विद्यालयप्रशासनं सङ्घटनञ्च

हिन्दीमूलम्

एस्॰ पी॰ सुखिया

संस्कृतानुवादकौ

सन्तोष मित्तलः

फतेहसिंहः

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
५६-५७, इन्स्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

ISBN : 978-81-86111-24-6

संस्करणम् : २००९

मूल्यम् : ३८०/- रु.

मुद्रकः
अमर प्रिंटिंग प्रैस, दिल्ली-९

भूमिका

विदन्त्येव विद्वांसो यद् देशेऽस्मिन् विलसन्ति नाना जातयो, नाना धर्मा नाना भाषाश्च। 'जनं बिभ्रती बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसम्' इति निगदद्भिरस्मदनूचानैरपि भाषाणां वैविध्यं वैपुल्यं चोरीकृतं भारतीये महाद्वीपे। भाषासु परस्परमन्तःसंवादो भारतीयपरम्परायाः अप्रतिमो विशेषः। अस्मिंश्चान्तःसंवादे संस्कृतस्य अनितरसाधारणी भूमिका बभूवेति न संशीतिः, यतो हि संस्कृतं सुनिश्चितं सुसंस्कृतं सुदृढं सेतुबन्धं व्यरचयद् भाषावैविध्यमये संसारे। अत एव संस्कृतं हि नाम "भारतीयविभिन्नवाङ्मयतत्त्वसारसरस्वती" वरीवर्तीति युक्तमुक्तं केनापि महाकविना। यथा अद्यत्वे तथा पुराकालेऽपि गुणाढ्यकृतबृहत्कथासदृशाः साहित्यस्य महान्तो ग्रन्थनिधयः संस्कृतेऽनूद्य संरक्षिताः। अथ चाविर्भवत्सु नवीनेषु प्रस्थानेषु तद्विषयका ग्रन्थाः सम्प्रति समधिकतरमितरभाषाभ्यः संस्कृतेऽनूद्य प्रकाश्यन्ते। एतादृशानामनुवादानां ज्ञानस्य समुन्मेषे विस्तारे चिन्तनस्य समुल्लासे च अनुत्तमा भूमिका वर्तते इति निश्चप्रचम्।

संस्कृतभाषा यथा चिरपुरातनी सनातनी तथैव प्रतियुगं पुनःपुनर्जायमाना उषा इव नवविच्छित्तिं नूतनां च छविमाविर्भावयन्ती वरीवर्तते, इदानीमपि स्वे महिम्नि प्रतिष्ठिता चास्त इति जानन्त्येव सर्वे सुरभारतीसमुपासकाः। साम्प्रतिकेऽस्मिन् समये अस्या भाषाया नवोन्मेषः काममपि अभिख्यां तनोति। नैके उदीयमाना-स्तरुणास्तेजस्विनः पण्डिताः प्रकटयन्ति शास्त्रवैभवमस्याः। संस्कृतभाषायामिदानीमपि प्रौढा परिष्कृताः शास्त्रग्रन्था विरच्यन्ते। यथा मौलिकं तथैवानूदितमपि साहित्यं संस्कृतस्य प्रथयति गौरवम्। अनुवादेषु जागरूकैर्विपश्चिदपश्चिमैर्नवीना विषया सविशेषमङ्गीकृताः। एतादृशेषु नवीनेषु विषयेषु शिक्षाशास्त्रमपि वर्तते महत्त्वपूर्णो विषयः।

राष्ट्रियसंस्कृतसंस्थानस्य अष्टसु परिसरेषु शिक्षाशास्त्रमध्याप्यते। यद्यपि शिक्षापद्धतीनां शिक्षाविषयाणां च विवेचनं प्राप्यते प्राचीने संस्कृतसाहित्ये

विशिष्योपनिषत्सु, परन्तु सत्स्वपि मूलसिद्धान्तेषु व्यवस्थाया परिवर्तनेन प्रस्थाने नवोन्मेषाः जायन्त एव। अत एवापेक्षा जागर्ति प्रस्तुतग्रन्थसदृक्षाणामनुवादानाम्।

ग्रन्थोऽयं शिक्षाप्रशासनं विद्यालयसङ्घटनं च विषयीकरोति। विषयस्य सर्वाङ्गीणं विशदं च विवेचनमिह प्रस्तुतम्। सिद्धान्ताः व्यवहाराश्च लक्ष्यलक्षणानु-सन्धानपुरस्सरं विवेचिताः। विशिष्य राष्ट्रियशिक्षाप्रणाल्या राष्ट्रियशिक्षानीतेश्च निरूपणमिह सर्वथाऽवधेयम्। अथ विद्यालयसङ्घटनमिति यद्विषयविवेचनमिह विहितं तस्योपादेयता असन्दिग्धैव। मूलग्रन्थस्य अनुवादः सरलसुबोधया भाषया विहितः।

ग्रन्थोऽयं शिक्षाशास्त्रस्याध्यापकानां छात्राणां च कृते सर्वथा उपादेयः स्यादित्याशास्ते।

राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्

प्रास्ताविकम्

संस्कृतभाषायाः शिक्षणक्षेत्रे आधुनिकी परम्परागतेति धाराद्वयी दृश्यते। परम्परागतायां धारायां चिन्तनं लेखनमपि संस्कृत-माध्यमेनैव प्रचलति। परन्तु आधुनिक्यां धारायां संस्कृतभाषायामिव मातृभाषायामपि छात्राणां चिन्तनलेखनादिकम् अवलोक्यते। शिक्षाशास्त्रे तावदनयोरुभयोरपि समन्वयः अवलोक्यते।

अनेनैव कारणेन '**विद्यालयप्रशासनं सङ्घटनञ्च**' इत्यस्य ग्रन्थस्य अनुवादवेलायाम् उपरोक्तयोरुभयोरपि विभागयोः प्रयोजनाय सरला सुबोधा च संस्कृतभाषा समाश्रिता वर्तते।

पुस्तकमिदं मुख्यतः 'अ' 'ब' इति भागद्वये विभक्तं वर्तते। एतेषु भागेषु षट्त्रिंशत् अध्यायाः सन्ति। 'अ' भागे पञ्चसु अध्यायेषु शिक्षाप्रशासनस्य सामान्यपरिचयेन सह विभिन्नेषु स्तरेषु शिक्षा प्रशासनस्य व्यवस्था कथं भवतीति विषयः प्रतिपादितो वर्तते। 'ब' भागस्य षड् खण्डाः वर्तन्ते। प्रथमे खण्डे विद्यालयस्य मानवीयसंसाधनानां वर्णनमस्ति। द्वितीये खण्डे षड्सु अध्यायेषु विद्यालयपरिसरस्य विभिन्नानां महत्त्वपूर्णानां भौतिकसंसाधनानां च वर्णनं सविस्तरम् अस्ति। तृतीयखण्डे च षड्सु अध्यायेषु विद्यालये शैक्षिकगतिविधयः कथं प्रचलन्तीति निरूपणं कृतमस्ति।

चतुर्थे खण्डे चत्वारः अध्यायाः सन्ति। तत्र 'विद्यालय निरीक्षणं परिनिरीक्षणञ्च' इत्यस्य विषये विस्तृतं चिन्तनं वर्तते। पञ्चमे खण्डे चतुर्षु अध्यायेषु 'विद्यालय-सहायक-सेवा' इति मुख्यशीर्षके शारीरिकशिक्षा स्वास्थ्यशिक्षा च इति शीर्षकेण विषयः सुस्पष्टतया प्रतिपादितः। षष्ठखण्डे च सप्त-अध्यायास्सन्ति। येषु 'विद्यालयस्य सामाजिकपक्षः' इति शीर्षकेण समसामयिकसमस्यानां विस्तरेण वर्णनं वर्तते।

राष्ट्रियसंस्कृतसंस्थानस्य पूर्वकुलपतिना **प्रो. वी.कुटुम्बशास्त्रिणा** कल्पितायाः अस्याः योजनायाः कार्यान्वयनाय वर्तमानकुलपतीनां **प्रो. राधावल्लभत्रिपाठिमहोदयानां** प्रशंसनीयेन उत्साहवर्धकेन च प्रयासेन आवां कार्यं

पूरितवन्तौ इति तान् प्रति सश्रद्धं हृदयेन कृतज्ञतां प्रकटयावः।

प्रो. रामानुजदेवनाथन्महोदयाः (प्राचार्याः, राष्ट्रिय-संस्कृत-संस्थानम्, शृङ्गेरी) पुस्तकमिदं प्रत्यक्षं पठित्वा भाषां परिष्कृत्य, सम्मार्ज्य, संशोध्य छात्राणां कृते सुग्राह्यं कृतवद्भ्यः, तथा च अस्याः योजनायाः समन्वयकेभ्यः **डॉ. वाई.एस.रमेशमहोदयेभ्यः** आवयोः पक्षतः भृशं कार्तज्ञं प्रकटयावः।

अन्ते च मूलग्रन्थलेखिकायै तस्याः पुत्राय स्वीडन निवासिने **श्रीराधामोहनमहोदयाय** प्रत्यक्षाप्रत्यक्षतः साहाय्यं कृतवद्भ्यः विद्वद्भ्यश्चः भूयो भूयः हार्दं कार्तज्ञं धन्यवादं च कुर्वः।

अनुवादकौ
सन्तोषमित्तलः
फतहसिंहः
आचार्यौः
राष्ट्रियसंस्कृतसंस्थानम्
जयपुरपरिसरः, जयपुरम्

विषय-सूची

खण्डः (अ)

शिक्षा-प्रशासनम्

(Educational Administration)

खण्डः (ब)

प्रथमः खण्डः

विद्यालयसङ्घटने प्रधानाचार्य-शिक्षक-छात्राणां भूमिका
(Role of Personnel in School Organization)

द्वितीय खण्डः

विद्यालयपरिसरः

(SCHOOL PLANT)

विद्यालयप्रशासनं सङ्घटनञ्च

हिन्दीमूलम्

एस्० पी० सुखिया

संस्कृतानुवादकौ

सन्तोष मित्तलः

फतेहसिंहः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

विद्यालयप्रशासनं सङ्घटनञ्च
सन्तोष मित्तलः
फतेहसिंहः

खण्डः (अ)

शिक्षा-प्रशासनम्

(Educational Administration)

- शिक्षा-प्रशासनम्
- राष्ट्रियशिक्षा-प्रणाली
- केन्द्रीयस्तरे शिक्षा-प्रशासनम्
- राजकीयस्तरे शिक्षा-प्रशासनम्
- प्राथमिक-माध्यमिक-विश्वविद्यालयशिक्षाणां प्रशासनम्

1

शिक्षा-प्रशासनम्

(Educational Administration)

"Educational administration is a specialized set of organizational functions whose primary purposes are to ensure the effcient and effective delivery of relevant educational services as well as the implementation of legislative policies through planning, decision-making and leadership behaviour that keeps in organization focused on predetermined objectives, provides for optimum allocation and most prudent care of resources to ensure their most productive uses, stimulates and co-ordinated professional and other personnel to produce a coherent social system and desirable organizational climate, and facilities determination of essential changes to satisfy future and emerging needs of students and society."

— Stephen J. Knezevich.

प्रायशो जनाः प्रशासन (Administration) - प्रबन्धन (Management) व्यस्थापन-सङ्घटनादि (Organization) शब्दानां समानार्थकतां स्वीकुर्वन्ति तथैव व्यवहरन्ति च, किन्तु नैतद्युक्तमस्ति। वस्तुतोऽत्र एषां शब्दानां प्रयोगः निश्चितेष्वर्थेष्वेव भवति यथा-प्रशासनशब्देन, सा क्षमताऽभिहिता भवति या सामाजिकशक्तिं समुत्पन्नान्तर्विरोधपरिहारपूर्वकं तन्त्रमनुनयति अर्थात् तन्त्रानुगामिनीं करोति। प्रबन्धनं व्यवस्थापनञ्चेत्युभौ समानार्थकौ स्तः। व्यवस्थापनशब्देन ते क्रियाकलापाः कथ्यन्ते ये नीतेः क्रियान्वयने उपयोगिनो भवन्ति अर्थात् प्रशासनिकनीतेः प्रयोगात् प्राक् तदुपयोगयोग्यसाहित्यसङ्कलनमेव प्रबन्धनं व्यवस्थापनं वा भवति। प्रशासकीय-नीतेः क्रियान्वितिं प्रशासकोऽनेनैव कर्तुं शक्नोति। सङ्घटनमित्यनेन पदेन ताः प्रवृत्तयः तानि तत्त्वानि वाऽभिधीयन्ते याः प्रवृत्तयः यानि तत्त्वानि वाऽपेक्षितलक्ष्यसिद्ध्यै किमपि नूतनं सैद्धान्तिकं स्वरूपं प्रारूपं वा निर्मान्ति। कस्यापि सङ्घटनस्य संस्थायाः वा सञ्चालनं प्रशासनेन क्रियते, सङ्घटनात् पृथक् नहि प्रशासनस्य अस्तित्वं वर्तते। अतो वक्तुं शक्यते यत् कस्मिन्नपि सङ्घटने प्रयुक्तानां चेतनाऽचेतनसंसाधनानां न्यायोचितोपयोगो विद्यते, येन सङ्घटनोद्देश्यसम्पूर्त्तिः साध्या भवेत्। अस्मिन्नऽर्थे तु प्रशासनं साधनं भवति न तु साध्यम्। अनेनेदमपि तथ्यं

सुस्पष्टं भवति – यत् प्रशासनमेका सतता प्रक्रिया वर्तते यस्याः प्रारम्भः संस्थायाः सङ्घटनस्य समारम्भेण सहैव भवति यथा यथा सङ्घटनस्य लक्ष्यसिद्धिः भवति तथा तथा तस्य प्रशासनस्य प्रगतिरपि भवति ।

उपर्युक्तविवेचनेनेदं तु स्पष्टं भवति यत् संस्थानं सङ्घटनं वा स्वोद्देश्यानुसारिणीं कार्यपद्धतिमङ्गीकरोति अस्माद् एव संस्थानानि सङ्घटनानि स्वात्मनो भजन्ते पृथक्ताम्। अतएव च प्रतिप्रशासनं स्वसंस्थासङ्घटनस्वरूपानुसारि, कार्यानुरूपं, दायित्वानुरूपं, कार्यपद्धत्यनुरूपं वा नाम गृह्णाति यथा–शिक्षाप्रशासन–कृषिप्रशासन–चिकित्साप्रशासनादीनि।

प्रशासनव्यवस्थापनयोर्भेदः –

प्रशासनं व्यवस्थापनञ्चेत्युभौ शब्दौ समानार्थकाविति मत्वोभयोः शब्दयोरेकस्मिन्नऽर्थे प्रयोगं कुर्वन्ति जनाः किन्तूभयोः शब्दयोः सूक्ष्मदृष्ट्यार्थभेदो विद्यते। उभयोरर्थभेदप्रदर्शनाय प्रस्तूयतेऽधस्तनतालिका, यथा अर्थभेदप्रतीतिः स्पष्टा बुद्धिस्था च भविष्यति –

प्रशासनम्	व्यवस्थापनम्
1. प्रशासनं तदेकं साधनमस्ति, यन्निर्धारयति सङ्घटनस्य उद्देश्यानि नीतीः मार्गदर्शकसिद्धान्तान् च।	1. व्यवस्थापनं तदेकं साधनं वर्तते यत् कार्यकारिण्या प्रशासनिक–समित्या वा निश्चितोद्देश्यानां निर्धारितलक्ष्याणां वा सिद्धिं करोति।
2. 'प्रशासनम्' पारिभाषिकपदं सार्वजनिक वाद–विधि–व्यवस्था–नागरिकसंस्थादीनाम् अनुशासनाय प्रयुज्यते।	2. 'व्यवस्थापनं' पदमिदं जनसमूहयन्त्रशाला–संस्थानानां संचालनाय प्रयुक्तं भवति।
3. प्रशासनं नियम–विनियमोपनियमैः सम्बद्धं भवति, अत्र लिखित–क्रियाकलापाः एव महत्त्वं बिभ्रति।	3. उद्देश्यैः लक्ष्यै र्वा सम्बद्धं भवति व्यवस्थापनं, अतः तत्र परिणामस्य महत्त्वं भवति।
4. प्रशासने नियमप्राबल्यात् संवेदन–शीलताया अभावः, अतः तत्र कठोरता परम्परागतता च भवति।	4. व्यवस्थापनं फलानुगामित्वात् प्रगतिशीलनवतां कल्पनाभूमिं च प्राप्नोति।
5. परिणाम–मापनं प्रशासनस्य सुकरं न भवति।	5. व्यवस्थापने परिणामाकलनं सुकरं भवति।

6. प्रशासनं निर्णयैः सम्बद्धा प्रक्रिया वर्तते, अस्यां नियोजनं, सङ्घटनं, कर्मकराणां नियुक्तिः, सञ्चालने समन्वयः, प्रतिवेदनलेखनं, आयव्ययवितरणं, मूल्याङ्कनम् इत्यादिभिः सम्बद्धक्रियाणां समावेशो भवति।	6. व्यवस्थापनेऽपि नियोजन-सङ्घटन-कर्मकराणां नियुक्ति-सञ्चालन-समन्वय-प्रतिवेदन- लेखन-आयव्यय-विवरणमूल्याङ्कनसम्बन्धिक्रियाणां समावेशो भवति, व्यवस्थापनमपि निर्णयैः सम्बद्धा प्रक्रिया एवास्ति।
7. प्रशासनं भौतिकसंसाधनानां मानवीयप्रयासानां समन्वयेन सह सम्बद्धं भवति।	7. व्यवस्थापनस्य सम्बन्धः व्यक्तिभिः वस्तुभिश्च भवति।

शिक्षाप्रशासनस्य ऐतिहासिकपृष्ठभूमिः -

साम्प्रतं शिक्षाप्रशासनस्य यत्स्वरूपं दृश्यते तस्यारम्भः लोकप्रशासनतोऽभवत्। वस्तुतः शिक्षाप्रशासनं लोकप्रशासनस्याङ्गम् अस्ति, तथापि लोकप्रशासनात् शिक्षा प्रशासनं भिन्नं वर्तते। यतो हि अस्य सम्बन्धः तु विद्यालयैः सह अस्ति। विद्यालयश्च स्वस्मिन्नेका विशिष्टा संस्था अस्ति। इयं विद्यालयनाम्नी संस्था, सामाजिकसंस्कृतेः संरक्षणं कुर्वती तस्याः परिष्कारपूर्वकं वर्धापनमपि करोति, भाविजनेभ्यश्च संस्कृतिं यच्छति। विद्यालयाः सामाजिकपरिवर्तनस्य साधनरूपेण संयन्त्ररूपेण वा स्वस्य भूमिकायाः निर्वहनं कुर्वन्ति, एवं शिक्षा एका सामाजिकप्रक्रिया अस्ति तथा च एतस्याः प्रशासनं सामान्यप्रशासनात् भिन्नं विद्यते।

लैटिनभाषायां प्रशासनशब्दस्य प्रयोगः स्वल्पतम एव अभवत् किन्तु रोमनसाहित्ये अस्य शब्दस्य प्रयोगः प्रचुरतया अभवत्। किन्तु अस्य शब्दस्य निश्चितार्थस्वरूपयोः निर्धारणं जर्मनीदेशे, आस्ट्रियादेशे च विकसितया 'केमेरियलविचारधारया' कृतम्। एषा विचारधारा हि सार्वजनिकसेवाक्षेत्रे निरतानां जनानां कार्याणि प्रशासनेन सह योजयामास, ततः प्रशासनसम्बन्धिमान्यता-संवर्धनेऽधस्तनाः त्रयो विद्वांसः महत्त्वपूर्णं कार्यं कृतवन्तः -

(अ) **प्रोसे** नामको विद्वान् नीतिमेव प्रशासनं स्वीकरोति।

(ब) **जिन्के** नामको विद्वान् व्यवस्थापनमेव (Management) प्रशासनमस्तीति प्रशासनस्वरूपं प्रकटीकृतवान्।

(स) **वान जुस्टी** नामको विद्वान् अर्थशास्त्रमेव प्रशासनस्य स्वरूपं स्वीकृतवान्।

केमेरियलविचारधारा प्रशासनं वैज्ञानिकपृष्ठभूमौ क्रमबद्धं कृतवती। अष्टादश्यां शताब्द्यां उत्तरार्धे अलेक्जेण्डर हेमिल्टनः प्रशासनस्य व्याख्याने प्रयासं कृतवान्। सहैव सः तस्य संकल्पनाम् अवधारणां वा स्पष्टीकृतवान्। हेमिल्टनमहोदयस्य विचारोऽस्ति यत् सर्वकारस्य कार्याणि तैः सर्वैः क्रियाकलापैः सम्बद्धानि सन्ति ये शासनप्रणाल्यां भवन्ति। शासनतन्त्रेण व्यवस्थापिका-कार्यपालिका-न्यायपालिकाभिः सम्बद्धक्रियाकलापाः क्रियन्ते, किन्तु प्रशासनं केवलं कार्यपालिकायाः कार्यैः सम्बद्धं तिष्ठति। एवं प्रशासनस्य विशिष्टार्थः सीमितार्थश्च स्पष्टो भवति। शासनस्योक्त-कार्याणाङ्कृते प्रशासनं व्यवस्थापनञ्चेत्युभयोः शब्दयोः प्रयोगः क्रियते। सर्वकारस्य कार्यैः सह संयुक्ते प्रशासने, लोकप्रशासनं मान्यतामगच्छत्। एकोनविंश्यां शताब्द्यां लोकप्रशासनसम्बन्धिमान्यता प्रबलताङ्गता, अतः सर्वकारस्य कार्याणामध्ययनेन सम्बद्धायाः विशिष्टशाखायाः जन्म बभूव।

1887 तमे वर्षे वुडरोविल्सनमहोदयः प्रशासनिकाध्ययनम् 'दी स्टडी ऑफ एडमिनिस्ट्रेशन' इत्याख्यं पुस्तकं प्रकाशितवान्। पुस्तकेऽस्मिन् लेखकेन विशेषतः प्रशासनं सर्वकारीयकार्याणामेव संज्ञेत्युक्त्वा परिभाषितम्। अतएव 1906 तमे वर्षे संयुक्तराज्यामेरिकादेशे 'नेशनल इन्स्टीट्यूट ऑफ पब्लिक एडमिनिस्ट्रेशन' इत्यस्य संस्थानस्य स्थापना अभूत्। वुडरोविल्सनमहोदयस्यानुसारं तु प्रशासनं सर्वकारस्य कार्यैः राज्यस्य नीतिभिः, योजनाभिश्च सम्बद्धं भवति।

फ्रेंकगुडनोमहोदयः राजनीति-प्रशासनयोर्मध्ये भेदं स्वीकृत्य तयोः पृथक्-पृथक् अस्तित्वं स्वीचकार। तस्य मते प्रशासनमेकं भिन्नं कार्यं राजनीतिश्च तद् व्यतिरिक्तं कार्यं वर्तते। राजनीतेः (Politics) सम्बन्धः सर्वकारस्य तत्कार्यैः सह वर्तते यत्कार्यैः राज्येच्छाभिव्यक्तिः नीतिनिर्धारणञ्च भवति। एवं विल्सनमहोदयः फ्रेंकगुडनोमहोदयश्च उभौ विद्वांसौ प्रशासनस्य अर्थविषये वैमत्यं रक्षन्तौ प्रशासनं स्पष्टयतः। विल्सनमहोदयः प्रशासनं कीदृशं भवेत्? इति निरूपयामास। गुडनोमहोदयः प्रशासनं कीदृशमस्ति? इति प्रतिपादयामास। एवं प्रथमो विल्सनमहोदयः आदर्शरूपेण (Normative) द्वितीयश्च विद्वान् गुडनो वर्णनरूपेण (Descriptive) प्रशासनं स्पष्टीकृतवान्।

प्रथमविश्वयुद्धानन्तरं प्रशासनस्य मान्यतायां विकासोऽभवत्। कालेऽस्मिन् तिस्रविचारधाराः विकसिताः। ताः इमाः सन्ति -

1. मेरी पार्कर फोलेटमहोदयः प्रशासनस्य सामाजिकदर्शनपृष्ठभूमिम् अरचयत्।

अस्य दर्शनस्य विकासे एषः महोदयः उद्योगात्, वैज्ञानिकव्यवस्थापनात् राजनीतिशास्त्रात्, लोकप्रशासनाच्च विषयवस्तूनि संगृह्य प्रशासनाय नवां दिशं प्रददौ।

2. मारिस एल. कुक, पीटर ड्रकर प्रभृतयः महोदयाः स्वीकुर्वन्ति यत्प्रशासने नीति-कला-विज्ञानेति त्रयः पक्षाः समन्विताः सन्ति।

3. 1930 तमे वर्षे प्रशासने नूतनप्रभावाणां समावेशोऽभवत्। फलतः प्रशासनिककार्याणि कार्यनिर्वहणनेतृत्वेन (Executive Leadership) सह योजितानि। इदमपि स्वीकृतं यत्प्रशासके निश्चयेन नायकोचितगुणाः भवेयुः। चिन्तनशीलता, सहयोगवृत्तिः, प्रेरकशक्तिः, सम्मील्य कार्यकरणस्य प्रवृत्तिः, कार्यं प्रतिरुचिः प्रतिबद्धता इत्याद्याः गुणाः नायकलक्षणे स्वीक्रियन्ते।

लूथर-गुलिक-उरविकादयो विद्वांसः वैज्ञानिकप्रशासनस्य विकासे समाजशास्त्रीय-मनोवैज्ञानिकतत्त्वानाञ्च स्थानं महत्त्वपूर्णमस्तीति मन्वते। एषां तत्त्वानाम् आधारेणैव प्रशासकः भविष्यद्रष्टा भवितुं शक्यते। प्रशासनस्य वैज्ञानिकाधारे घटकत्रयस्य महत्त्वपूर्णं योगदानमस्ति, ते निम्नलिखिताः सन्ति -

(अ) कौशलविकासविधिः (Efficiency Method)

(ब) व्यवस्थापनविज्ञानम् (Management Science)

(स) मात्रात्मकनिर्णयनम् (Quantitative Decision Making)

एते त्रयो घटकाः प्रशासनप्रक्रियामधिकं प्रभावयन्ति। आधुनिकविज्ञानस्य प्रभावेण त्रिषु घटकेषु यान्त्रिकसमावेशः प्रवर्तते अतः प्रशासनमधिकतया वस्तुनिष्ठतामुद्देश्यपरतां कुशलतां सफलतामासादयति। प्रशासकोऽपि क्षतिं विनैव सहजतया निर्णयं कर्तुं शक्नोति। नियन्त्रणनियोजनादिप्रशासनिकप्रक्रियाः सारल्येन सञ्चाल्यन्ते। अद्य कक्ष्याकार्यक्रमाणां विकासे संगणकस्य प्रयोगेण, संगणकसमय-चक्रप्रयोगेण संगणकसहायता-समयसारिणिप्रयोगेण नियन्त्रणे नियोजने च संगणकस्य प्रयोगेण स्वचालितोपकरणानां प्रयोगेण च प्रशासनं वैज्ञानिकत्वं प्राप्नोति।

शिक्षाप्रशासनस्यार्थः -

यद्यपि शिक्षाप्रशासनं सामान्यप्रशासनस्य लोकप्रशासनस्य वा अङ्गमेव अस्ति शिक्षाप्रशासनमन्यप्रशासनेभ्योऽधिकं मानवीयमूल्यानां प्राप्तेः दायित्वं स्वीकरोति। शिक्षाप्रशासनं विद्यालयानां माध्यमेन आदर्शमूल्यानि प्राप्तुं यतते सफलताञ्च अत्र प्राप्नोति। एतस्मात् कारणात् शिक्षाप्रशासनं लोकप्रशासनात् अन्येभ्यः प्रशासनेभ्यः

वा कार्येणोद्देश्येन च भिन्नं भवति अतः शिक्षाप्रशासनम् अस्मिन् रूपे विशिष्टः व्यवसायोऽस्ति। शिक्षाप्रशासनस्य स्पष्टार्थं ज्ञानाय काश्चन परिभाषाः प्रस्तूयन्ते –

1. शिक्षानुसन्धानस्य विश्वकोशः –

''शिक्षाप्रशासनम् एतादृशी प्रक्रिया विद्यते यथा सम्बद्धव्यक्तिप्रयासानां समन्वयः, उचितसामग्र्याः उपयोगः एवं क्रियते यया मानवीयगुणानां समुचितविकासः भवेत्। एषा प्रक्रिया न केवलं बालकानां नवयुवकानाञ्च विकासायैवास्ति अपितु अस्यां प्रौढानां कार्यकर्तर्णिाञ्च विकासाय अपि महत्त्वपूर्णं स्थानमस्ति।''[1]

2. कैमबेल-प्रभृतयो एवं परिभाषन्ते –

''शिक्षा-प्रशासने शिक्षणाधिगमयोश्च प्रक्रिया सम्बद्धलक्ष्याणां नीतीनाञ्चविकासप्रोत्साहनपराः सुविधाः निहिताः भवन्ति। शिक्षाप्रशासनं शिक्षणाधिगमयोश्च उपयुक्तकार्यक्रमाणां विकासं प्रोत्साहयति। तथा च शिक्षणाधिगमयोश्च प्रक्रियां सञ्चालयितुं भौतिकसंसाधनानां मानवीयसंसाधनानाञ्च व्यवस्थां करोति।''[2]

3. वैलफोर ग्राहम् एवं भाषते –

''शिक्षाप्रशासनं बालकेषु योग्यशिक्षकैः समुचितशिक्षाप्राप्तियोग्यतामुत्पादयति। यया ते उपलब्धार्थिकसाधनानां समुपयोगं कृत्वा स्वप्रशिक्षणेन सर्वोत्कृष्टतां प्राप्तुं समर्थाः भवेयुः।''[3]

---

1. "Educational administration is a process of integrating the efforts of personnel and of utilizing appropriate materials in such a way as to promote effectively the development of human qualities. It is concerned not only with the development of children and youth but also with the growth of adults and particularly with the growth of school personnel."

   - Encyclopaedia of Educational Research, 3rd edition, p. 19

2 "The educational administration consists of facilitating the development of goals and policies basic to teaching and learning, stimulating the development of apporpriate programmes for teaching and learning and procuring and managing personnel and material to implement teaching and learning." **- Cambell, Corbally & Ramseyer**

3. "Educational administration is to enable the right pupils to reeive the right education from the right teachers, at a cost within the means of the state under conditions wihch will enable the pupils best to profit by their training."

   - Graham Balfour : Educational Administration, p. 38

4. आर. मौर्ट पॉलमहोदयेनोक्तम् –

''शिक्षाप्रशासनस्यार्थोऽस्ति निर्धारितोद्देश्यानुरूपो विकासः छात्राणाम् इत्यनया दृष्ट्या शिक्षकाणां साधनरूपेण प्रयोगकरणं तथा अस्याः प्रक्रियायाः सञ्चालनं जनसमुदाये भवेत् यत् शिक्षोद्देश्यैः तत्प्राप्तिसाधनैश्च विभिन्नरूपेण सम्बद्धं स्यात्।''

उपर्युक्तपरिभाषाविलोकनेन एतत्स्पष्टं भवति यत् –

1. शिक्षाप्रशासनं मिलित्वा कार्यसम्पादने साधनानि प्रयासान् वा सक्रियतां नयति।

2. शिक्षाप्रशासनं शिक्षोद्देश्योपलब्धौ साहय्यं प्रददाति।

3. शिक्षाप्रशासनं व्यक्तीनां समाजस्य च प्रगतौ सहायकं भवति।

4. शिक्षाप्रशासनं विविधप्रकाराणां कार्यकर्त्रीणां, छात्राणां, शिक्षकाणाम् अभिभावकानां जनप्रयासानां चैकत्र समन्वयेन सम्बद्धम् अस्ति।

शिक्षाप्रशासनस्य भेदाः –

सामान्यतः शिक्षाप्रशासनस्य बाह्याऽऽन्तरिकभेदात् द्वौ भागौ भवतः –

(अ) बाह्यप्रशासनम् –

शिक्षायाः बाह्यनियन्त्रणमेव बाह्यप्रशासनं भवति। बाह्यप्रशासनेन सः प्रभावः आदेशश्च संकेतितः यः उच्चशक्त्या प्राप्यते। भारते शिक्षायाः बाह्यप्रशासनस्यार्थः – 'शिक्षाविभागविहितं शासकीयनियन्त्रणम् इति।' बाह्यप्रशासनं नियमानां निर्माणं करोति। पाठ्यपुस्तकानां पाठ्यक्रमस्य च निर्धारणं करोति तथा च भवनानां निर्माणे क्रीडाक्षेत्राणां व्यवस्थायां साहय्यं करोति। वेतन–सेवावस्था–सत्रावधीनां च निर्धारणं करोति। एतादृशीनां बहुविधसमस्यानां विषयेऽपि स्वस्य निर्णयं ददाति।

अन्येष्वपि लोकतन्त्रीयदेशेषु पाठ्यक्रमस्य पाठ्यपुस्तकानां तथा चान्यासामी–दृशीनां शैक्षिकसमस्यानां समाधानस्य दायित्वं समुदायेषु विद्यालयेषु च भवति किन्तु भारते स्थितिः पूर्णतया विपरीता अस्ति। भारते एषु विषयेषु आदेशाः शिक्षाविभागेन प्रेष्यन्ते। अत्र विद्यालयेषु तद् पाठ्यवस्तु एव पाठ्यते यत् शिक्षाविभागेन कक्ष्याभ्यः निर्धार्यते।

उत्तमा प्रशासनपद्धतिः सा अस्ति यस्यां शिक्षकः शिक्षाप्रशासने साधिकारं सहभागी भवति। अस्यां शिक्षकः, प्रशासकः, शिक्षामर्मज्ञः च सर्वे मिलित्वा एव कार्यं कुर्वन्ति। एषां त्रयाणां सहयोगपूर्वककार्येण एव तदुद्देश्यं पूर्णतां याति। यस्य कृते सङ्घटनं जन्म लभते। दुर्भाग्यवशात् भारते तु प्रशासनसम्बन्धिविषयेषु न च

शैक्षिकविषयेषु शिक्षकाः स्वमतप्रस्तुतौ स्वतन्त्राः सन्ति।

(ब) आन्तरिकप्रशासनम् -

आन्तरिकप्रशासने सा व्यवस्था गृह्यते यया विद्यालयस्य नेता स्वसहयोगिनां साहाय्येन विद्यालयस्य दैनन्दिनकार्यक्रमाणां क्रियाणाञ्च सञ्चालनं क्रियते। एतदतिरिक्तमपि विद्यालयस्य नेता शिक्षकाणां छात्राणाञ्च सहयोगेन शिक्षाविभागेन निर्धारितसामान्यनियमानुसारं विद्यालयस्य व्यवस्थां करोति।

शैक्षिकविषयेषु विद्यालयनेतारः स्वतन्त्राः भवेयुरितीच्छति प्रजातन्त्रम्। यदि तेषां स्वतन्त्रता न भविष्यति तर्हि ते अहमहमिकया (Initiative) कार्येषु प्रवृत्ताः न भविष्यन्ति च ते यन्त्रवदेव उच्चस्तरीयशक्तेः आदेशानां पालने स्थास्यन्ति। अतस्तु स्वीकृते लोकतन्त्रे एतदावश्यकं भवति यत् विद्यालयाः पाठ्यपुस्तक-पाठनविध्यादिविषयेषु निर्णयग्रहणे, निर्णयस्य क्रियान्वितौ स्वतन्त्राः भवेयुः। विद्यालयस्यान्तरिकव्यवस्थायाम् अपि लोकतान्त्रिकदृष्टिः स्यात्। अतः प्रशासनक्षेत्रे प्रशासक-शिक्षक-शिक्षाविदश्च यथा भवन्ति उत्तरदायिनः तथैव छात्रवर्गेऽपि भवेत्, ततश्चैषां समेषां प्रशासनिकगतिविधिषु समन्वयो विधेयः।

शिक्षाप्रशासनस्य प्रमुखो विषयः 'प्राधिकरणं नियन्त्रणञ्चेत्युभयात्मकः' (Authority & Control) स्वीकृतः। यतो हि, शक्तेः नियन्त्रणस्य च केन्द्रबिन्दुनैव प्रशासनस्य स्वरूपं गुणवत्ता च परिज्ञायेते। वस्तुतः, प्राधिकरणेन सा शक्तिः लक्ष्यते, या कार्यकर्तॄणां कार्याणि विभजते, कार्यस्योत्तरदायित्वञ्च यच्छति। नियन्त्रणं तु सा युक्तिः प्रणाली वा वर्तते, यया शक्तेः प्रयोगः क्रियते। किञ्च तत्त्वेत्विमे संयुक्ते हि प्रशासनस्य गुणवत्तां निर्णयतः। प्रशासने, प्राधिकरण-नियन्त्रणयोस्त्रयः प्रमुखाः पक्षाः भवन्ति। यथा -

(अ) प्रथमः पक्षः - केन्द्रीकरण-विकेन्द्रीकरणात्मकः।
(ब) द्वितीयः पक्षः - अनुचरप्रभुः राजनीतिज्ञश्च।
(स) तृतीयः पक्षः - विशेषज्ञः अनुचरप्रभुः।

(अ) केन्द्रीकरणं विकेन्द्रीकरणञ्च (Centralization & Decentralization)-

प्रशासनस्य तत्स्वरूपं, यस्मिन् सत्ता शक्तिर्वा एकस्मिन्नेव केन्द्रे तिष्ठति तत्केन्द्रीकरणं भवति। सत्तायाः शक्तेर्वा यत्केन्द्रं भवति तदेव नीतिनिर्धारणं करोति, निर्धारितनीतीनां क्रियान्वयनं करोति। धनमादेशञ्च यच्छति, प्रशासन-मीदृशमेवैकरूपतामानयति, अनेनैव शिक्षायां राज्यस्याधिकारोऽपि स्वीक्रियते। प्रशासनमिदमनुचरप्रभुभिः अधिकृतं भवति।

विकेन्द्रीकरणेन प्रशासनस्य तत्स्वरूपं प्रस्तूयते, यस्मिन् स्वरूपे स्थानीयनि-कायेषु सत्ता निहिता विलोक्यते। इदं स्वरूपं स्थानीयसमुदायानामात्मनिर्णयसिद्धान्ते स्थितं भवति। प्रस्तुतस्वरूपकस्य शिक्षाप्रशासने समुदायाऽभिभावकशिक्षकेति त्रयाणामेव समं महत्त्वं स्वीक्रियते। सहैव शिक्षा सहयोगिप्रयासरूपेण स्वीकृता भवति। इदं प्रशासनं स्थानीय-परिस्थितिभिरानुकूल्यमिच्छति, विविधतामपि रक्षति, अन्तःक्रियाणां स्वतन्त्राभिव्यक्तिं दृढतयेच्छति।

(ब) अनुचरप्रभुः राजनीतिज्ञश्च (Bureaucrats & Politiciations) -

साम्प्रतं प्रत्येकस्मिन् देशे, राज्यानि शिक्षाप्रचारप्रसारकार्यक्रमे बहुधनं यच्छन्ति। अतः प्रत्येकं राज्यं शक्तिनियन्त्रणयोः स्वेच्छयोपयोगं करोति। राज्यं शक्ति नियन्त्रणयोरुपयोगं राजनीतिज्ञानुचरप्रभुमाध्यमेन करोति। भारते लोकतन्त्रं विकासशीलं विद्यते। तच्छासनस्य विविधपरम्पराणां निर्माणं करोति। तस्य सम्मुखेऽयं सर्वाधिकमहत्त्वपूर्णः प्रश्नः वर्तते यत् सर्वतोभावेन भारते सत्ताऽनुचरप्रभ्वायत्ता भवेदथवा राजनीतिज्ञानां हस्तगता स्यात् इति।

व्यवहारे यदि पश्यामः, अनुचरप्रभवो हि भारते सत्तां समुपभुञ्जते। यतो हि राजनीतिज्ञास्तु सर्वकारपरिवर्तनेन परिवर्तन्तेऽतः न तेषां स्थायित्वं भवति। तथा च तेऽनुभवशून्या अप्राविधिकाश्चापि भवन्ति (Non-technical) अनुचरप्रभवो विशेषज्ञाः अनुभविनश्च भवन्ति अतः ते स्वप्रभुत्वसंरक्षणे समर्थाः सन्ति। अस्तु राजनी-तिज्ञेभ्योऽधिकं ते सत्तायाः उपयोगं कर्तुं समर्थाः सन्ति।

(स) विशेषज्ञः अनुचरप्रभुश्च (Technocrats & Bureaucrats) -

स्वतन्त्रताप्राप्त्यनन्तरं भारतदेशेन आर्थिक-औद्योगिक-शैक्षिकादिषु विभिन्नेषु क्षेत्रेषु सामाजिकपरिवर्तनादिकार्येषु यत्पदमुत्थापितं तेन तस्य सम्मुखे भीषणसमस्याः समागताः। सहैव तस्य कार्यक्षेत्रं व्यापकं जटिलञ्चाभूत्। एषु विभिन्नक्षेत्रेषु प्रशासनिक-कार्यसम्पादनाय विशेषज्ञानामावश्यकतामनुभवपथमागता। अनया परिस्थित्या प्रशासने द्वे विचारधारे प्रादुर्भूते स्तः।

प्रथमविचारधारानुसारेण प्रशासनिकसत्ताऽनुचरप्रभुभिः भोक्तव्या द्वितीय-विचारधारानुसारेण प्रशासनिकसत्ता विशेषज्ञैः (विभिन्नक्षेत्रविशेषज्ञैः) भोक्तव्या।

भारतीयप्रशासनेऽद्यापि सेवकप्रभुत्वं विद्यते। सर्वेषां विभागानां नियन्त्रणं प्रशासनिकसेवाधिकारिणां हस्तगतमस्ति। सर्वे विभागाः नियन्त्र्यन्ते विशेषविभागीयानुभवरहितैरपि तैरेव प्रशासनिकसेवाधिकारिभिः। यथा -

विश्वविद्यालयेषु कुलपतिपदेऽपि भारतीयप्रशासनिकसेवाधिकारिणां नियोजनं क्रियते। किन्तु विशेषज्ञप्रणाल्यानुसारेण तु कुलपत्यादिपदेऽखिलभारतीयशिक्षासेवा-अधिकारिणः महाविद्यालयानां प्राचार्यः, विश्वविद्यालयानाम् आचार्याः (प्रोफेसर) इत्यादीनाम् एवाधिकारिकतया नियोजनं कर्त्तव्यं भवति।

शिक्षाप्रशासनस्याधाराः -

शिक्षाप्रशासनस्य प्रमुखा आधाराः निम्नलिखिताः सन्ति -

(अ) शैक्षिकोद्देश्यम् -

शिक्षाप्रशासनं सामाजिकदर्शननिर्धारितेषु शैक्षिकोद्देश्येषु तिष्ठति। सामाजिक-दर्शनस्य निर्धारणं सामाजिक-सांस्कृतिकैतिहासिक-राजनैतिकार्थिकादिगतिमत्तत्त्वानि कुर्वन्ति, इदमेव च सामाजिकदर्शनं शैक्षिकोद्देश्यानि जनयति। मुख्यतया विश्वे द्विविधं दर्शनमुपलभ्यते-प्रथमं तु एकाधिकारात्मकं द्वितीयं लोकतन्त्रात्मकं सामाजिकदर्शनं भवति। एकाधिकारात्मके दर्शने व्यक्तिहिताद् राष्ट्रियहितं सर्वोपरि स्वीक्रियते। लोकतन्त्रात्मके दर्शने बलवद् व्यक्तिमहत्त्वं भवति तथापि व्यक्ति-समाजयोर्हितं सन्तुलितं रक्ष्यते। उक्तयोः दर्शनयोः विभिन्नता देशानां शैक्षिकोद्देश्यानि प्रभावयति। शिक्षाप्रशासनमेषामुद्देश्यानामनुरूपतां प्राप्नोति। एकाधिकारात्मकदर्शना-नुयायिदेशेषु शिक्षाप्रशासनस्य स्वरूपं तदनुरूपं भवति। तत्राधिकारिणामादेशानुपालन-मेवापेक्ष्यते कार्यकर्तृभ्यः। किन्तु-लोकतन्त्रामकदर्शनानुयायिदेशेषु व्यक्तिविचार-स्वातन्त्र्यं प्रोत्साह्यते। एषु देशेषु शिक्षाप्रशासनस्य स्थितिः सहयोगे समायोजने एकीकरणे कार्यकर्तणिां सहभागितायां सद्भावनायाञ्च भवति।

शैक्षिकोद्देश्यानि नहि सर्वेषु देशेषु समानतां स्थायित्वं च प्राप्नुवन्ति। देशस्य सामाजिक-राजनैतिकार्थिक-सांस्कृतिकजीवनावश्यकतामाकाङ्क्षां वानुगच्छन्ति तानि। यदाऽऽवश्यकताः आकाङ्क्षाः वा देशस्य परिवर्तन्ते तदा तासामनुगमनं शैक्षिकोद्देश्यान्यपि कुर्वन्ति। शैक्षिकोद्देश्यानां निर्मितिः नहि केवलं देशस्य वर्तमानपरिस्थित्यनुकूला भवति अपितु देशविकासदिशां भाविसमाजस्य रूप-रेखामाश्रित्य तेषां निर्मितिः भवति। अतः शैक्षिकोद्देश्यानि शिक्षाप्रशासनस्वरूपनिर्धारणे महतीं भूमिकां स्वीकुर्वन्ति।

(ब) सामाजिकाधारः -

शिक्षा चैकास्ति सामाजिकप्रक्रिया। तस्याः कार्यपद्धत्तिः प्रशासनञ्च विभिन्नसामाजिकघटकानाश्रित्य तिष्ठति। देशस्येतिहासो दर्शनञ्च पर्याप्तरूपेण

शिक्षाप्रशासनस्वरूपं प्रभावितं करोति। संयुक्तराज्यममेरिकादेशः लोकतान्त्रिक–सिद्धान्तान् स्वीकृत्य स्वतन्त्रोबभूव। अन्य–राष्ट्राणामपेक्षया तस्योदयः नवराष्ट्ररूपेण विलम्बेनाभूत्। अत एव तत्रत्य–लोकतान्त्रिकविचारानुरूपं शिक्षाप्रशासनस्य स्वरूपं लोकतन्त्रात्मकं विकेन्द्रीकृतञ्चाभूत्। रूसदेशः ऐतिहासिकप्रभावात् साम्यवादिदर्शनात् केन्द्रीकृतशिक्षाप्रशासनं स्वीचकार। भारते वर्तमानं शिक्षाप्रशासनं ब्रिटिश–शासनस्यावदानमस्ति। अस्तु नहि कश्चिद्देशः स्वेतिहासपरम्परां विहाय तिष्ठति। एताः परम्पराः तस्य शिक्षाप्रशासने प्रतिबिम्बिताः भवन्ति।

देशस्य संस्कृतिः प्रत्यक्षाप्रत्यक्षरूपेण शिक्षाप्रशासने परिलक्षिता भवति। समाजः स्वसंस्कृतिरक्षणे शिक्षामुखापेक्षी भवति। इच्छति च शिक्षया संस्कृतेः प्रगतिम्। शिक्षाप्रशासनमपि समाजस्येमामपेक्षां ध्यात्वा संस्थानानां सङ्घटनानां वा संचालनं करोति। अत एव शिक्षाप्रशासनं सामाजिकप्रक्रियारूपेण स्वीक्रियते। प्रत्यक्षाप्रत्यक्षतया शिक्षाप्रशासनं सांस्कृतिकवातावरणानुप्राणितं तिष्ठति। अस्य विचारस्य पुष्टिः केण्डल् (Kandel) महोदयस्याधस्तनशब्दैर्निधीयते – ''शिक्षाप्रणाल्यः स्वसांस्कृतिक–पर्यावरणेन प्रभाविताः भवन्ति। न केवलाः राष्ट्रियाः प्रणाल्यः परस्परं भिन्नाः भवन्ति। अपितु यत्र लोकतन्त्रान्तर्गतं विकेन्द्रीकरणं प्रोत्साहनं प्राप्नोति (तत्र) स्थानीयाः प्रणाल्योऽपि परस्परं भिन्नाः भवन्ति।''

(स) मनोवैज्ञानिकाधारः –

अन्यप्रशासनेभ्यो भिन्नं भवति शिक्षाप्रशासनम् यतो हि, तस्य सम्बन्धो व्यक्तिविकासेन भवति। अन्यप्रशासनेषु व्यक्तिविकासः नह्यपेक्षितो भवति। शिक्षा व्यक्तेः सम्पूर्णविकासस्य प्रक्रिया वर्तते, अतः तस्याः प्रशासनं व्यक्त्यादर्शात् पृथक्कर्तुं न शक्नुमः। अस्ति शिक्षाप्रशासनं गतिशीला प्रक्रियैका। शिक्षाप्रशासनस्य केन्द्रं बालकाः भवन्ति **ग्राहम बैलफोर** मतानुसारेण –''शिक्षाप्रशासनस्योद्देश्यमस्ति–यदुपयुक्तबालकान् उपयुक्तशिक्षकैः उपयुक्तशिक्षा उपलब्धार्थिकसाधनैः सौविध्येन शिक्षां प्राप्तुं सहायताप्रदानम्।'' अतः शिक्षाप्रशासनं पत्रावलीकेन्द्रितं न स्यात् अपितु तद्व्यक्तिकेन्द्रितमेव स्यात्। अतः शिक्षाप्रशासनेन व्यक्तेः – शारीरकाध्यात्मिक–संवेगात्मक–सौन्दर्यात्मकादिनां विभिन्नपक्षाणां सर्वतोभावेन विकासाय प्रयतितव्यम्। मनोविज्ञानस्य साहाय्येन बालकानां शक्तिसामर्थ्याभिरुच्यादिकं विज्ञाय तदनुकूलमेव विद्यालयस्य पाठ्यक्रमः, समयतालिकाः, शिक्षणपद्धतिः, शैक्षिकसामग्री च भवेत्, अनया व्यवस्थयैव व्यक्तेः सर्वाङ्गीणविकासः संभविष्यति। पुनश्च शिक्षकाणां कार्यकर्तॄणां

शक्तिं सामर्थ्यं रुचिं च विलोक्य कार्यविभाजनं कर्तव्यम् एवं कृते तेषां कार्यक्षमतावृद्धिः भवति। तेषु सहयोगभावना, सम्यक्तया कार्यसम्पादनौत्सुक्यञ्चापि प्रादुर्भवति।

राष्ट्रियलक्ष्याणि आकाङ्क्षाः शिक्षाप्रशासनञ्च –

शिक्षाप्रशासने राष्ट्रियलक्ष्याणामाकाङ्क्षाणां स्थानमपि रक्षणीयम्। यतो हि राष्ट्रोन्नतिः समृद्धिश्च विद्यालयेष्वेव तिष्ठति। भारतीयाः लोकतन्त्रं धर्मनिरपेक्षतां समाजवादं राष्ट्रियैक्यकरणञ्चेति बहूनि राष्ट्रियलक्ष्याणि स्वीकुर्वन्ति। एषां राष्ट्रियलक्ष्याणां प्राप्त्यर्थं शिक्षोद्देश्यानां निर्धारणमपि कृतम्। यथोदाहरणार्थम् लोकतान्त्रिकनागरिकतायाः विकासः, उत्पादकतायां वृद्धिः, सामाजिकैकतायाः राष्ट्रियैकतायाश्च विकासः, त्वरयाऽऽधुनिकीकरणं सामाजिकनैतिकाऽऽध्यात्मिकमूल्यानां विकासः इत्यादीनि निर्धारितोद्देश्यानि सन्ति।

एषामुद्देश्यानां (लक्ष्याणां वा) प्राप्तिरपि तदैव सम्भवा यदा लक्ष्यानुकूल-शिक्षाप्रक्रियायाः समुचितव्यवस्था स्यात्। शिक्षाऽऽयोगोऽस्मिन् विषये लिखति – ''शिक्षायाः महत्त्वपूर्णपरिष्कारोऽनिवार्यतयाऽयं करणीयोऽस्ति। प्रथमं शिक्षायां परिवर्तनं स्यात् तत्परिवर्तनमपि लोकजीवन-आवश्यकता-आकाङ्क्षादिभिः सह सम्बद्धं भवेत्। एवं प्रकारेण परिष्कृता शिक्षा, सामाजिकाऽऽर्थिक-सांस्कृतिक-परिवर्तनस्य सशक्तं साधनं भवेत्। एतदावश्यकमप्यस्ति राष्ट्रियलक्ष्यसिद्धये।''[1] स्पष्टमनेन यद् राष्ट्रियजीवनानुकूला राष्ट्रियाकाङ्क्षापूरिका च शिक्षा भवनीया, इदमुद्देश्यं कुशलशिक्षाप्रशासनेनैव प्राप्तुं शक्नुमः।

अस्माकं समाजे लोकतान्त्रिक-पद्धतिः स्वीकृता। स्वीकृतलोकतान्त्रिक-मार्गस्यास्माकं भारतीयसमाजस्य कामनेयमस्ति यत्, कुशला अर्थात् योग्या नागरिकाः भवेयुः। नागरिकेषु सामाजिककौशलमपि स्यात्। समाजस्याभीष्टसिद्धेः दायित्वं विद्यालयानामेव विद्यते। यादृशान् नागरिकान् विद्यालयाः विधास्यन्ति तादृशाः नागरिका एव भविष्यन्ति। यादृशाः नागरिकाः तादृश एव समाजोऽपि भविष्यति। अतः समाजस्याभीष्टसिद्धये विद्यालयेषु नागरिक (सामाजिक) क्रियाणां स्थानं स्याद् येन बालकेषु कुशलनागरिकतायाः विकासः सम्भवेत्।

1. "The most important and urgent reform needed in education is to transform it to endeavour to relate it to the life, needs and aspirations of the people and thereby make it a powerful insturment of social, economic and cultural transformation necessary for the realization of the national goals."

- Report of the education Commission (1964-66), p. 613

शिक्षासंस्थाः, देशस्योत्पादनेनार्थिकपरिस्थितिभिश्च बहुलतया प्रभाविताः भवन्ति। कृषिप्रधानदेशस्य शिक्षापद्धत्त्यां कृषिशिक्षा व्यवस्था कर्त्तव्या भवति। कृषिविद्यालय–महाविद्यालय–विश्वविद्यालयानां सङ्घटनं कर्त्तव्यं भविष्यति। उद्योगप्रधानदेशस्य शिक्षा, साफल्येनोद्योगसञ्चालनयोग्यताधायिका भविष्यति, एतदर्थं तत्र देशे–औद्योगिक–प्राविधिक–प्रौद्योगिकशिक्षासंस्थानानां व्यवस्था अनिवार्यतया कर्त्तव्या। अधुना भारते तूभयपक्षप्रबलताऽऽवश्यकी वर्तते ऽर्थात् उक्तोभयविधशिक्षा सुत्तरामावश्यकी विद्यते। स्वातन्त्र्यानन्तरं भारतमुभयदृष्ट्या आत्मनिर्भरं कर्तुं प्रयासाः क्रियन्ते। तथैतदर्थं–कृषि–वैज्ञानिक–प्रौद्योगिकशिक्षायाः व्यवस्था विधीयते। विभिन्नप्रकाराणां विद्यालयमहाविद्यालयानां स्थापनयोत्पादनवृद्धौ बलप्रयोगः क्रियते। स्पष्टमेतत् यच्छिक्षाप्रशासने राष्ट्रियलक्ष्याणामाकाङ्क्षाणां स्मरणमनिवार्यतया रक्षणीयम्।

राष्ट्रियचरित्रस्य प्रभावोऽपि शिक्षायां भवति। यादृशं चरित्रं नागरिकाणां तादृश–प्रभावः शिक्षाप्रशासनेऽनिवार्यतया पतत्येव। अधुना सर्वत्र वयं शृणुमः पश्यामश्च यद् भारतीयचरिह्वत्रं निम्नकोटिकमस्ति। अतः शिक्षासंस्थानामिदं दायित्वमापतितं यत् भाविनागरिकाणां चरित्रनिर्माणं ताः कुर्वन्तु। एतदर्थं शिक्षाप्रशासकाः शिक्षासंस्थानां संघटने तासां प्रशासने चावधानं यच्छेयुः। शिक्षासंस्थानां वातावरणं चरित्रनिर्माणा–योपयुक्तं भवेदेतदर्थं ते प्रयत्नं कुर्वन्तु। चरित्रनिर्माणायैव मूल्यपरकशिक्षाद्यापेक्षते।

शिक्षायाः प्रशासनिकप्रक्रिया –

बी. सीयर्स (B. Sears) नामको विद्वान् स्वपुस्तके "The Nature of the administrative process" प्रशासनप्रकियायाः प्रकृतिः इत्याख्ये लिखितवान् यत् शिक्षाप्रशासनप्रक्रियायै पञ्चक्रियाणामावश्यकता भवति। ताः पञ्च क्रियाः नियोजन–सङ्घटन–निर्देशन–समन्वय–नियन्त्रणात्मिकाः सन्ति।

शिक्षाप्रशासनस्योक्तपञ्चघटकेषु नायकत्वं–ध्येयादिकानां संयोजनमपि करोति **हेगमनः** नामको विद्वान्। अमेरिकाविद्यालयप्रशासकसङ्घेन प्रकाशिते वार्षिकपुस्तके (Year Book), शिक्षाप्रशासनप्रक्रिया–सम्बद्धाः निम्नलिखिताः कार्यकलापाः महत्त्वपूर्णाः सन्तीति स्वीकृतम्। ते कार्यकलापाः –

नियोजनं, प्रावधानमुत्प्रेरणं समन्वयो मूल्याङ्कनञ्चेति पञ्चैव सन्ति। विभिन्न–विचारकोक्त–कार्यकलापानां संश्लेषविश्लेषात्मके समीक्षणे कृते शिक्षाप्रशासनिक–प्रक्रियायामधस्तनकार्याणां परिगणनमपि कर्तुं शक्यते – निर्णयनं (Decision making), नियोजनं (Planning), सङ्घटनं (Organizing) सम्प्रेषणं, निर्देशनं, समन्वयनं,

प्रतिवेदनम्, आयव्ययप्ररूपणं (Budgeting) मूल्याङ्कनम् इति।

(1) निर्णयनम् (Decision Making) – सर्वत्र कस्यापि कार्यस्य सम्पादनाय निर्णयग्रहणमत्यावश्यकं भवति। निर्णये जाते हि, सङ्घटने विभिन्नक्रियाकलापाः संचाल्यन्ते। विद्यालयप्रशासने प्रतिदिनं यस्मिन्कस्मिन्नपि विषये एतादृशाः निर्णयाः प्रशासकेन कर्त्तव्याः भवन्ति। ये च नियताः सन्ति। नह्येषां निर्णयानां ग्रहणे किमपि विशेषविचारणीयं भवति। यतो ह्येतादृशः निर्णयाः पूर्वनिर्णयान् नियमान् नीतिं वानुगच्छन्ति। परन्तु प्रशासकस्य निर्णयः स्वस्थो वस्तुनिष्ठश्च भवेदित्येतदर्थं निर्णयप्रक्रियायामधस्तनतत्त्वानि निवेशनीयानि प्रशासकेन –

(1) उद्देश्यस्य लक्ष्यस्य वा स्पष्टज्ञानम्।

(2) समाधेयसमस्यासम्बन्धिन्यः सर्वाः सूचनाः संकलनीयाः तदुपरि सम्बद्धजनमतसंग्रहणञ्चापि करणीयम्।

(3) संकलिततथ्यानां विश्लेषणपूर्वकं विज्ञायैव निर्णयः कर्त्तव्यः।

(4) विश्लेषणेन निर्णयने (निर्णयशक्ति) नोपलब्धविकल्पानां चयनङ्कर्तव्यम्।

(5) समुपलब्धविकल्पानामुद्देश्यसिद्धिदृष्ट्या मूल्याङ्कनं कर्त्तव्यम्।

(6) स विकल्पश्चेतव्यो यश्चोद्देश्यसिद्धौ समुपयोगी स्यात्।

2. नियोजनम् – अस्य सामान्योऽर्थः, उद्देश्यपूर्त्यर्थं क्रियमाणकार्यस्य तस्य पद्धतेः, सहयोगिजनानां, परिस्थितीनां सहायकवस्तूनां सारपूर्णरूपरेखानिर्मितिरस्ति। एवंविधायाः रूपरेखाया अभावे न किमपि कार्यं सर्वथा साफल्यं प्राप्नोति। यदि कार्यस्य रूपरेखा (उद्देश्यानुकूला) पूर्वं निर्धारिता न स्यात् तदा लक्ष्यभ्रष्टता सम्भाव्यते। शैक्षिकनियोजनं त्वेका प्रगतिशीला प्रक्रिया वर्तते। अस्यां न केवलं वर्तमानः ध्यातव्यः, अपितु भविष्यत्कालो दृष्टिपथे रक्षणीयो भवति। योजनानिर्माणे पूर्वकालिक-निर्देशानामनुभवस्य वोपयोगो अवश्यमेव करणीयः। तथा व्यक्ति-समाज-संस्थाऽऽवश्यकताः सिद्धान्तादर्शसाधनान्यप्यावश्यं ध्यातव्यानि।

नियोजनसमयेऽविस्मरणीयानीमानि तथ्यानि भवन्ति –

(1) अस्माकमग्रे नियोजनलक्ष्यं स्पष्टं स्यात् अर्थात् यस्योद्देश्यस्य पूर्त्यर्थं योजना निर्मीयते एतदुद्देश्यं लक्ष्यं वा पूर्णतः स्पष्टं निश्चितं च स्यात्।

(2) उद्देश्यानि निर्धार्य तत्पूर्त्यर्थं कर्त्तव्य-कार्याणां विस्तृता सूची निर्मेया।

(3) सहैवायमपि निश्चेतव्यो यत् विविधकार्याणि कया पद्धत्त्या केन प्रविधिना वा सम्पाद्यानि भविष्यन्ति।

(4) एषां प्रविधीनां निर्धारणे जाते, तेषां क्रियान्वयन–सहायकसामग्र्याः चयनं वर्गीकरणञ्च करणीयम्।

योग्यः प्रशासकः नियोजनकरणसमये उपरिवर्णितानां सर्वेषामुक्ततथ्यानां समुचितं समायोजनं कुर्यात्। एवं सर्वं सम्पादिते योजनायाः योजनाकार्यपरिणामस्य (मूल्यांकन) विषयेऽपि विचारो विधेयः प्रशासकेन। यदि परिणामे न्यूनता वैपरीत्त्यं वा प्रतीयते, अथवाऽप्रतीक्षितकारणैः योजनास्वरूपे परिवर्तनमावश्यकं प्रतीयते तदा तस्याः स्वरूपे परिवर्तनं भवेत, ईदृशं योजनास्वरूपं पूर्वमेव निश्चेतव्यम्।

लोकतन्त्रीयाधारे योजना निर्मिता भवेत्। योजनानिर्माणे सहायकाः स्वातन्त्र्येण स्वमौलिकविचारान् प्रस्तोतुं पर्याप्तावसरं लभेरन्।

ईलियट मौसीयर् च –

उभौ विद्वांसौ योजना–निर्माणेऽधस्तनतथ्यानि ध्यातव्यानि सन्तीति वदतः–

1. विद्यालयस्य शैक्षिकावश्यकतानुरूपमुपलब्धसंसाधनानां सन्दर्भे उद्देश्यानां निर्धारणं भवेत्।
2. समुदायविशेषे, विद्यालयादपेक्षाः, शिक्षाया आवश्यकताश्च विचारणीयाः।
3. विद्यालयस्य विशिष्टकार्यक्रमाणां गतिविधीनाञ्च निर्धारणम्।
4. निर्धारितकार्यक्रम–सम्पादनायैकीकृतसंघ (इकाई) निर्माणं कर्त्तव्यमेवं कृते कार्यक्रमसम्पादनं सुकरं तेन लक्ष्यसिद्धिश्चापि भवेत्।
5. विमृश्य सर्वं, योजनायाः क्रियान्वितिः कर्तव्या।
6. समये समये क्रियमाण–कार्याणां मूल्याङ्कनङ्कर्तव्यम्।
7. उपर्युक्ते मूल्याङ्कने पुनर्नियोजनस्य सम्भावनाऽपि ध्यातव्या।

3. सङ्घटनम् –

प्रशासनस्य मौलिकमिदं कार्यमस्ति। विषयेऽस्मिन् जे.बी. सीयर्स महोदयः कथयति–सङ्घटनं नाम कार्यसम्पादनयन्त्रं, यस्य निर्माणं, व्यक्ति–वस्तु–धारणा–प्रतीक–स्वरूप–नियम–सिद्धान्तादिभिर्भवति। यन्त्रं स्वतः एव कार्यं कर्तुं शक्नोति। अथवास्य संचालनं मानवीयनिर्णयैरिच्छाभिश्च विधीयते। सङ्घटनेऽवस्थाद्वयस्य संस्थितिः भवति। प्रथमावस्था मानवीया द्वितीया च भौतिकी भवति। मानवीयतत्त्वैः सङ्घटितसङ्घटने कक्ष्याः समितयः शिक्षकाः कर्मकराश्च भवन्ति। भौतिकतत्त्वेषु भवनासन–पुस्तकालय–शैक्षिकसम्भाराः भवन्ति। सङ्घटनस्य द्वितीयायाम–वस्थायामुक्तभौतिकतत्त्वानां संग्रहणं भवति। आभ्यामवस्थाभ्यां सङ्घटनं प्रभावितं भवति। उक्ताभ्यामवस्थाभ्यामतिरिक्तान्यपि विचार–सिद्धान्त–धारणाख्यतत्त्वानि विद्यालयपद्धतिं पाठ्यक्रमं समयचक्रञ्च प्रभावयन्ति। अस्तु सङ्घटनेन

विभिन्नतत्त्वानि तथा व्यवस्थाप्यते, यथा सम्पूर्णकार्यक्रमस्योद्देश्यसिद्धिदा क्रियान्वितिः सुकरा भवेत्।

सङ्घटनस्य स्वरूपमपि द्विविधं भवति, औपचारिकानौपचारिकभेदात्। औपचारिके सङ्घटने, कार्यकर्तर्णिां सहायकानां पर्यवेक्षकाणामधिकारिणाञ्च समेषामेका शृङ्खला भवति। एते कार्यानुरोधदायित्वानुरोधाभ्यां वरिष्ठ–कनिष्ठादिश्रेणीषु विभक्ताः भवन्ति। एषु सङ्घटनात्मकः सम्बन्धस्तिष्ठति। एषु विद्यमानस्य सम्बन्धस्य रक्षणाय परस्परं सूचनानामादेशानां सततमादानप्रदानार्थं सञ्चारव्यवस्था भवति।

अनौपचारिके सङ्घटने व्यक्तीनां सम्बन्धोऽधिकारेण कार्येण वा न भवति। अपितु एषां मध्ये यः सम्बन्धः सः व्यक्तित्वकारणात् अथवा पारस्परिकात्मीयत्वादेव भवति। इमे सम्बन्धाः रुचि–कार्याभिवृत्ति–विचार–विश्वासादिनां मान्यतानामाधारेण उद्भवन्ति। चेस्टरबरनार्डस्य मान्यतास्ति ''प्रत्येकस्मिन्नौपचारिक–सङ्घटनेऽनौ–पचारिक–सङ्घटनं व्याप्तं भवति। प्रथमम् औपचारिकं स्वरूपं सङ्घटनस्य व्यवस्थायै दीर्घजीवनाय च भवति। द्वितीयमनौपचारिकं स्वरूपं सङ्घटनस्य जीवनशक्तिरस्ति।''

4. सम्प्रेषणम् –

सूचनादेशविचारप्रश्नानां यथावज्ज्ञानाय या व्यवस्था भवति सा सम्प्रेषण–मित्युच्यते। औपचारिकसङ्घटने सम्प्रेषणस्यैकं निश्चितं स्वरूपं (पद्धतिर्वा) भवति। सङ्घटने पदक्रमानुरूपतामाश्रित्य सम्प्रेषणप्रक्रिया कार्यं करोति। शालायां सम्प्रेषणस्य त्रयः ध्रुवः भवन्ति 1. अधोगामी, 2. समानगः 3. ऊर्ध्वगामी–भेदात्। प्रथमे ध्रुवे–उच्चाधिकारिणामादेशाः सूचनाश्चाधीनस्थान् यान्ति। द्वितीये–समानस्तरीयेषु प्रसरन्ति, यथा–शिक्षकः शिक्षकं, कर्मकरः कर्मकरं सूचनादिकं यच्छति। तृतीये – अधीनस्थानां विचाराः, सन्देशाः, मतानि बोधनानि वोच्चाधिकारिणो यान्ति। अतः स्पष्टमेतत् यत् सम्प्रेषणं तत्साधनं भवति, येन संस्था सङ्घटनं वा सङ्घटिता सङ्घटितं वा भवति।

5. निर्देशनम् –

अस्यार्थं स्पष्टयन् **जे.बी. सीयर्सो** लिखति – ''प्रशासनस्य निर्णयप्रभावकमङ्गं निर्देशनमिति भवति। इदं कार्याय सूचयति, संकेतयति च कार्यपद्धतिं कार्यसमयं, समापनावसरञ्च।''[1] नेतृत्वं मार्गदर्शनं वा प्रशासनस्याधारभूमिः भवति।

1. "Direction in administration is the part that effects the decision, gives the signal to act, indicates what the action is to be and when it is to start and stop."

- **J.B. Sears :** The Nature of Administrative Process, P. 24

सफलनेतृत्वाभावे पथप्रदर्शनाभावेऽखिल–योजनाः संघटनानि च वैय्यर्थ्यं प्राप्नुवन्ति। निर्देशनेऽपि तिस्रो वार्ताः महत्त्वपूर्णाः सन्ति– निर्णयकरणं, निर्णयानां घोषणा, निर्णयानां व्यवहारे स्थापनमिति त्रीणि निर्देशने महत्त्वं स्थानं रक्षन्ति। नहि निर्देशनं सरलं कार्यमस्ति। निर्देशनप्रदानाय प्रशासके उच्चस्तरीया योग्या, नेतृत्वशक्तिः, दूरदर्शिता, अनुभवविवेकादयो गुणाश्च परमावश्यकाः भवन्ति। सफलसञ्चालनङ्कर्तुं प्रशासके मानवीयसम्बन्धस्थापनयोग्यतापि परमावश्यकी भवति। यदि नेतरि मानवीयसम्बन्ध–निर्माणक्षमताया अभावः स्यात् सः स्वयोजनां सफलयितुं न शक्नोति। कुशलो नेता स्वसहयोगिजनैः विमृश्यैव निर्णयङ्कुर्यात्। विमर्शकाले सः स्वकीयान् विचारान् एवं प्रकारेण उपस्थापयेत् येन तस्य सहयोगिनोपि अस्माकमेवेमे विचाराः इति मत्वा सम्मताः भवेयुः। एवंविधस्य पारस्परिकसम्बन्धस्य स्थापनमेव सञ्चालनस्य (नेतृत्वस्य) साफल्यमुच्यते।

6. समन्वयस्थापनम् –

द्विविधसंसाधनानां समवायः सङ्घटने प्रायेण भवति। कानिचिद् भौतिक–संसाधनानि, कानिचिच्च मानवीयसंसाधनानि भवन्ति सङ्घटने। भौतिकसंसाधनानि भवनोपकरणादीनि भवन्ति। मानवीयसंसाधनेषु प्राचार्याधिकारि–शिक्षक–कर्मकरादीनां परिगणनं भवति। प्रशासकस्य महत्त्वपूर्णं कार्यमिदं भवति यत् स एषां संसाधनानां शक्तेः न्याय्यं सार्थकं मितव्ययतयोपयोगं कुर्यात् येन निर्धारित–सङ्घटनोद्देश्यानि सुलभानि स्युः। एतदर्थं प्रशासनमन्तरा भौतिकं मानवीयमाश्रितता–मन्तःसम्बन्धञ्च स्थापयेत्। एषां संसाधनानामुचितसमन्वयेन श्रमस्य शक्तेश्चापव्ययं पारस्परिकसंघर्षञ्च वारयति प्रशासनम्।

7. प्रतिवेदननिर्माणम् –

शिक्षाप्रशासनप्रक्रियायां प्रतिवेदननिर्मितेः स्वन्त्रमेकं महत्त्वमस्ति। शिक्षाप्रशासनं सङ्घटनस्य निखिलकार्याण्यवलोक्य तत्सम्बन्धिप्रतिवेदनं निर्मायात्।

8. आय–व्ययपत्रक (बजट) निर्माणम् –

शिक्षाप्रशासनप्रक्रियाया अङ्गभूतमिदं कार्यम् आयव्ययपत्रकनिर्माणात्मकं विद्यते। डॉ. आर. सी. शर्मा आयव्ययपत्रकनिर्माणस्यार्थं परिभाषते – ''शैक्षिकावश्यकतानां सूचीं विधाय तासां सम्पूर्त्यर्थं कार्यक्रम–निर्माणं, निर्मितकार्यक्रमस्य च वित्तीयप्राविधिकशब्देषु अनुवाद एव आयव्ययपत्रकमिति कथ्यते।''

9. मूल्याङ्कनम् –

इदमपि प्रशासनस्य महत्त्वपूर्णमेकं तत्त्वमस्ति। किमपि न तावत् पूर्णतां प्राप्नोति

यावत् तस्य समुचितरीत्या परिणाममूल्याङ्कनं न क्रियते। मूल्याङ्कनेनैव ज्ञायते यत् कियदुद्देश्यसिद्धिः सञ्जातेति। अनेन कार्यदोषान् अपि जानीमः। कस्मात्कारणाच्चाभीष्टसिद्धिः पूर्णतया नैवाभूदित्यपि मूल्याङ्कनेन स्पष्टं भवति। मूल्याङ्कनङ्कृत्वैव वयं भविष्यत्कालिकोद्देश्यानां विधीनाञ्च निर्धारणङ्कर्तुं शक्नुमः। प्रशासने निरन्तरं गतिशीलता स्यात्, अतः प्रगत्यर्थं स्वकार्याणां समये-समयेऽस्ति मूल्याङ्कनमावश्यकम्। मूल्याङ्कनमवश्यमेवास्माभिः समये समये कार्याणां करणीयम्। मूल्याङ्कनस्याभावे न हि वयं सङ्घटनं स्वसंस्थानं वोन्नेतुं शक्नुमः। साररूपेणैवं वक्तुं शक्यते - यच्छिक्षाप्रशासने शिक्षाप्रक्रियायाः समुचितव्यवस्थापनं निहितं विद्यते। शिक्षाप्रशासन-सञ्चालनाय प्रशासकः शिक्षाप्रक्रियास्तरान् समीक्षेत। यद्येवं न करिष्यति, प्रशासनेऽप्यसफलोऽसमर्थोवा भविष्यति। शिक्षाप्रशासनस्य सफलता प्रशासकगुणेषु निरीक्षणदक्षतादिषु भवति। स्याद् योजना प्रबलापि प्रशासकस्य किन्तु, यावत् सः क्रियान्वयने सफलनेतृत्वस्य परिचयं न दास्यति समये समये च निरीक्षणं न करिष्यति तावत् सः सफलतामपि न प्राप्स्यति।

पुनरावृत्तिप्रश्नाः

1. शिक्षाप्रशासनस्य किं तात्पर्यम्? उदाहरणेन स्पष्टयत।
2. के भेदाः शिक्षाप्रशासनस्येति स्पष्टीकुरुत।
3. शिक्षाप्रशासनस्याधाराः सोदाहरणं विवेचनीयाः।
4. प्रचलितदार्शनिक-राजनैतिकविचारधाराभिः कथं शिक्षाप्रशासनं प्रभावितं भवतीति विचार्यताम्।
5. शिक्षाप्रशासने कथं व्यक्तेः महत्ता स्वीकर्त्तव्यास्तीति विवेचनीयम्।
6. शिक्षाप्रशासनप्रक्रिया लोकतन्त्रस्वरूपाश्रिता स्याद् इत्येतत्कथनस्य किमस्ति तात्पर्यम्? अस्याः विभिन्नानि कार्याण्यपि दर्शनीयानि।
7. सङ्घटन-निर्देशयोः परस्परं यदन्तरं तत् स्पष्टयत।
8. कस्यापि विद्यालयस्य क्रियामुद्धृत्य मूल्याङ्कन-महत्त्वं विवेचनीयम्।

लेखार्थप्रश्नः

शिक्षाप्रशासनस्य अर्थाभिव्यक्तिं कुर्वन्तः तत्प्रक्रियान्तर्गतानां प्रमुखकार्याणां सोदाहरणमुल्लेखं कुर्वन्तु।

2
राष्ट्रियशिक्षाप्रणाली
(National System of Education)

"Every country develops its system of education to express and promote its unique socio-cultural identity and also to meet the challenges of the times."

- National Policy on Education, 1986.

भारतवर्षे वर्तमानशिक्षापद्धतेराधारशिला आङ्गलशासकैः संस्थापितासीत्। अस्याः पद्धतेः प्रारम्भः एकोनविंशतिशताब्द्याः आदौ मन्यते। वस्तुतः आधारशिलेयं 1854 तमे वर्षे वुड्घोषणापत्रेणोपस्थापिता।''घोषणापत्रमेतद् भारतीयशिक्षाया आधारोऽस्ति। भारते आधुनिकशिक्षापद्धतेराधारशिला अनेनोपस्थापिता।''[1] घोषणापत्रेऽस्मिन् प्रतिपादितं यत् शिक्षासंरचनायाम् आदौ प्राथमिकविद्यालयाः ततः उच्चप्राथमिकविद्यालयाः ततः महाविद्यालयाः विश्वविद्यालयाश्च क्रमेण स्युरिति। वुड्महोदयाः स्वप्रपत्रेण एकं शैक्षिकसोपानं (Educational Ladder) स्थापयितुं प्रयासं कृतवन्तः। अस्य सोपानस्य रूपं कतिपयपरिवर्तनैः सह पूर्ववत् उपलभ्यते यद्यपि 1854 तः अद्यावधि शिक्षापद्धतौ बहूनि परिवर्तनानि समायातानि, विभिन्नानां विद्यालयानां महाविद्यालयानाञ्च पुनःस्थापना जाता परं प्रारम्भिकशिक्षातः विश्वविद्यालयीयशिक्षां यावत् वुड्घोषणापत्रानुगुणमेव स्तरः अवलोकयितुं शक्यते।

माध्यमिकशिक्षायोगेन प्रस्तावितशैक्षिकसंरचना–

स्वतन्त्रताप्राप्तेः परं राष्ट्रस्य कर्णधाराः शिक्षापद्धतेः संरचनायां परिवर्तनमानेतुं प्रयासं कृतवन्तः येन परिवर्तितपरिस्थितिषु समायोजने, नूतनादर्शाणां मूल्यानाञ्च प्राप्तौ साहाय्यं स्यात्। अतः भारतसर्वकारेण 1952 तमे वर्षे माध्यमिकशिक्षाया अन्वेक्षणाय डा. ए.एल. मुदालियारमहोदयानाम् आध्यक्ष्ये माध्यमिकशिक्षायोगस्य नियुक्तिः कृता। मुदालियार महोदयानामध्यक्षतायां विहितोऽयमायोगः 'मुदालियार–आयोगः' इत्याख्येनापि अभिधीयते।

---

1. " The Despatch said to be the corner-stone of Indian education. It is said to have laid the foundation of our present system of education."

- A. N. Basu

माध्यमिकशिक्षा प्राथमिकशिक्षां विश्वविद्यालयीयशिक्षाञ्च संयोजयति। अतः माध्यमिकशिक्षायोगेन शिक्षाया अन्यक्षेत्रेष्वपि विचाराः प्रस्तुताः। आयोगेन शिक्षायाः नूतनसंरचनायाः रूपरेखा एवं प्रदत्ता–

	स्नातकोत्तरपाठ्यक्रमः (अवधिः द्विवर्षीयः)		
माध्यमिकोपाधि–प्रक्षिणम् (द्विवर्षीयम्)	प्रथमोपाधि–पाठ्यक्रमः (त्रिवर्षीयम्)		व्यवसायिकम् औद्योगिकञ्च (त्रितः पञ्चवर्षीयम्)
उच्चतर–माध्यमिक–स्तरः (त्रिवर्षीयम् चतुर्वर्षीयं वा)	पूर्वविश्वविद्यालयीय–पाठ्यक्रमः		उच्चतरमाध्यमिकविद्यालयः बहुदुद्देश्यीयविद्यालयश्च
	उच्चमाध्यमिक–विद्यालयः (High School)	प्राविधिक–उच्च–माध्यमिक–विद्यालयः	
निम्नमाध्यमिकस्तरः (त्रिवर्षीयः)	उच्चप्राथमिक–माध्यमिकः उच्चमाध्यमिकः विद्यालययो वा		औद्योगिककेन्द्रम्
प्राथमिकस्तरः (चतुर्वर्षीयः पञ्चवर्षीयो वा)	प्राथमिकः कनिष्ठ–माध्यमिकः विद्यालयः		ट्रेड् विद्यालयः
पूर्वप्राथमिक स्तरः	किण्डरगार्टन नर्सरी विद्यालयश्च		विद्यालयशिक्षायाः प्रारम्भः

अनया संरचनया प्रतीयते यत् आयोगेन विभिन्नस्तराणां कृते निम्नलिखितानि मतानि प्रस्तुतानि–

1. माध्यमिकशिक्षाया अवधिः सप्तवर्षीयः स्यात्।
2. शिक्षेयं चतुःपञ्चवर्षाणां प्राथमिकशिक्षायाः पश्चाद् प्रारब्धा स्यात्।
3. माध्यमिकशिक्षाया अवधिः भागद्वये विभक्तः स्यात्।

(अ) त्रिवर्षीया उच्चप्राथमिकी निम्नतरमाध्यमिकी शिक्षा।

(ब) चतुर्वर्षीया उच्चतरमाध्यमिकी शिक्षा।

4. अस्याः शिक्षायाः परं त्रिवर्षीयः स्नातकोपाधिपाठ्यक्रमः ततश्च द्विवर्षीयः स्नातकोत्तर-पाठ्यक्रमः स्यात्।

आयोगेन सम्पूर्ण-भारते शिक्षायां एकरूपं समानेतुं 11+3 संरचनायाः परामर्शः दत्तः यस्मिन् प्राथमिकशिक्षातः व्यतिरिक्ता सप्तवर्षीया माध्यमिकी शिक्षा ततश्च त्रिवर्षीयस्नातकशिक्षायाः परामर्शोऽऽसीत्। परं केन्द्रीय-सर्वकारेण परामर्शोऽयं राज्यसर्वकाराणामुपरि निर्धारितः, ततः शिक्षायाः स्वरूपं पूर्वापेक्षया विकृतिमवाप, यतो हि कुत्रचित् उच्चविद्यालयाः, कुत्रचित् उच्चतरमाध्यमिकविद्यालयाः कुत्रचिच्च अन्तर्महाविद्यालयाः। कुत्रचित् द्विवर्षीयस्नातकपाठ्यक्रमः, कुत्रचिच्च त्रिवर्षीयोऽभवत्, इत्थं साम्याभावाद् बालकानां पितरः एकप्रान्तं विहायान्यत्र गच्छन्ति चेत् काठिन्यमनुभवन्ति।

शिक्षा-आयोगेन प्रस्ताविता शिक्षायाः संरचना-

भारतसर्वकारेण विश्वविद्यालयस्य माध्यमिकशिक्षायाश्च प्रचलितदशानां विशेषतोऽन्वेक्षणं कारितमासीत् परं सम्पूर्ण-शैक्षिकस्तराणां स्थितेः तत्सम्बन्धानां च ज्ञानप्राप्त्यर्थं 1964 तमे वर्षे डा. डी. एस. कोठारी महोदयानामध्यक्षतायाम् एकस्य शिक्षायोगस्य नियुक्तिः कृता। अनेन शिक्षायोगेन सर्वेषां सम्भवसाधनानां साहय्येन सूचनाः प्राप्य तदध्ययनञ्च कृत्वा 1966 तमे वर्षे सर्वकारस्य पुरतः एका संस्तुतिः प्रस्तुता। अनेन शिक्षायाः सर्वेष्वपि क्षेत्रेषु परिवर्तनमानेतुं परामर्शाः दत्ताः। सम्पूर्णे देशे एतेषां परामर्शानां समालोचनाऽभवत्। भारतसर्वकारः ततः परमेव आयोगस्य संस्तुतीनां क्रियान्वयनाय प्रयत्नशीलः वर्तते। 'शिक्षायोगेन' देशे प्रचलिता शिक्षापद्धतिः अवधानेन अन्वेक्षिता ततश्च शिक्षाया एकं प्रारूपं प्रस्तुतं तच्चाधोनिर्दिष्टं वर्तते-

1. सामान्यशिक्षातः विद्यालयीयशिक्षातः वा प्राक् एकतः त्रिवर्षीयावधियुक्तायाः पूर्व-प्राथमिकशिक्षायाः व्यवस्था स्यात्।

2. सामान्यशिक्षावधिः दशवर्षीयः स्यात्। अस्यां केवलं प्राथमिकशिक्षायै तथा निम्नमाध्यमिकशिक्षायै स्थानं स्यात्। प्रथमकक्ष्यायां प्रवेशवयः न्यूनातिन्यूनं षट्वर्ष स्यात्। किञ्च प्रथमसार्वजनिकबाह्यपरीक्षा दशवर्षीयसामान्यशिक्षातः परं स्यात्। दशम कक्ष्यां यावत् कस्मिन्नपि विषये विशेषीकरणस्यानुमतिर्न स्यात्।

3. निम्नमाध्यमिकस्तरे द्विविधा शिक्षाव्यवस्था स्यात्-

(1) द्विवर्षीया त्रिवर्षीया वा समान्यशिक्षा

(2) एकतः त्रिवर्ष यावत् व्यावसायिकी शिक्षा

4. उच्चतरमाध्यमिकशिक्षायाः अवधिः वर्षद्वयं स्यात्, अपि च स्तरेऽस्मिन् द्विविधा शिक्षाव्यवस्था स्यात्-

(1) वर्षद्वयं यावत् सामान्यशिक्षा

(2) एकतः वर्षत्रयं यावत् व्यावसायिकी शिक्षा

स्तरः	कक्ष्याः	आयुः
स्नातकोपाधिः	III	21
	II	20
	I	19
उच्चतरमाध्यमिकस्तरः	XII	18
	XI	17
निम्नमाध्यमिकस्तरः	X	16
	IX	15
	VIII	14
उच्चतरप्राथमिकस्तरः	VII	13
	VI	12
	V	11
निम्नप्राथमिकस्तरः	IV	10
	III	8, 9
	II	7
विद्यालयशिक्षायाः प्रारम्भः	I	6
पूर्वप्राथमिकशिक्षा		

5. माध्यमिकविद्यालयाः द्विविधाः स्युः-

(1) उच्चमाध्यमिकविद्यालयः- यत्र शिक्षाकालः दशवर्षीयः स्यात्।

(2) उच्चतरमाध्यमिकविद्यालयः- यत्र शिक्षाकालः द्वादशवर्षीयः स्यात्।

6. एकादश्यां द्वादश्यां वा कक्ष्यायां विविधविषयाणां विशिष्टा शिक्षा दातुं शक्यते।

7. उच्चतरमाध्यमिकशिक्षातः परं प्रथमोपाधिकपाठ्यक्रमस्य अवधिः वर्षत्रयं स्यात्।

8. द्वितीयोपाधेः कालः वर्षद्वयं वर्षत्रयं वा भवितुं शक्यते। कुत्रचित् विश्वविद्यालयेषु स्नातकविद्यालयानां संस्थापनं स्यात् यत्र केषुचन विषयेषु त्रिवर्षीयावधेः द्वितीयोपाधिकस्नातकोत्तरपाठ्यक्रमस्य वा व्यवस्था स्यात्।

आयोगेन प्रचलितशिक्षावधौ एकवर्षस्य वृद्धेः परामर्शः दत्तः, अतः पूर्वमपि विविधायोगैः, संस्थाभिश्च प्रथमोपाधिकपाठ्यक्रमात् पूर्वं द्वादशवर्षीय-शिक्षाव्यवस्थायाः संस्तुतिः कृताऽऽसीत्।

किञ्च सेडलर्-आयोगेन, राधाकृष्णन्-आयोगेन चापि प्रथमोपाधिक-(स्नातक) पाठ्यक्रमे प्रवेशात् प्राक् न्यूनतमा योग्यता उच्चमाध्यमिकपरीक्षायाम् उत्तीर्णता निर्धारिता।

भावनात्मकैकतासमितिः

(The Committee on Emotional Integration)-

अखिलभारतीयमाध्यमिकशिक्षकसंघाभ्यामपि प्रथमोपाधिकपाठ्यक्रमात् पूर्वं द्वादशवर्षीयाविद्यालयीयशिक्षायाः परामर्शः प्रदत्तः। ताभ्यामपि अवधिरयं पूर्वप्रचलितस्तरेष्वेव विभक्तः -

1. पञ्चवर्षं यावत् प्राथमिकी शिक्षा
2. त्रिवर्षं यावत् निम्नमाध्यमिकी
3. चतुर्वर्षं यावत् उच्चतरमाध्यमिकी शिक्षा

किञ्च 'अखिलभारतीयमाध्यमिकशिक्षापरिषद् (All India Council For Secondary Education) द्वारा विविधप्रान्तीयशिक्षामन्त्रिणां सम्मेलनेनापि 1964 तमे वर्षे अयमेव परामर्शो दत्तः। अत उपर्युक्तैः विचारैः प्रतीयते यत् शिक्षायोगेनापि तेषामेव विचाराणां पुष्टिः कृता।

राष्ट्रियशिक्षानीतिः-भारतसर्वकारेण शिक्षाविकासाय सुसङ्घटितराष्ट्रिय-शिक्षापद्धतेः विषये परामर्शाय 1964 तमे वर्षे शिक्षायोगः नियोजितोऽऽसीत्। आयोगेन शिक्षायाः राष्ट्रियपद्धतिः इति विषये ये विचाराः प्रकटिताः ते संसत्सदस्यैः विभिन्नदलानां प्रतिनिधिभिः राज्यानां शिक्षामन्त्रिभिः भारतीयविश्वविद्यालयानाम् उपकुलपतिभिश्च कतिपयसंशोधनैः परं स्वीकृताः। अस्याधारेणैव भारतसर्वकारेण

शिक्षायाः राष्ट्रियशिक्षानीतिः सर्वकारीय-प्रस्तावरूपेण 24 जुलाई 1968 तमे वर्षे प्रस्तुता। सप्तदशकार्यक्रमाश्च संयोजिताः सर्वकारेणास्यां नीतौ। या संरचना शिक्षायोगेन प्रस्ताविताऽऽसीत् सैव सर्वकारेण प्रस्तुता अतः कार्यक्रमेष्वेषु तस्याः स्थापनायै महत्त्वपूर्णं स्थानं प्रदत्तम्।

10+2+3 शिक्षासंरचनाराष्ट्रियसमितिः– 'केन्द्रीयशिक्षा परामर्शदातृमण्डल' द्वारा स्वीकीये षट्त्रिंशत्तमाधिवेशने एतदनुभूतं यत् सम्पूर्णे देशे शिक्षायाः एकमेतादृशं प्रारूपं स्यात्। अनयैव दृष्ट्या तेन शिक्षामन्त्रालयोपरि एतद् दायित्वं समुपस्थापितम्। शिक्षामन्त्रालयेन विश्वविद्यालयानुदानायोगेन राज्यसर्वकारैश्च विचार-विमर्शं कृत्वा एका राष्ट्रियसमितिः नियोजिता सा शिक्षेतिहासे '10+2+3 शिक्षासंरचनायां राष्ट्रियसमितिः' इत्याख्येन प्रसिद्धिं गता।

शिक्षासमितेः नियुक्तिः कार्यक्षेत्रञ्च–

भारतसर्वकारस्य शिक्षा-समाजकल्याणमन्त्रालयेन च सितम्बर 1972 तमे वर्षे डा.पी.डी. शुक्लमहोदयानाम् आध्यक्ष्ये समितेरस्याः नियुक्तिः कृता। अस्याम् उत्तरप्रदेश-राजस्थान-पश्चिम बंगाल-दिल्ली-तमिलनाडु-गुजरात-आसाम-इत्यादीनां प्रान्तानां शिक्षासचिवाः सदस्याः आसन्। एतदतिरिक्तं निदेशकः, शिक्षायोजनायोगः, दिल्ली, सचिवः, माध्यमिकशिक्षाकेन्द्रीयमण्डलम्, दिल्ली, इत्युभावपि सदस्यौ आस्ताम्।

कार्यक्षेत्रम्–

1. समस्तराज्यानां संघीयक्षेत्राणाञ्च मध्ये 10+2+3 इत्याख्यां शिक्षासंरचनां प्रारब्धुं परामर्शप्रदानम्।

2. कार्यक्रमस्यास्य प्रारम्भे अनुमानिकव्ययस्य विवरणप्रदानम्।

राष्ट्रियसमित्या नवम्बर 1973 तमे वर्षे स्वप्रतिवेदनं भारतसर्वकारस्य समक्षं प्रस्तुतम्। प्रतिवेदनेऽस्मिन् नवाध्यायाः सप्तपरिशिष्टाश्च वर्तन्ते। अन्तिमे अध्यायद्वये पाठ्यक्रमशिक्षयोश्च व्यवसायीकरणस्य विषये विवेचनं विहितम्।

भारतसर्वकारेण समितेः प्रतिवेदनं स्वीकृत्य तन्निर्दिष्टपरामर्शानाम् उपरि कार्यं कर्तुं निर्णयो दत्तः।

भारतसर्वकारः शिक्षाऽऽयोगेन प्रस्तुतां 10+2+3 इति शैक्षिकसंरचनां परिशीलयितुं नियुक्तायाः राष्ट्रियसमतेः प्रतिवेदनं विचार्य विमृष्ट्वा च तां संरचनाम् अन्वमन्यत।

केन्द्रीयशिक्षापरामर्शदातृमण्डलेन (Central Advisory Board of Education) नवम्बर 1974 तमे वर्षे 10+2+3 इत्यस्याः नूतनशैक्षिकसंरचनायाः पञ्चमपञ्चवर्षीय-योजनायां प्रारब्धुं निर्णयः कृतः। फलतः 1976-77 ईसवीयवर्षान्तं यावत् संरचनेयं एकोनविंशतिप्रान्तेषु संघीयक्षेत्रेषु च प्रारब्धाऽभवत् उत्तरप्रदेशसर्वकारेणापि 1982 तमे वर्षे संरचनेयमङ्गीकृता। इमां संरचनां प्रति द्विविधा प्रतिक्रिया अभवत्-अस्याः स्वीकारेण छात्राणामुपरि अध्ययनस्य भारोऽभिवर्धितः। विपुलस्य धनराशेश्चावश्यकता अनुभूयते। अतः पञ्चमपञ्चवर्षीययोजनान्तं यावत् इयं पूर्णतः प्रारब्धा नासीत् परमिदानीं सर्वत्रेयं प्रारब्धा दृश्यते।

पुनरीक्षणसमितिः (Review Committee)-

मार्च, 1977 तमे वर्षे केन्द्रीयसर्वकारे परिवर्तनात् अन्यक्षेत्रेष्वपि परिवर्तनस्यापेक्षा सञ्जाता। 10+2+3 अस्याः शैक्षिकसंरचनायाः आलोचना वृद्धिं गता परं समर्थकाः परिवर्तनमानेतुं नैच्छन्। अतः सर्वकारेण शैक्षिकसंरचनायाः पुनरीक्षणाय जुलाई 1977 तमे वर्षे डॉ. ईश्वर भाई पटेल महोदयानां (कुलपति, गुजरात विश्वविद्यालयः) अध्यक्षतायाम् एका पुनरीक्षणसमितिः नियुक्ता। अनया समित्या दशवर्षीय-विद्यालयशिक्षायाः पाठ्यक्रमस्य अध्ययनात्परं राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषदा निर्मिते पाठ्यक्रमे कतिपयसंशोधनानि विधाय नवम्बर 1977 तमे वर्षे स्वीकीयप्रतिवेदनं प्रेषितम्।

+2, राष्ट्रियपुनरीक्षणसमितिः वा -

केन्द्रीयशिक्षामन्त्रिणा डॉ. पी.सी. चुन्दर महोदयेन +2 पाठ्यक्रमस्य विचारार्थम् अकटूबर 1977 तमे वर्षे एकस्याः अन्यायाश्च समितेः नियुक्तिः कृता। अस्याः समितेरध्यक्षाः डॉ. मालकम् एस. आदिशेषय्या (कुलपति, मद्रासविश्वविद्यालयः) महाभागाः आसन्। अनया समित्या उच्चतरमाध्यमिकविद्यालयशिक्षायाः पाठ्यक्रमस्याध्ययनं शिक्षायाः व्यवसायीकरणस्य सन्दर्भे विहितम्।

राष्ट्रियशिक्षासम्मेलनम् (1977) -

राष्ट्रियपुनरीक्षणसमितेः विचारावसरे एव जनतासर्वकारेण राष्ट्रियशिक्षा-सम्मेलनस्यायोजनं कृतम्। इदञ्च 18, 19, 20 दिसम्बर 1977 तमे वर्षे दिल्लीनगरे

सम्पन्नम्। अस्याध्यक्षा: 'नई तालीम समिति' केन्द्रीय-गाँधी-स्मारकनिधेश्चाध्यक्षपदमलङ्कुर्वाणा: डॉ. श्रीमन्नारायण-महोदया: आसन्। सम्मेलनेऽस्मिन् राजस्थानप्रान्तस्य राज्यपालमहोदया: श्री रघुकुलतिलकमहाभागा:, प्रान्तानां शिक्षामन्त्रिण:, त्रिंशद् विश्वविद्यालयानां कुलपतय: केचन संसत्सदस्या:, ऐच्छिकसङ्घटनानाञ्च विभिन्ना: शिक्षाविद: भागं गृहीतवन्त:। अस्मिन् शिक्षामन्त्रालयस्य, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद: उच्चाधिकारी इतरे शतसंख्यातोऽधिका: शिक्षाकार्यकर्त्तार: भागं गृहीतवन्त:, एतदस्य वैशिष्ट्यम्।

अपि च सम्मेलनस्योद्घाटनं तदानीन्तनप्रधानमन्त्रिण: श्री मोरारजी देसाई महाभागा: समापनञ्च केन्द्रीयशिक्षामन्त्रिण: डा. पी.सी. चुन्दरमहोदया: कृतवन्त:।

शिक्षासम्मेलनं किमर्थम्? -

जनतासर्वकार: प्रागेव गांधीवादिसिद्धान्तानुगुणं प्रचलनस्य घोषणां कृतवान्, अत: शिक्षाक्षेत्रेऽपि गांधीमहोदयानुगुणं बेसिकशिक्षामाधारीकृत्य तस्या: क्रियान्वयनाय राष्ट्रियशैक्षिकसंरचनायां परिवर्तनमावश्यकमिति धिया अस्य सम्मेलनस्यायोजनं विहितम्। किञ्च सम्मेलनमिदम् 'अखिल भारतीय नई तालीम समिति' इत्यस्या: अनुदेशेन समायोजितमभवत्।

8+4+3 शिक्षासंरचनासम्मेलनेऽस्मिन् 10+2+3 शैक्षिकसंरचनाया: विचारो विहित: सर्वसम्मत्या च नूतनशैक्षिकसंरचनाया: संस्तुति: कृता। संस्तुतिरियं 8+4+3 शैक्षिकसंरचना इत्याख्येन प्रसिद्धिं भजते। अत्र अष्टौ वर्षाणि यावत् संविधानानुसारम् अनिवार्या नि:शुल्का च शिक्षा स्यात् इति प्ररम्भिकशिक्षाव्यवस्था सम्पादिता। उच्चतरमाध्यमिकशिक्षा चतुर्वर्षाणि यावत् स्वयं सम्पन्नता इति व्यवस्थाङ्गीकृता। अपरेषु शब्देषु इमां शिक्षां प्राप्य छात्रा आत्मन: सुनागरिकरूपेण संस्थापयितुं समर्था: भविष्यन्ति। उच्चतरमाध्यमिकशिक्षात: परं स्नातकोपाधिपाठ्यक्रम: भविष्यति। अस्यां नवशैक्षिकसंरचनायां प्रथमा सार्वजनिकपरीक्षा दशवर्षीयविद्यालयीयशिक्षात: परं भविष्यति। राष्ट्रियैकतायै आवश्यकमेतद् यत् संरचनेयं विभिन्नेषु क्षेत्रेषु, मण्डलेषु, प्रान्तेषु च स्वपाठ्यक्रममनुसृत्य विकेन्द्रीकृता स्यात् अर्थात् स्थानीयावश्यकतानुगुणं पाठ्यक्रमनिर्माणस्य व्यवस्था स्यादिति।

8+4 शैक्षिकसंरचना एव किमर्थं स्वीकृता, 10+3 किमर्थंन्न ?

शिक्षासम्मेलनेऽस्मिन् 8+4 शैक्षिकसंरचनास्वीकारे बहवः पक्षाः संस्तुतास्सन्ति यथा–

10+2 उच्चतरमाध्यमिकशिक्षेयं साहित्यिकं सामान्यं वा व्यावसायिकञ्चेति भेदद्वये विभक्ता। भेदेऽस्मिन् छात्राणाम् अधिकः समयः शास्त्रीयविषयाणामध्ययने व्ययो भवति, कक्ष्यापद्धतेश्च पुनःस्थापनं जायते। अत्र महाविद्यालयेषु विश्वविद्यालयेषु च समधिकाः छात्राः प्रेषयितुं शक्यन्ते एतदेव महत्प्रयोजनम्। नूतनशैक्षिकसंरचनायाः (8+4) स्वीकारे केवलं एकैव धारा वैशिष्ट्यं भजते अत्र विभिन्नव्यावसायिककार्यैः सह भाषा, विज्ञानं, गणितं, समाजविज्ञानं, साहित्यं, समाजोपयोगिनाम् उत्पादनकार्याणाञ्च निश्चितः पाठ्यक्रमः स्वीकृतोऽस्ति।

किञ्च 8+4 शैक्षिकसंरचनास्वीकारे महाविद्यालयीयशिक्षाकार्यक्रमस्य व्यये न्यूनत्वमागमिष्यति। यतो हि उच्चतरमाध्यमिककक्ष्याद्वयं विद्यालयीयपाठ्यक्रमेणैव सम्बद्धं भविष्यति।

किञ्च अस्यां शैक्षिकसंरचनायां व्यक्तिगतविद्यालया अपि राष्ट्रियशिक्षापद्धतौ आनेतुं शक्यन्ते। अत्र व्यक्तिगतविद्यालयेषु अष्टमीकक्ष्यां यावत् शिक्षणं निःशुल्कं स्यात् उच्चस्तरे च पञ्चाशत्प्रतिशतं स्थानानि निर्धनानाङ्कृते निर्धारितानि स्युः।

अपि च अस्यां संरचनायां शिक्षायाः सर्वेषु स्तरेषु शिक्षायाः माध्यमः मातृभाषा स्यात् इति कथितम्। तथा च उपयोगिविषयाणां पाठ्यक्रमे स्थानं प्रदाय संरचनेयं परिवर्तिता विश्वानुकूला स्थापयितुं शक्यते।

अत्र च 10+2 शैक्षिकसंरचनायाः गुणान् तीव्रगत्या जायमानं परिवर्तनञ्चाधारीकृत्य विश्वस्य आवश्यकतानुगुणं समन्वयस्य कृते प्रयासो विहितः। किञ्च संरचनेयं शास्त्रीयप्रकृत्यान्वितपरम्परागतशैक्षिकसंरचना महत्त्वाकाङ्क्षिणी पाठ्यक्रमयोर्मध्ये च संतुलनं स्थापयितुमर्हा वर्तते। अपि च राष्ट्रियाकांक्षामावश्यकताञ्च सम्पूर्त्तये महात्मागांधिमहोदयानां (कार्येण शिक्षा) सिद्धान्तानुगुणं व्यावहारिकं स्वरूपं प्रदातुं शक्यतेऽनया। अस्याः संरचनायाः गुणान् स्वीकृत्य तदानीन्तन भारतसर्वकारेण 1979 तमे वर्षे इयं राष्ट्रियशिक्षानीतौ समायोजिता। परं शिक्षानीतेः घोषणायाः प्रागेव सर्वकारविघटनेन प्रचलिता नाभवत्।

राष्ट्रियशिक्षानीतिः 1986 –

राष्ट्रियविकासाय नवचेतनायै च शिक्षायाः महती भूमिका वर्तते। एकविंशतिशताब्द्यां पदार्पणेन सह शिक्षाया उत्प्रेरणाः ज्ञानान्वेषणाय बलं यच्छन्ति यत् इदानींतनावश्यकतानुगुणं शिक्षाव्यवस्थासम्पादने सम्भवोपायानां प्रकाशनं स्यात्। साम्प्रतं जीवनस्य विविधक्षेत्रेषु महत्परिवर्तनं समायातं, स्वतन्त्रतायाः पश्चात् शिक्षाक्षेत्रे अनेकानि परिवर्तनानि जातानि, एतेषां परिवर्तनानामानयने 1968 तमशिक्षानीतेः महती भूमिका वर्तते। किन्तु अस्याः नीतेः विभिन्नाः स्तुतयः कार्यरूपेण परिणता नाभूवन्, विभिन्नेषु वर्गेषु शिक्षायाः प्रचलनं नाभवत्, शिक्षास्तरे उन्नतिरपि नाभवत्। अतः एतासां समस्यानां निवारणम् इदानीं प्रथमावश्यकता वर्तते।

भारतीयचिन्तनानुसारं मानवः अमूल्यसम्पत् राष्ट्रियसंसाधनञ्च वर्तते। तस्य विकासः गत्यात्मकः संवेदनशीलश्च स्यात् यतो हि प्रतिव्यक्ति स्वकीयं विशिष्टं महत्त्वं वर्तते, जन्मतः मृत्युपर्यन्तं सर्वस्यां परिस्थितौ तस्य पुरतः विभिन्नाः समस्याः नूतनसंसाधनानामावश्यकता चानुभूयन्ते। विकासस्य प्रक्रियायामस्यां शिक्षा स्वीकायमुत्प्रेरकं योगदानं दद्यात् तदर्थं सावधानं योजनानां निर्माणं तदुपरि स्वीकृतेश्च परमावश्यकताऽनुभूयते किञ्च साम्प्रतं भारतवर्षे राजनैतिक-सामाजिकसमस्यानाम् अभिवर्धनं नैतिकमूल्यानाञ्च ह्रासः समजायत। समाजवादः, धर्मनिरपेक्षत्वं व्यावसायिकनैतिकमूल्यानाञ्च प्राप्तौ समस्याः समागच्छन्ति।

सुशिक्षिताः ग्राम्याः जनाः सौविध्याभावात् तत्र वस्तुं सन्नद्धाः न सन्ति अतः ग्राम-नागरक-जीवनयोर्मध्ये साम्याय विविधसंसाधनानामुपलब्धेः परामावश्यकता वर्तते।

जनसंख्यानियन्त्रणाय, साक्षरतायै, समस्यानां समाधानाय च शिक्षा अत्यन्तम् आवश्यकी वर्तते, इत्थं शिक्षायाः बहुविधगुणान् स्वीकृत्य नवपरिस्थितये सामाजिकावश्यकतानां सम्पूर्त्तये च 1986 तमे वर्षे भारतसर्वकारेण शिक्षायाः एका नवनीतिरङ्गीकृता, सेयं नीतिः 'राष्ट्रियशिक्षानीतिः 1986' इत्याख्येन प्रसिद्धिमवाप। अस्याः नीतेः प्रारूपे राष्ट्रियशिक्षापद्धतेः प्रतिपादनम् अभवत्।

राष्ट्रियशिक्षाप्रणाली (National System of Education) -

अस्याः प्रणाल्याः प्रमुखाः संस्तुतयः–

1. राष्ट्रियशिक्षाप्रणाल्याः मूलमन्त्रोऽयं यत् निश्चितस्तरं यावत् जाति–धर्म–स्थान–लिङ्गादिभेदं विना सर्वेषाङ्कृते समरूपा शिक्षा स्यात्। अस्य लक्ष्यस्य प्राप्तये सर्वकारः समुचितोपायैः वित्तपोषितकार्यक्रमान् समारभ्प्स्यति। 1968 ईस्वीयनीतौ अनुशंसितसामान्यविद्यालयीयपद्धतेः क्रियान्वयनाय प्रभावोत्पादकरीत्या कार्यसम्पादनं भविष्यति।

2. राष्ट्रियशिक्षापद्धतेरन्तर्गतरूपेण सम्पूर्णदेशे 10+2+3 संरचनेयं स्वीकृता वर्तत एव तत्र दशवर्षाणां पञ्चवर्षात्मकं प्रारम्भिकशिक्षायाः, वर्षत्रयात्मकमुच्चप्राथमिकशिक्षायाः, वर्षद्वयात्मकञ्च माध्यमिकशिक्षायाः व्यवस्थापनं स्यात्।

3. राष्ट्रियशिक्षाप्रणाली सम्पूर्णराष्ट्रस्य कृते राष्ट्रियशिक्षाक्रमस्य आर्दशान् आधृत्य भविष्यति, यत्र एकः सामान्यकेन्द्रबिन्दुः भविष्यति तदितरतत्त्वानि स्थानिकवातावरणानुसारेण यथापेक्षं भवितुमर्हन्ति।

सामान्यकेन्द्रबिन्दौ, भारतस्वातन्त्र्यान्दोलनेतिहासः, सांविधानिककर्त्तव्यानि, राष्ट्रियाभिज्ञानसम्बन्धितत्त्वानि च भविष्यन्ति। अमीषां तत्त्वानां व्यवस्थापनं तथा क्रियते येन राष्ट्रियमूल्यानां विकासः जायते। राष्ट्रियमूल्येषु अन्तर्भवन्ति इमे विषयाः – भारतस्य समानसांस्कृतिकनिधिः, प्रजातन्त्रं, धर्मनिरपेक्षता, स्त्रीपुरुषसमानता, पर्यावरणसंरक्षणं, सामाजिकावरोधानां दूरीकरणं, सीमितपरिवारस्य महत्त्वं, वैज्ञानिकप्रवृत्तेर्विकासः।

4. नूतनशिक्षापद्धतिः आगामिन्यां सन्ततौ विश्वव्यापिदृष्टिकोणं सुदृढीकरणाय, अन्ताराष्ट्रियसहयोगं सहास्तित्वभावनायाः विकासाय चोपयुक्ता स्यात्। समानताया उद्देश्यमवाप्तुं राष्ट्रियशिक्षापद्धतौ सर्वेषाङ्कृते शिक्षायाः साफल्याय समानावसराणां प्रदानं स्यात् तदर्थं सामाजिकवातावरणं पूर्वाग्रहकुण्ठानाञ्च समाप्तिः शिक्षायाः परममुद्देश्यं स्यात्।

5. प्रत्येकस्मिन् सोपाने दीयमानायाः शिक्षायाः न्यूनतमस्तरस्य निर्धारणं भविष्यति। विद्यार्थिनः भारतस्य विभिन्नभागानां संस्कृति–सभ्यता–परम्परा–सामाजिकव्यवस्थादीनामध्ययने बोधने च समर्थास्स्युस्तदर्थमुपायाः करिष्यन्ते। युवानः

स्वबुद्ध्या कल्पनया च देशस्य महिमानं गरिमाणञ्चावबोद्धुं यथा समर्थास्स्युः तदर्थं तेषां प्रोत्साहनं करिष्यते।

6. राष्ट्रस्य सम्पर्कभाषां वर्धापयितुं प्रयासः करिष्यते।

7. उच्चशिक्षया, सामान्यशिक्षया विशेषतया प्राविधिकशिक्षया च शिक्षितानां सुयोग्यच्छात्राणाञ्च कृते समानावसराणां व्यवस्था भविष्यति। तथा च एकक्षेत्रतः अन्यत्र शिक्षणस्य व्यवस्थापि भविष्यति। विश्वविद्यालयेषु उच्चशिक्षणस्थलेषु च शिक्षायाः सार्वदेशिकस्वरूपोपरि बलं प्रदास्यते।

8. शोध-विकास-विज्ञान-प्रविधिशिक्षायाः विषयेषु राष्ट्रस्य विभिन्नसंस्थानां मध्ये व्यापकसम्बन्धं स्थापयितुं विशिष्टा व्यवस्था भविष्यति येन ते स्व-स्वसाधनानि सम्मील्य राष्ट्रियमहत्त्वस्य परियोजनासु भागं गृहीतुं शक्तास्स्युः।

9. 'आजीवनं शिक्षा' शैक्षिकप्रक्रियायाः प्रधानं लक्ष्यं वर्तते। सार्वजनीना साक्षरता तदभिन्नमङ्गञ्च वर्तते। युवकाः, गृहिणः, श्रमिकाः व्यापारिणश्च स्वसामर्थ्यरुचिसौविध्यानुसारञ्च शिक्षां प्राप्तुं समर्थाः यथा स्युस्तदर्थम् अवसराः प्रदास्यन्ते। इत्थं मुक्तशिक्षा (Open Education) दूरस्थशिक्षा (Distance Education) च राष्ट्रियशिक्षणपद्धतेः महत्त्वपूर्णाङ्गे भविष्यतः।

10. शिक्षायाः पुनर्निर्माणाय, शैक्षिकासाम्यापाकरणाय, प्राथमिकशिक्षायाः सार्वजनीकरणाय, प्रौढसाक्षरतायाः कृते, वैज्ञानिक-प्रौद्योगिकानुसन्धानाय विविधलक्ष्याणां सम्प्राप्तये च साधनानाम् एकत्रीकरणस्य दायित्वं समग्रे राष्ट्रे भविष्यति।

आगामिवर्षेषु अधोनिर्दिष्टसंस्थानां शिक्षापद्धतौ विकासाय महती भूमिका भविष्यति-

1. विश्वविद्यालय-अनुदान-आयोगः (University Grant Commission)

2. अखिलभारतीयप्राविधिकशिक्षापरिषद् (All India Council of Technical Education)

3. भारतीयकृष्यनुसन्धानपरिषद् (Indian Council of Agricultural Research)

4. भारतीयचिकित्सापरिषद् (Indian Medical Council)

5. राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् (National Council of Educational Research and Training)

6. राष्ट्रियशैक्षिकनियोजनप्रशासनसंस्थानञ्च (National Institute of Planning & Administration NIEPA)

7. अन्ताराष्ट्रियविज्ञानप्रौद्योगिकीशिक्षासंस्थानञ्च (International Institute of Science and Technology Education)

उपर्युक्ताः सर्वाः संस्थाः समेकितयोजनया संयोजिताः भविष्यन्ति येन परस्परं कार्यात्मकसम्बन्धः संस्थापितः स्यात्, अनुसंन्धानस्नातकोत्तरशिक्षाकार्यक्रमश्च सशक्तः स्यात्।

कार्ययोजना– भारतीयसंसद्द्वारा वित्तसत्रतः परं 'राष्ट्रियशिक्षानीतिः 1986', इत्यस्योपरि विचार–विमर्शो विहितः स्वीकृतिश्च प्रदत्ता। तदानीं मानवसंसाधनविकासमन्त्रिमहोदयैः आश्वस्तं यत् ते वर्षाकालिके सत्रे अस्याः नीतेः कार्यान्वयनाय एकां योजनां प्रस्तोष्यन्ति। वित्तसत्रतः परं मन्त्रालयः कार्ययोजनायाः निर्माणाय द्रुतगत्या कार्यं प्रारब्धवान्। 20 जुलाई 1986 तमे वर्षे प्रान्तीयसर्वकाराणां/संघशासितप्रदेशीयानां सचिवानाम् एकं सम्मेलनं समायोजितम् तत्र प्राप्तपरामर्शानामुपरि विचारः कृतः राष्ट्रियशिक्षानीतेः मुख्यविषयाणामुपरि च कार्ययोजना निर्मिताऽभवत्।

अगस्त 1986 तमे वर्षे 'केन्द्रीयशिक्षापरामर्शमण्डलस्य' सभायां कार्ययोजनायाः कतिपयविचारैः सह स्वीकृतिरभवत्।

तदानीन्तनभारतसर्वकारेण 1986 तमे वर्षे अगस्तमासे अस्याः नीतेः प्रपत्राणि प्रकाशितानि। कार्ययोजनास्वीकृतेः, पश्चादेव सर्वकारः विघटितः परिवर्तितश्च। अतः 1986 तमे वर्षे शिक्षानीतेः पुनर्निरीक्षणाय श्रीआचार्यराममूर्त्तिमहोदयानामाध्यक्ष्ये पुनरीक्षणसमितेः नियुक्तिः अभवत्। समितिरियं दिसम्बर 1990 तमे वर्षे स्वप्रतिवेदनं प्रदत्तवती, अस्य प्रतिवेदनस्य नाम– "Towards an Enlightened and human society" इत्यासीत्। अस्याः संस्तुतेः क्रियान्वयनात्पूर्वमेव पुनः सर्वकारः संशोधितः। अतः 1992 तमे वर्षे तदानीन्तनसर्वकारेण नूतनकार्ययोजना निर्मापिता, तदनुगुणञ्च भारतसर्वकारः 1986 तमे वर्षे सम्पद्यमानायाः शिक्षानीतेः क्रियान्वयनायाद्यापि प्रयासरता वर्तते इति।

भारते शैक्षिकसंरचना[1]

¼Educational Structure in India½

स्तरः/आयुः/अवस्था							10			+2		+3				+2 Yrs.		P.G.
	I	II	III	IV	V	VI	VII	VIII	IX	X	XI	XII	XIII	XIV	XV	XVI	XVII	
5 6	7	8	9	10	11	12	13	14	15	16	17	18	19	20	21	22	23	24 25

—— प्रारम्भिकशिक्षा —— माध्यमिकशिक्षा —— उच्चशिक्षा ——

उच्चमाध्यमिकविद्यालयः सामान्यशिक्षा/व्यावसायिकशिक्षा — स्नातकपाठ्यक्रमः

प्राथमिक–विद्यालयः	उच्चतरप्राथमिक–विद्यालयः	मध्यमिक–विद्यालयः	उच्चमाध्यमिकविद्यालयः सामान्यशिक्षा/ व्यावसायिकशिक्षा	स्नातकपाठ्यक्रमः अनावृतविश्वविद्यालयः बी.ई/बी. टेक, एम.बी.बी.एस. | एम.ई., एन.एस. | एम. टेक, एम.डी. स्नातकोत्तरपाठ्क्रमः बी.एड., एम.एड. | एम.फिल | पीएच.डी.
		प्राविधिक–विद्यालयः	पॉलीतकनीकी	
अनौपचारिक–केन्द्राणि	अनौपचारिक–केन्द्राणि	मुक्त–विद्यालयः	मुक्त–विद्यालयः	

अनिवार्यशिक्षा

1. Development of Education in India :1990-92, NIEPA and Department of Education, Ministry of Human Resource Development (MHRD), New Delhi, p.4.

पुनरावृत्तिप्रश्नाः

1. वुड्घोषणापत्रस्यास्माकं शिक्षापद्धतौ कः प्रभावोऽपतत् ?

2. माध्यमिकशिक्षायोगेन तात्कालिकशैक्षिकसोपाने केषां–केषां परिवर्तनानाङ् कृते परामर्शः दत्तः ?

3. माध्यमिकशिक्षायोगेन प्रस्तावितशैक्षिकसंरचनायाः रूपरेखां विवेचयत ?

4. शिक्षायोगमाध्यमिकशिक्षायोगाभ्यां माध्यमिकशिक्षासंरचनायाः विषये दत्तपरामर्शानां मध्ये को भेदः ? स्पष्टयत।

5. 8+4+3 शैक्षिकसंरचना 10+2+3 संरचनातः कथं भिन्ना ? स्पष्टयत।

6. 8+4+3 शिक्षासंरचनायाः गुणान् संक्षेपेण विवेचयत ?

7. राष्ट्रियशिक्षानीतेः (1986) प्रमुखोद्देश्यानि संक्षेपतः विवेचयत ?

लेखार्थप्रश्नः

उत्तरप्रदेशे 10+2+3 इति शैक्षिकसंरचनां प्रारब्धुं का व्यवस्था क्रियमाणा वर्तते ? विवेच्यन्ताम्।

3

केन्द्रीयस्तरे शिक्षा-प्रशासनम्

(Educational Administration At The Centre)

"The Central Advisory Board of Education will play a pivotal role in reviewing education development, determining the changes required to improve the system and monitoring implementation. It will function through appropriate committees and other mechanisms created to ensure contact with, and coordinating among the various areas of Human Resource Development. The Department of Education at the centre and in the States will be strengthened through the involvement of professionals."

– National Policy on Education, 1986.

स्वतन्त्रताप्राप्तेः परं भारतवर्षमात्मानं लोकतन्त्रात्मकं गणराज्यम् आर्थिकक्षेत्रे च समाजवादं संघोषितवत्। आर्थिकक्षेत्रे प्रस्तावितोद्देश्यानां सम्प्राप्तये देशस्य राजनेतृभिः पञ्चवर्षीययोजनानामपि नियोजनं कृतमनुभूतञ्च यत् शिक्षाभावे लोकतन्त्रं साफल्यमधिगन्तुं न शक्नोति आर्थिकोन्नतिश्च असम्भवा इति। एतद्विज्ञाय पञ्चवर्षीययोजनासु शिक्षायै अपि महत्स्थानं प्रदत्तम्। तृतीयपञ्चवर्षीययोजनायाञ्च संघोषितम्। मानवः यन्त्रापेक्षया महत्त्वपूर्णोऽस्ति इति.... अतः भौतिकयोजनापेक्षया मानवाय विनियोजनं महत्त्वपूर्णं वर्तते। अतोऽनुभूतं योजनानिर्मातृभिर्यत् जनानामार्थिकस्थितेः सुदृढीकरणाय लोकतन्त्रदिशायां महत्प्रयोगसाफल्यं शिक्षया एव भवितुमर्हति नान्यथा। शिक्षया व्यक्तेः समाजस्य चोन्नतिर्भवति इति अवगत्य राष्ट्रनेतारः तस्याः प्रगतये प्रयासरताः वर्तन्ते।

केन्द्रसर्वकारः(THE CENTRAL GOVERNMENT) -

ऐतिहासिकपृष्ठभूमिः – आङ्ग्लसर्वकारः भारतीयानां शिक्षां प्रति ध्यानं न ददाति स्म। 1883 तमे वर्षे लॉर्ड रिपन महोदयाः प्राथमिकशिक्षां स्थानीयस्वशासनाय समर्पितवन्तः। तदानीं शिक्षाप्रशासनं केन्द्रीकृतमासीत्; प्रान्तेषु केन्द्रीयनीतीनामेव परिपालनं भवति स्म। 1901 तमे वर्षे शिक्षायाः महानिदेशकः (Director General of Education) इति पदं सृष्टम् 1910 तमे वर्षे च 'शिक्षाविभागः' संस्थापितः स 'Department of Education, Health and Lands' इत्याख्येन प्रसिद्धिमवाप,

विभागोऽयं वाइसराय कार्यकारीपरिषद सदस्याधीनं कृतं संरक्षणान्वेषणाय च सचिवोऽपि प्रतिनियुक्तः। 1921 तमे वर्षे शिक्षेयं प्रान्तेषु हस्तान्तरिता पुनश्च द्वितीयमहायुद्धात्परं केन्द्रीयसर्वकारेण शिक्षाक्षेत्रे रुचिः प्रदर्शिता 1945 तमे वर्षे शिक्षाविभागस्य संस्थापनमपि स्वास्थ्यभूमिविभागात् पृथक्त्वेन अङ्गीकृतम्।

1947 तमे वर्षे भारतस्य स्वातन्त्र्यात् पश्चाद् शिक्षाविभागोऽयं शिक्षामन्त्रालयरूपेण परिवर्तितः। 1957 तमे वर्षे शिक्षामन्त्रालयेन सह वैज्ञानिकानुसन्धानमपि संयोजितम्। 1958 तमे वर्षे च मन्त्रालयोऽयं भागद्वये विभक्तः -

(अ) शिक्षा-मन्त्रालयः (Ministry of Education)

(ब) वैज्ञानिकानुसन्धानसांस्कृतिकविषयाणाञ्च मन्त्रालयः (Ministry of Scientific Research & Cultural Affairs) -

एतौ मन्त्रालयौ पृथक्-पृथग्रूपेण राज्यमन्त्रीणामाध्यक्ष्ये संस्थापितौ पुनश्च 1963 तमे वर्षे संयोजितौ तथा च भागद्वये विभक्तः -

(अ) शिक्षा-विभागः (Department of Education)

(ब) विज्ञान-विभागः (Department of Science)

29 फरवरी 1964 तः मन्त्रालयोऽयं शिक्षामन्त्रिणामाध्यक्ष्ये संस्थापितः यस्य सहयोगाय द्वावुपमन्त्रिणावेकः राज्यमन्त्री च प्रतिनियुक्ताः। 1964-65 तमे वर्षे मन्त्रालयोऽयं पुनर्घटितः तत्र पञ्चविभागानां (Bureau) चतुरुपविभागानां (Division) व्यवस्था सम्पादिता।

पञ्चविभागाः (Five Bureaus) एते आसन् -

1. विद्यालयशिक्षा (School Education)
2. उच्चशिक्षा (Higher Education)
3. छात्रवृत्तयः (Scholarships)
4. योजना आनुषङ्गिकशैक्षिकसेवा च (Planning & Ancillary Education Services)
5. भाषा, साहित्यं, ललितकलाश्च (Languages, Literature & Fine Arts)

मन्त्रालयस्य चत्वारः उपविभागाः (Divisions) आसन् यथा -

1. शारीरकशिक्षा मनोरञ्जनञ्च (Physical Education & Recreation)

2. बाह्यसम्बन्धाः (External Relations)

3. वैज्ञानिकानुसन्धानम् (Scientific Research)

4. प्रशासनञ्च (Administration)

1967–68 तमे वर्षे विभागद्वयसंयोजनेन साकं मन्त्रालयोऽयं पुनर्घटितः। किञ्च विभागानां नामानि परिवर्तितानि यथा –

1. सांस्कृतिकक्रियाधारकः (Bureau of Cultural Activities)

2. योजनासमन्वयाधारकः (Bureau of Planning & Co-ordination)

3. प्रशासनाधारकः (Bureau of Administration)

4. सामान्यशिक्षाधारकः (Bureau of General Education)

5. प्राविधिकशिक्षाधारकः (Bureau of Technical Education)

6. छात्रवृत्तियुवासेवाधारकः (Bureau of Scholarships & Youth Services)

7. भाषापुस्तकप्रोन्नयनाधारकः (Bureau of Languages & Book Promotion)

इमे आधारकाः संयुक्तसचिवस्य परामर्शदातुरधीनतायां संस्थापिताः। तदधीनं उपशिक्षापरामर्शकः, उपसचिवः, सहायकशिक्षापरामर्शकः, वरिष्ठ–विज्ञानाधिकारी, शिक्षाधिकारी, विभागाधिकारिणश्च प्रतिनियुक्ताः।

26 सितम्बर 1985 तमे वर्षे 'मानवसंसाधनविकासमन्त्रालयः' इत्याख्यो नूतनमन्त्रालयो सृष्टः। तत्र पञ्चविभागाः सन्ति –

1. शिक्षाविभागः (Department of Education)

2. संस्कृतिविभागः (Department of Culture)

3. कलाविभागः (Department of Arts)

4. युवविषयाणां क्रीडानां च विभागः (Department of Youth Affairs & Sports)

5. महिला–बालसंरक्षणविभागः (Department of Women & Child Care)

शिक्षाविभागोऽयं 'मानवसंसाधनविकासमन्त्रालयस्य अङ्गं वर्तते। अयं राज्यमन्त्रिणामाध्यक्ष्ये संस्थापितः योहि मानवसंसाधनविकासमन्त्रालयस्य मन्त्रिणामधीने कार्यं सम्पादयति। अत्र सचिवालयस्याप्येकोऽध्यक्षो भवति यस्य सहाय्यं कर्तुं विशिष्टः सचिवः (उच्चशिक्षा), अतिरिक्तसचिवः, शिक्षापरामर्शदातारश्च

भवन्ति। विभागोऽयं विभिन्नेषु मण्डलेषु, विभागेषु, संकायेषु, एककेषु च संविभक्तो वर्तते। प्रत्येकस्मिन् मण्डले एकः परामर्शदाता भवति, तत्र सहयोगाय च विभागीयाध्यक्षोऽपि (Divisional) प्रतिनियुक्तो भवति। मन्त्रालयस्य प्रशासकीयाध्यक्षो शिक्षापरामर्शदाता भवति। अस्य प्रशासकीयप्रारूपमालेखपत्रेण (3.1) स्पष्टीक्रियते –

भारतीयसंविधाने शिक्षा (Education in the Constitution of India)

भारतीयसंविधाने शिक्षानीतेर्निर्धारकाप्रमुखाः धाराः बहुन्युपबन्धानि च वर्तन्ते एतानि शीर्षकान्तर्गतमधोनिर्दिष्टानि –

1. अनुच्छेदः धारा वा 28 – राज्यसर्वकारेण पूर्णरूपेण पोषितासु न क्वापि संस्थासु धार्मिकशिक्षा भविष्यति, किन्तु तादृश वैयक्तिकसंस्थासु धार्मिकशिक्षा भवितुमर्हति याः सर्वकारेण अङ्गीकृताः, याः सर्वकारार्थिकसहायतां प्राप्नुवन्ति, याश्च सर्वकारस्य प्रबन्धने विद्यमानाः तदितरार्थिकस्त्रोतोभिः संस्थापिताः प्रचाल्यमानाश्च, यासां निर्मातृभिः दातृभिर्वा धार्मिकशिक्षा नियमेन स्यादिति अभिसन्धिः प्रकटितः। तथापि नियमः एतादृशः भवेत् यत् तादृशसंस्थासु पठन्तः धार्मिकशिक्षायां, धार्मिकोपासनायां, धार्मिकस्थानेषु च उपस्थातुं बलात् न अनुरुध्येरन् यावत् ते प्रौढाः न भवन्ति संरक्षकैः, पितृभिः वा तदर्थं नानुमन्यन्ते।

2. धारा 29 (1) – भारतस्य कस्मिन्नपि प्रान्ते, क्षेत्रे यत्र कुत्रापि वास्तव्याः जनाः स्वभाषालिपेः संस्कृतेश्च संरक्षणायाधिकारिणो भविष्यन्ति। अत्र देवनागरीलिप्यां हिन्दीभाषायामधिकारत्वनिर्देशकः 343 इत्याख्यानुबन्धस्य प्रभावो न भविष्यति।

धारा 29 (2) – ''राज्यद्वारा सञ्चालिते साहय्यभूते वा कस्मिन्नपि विद्यालये कोऽपि छात्रः जातिधर्मलिङ्गभाषाभेदेन प्रवेशात् वञ्चितो न भविष्यति।''


3. धारा 30 – ''धर्मेण भाषया वा निर्धारिताल्पसंख्यकाः स्वरुच्यनुकूलं शिक्षणसंस्थाः स्थापयितुमधिकारिणो भविष्यन्ति।''

उक्तशिक्षासंस्थानां कृते राज्यसर्वकारोऽपि धर्मभाषादिभेदेन साहाय्यं कर्तुं भेदो न करिष्यति।

राज्यस्य नीतिनिर्देशकतत्त्वानि –

1. धारा 41 – राज्यस्वसामर्थ्यानुगुणं यथाशक्ति कार्यप्राप्तुं, शिक्षामध्येतुं, वार्धके, रुग्णे वा अङ्गहीने स्थितौ वा न्यार्हतानामभावे सार्वजनिकसाहाय्यमाचरितुं कार्यसाधकोपबन्धानां प्राप्तिं कारयिष्यति।

3.1


मानवसंसाधनविकासमन्त्रालयः
शिक्षाविभागः
शिक्षासचिवः
प्रारम्भिकशिक्षाविभागः
संयुक्तशिक्षापरामर्शदाता (प्रारम्भिकशिक्षा)
उप-सचिवः (प्रशासनम्)
निदेशकः (प्रारम्भिक-शिक्षा)
निदेशकः (प्राविधिक-शिक्षा)
उप-सचिवः (अनौपचारिकशिक्षा)
माध्यमिकशिक्षाविभागः
संयुक्तसचिवः (माध्यमिकः)
उप-शिक्षा परामर्शदाता (व्यावसायिक-शिक्षा - I)
उप-शिक्षा परामर्शदाता (व्यावसायिक-शिक्षा - II)
उप-शिक्षासचिवः (माध्यमिकः)
विश्वविद्यालयः उच्च-शिक्षाविभागश्च
संयुक्तसचिवः (विश्वविद्यालयः)
निदेशकः
निदेशकः
निदेशकः (विश्वविद्यालयः)
प्रौढशिक्षाविभागः
संयुक्त सचिवः (प्रौढ शिक्षा)
निदेशकः (प्रौढशिक्षा)
उप-सचिवः (प्राविधिक)
उप-सचिवः
उप-शिक्षा परामर्शदाता (प्रौढशिक्षा)
एडीशनल सेक्रेटरी/अतिरिक्तसचिवः
पुस्तकप्रोन्नतिः छात्रवृत्तिविभागः
संयुक्तसचिवः
निदेशकः (पुस्तकप्रोन्नतिः)
उप-शिक्षा परामर्शदाता
उपसचिवः (संघीयक्षेत्रम्)
भाषाविभागः
संयुक्तसचिवः
निदेशकः (OL)
उप-सचिवः (ET)
उप-शिक्षा परामर्शदाता (SKT)
निदेशकः (L)
प्रशासनम् आयोजनम् यूनेस्को विभागश्च
संयुक्तसचिवः (प्रशासनम्)
निदेशकः (आयोजनम्)
उप-शिक्षा परामर्शदाता
निदेशकः (प्रशासनम्)
परियोजना निदेशकः (महिलासंख्या)
निदेशकः (यूनेस्को)
शिक्षापरामर्शदाता (प्राविधिकः)
प्राविधिकशिक्षाविभागः
संयुक्तशिक्षा परामर्शदाता (प्राविधिकः)
संयुक्तशिक्षा परामर्शदाता (एस)
उप-शिक्षा परामर्शदाता
उप-शिक्षा परामर्शदाता
उप-शिक्षा परामर्शदाता
निदेशकः (प्राविधिकः)
अतिरिक्तशिक्षा-परामर्शदाता
उप-शिक्षा परामर्शदाता
उप-शिक्षा परामर्शदाता
समेकित-आर्थिक-लेखाविभागः
संयुक्तसचिवः
वित्तपरामर्शदाता च
उप-वित्त परामर्शदाता

2. धारा 45 – चतुर्दशावस्थापर्यन्तानां सर्वेषां छात्राणाङ्कृते अनिवार्यनिःशुल्कशिक्षायै च राज्यं उपबन्धाय प्रयत्नं करिष्यति।

3. धारा 46 – राज्यं वर्णचतुष्टये निम्नतरवर्णानां साम्प्रतं 'अनुसूचितजाति, अनुसूचितजनजाति' इत्याख्येनाभिधीयमानानां वर्गाणां शैक्षिक–आर्थिक–सामाजिक–राजनैतिकसंरक्षणाय तेषामुत्तरोत्तरमुन्नतये च प्रयासं करिष्यति।

संविधानस्य सप्तमी सूचिका (धारा 246)

(अ) सङ्घसूचिका – भारतीयसंविधाने सर्वे विषयाः सर्वाश्च शक्तयः संघराज्य– समवर्त्तिसूचित्रये संविभक्तास्सन्ति। संविधानस्य सप्तम्यामनुसूच्यां प्रथमसूचावपि(सङ्घ सूचिका) केन्द्रसर्वकारस्य कृते कतिचिदुपबन्धैः कानिचन शैक्षिकोत्तरदायित्वानि संनिर्धारितानि यथा –

1. उपबन्धं 63 – ''भारतीयसंविधानस्यादौ काशीहिन्दूविश्वविद्यालयः, अलीगढ़मुस्लिम विश्वविद्यालयः, दिल्लीविश्वविद्यालयश्च तथा संसदविधिना राष्ट्रिय महत्त्वस्य कृते संघोषितान्यासंस्थाश्च।''

2. उपबन्धं 64 – ''भारतसर्वकारेण पूर्णतांशतो वा वित्तपोषिताः, संसदेन राष्ट्रियमहत्त्वस्य कृते संघोषिता वैज्ञानिकी शिल्पीया वा शिक्षा संस्थाः।''

3. उपबन्धं 65 – संघीयकारकाणि संस्थाश्च या –

(क) ''वृत्तिकं (Professional), व्यावसायिक प्राविधिकप्रशिक्षणाय वा सन्ति।'' अत्र सुरक्षाकर्मी पदाधिकारीणां (Police Officers) प्रशिक्षणसम्बद्धाः संस्थाप्यन्तर्भवन्ति।

(ख) ''विशिष्याध्ययनानुसन्धानामुन्नतये च सन्ति।''

(ग) अपराधान्वेक्षणायानुसन्धानाय च वैज्ञानिकं शिल्पीय साहयय्यं कर्तुं निर्दिष्टास्सन्ति।

4. उपबन्धं 66 – उच्चतरशिक्षासंस्थानाम् अनुसन्धानस्य संस्थानां वा, वैज्ञानिक–शिल्पीय–संस्थानाञ्च मध्ये एकत्वं समायातुं मानदण्डानां निर्धारणम्।

(ब) राज्यसूची –

उपबन्धं 11 – ''शिक्षा विश्वविद्यालयैस्सह सङ्घसूचौ अन्तर्निहितानुबन्ध 63, 64, 65, 66 समवर्त्ती सूच्युपबन्धं पञ्चविशं (25) च व्यतिरिक्तं एकः राजकीय–विषयो वर्तते।''

(स) समवर्त्तिसूची -

उपबन्धं 25 - "श्रमिकाणां व्यावसायिकं प्राविधिकप्रशिक्षणञ्च।"

मूलतः भारतीयसंविधाने शिक्षा एका राजकीयविषयो वर्तते। 1976 ई. संशोधनात्परं शिक्षा राज्यसूचितः समवर्त्तिसूच्यौ स्थानं लब्धवती। ततः शिक्षोपरि राज्यं केन्द्रञ्च विधिनिर्माणं कर्तुं शक्नुतः। परस्परं विरोधे सति केन्द्रीयविधिरेव सर्वमान्यो भविष्यतीति सिद्धान्ततो स्वीकृतम्। समवर्त्तिसूचौ स्थानात्परं शिक्षेयमेतादृशी स्थितिः जाता यत् -

(1) राज्यसर्वकारोऽपि शिक्षायामुपरि शिक्षासम्बद्धविधिं निर्मातुं शक्नोति।

(2) केन्द्रीयसर्वकारोऽपि शिक्षासम्बद्धविधिं निर्मातुं शक्नोति।

(3) एकस्मिन्नेवविधौ अन्योन्याश्रयत्वे विरोधे च सति केन्द्रीयविधिरेव सर्वमान्यो भविष्यतीति सिद्धान्तोऽङ्गीकृतः।

इत्थं समवर्त्तिसूचौ स्थानात्परं शिक्षोपरि महत्बलं दीयते विकासगतिश्च प्रवर्धते। शिक्षालक्ष्यानां प्राप्तौ साहाय्यं मेलिष्यति।

शिक्षायां केन्द्रस्य भूमिका (ROLE OF CENTRE IN EDUCATION)-

शिक्षाक्षेत्रे केन्द्रस्य महती भूमिका वर्तते। राज्येषु शिक्षास्थितेः सुदृढीकरणाय केन्द्रद्वारा परामर्शाः दीयन्ते। हिन्दीभाषाया इतरभाषाणाञ्च शोधकार्येणाभिवृद्धिःसम्पाद्यते। शिक्षाक्षेत्रे विविधयोजनानां निर्माणे क्रियान्वयनाय च केन्द्रसर्वकारः प्रयत्नशीलः वर्तते परमुच्चशैक्षिकक्षेत्रे तु केन्द्रीयाधिपत्यमेव महत्तां भजते।

केन्द्रसर्वकारः अधोनिर्दिष्टकार्याणि सञ्चालयति -

(1) केन्द्रसर्वकारः अलीगढ़मुस्लिमविश्वविद्यालयः, बनारसहिन्दुविश्व-विद्यालयः, दिल्ली विश्वविद्यालयः, विश्वभारती विश्वविद्यालयः, शान्तिनिकेतनम्, जवाहरलालनेहरूविश्वविद्यालयः, नॉर्थ ईस्टर्नहिल यूनिवर्सिटी, शिलांग, हैदराबाद विश्वविद्यालयः, पाण्डुचेरी विश्वविद्यालयः, पाण्डुचेरी; इन्दिरागांधितमुक्त-विश्वविद्यालयः, जामियामिलिया इस्लामिया, दिल्ली इत्याख्याः दशशिक्षणसंस्थाः सञ्चालयति।[1] किञ्च असमविश्वविद्यालयः, सिल्चर, तेजपुरविश्वविद्यालयः, असम, नागालैण्डविश्वविद्यालयः, नागालैण्ड् इत्याख्यानि त्रीणि नूतनशिक्षणकेन्द्राणि संस्थापितानि।

1. Universities Hand Book, 1989, PP. 1-1213.

(2) राष्ट्रियमहत्त्वसंस्थानानां प्रशासनम्।

(3) गुजरातविद्यापीठम्, अहमदाबादः, कन्या गुरुकुलम्, देहरादून, श्री अरविन्दान्ताराष्ट्रियशिक्षणकेन्द्रम्, पाण्डुचेरी, लोकभारती, सनोसारा (गुजरात) इत्याख्यानां शिक्षणसंस्थानाङ्कृतेऽनुदानप्रदानम्।

(4) संघीयक्षेत्रेषु शिक्षाव्यवस्थापनम्।

(5) इतरराष्ट्रैस्सह शैक्षिकसांस्कृतिकसम्बन्धस्थापनम्, 'यूनेस्को' इत्यादीनामन्ताराष्ट्रियसङ्घटनानाङ्कृते सहयोगप्रदानम्।

(6) उच्चशिक्षानुसन्धान-वैज्ञानिक-प्राविधिकशिक्षाक्षेत्रेषु मानदण्डानां निर्धारणं सौविध्यानां समन्वयस्थापनञ्च।

(7) संसत्विधिना राष्ट्रियमहत्त्वरूपेण संघोषितानां वैज्ञानिकप्राविधिकशिक्षण-संस्थानाञ्च प्रशासनम् यथा - भारतीयप्रोद्यौगिकीसंस्थानम् (खड्गपुर, मुम्बई, चेन्नई, दिल्ली, कानपुर, रुड़की, गुवाहटी इत्यादः); नेशनल इन्स्टीट्यूट ऑफ फाउन्ड्री एण्ड फोर्ज, राँची। किञ्च भारतसर्वकारेण साम्प्रतमेव अहमदाबाद-बैंग्लौर-कलकत्ता-कोझिकडि-इन्दौर-लखनऊ-नगरेषु 'भारतीयप्रबन्धसंस्थानानि' संस्थापितानि।

(8) केन्द्रराज्ययोर्मध्ये जायमानेषु शैक्षिककार्येषु समन्वयस्थापनम्। अपि च केन्द्रसर्वकारः उक्तकर्त्तव्यव्यतिरिक्तं राज्यसर्वकाराणां सहयोगं प्राप्य बहूनि कार्याणि सम्पादयति। तानि खलु अग्राङ्कितानि -

(1) सम्पूर्णेऽस्मिन् भारतवर्षे षट्तः चतुर्दशवर्षाणि यावदवस्थान्वित-छात्राणाङ्कृते अनिवार्यतया सार्वभौमिकशिक्षासम्बन्धे राज्यसर्वकारीयोत्तरदायित्वेषु भागग्रहणम् इदानीं यावत् भारते निःशुल्कानिवार्यशिक्षायाः च स्थितिः एवं दृष्टव्या-

1- जम्मूकश्मीरप्रान्ते नागालैण्ड प्रान्ते च सर्वविधशिक्षा निश्शुल्कतया दीयते।

2- तमिलनाडुप्रान्ते प्राक्विश्वविद्यालयकक्ष्यां यावत् दीयमाना विद्यालय-शिक्षा निःशुल्का वर्तते।

3- आन्ध्रप्रदेशे, केरलप्रान्ते, कर्णाटके च माध्यमिकस्तरं यावत् दीयमाना शिक्ष्या निःशुल्का वर्तते।

4- महाराष्ट्रप्रान्ते प्राथमिकशिक्षा निःशुल्का वर्तते। तत्र च द्वादशशतरूप्यकैः न्यूनराशिग्राहकाणामभिभावकानां छात्रेभ्यः सर्वेष्वपि स्तरेषु एकवर्षं यावत् शिक्षा निःशुल्कतया दीयते।

5- राजस्थानप्रान्ते बालिकानाङ्कृते सर्वेषु स्तरेषु बालकानाङ्कृते च उच्च

प्राथमिकस्तरं यावत् शिक्षा निःशुल्कतया प्रदीयते।

6– पंजाब–हरियाणा–मध्यप्रदेशप्रान्तेषु च प्राथमिकशिक्षा निःशुल्का वर्तते।[1]

7– उत्तरप्रदेशे छात्राणाङ्कृते अष्टमीकक्ष्यां यावत् शिक्षा निःशुल्का तत्र छात्रासु छात्रेषु मध्ये भेदो न दृश्येतेऽस्मिन् क्षेत्रे।

8– बिहारप्रान्ते सप्तमीकक्ष्यां यावच्छिक्षा निःशुल्का।

9– उडीसाप्रान्ते प्राथमिकशिक्षा शुल्करहिता वर्तते।

10– असमप्रान्ते बालिकानाङ्कृते अष्टमींयावत् बालकानाङ्कृते च पञ्चमींयावत् शिक्षा निःशुल्का वर्तते।

11– प्रायः सर्वेष्वपि संघक्षेत्रेषु प्राथमिकशिक्षा निःशुल्का वर्तते।

संविधानस्य निर्देशकसिद्धान्तानुगुणं भारते षोडशप्रान्तेषु संघीयक्षेत्रत्रये च 'अनिवार्यप्राथमिकशिक्षाऽधिनियमः' (Compulsory Primary Education Act) निर्मापितः।

(2) उच्चशिक्षायाः वैज्ञानिकप्राविधिकशिक्षास्तराणाञ्च निर्धारणं शैक्षिकानुसन्धानकार्यस्य नियोजनं विकासश्च उच्चतरशिक्षायां समन्वयमानक–निर्धारणाय च केन्द्रसर्वकारः विश्वविद्यालयानुदानायोगेन कार्यं सञ्चालयति। विशिष्ट–क्षेत्रेष्वनुसन्धानप्रोन्नतये समन्वयाय च चतुर्ण्णामभिकरणानां संस्थापनाऽपि कृता – तानि यथा –

(अ) भारतीयसामाजिकविज्ञानानुसन्धानपरिषद् (Indian Council for Social Science Research - ICSSR)

(ब) भारतीयैतिहासिकानुसन्धानपरिषद् (Council for Indian Philosophical Research)

(स) भारतीयोन्नताध्ययनसंस्थानञ्च (Institute for Indian Higher Studies)

(3) हिन्दीभाषायां तथा अन्यभारतीयभाषासु शोधकार्यं तेषामभिवृद्धिश्च।

(4) विभिन्नविधीनां छात्रवृत्तीनां प्रदाने कार्यक्रमनिर्माणम्।

(5) भारतस्य प्राचीनसंस्कृतेः संरक्षणं विकासश्च।

(6) विकलाङ्गानाङ्कृते शिक्षा।

---

1. India 1993, P. 87

(7) अल्पसंख्यकानुसूचितास्पृश्यजातीनां सांस्कृतिकहिताय विशिष्टोत्तर-दायित्वम्।

(8) राष्ट्रस्य विभिन्नभागेषु संस्थितानां केन्द्रीयविद्यालयानां सञ्चालनम्।

(9) समाजस्य निम्नवर्गेषु शिक्षायै प्रोत्साहनम्।

(10) राष्ट्रियैकतायाः सुदृढीकरणाय विविधकारकाणां कार्यक्रमाणाञ्च व्यवस्थापनम्।

शिक्षायोगः (1964-66) केन्द्रसर्वकारस्य शिक्षादायित्वानां विषये कांश्चन परामर्शान् एवं दत्तवान् -

1. शिक्षक-शिक्षायां शिक्षकाणां स्थितौ च श्रेष्ठत्वं स्यात्।

2. कृष्यभियन्तृचिकित्सादिक्षेत्रेषु च जनशक्तेः नियोजनम्।

3. छात्रवृत्तीणां कार्यक्रमस्य विकासः।

4. शिक्षावसरेषु समत्वं यथा स्यात् येनान्ताराज्यीयं वैषम्यं न्यूनत्वमधिगच्छेत्।

5. माध्यमिकशिक्षायाः व्यावसायिकत्वं स्यादपि च विद्यालयशिक्षायाः स्तरेषून्नतये प्रयासो स्यात्।

6. कृषिप्रोद्यौगिकक्षेत्रेषु च 'व्यावसायिकशिक्षा' विकासं प्राप्नुयात्।

7. वैज्ञानिकशैक्षिकानुसन्धानयोश्च प्रगतये प्रयासो स्यात्।

1976 वर्षीयसंविधान-संशोधनेन शिक्षा राज्यसूचितः समवर्त्तिसूचौ स्थानमवाप्तवती। तत्र भावोऽयं निहितोऽऽसीत् यत् शैक्षिक-वितीय-प्रशासनिकदृष्ट्या राष्ट्रियजीवनेन सम्बद्धविषयेषु केन्द्रराज्यसर्वकारयोः मध्ये दायित्वस्य नूतनं सहभागित्वं स्यात्। अनेन राज्यभूमिकायान्तु महत्परिवर्तनं नाभवत् परं शिक्षाक्षेत्रे केन्द्रसर्वकारस्य दायित्वानि संवर्धितानि यथा -

1. शिक्षायाः राष्ट्रियस्वरूपस्य, समाकलनात्मकस्वरूपस्य च बलप्रदानम्।

2. गुणवत्तायां स्तरे च न्यूनत्वं न स्यात्तदर्थं प्रयासः। (यस्मिन् सर्वेषु स्तरेषु शिक्षकाणां शिक्षकप्रशिक्षणस्य गुणवत्ता स्तरश्च सम्मिलिताः सन्ति)

3. विकासान्वितजनशक्तेरावश्यकतां सम्पूरयितुं शैक्षिकव्यवस्थानामध्यय-नमन्वेक्षणञ्च।

4. शोधोच्चाध्ययनयोरावश्यकतानां सम्पूर्त्तिः।

5. शिक्षासंस्कृतिमानवसंसाधनविकासादीनाञ्च अन्ताराष्ट्रियपक्षेष्वधानदानम्।

6. शिक्षायाः प्रत्येकस्मिन् स्तरे उत्कृष्टतायै सततं प्रयासः।

अन्ते वक्तुं शक्यते यत् समवर्तिता सार्थकी परीक्षोन्मुखी च वर्तते। राष्ट्रियशिक्षानीतेः सहयोगेन शैक्षिकोद्देश्यानां प्राप्तिः भवितुमर्हति नान्यथा। तत्समये शिक्षामन्त्रालयनाम्नि परिवर्तनं जातं। इदानीं मन्त्रालयोऽयं 'मानवसंसाधनविकास-मन्त्रालयस्य' नाम्ना ज्ञायते।

अखिलभारतीयशिक्षा-परिषदः (All India Educational Councils)

अद्यापि शिक्षामन्त्रालयेन सङ्घटिताः परिषदः मण्डलानि च कार्यं कुर्वन्ति। एताः परिषद एव शैक्षिकोद्देश्यानां सम्प्राप्तौ साहय्यमाचरन्ति। कतिपयसंस्थानामुल्लेखः अधोनिर्दिष्टो वर्तते -

(1) शिक्षायाः केन्द्रीयपरामर्शदातृमण्डलम् (Central Advisory Board of Education)-

मण्डलमिदम् अति प्राचीनासंस्था वर्तते। शैक्षिकविषयाणामुपरि प्रान्तीयसर्वकारैः विचाराय परामर्शाय च 1921 तमे वर्षे संस्थापितमेतद्। पुनश्च 1923 तमे वर्षे Retrenchment Committee इत्यस्याः परामर्शं लब्ध्वा विघटितं, ततश्च 1935 तमे वर्षे हर्टागसमितेः परामर्शेण पुनर्घटितमिदमद्ययावत् कार्यरतमस्ति -

मण्डलमेतद् मन्त्रालयीय समस्तकार्याणाङ्कृते महत्स्थानं भजते अर्थात् अमुं परित एव सम्पूर्णो कार्यक्रमः प्रसारितः। अस्य सङ्घटनमेवं विहितम् -

1- केन्द्रीयशिक्षामन्त्री (चैयरमैन)

2- भारतसर्वकारस्य शिक्षापरामर्शदाता

3- सर्वकारेण अभिचिताः 15 सदस्याः, यत्र चतस्रः स्युः।

4- संसदः पञ्चसदस्याः (द्वौ राज्यसभायाः त्रयश्च लोकसभायाः)

5- भारत सर्वकारस्य विश्वविद्यालयस्य प्रतिनिधिषु अन्तर्विश्वविद्यालय-मण्डलद्वारा चितौ द्वौ सदस्यौ।

6- परिषदा चितौ अखिलभारतीयप्राविधिकशिक्षापरिषदः द्वौ सदस्यौ।

7- प्रान्तीयसर्वकारस्य प्रतिनिधिः (यः शिक्षामन्त्री भवति)।

8- केन्द्रीयसर्वकारेण नियुक्तः भविष्यति मण्डलसचिवः। प्रायः केन्द्रीयशिक्षा-मन्त्रालयस्य शिक्षासचिवो हि एतत्पदमलङ्करोति।[1]

1. Government of India, Ministry of education, Notification No. 6-2-50 D 1, May 25, 1950

मण्डलस्य कार्यद्वयं भवति –

1. केन्द्रसर्वकारेण राज्यसर्वकारेण वा प्रस्तुतस्य कस्यापि शिक्षासम्बद्ध-प्रश्नस्योत्तरप्रदानम्।

2. भारतसर्वकारस्य शैक्षिकविकाससम्बद्धानां महत्सूचनानां परामर्शाणाञ्चै-कत्रीकरणम् अन्वेक्षणात्परञ्च विविधपरामर्शैस्साकं भारतसर्वकारस्य राज्यसर्वकारस्य च समक्षे प्रस्तुतीकरणञ्च।[1]

वर्षैकवारमस्य सभा योजिता भवति तदानीं विविधशैक्षिकसमस्यानामुपरि विचारात्परं परामर्शाः दीयन्ते। मण्डलमेतद् "प्राथमिकशिक्षासमितिः, सामाजिक-शिक्षासमितिः, माध्यमिकशिक्षासमितिः, उच्चशिक्षासमितिः" इति समितिचतुष्टयेन साकं कार्यं सम्पादयति।

1986 वर्षीया राष्ट्रियशिक्षानीतिद्वारा केन्द्रीयशिक्षापरामर्शदातृपरिषदोपरि शिक्षायाः प्रबन्धे महत्दायित्वानि प्रदत्तानि। मण्डलमेतद् शैक्षिकविकासस्य पुनर्निरीक्षणेन सह तदुन्नतयेऽऽवश्यकपरिवर्तनानि नियोजयिष्यति। किञ्च उपर्युक्तसमितीनां माध्यमेन मानवसंसाधनविकासमन्त्रालयेन विविधक्षेत्रेषु समन्वयाय निर्मापितप्रक्रमाणां माध्यमेन च कार्यं करिष्यति। केन्द्रराज्ययोःशिक्षाविभागानां सुदृढतायै व्यावसायिकयोग्यतान्वितानां व्यक्तीनां चयनं करिष्यति।

(2) अखिलभारतीयप्रारम्भिकशिक्षापरिषद् (All India Council for Elementary Education) –

अस्याः संस्थापनं शिक्षा–वैज्ञानिकानुसन्धानमन्त्रालयेन 1957 तमे वर्षे कृतम्। षट्तः चतुर्दशावस्थापर्यन्तानां छात्राणाङ्कृते निःशुल्कानिवार्यतया च शिक्षाप्रदानाय विविधायोजनानां निर्माणमेवास्याः महदुद्देश्यम्। केन्द्रीयसर्वकारेण राज्यसर्वकाराणां स्थानीयसंस्थानाञ्च पथप्रदर्शनं स्वदायित्वनिर्वहनञ्चास्याः माध्यमेनैव क्रियते। अस्याः सङ्घटनमधोनिर्दिष्टसंस्थाभिः सम्प्रेषितप्रतिनिधिभिः भवति –

1. राज्यसर्वकारणां प्रतिनिधयः
2. केन्द्रीयपरामर्शदातृमण्डलम्
3. अखिलभारतीयमाध्यमिकशिक्षापरिषद्
4. प्रशिक्षणमहाविद्यालयानां प्रतिनिधयः

---

1. The organization of Government of India, op. cit, p. 260

5. बेसिकशिक्षाविषयकशिक्षामर्मज्ञाः

6. शिक्षामन्त्रालयस्य प्रतिनिधयः

7. निम्नवर्गाणां बालिकानाञ्च शिक्षाविषयकशिक्षामर्मज्ञाः।

अस्याः परिषदः निम्नकार्याणि निर्धारितानि -

(1) प्रारम्भिकशिक्षासम्बन्धिविषयेषु केन्द्रराज्यसर्वकाराणां स्थानीय-समितीनाञ्च कृते परामर्शप्रदानम्।

(2) प्रारम्भिकशिक्षायाः प्रशासकवित्तशिक्षणशास्त्रान्वितसमस्यानामनुसंधान-निष्कर्षप्रकाशनञ्च।

(3) शिक्षाविभागानां शिक्षकस्तरे चोन्नतिर्यथा स्यात् तादृशसाहित्यनिर्माणम्।

(4) प्रारम्भिकशिक्षाविस्तारायोन्नतये चोपयुक्तोपायानां निर्देशनं नेतृत्वप्रदानञ्च।

(5) प्रत्येकस्मिन् राज्ये प्रारम्भिकशिक्षास्तरस्योन्नतये विस्ताराय च विस्तृतकार्यक्रमनिर्माणम्।

राष्ट्रियशिक्षानीतिः 1986 तः प्रारम्भिकशिक्षायां विषयद्वये विशिष्टं बलं प्रदत्तम् -

(1) चतुर्दशवर्षावस्थापर्यन्तानां सर्वेषाङ्कृतेशिक्षाऽनिवार्यत्वेन स्यात्।

(2) शिक्षायाः गुणवत्तायामुन्नतिर्विकासश्च अनयोरुद्देश्ययोःप्राप्त्यर्थम् अखिल-भारतीयप्रारम्भिकशिक्षापरिषद् द्वारा महद्बलं दीयते। इयं परिषद् प्राथमिक-विद्यालयानाङ्कृतेऽऽवश्यकसौविध्यं प्रदातुं ''ऑपरेशन ब्लैकबोर्ड'' इत्याख्यां योजनां सञ्चालयति। किञ्च सौविध्याभावाद् ये खलु छात्राः विद्यालयमागत्याध्येतुन्न प्रभवन्ति तेभ्यः अनौपचारिकशिक्षा (Nonformal Education) कार्यक्रमाः सञ्चालयति।

(3) अखिलभारतीयमाध्यमिकशिक्षापरिषद् (All India Council for Secondary Education) -

अस्याः परिषदः संस्थापनं 1955 तमे वर्षेऽभवत्। देशे राष्ट्रे वा माध्यमिक-शिक्षोन्नतये विशिष्टसंस्थारूपेण कार्यकरणमेवास्याः प्रधानभूतमुद्देश्यं वर्तते। तदानीं स्थापनाकालेऽस्याः द्वाविंशतिः सदस्याः भारतसर्वकारस्य शिक्षापरामर्शको-ऽध्यक्षश्चासन्। अस्याः कृते परामर्शसम्बन्धि, कार्यपालिकासम्बन्धीति कार्यद्वयमासीत् परिषदियं भारतीयकेन्द्रराज्यसर्वकाराणाङ्कृते परामर्शदानेन सह माध्यमिक-शिक्षास्तरोन्नतये प्रचाराय चाधिकृतासीत्। 1955-1958 यावदियमित्थमेव कार्यमकरोत्।

परं 1958 तमे वर्षे पुनर्घटनात्परमेषा केवलं 'माध्यमिकशिक्षापरिषद्' सम्बन्धि-कार्याणाङ्कृते एव सन्नियोजिता। कार्यपालिकाकार्याणाङ्कृते Directorate of Extension Programmes for Secondary Education (DEPSE) इत्यादयः संस्थाः संनियोजिताः। साम्प्रतमस्याः परिषदः कार्यं परामर्शप्रदानमेव वर्तते। पुनः सङ्घटितायामस्यां परिषदि निम्नसंस्थानामेव (निकाय) प्रातिनिध्यं वर्तते –

1. केन्द्रीयशिक्षामन्त्रालयः
2. केन्द्रीयवित्तमन्त्रालयः
3. अखिलभारतीयप्राविधिकशिक्षापरिषद्
4. विश्वविद्यालयानुदानायोगः
5. अखिलभारतीयशिक्षासमुदायसंघः
6. प्रशिक्षणमहाविद्यालयानां समुदायः
7. भारतसर्वकारनियोजिताः राज्यस्य प्रतिनिधिः
8. अखिलभारतीयप्रारम्भिकशिक्षापरिषद्

राष्ट्रियशिक्षानीतेः क्रियान्वयनात्परं समग्रेऽपि राष्ट्रे नूतनगतिनिर्धारका 'नवोदयविद्यालयः' इत्याख्येन प्रथितानां प्रसिद्धविद्यालयानां संस्थापनमभवत्। सन्दर्भेऽस्मिन् राष्ट्रियशिक्षानीतौ (1986) लिखितमस्ति – "राष्ट्रस्य विभिन्नभागेषु संनिर्धारितप्रारूपानुसारं गतिनिर्धारकविद्यालयानां संस्थापनं करिष्यते तत्र शिक्षाक्षेत्रे नूतनपद्धतीनां प्रयोगस्य स्वतन्त्रता भविष्यति। शिक्षायां समत्वं सामाजिकन्याये उत्कृष्टत्वमेवेषां महदुद्देश्यं भवष्यिति। अनुसूचितजाति-जनजातिसम्बद्धछात्राणां प्रवेशायारक्षणं भविष्यति एषु विद्यालयेषु। किञ्च तत्र प्रमुखतया ग्राम्यप्रतिभाशालि-छात्राणां प्रवेशेन राष्ट्रियैक्यभावना प्रस्फुटिता भविष्यति। प्रत्येकस्मिन् क्षेत्रे छात्राणाङ्कृते स्वक्षमतानां प्रदर्शनायात्रावसरो दास्यते। किञ्च एते विद्यालयाः समग्रभारते विद्यालयस्तरोन्नतिकार्यक्रमे उत्प्रेरकत्वेन स्थास्यन्ते। निःशुल्कावासीयाश्च भविष्यन्तीमे।"

(4) विश्वविद्यालयानुदानायोगः (University Grants Commission)–

1948 तमे वर्षे "विश्वविद्यालयशिक्षायोगेन" दत्तपरामर्शैः 1953 तमे वर्षे विश्वविद्यालयानुदानायोगः संस्थापितः। 1956 तमे वर्षे संसदधिनियमेन- वैधानिकत्वं (Statutory Body) प्राप्तवान्। अधिनियममनुसृत्य अत्र अध्यक्षसचिवातिरिक्तं

नवसदस्याः भविष्यन्ति। तत्र त्रयो विश्वविद्यालयानां कुलपतयः, चत्वारो ख्यातशिक्षामर्मज्ञाः, द्वौ केन्द्रीयसर्वकारप्रतिनिधी च भवन्ति। साम्प्रतं आचार्य अरुण निगवेकर् अध्यक्षपदमलङ्कुर्वाणः विश्वविद्यालयशिक्षास्तरस्य उन्नतये प्रयत्नशीलः वर्तते।

अस्यायोगस्याधोनिर्दिष्टकार्याणि वर्तन्ते –

(1) विश्वविद्यालयीयं शैक्षिकस्तरमुच्चतमं यथा स्यात्तदर्थं परामर्शप्रदानम्।

(2) भारतीयविश्वविद्यालयेषु शिक्षास्तरस्य समन्वयाय तत्तच्छिक्षासम्बन्धि-समस्यासु विशेषज्ञसंस्थारूपेण भारतसर्वकाराय परामर्शप्रदानम्।

(3) विश्वविद्यालयान् स्वकोषद्वारा दीयमानस्य धनराशेर्वितरणं नीतेः निर्धारणञ्च।

(4) नूतनविश्वविद्यालयानां संस्थापनं प्रचलितविश्वविद्यालयानां अभिवृद्धये समुचितपरामर्शः।

(5) भारतसर्वकारस्य विश्वविद्यालयानां च नानाप्रश्नानां समाधानम्।

(6) विश्वविद्यालयानामार्थिकस्थितेरन्वेक्षणम्, केन्द्रीयसर्वकारेण प्रदत्तस्य अनुदानरूपेण दीयमानधनराशेः परामर्शः।

(7) विश्वविद्यालयशिक्षाया विस्ताॐण विकासेन च सम्बद्धावश्यककार्याणां सम्पूर्त्तिः।

(8) विश्वविद्यालयैः तत्तत्परीक्षापाठ्यक्रमानुसंधानादिकार्याणां सम्बन्धे सूचनाप्राप्तिः।

(9) विश्वविद्यालयानाङ्कृते स्वदेशात् विदेशेभ्यश्च उपयुक्तसूचनानामेकत्रीकरणं कृत्वा विश्वविद्यालयेभ्यः सम्प्रेषणम्।

(10) विश्वविद्यालयप्रदत्तोपाधीनां विषये केन्द्रराज्यसर्वकारेभ्यः परामर्शप्रदानम्।[1]

उपर्युक्तानि कार्याणि व्यतिरिच्य साम्प्रतमायोगोऽयम् इतराण्यपि बहूनि कार्याणि सम्पादयति तानि यथा[2] –

(1) विकासात्मकपरियोजनानां सञ्चालनम्। (2) शिक्षकाणां वेतनमाने सौकर्यम्। (3) विभिन्नविश्वविद्यालयेषु 'अध्ययनकेन्द्राणां' संस्थापनम्।

1. University Grants Commission Act, 1966 section 12.
2. Hindustan Year Book 1978, P. 175.

(4) छात्रावासानां निर्माणम्। (5) सेवानिवृत्तशिक्षकाणां सेवाया उपयोगकरणम्। (6) शिक्षकाणां विनिमयः। (7) छात्रवृत्तीनां व्यवस्था।

साम्प्रतमायोगः विज्ञानाभियन्तृप्रोद्यौगिकीनां द्वाषष्टिविभागानाम् एकोनविंशाध्ययनकेन्द्राणाङ्कृते च साहय्यमाचरति। किञ्च मानवशास्त्रसमाजविज्ञानसम्बद्धानां दशसंङ्ख्यकानामध्ययनकेन्द्राणां पञ्चविंशतिविभागानाङ्कृते च विशिष्टं साहय्यमाचरति[1] आयोगेनानेन एकादशाधिकशतं महाविद्यालयाः स्वायत्तत्वं गताः तेषु त्रयोविंशतिः आन्ध्रप्रदेशस्य, चतुश्चत्वारिंशत् तमिलनाडुप्रान्तस्य, त्रिंशद् मध्यप्रदेशस्य, पञ्च राजस्थानस्य, पञ्च उड़ीसाप्रान्तस्य, द्वौ गुजरातप्रान्तस्य, द्वावेव च उत्तरप्रदेशस्य वर्तन्ते।[2]

किञ्चानेनायोगेन प्रथमोपाधिकपाठ्यक्रमस्य पुनर्निर्माणाय योजना प्रस्ताविता। तेन पाठ्यक्रमः इदानीन्तनावश्यकतानुगुणं वातानुकूलं च स्यात्तदर्थं बलं प्रदत्तम्। किञ्च शिक्षा व्यावहारिकत्वं, उत्पादकत्वञ्च यथा प्राप्नुयात्तथा बलं प्रदत्तम्। इत्थमेवायमायोगः नवसङ्ख्यकानां विश्वविद्यालयानाम् अष्टोतरद्विशतमहाविद्यालयानां पाठ्यक्रमं संशोध्य पुनर्निर्मितं पाठ्यक्रमं प्रारब्धवान्।

शिक्षणाधिगमप्रक्रियायाः समुन्नतयेऽऽयोगेनेमे कार्यक्रमाः प्रारब्धाः –

(1) महाविद्यालय–मानवसमाजविज्ञानाभिवृद्धिकार्यक्रमः (College Humanities & Social Science Improvement Programme - CHSSIP)

(2) महाविद्यालयविज्ञानाभिवृद्धिकार्यक्रमः (College Science Improvement Programme - CSIP)

(3) विश्वविद्यालयीयनेतृत्वकार्यक्रमाः (University Leadership Programmes)

(4) विशिष्टसहायताकार्यक्रमाः (Special Assistance Programmes - SAP)

(5) पाठ्यक्रमविकासकेन्द्राणि (Curriculum Development Centres)

आचार्यराममूर्तिसमित्या विश्वविद्यालयानुदानायोगस्य पुनः सङ्घटनाय परामर्शो दत्तः, समितेरयं विचारोऽऽसीत् –

(1) आयोगस्य शिक्षणानुसन्धानप्रसारप्रबन्धवित्तसम्बन्धिनः पञ्च सदस्याः पूर्णकालिकाः स्युः।

1. Manorma Year Book, 1988, P. 494.
2. India 1994, P. 94.

(2) एतदतिरिच्य अध्यक्षोपाध्यक्षावपि स्याताम्।

(3) समागतसमस्यानां निवारणाय तत्क्षेत्रीयकार्यालयानां संस्थापनं स्यात्।

(5) अखिलभारतीयप्राविधिकशिक्षापरिषद् (All India council for Teachnical Education)

1945 तमे वर्षे अस्याः परिषदः स्थापनं 'सर्वकारसमितेः' परामर्शेनाभवत्। साम्प्रतमेषा विश्वविद्यालयानुदानायोगवत् वैधानिकनिकायरूपेण समाख्याता। 1987 वर्षीयाखिलभारतीयप्राविधिकशिक्षापरिषदः अधिनियममनुसृत्यैतानि कार्याणि निर्दिष्टानि –

1. प्राविधिकशिक्षायाः नियोजनम्।
2. स्तराणां मानदण्डानां निर्धारणमनुरक्षणञ्च।
3. प्रत्यायनम् (Accreditation)।
4. प्राथमिकत्वप्राप्तक्षेत्राणाङ्कृते वित्तीयव्यवस्थापनम्।
5. अनुश्रवणं (Monitoring) मूल्याङ्कनञ्च।
6. प्रमाणनम् (Certification)।
7. उपाधीनां समकक्षत्वस्य निर्धारणम्।
8. प्राविधिकप्रबन्धशिक्षयोर्मध्ये समन्वयस्थापनम्। राष्ट्रियशिक्षानीतौ 'प्राविधिकीप्रबन्धशिक्षे च समाने' इति धिया प्राविधिकजनशक्तिसूचनापद्धतेः (Technical Manpower Information) विकासाय सुदृढीकरणाय च संकल्पः कृतः। शिक्षायाः सर्वेषु स्तरेषु च संगणकशिक्षा व्यावसायिकशिक्षा च सुदृढा स्याताम् तदर्थं प्रयासो विहितः।

(6) राष्ट्रियग्रामीणोच्चशिक्षापरिषद् (National Council for Rural Higher Education)

अस्याः परिषदः संस्थापनं 1956 तमे वर्षे "श्रीमाली समितेः" परामर्शेनाभवत्। ग्रामीणशिक्षास्तरोन्नतये प्रसाराय च केन्द्रराज्यसर्वकाराणां विशेषज्ञसंस्थारूपेण परामर्शायेयं संस्थापिता। किञ्चेयं परिषद् ग्राम्यविकासयोजनासु भागं ग्रहितुं संस्थानाङ्कृतेऽनुदानं प्रदातुमपि भारतसर्वकारं परामर्शयति। किञ्च ग्रामीणक्षेत्रेषु जायमानानां शिक्षासमस्यानामन्वेक्षणं कृत्वा तत्समाधानाय च विविधयोजनाः निर्माति। अनया च ग्राम्योच्चशिक्षायै चतुर्दशसंस्थानां स्थापना कृता। अपि च महात्मगांधीनां शैक्षिकविचारान्ननुसृत्य ग्रामीणविश्वविद्यालयस्य नूतनसंरचनापि संकल्पिता। अस्याः

सूक्ष्मं नियोजनं ग्रामीणक्षेत्राणां पुनरुत्थानायाधारत्वेनाङ्गीकृतम्।

(7) राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् (National Council for Educational Research & Training)

''शैक्षिकानुसंधानस्योन्नतिः, प्रकाशनसमन्वयप्रशिक्षणप्रसारसेवानामुन्नतिश्च इत्येतानि कार्याणि वर्तन्ते केन्द्रसर्वकारस्य। कार्यस्यास्य सम्पूर्त्तये 1961 तमे वर्षे शिक्षामन्त्रालयेन सङ्घटनमेकं संस्थापितम्। तच्च साम्प्रतं ''राष्ट्रियशैक्षिकानुसंधान-प्रशिक्षणपरिषद्'' इत्याख्येन प्रसिद्धिं भजते। स्वायत्तसंघटनमेतदधोनिर्दिष्टसदस्यान्वितं वर्तते –

1. भारतसर्वकारस्य शिक्षापरामर्शकः
2. दिल्लीविश्वविद्यालयस्य कुलपतिः
3. विश्वविद्यालयानुदानायोगस्याध्यक्षः
4. राज्यसर्वकारस्य प्रतिराज्यम् एकः प्रतिनिधिः
5. भारतसर्वकारेण अभिचिताः द्वादश सदस्याः।

सङ्घटनमिदं मानवसंसाधनविकासमन्त्रालयस्य शैक्षिकविभागत्वेन (Academic Wing) कार्यं सम्पादयति।[1] किञ्च विद्यालयशिक्षासम्बन्धिनीतीनाङ्कृते सुदीर्घकार्यक्रमाणां निर्माणे कार्यान्वयने च साहय्यमाचरति। विद्यालयीयशिक्षाक्षेत्रे तस्य विविधनीतीनां निर्धारणे विविधकार्यक्रमाणां सञ्चालने च मन्त्रालयस्य साहाय्यं करोति। सङ्घटनस्य कानिचन कार्याण्येवं भवन्ति[2] –

1. विद्यालयशिक्षासम्बन्ध्याध्ययन-पर्यवेक्षणे।
2. विद्यालयशिक्षकाणाङ्कृते उन्नतस्तरस्य प्रशिक्षणस्य व्यवस्थापनम्।
3. शैक्षिकविस्तृतसेवानां सङ्घटनम्।
4. विद्यालयोन्नतशैक्षिकप्रविधीनां व्यवहाराणाञ्च सभारम्भः।
5. विद्यालयशिक्षासम्बन्धिविचाराणां तत्सूचनानाञ्च कृते एकं निकासी गृहरूपे (Clearing House) कार्यकरणम्।

उपर्युक्तकार्याणां सम्यक्रीत्या सञ्चालनाय परिषदियं प्रान्तीयशिक्षाविभागैः, विश्वविद्यालयैः, विद्यालयशिक्षासम्बद्धेतरसंस्थाभिश्च सुसम्पर्कं स्थापयितुं प्रयत्नशीला वर्तते। किञ्चेयं 'यूनेस्को, यूनीसेफ इति अन्ताराष्ट्रियसङ्घटनानाङ्कृतेऽपि साहाय्यमा-

1. India, 1986, P. 79.
2. India, 1971-72, P. 77.

चरितुं सुसम्पर्कं स्थापयति। विद्यालय–शिक्षा, शिक्षक–शिक्षा च बहुप्रभाविते परिषदा अनया इति।

अनया परिषदा 'राष्ट्रियशिक्षासंस्थानम्' (National Institute of Education) इत्यस्यापि संस्थापनं कृतम्। अनुसंधानसङ्घटनं वर्तते यत्र विविधविभागाः वर्तन्ते –

(1) केन्द्रीयशिक्षा–संस्थानम् (Central Institute of Education)

साम्प्रतमेतद् ''कोठारी आयोगानुशंसया'' दिल्लीविश्वविद्यालयेन सम्बद्धमभवत्।

(2) शिक्षण–सामग्रीविभागः (Department of Teaching Aids)

विभागोऽयं 1984 तमे वर्षे पूर्णविकसितसंस्थानरूपे परिवर्तितः ''केन्द्रीय–प्रोद्यौगिकीसंस्थानम्'' नाम्ना प्रसिद्धश्च।

(3) शैक्षिक–पर्यवेक्षण–एककः (Educational Survey Unit)

(4) आधारशिक्षाविभागः (Department of Basic Education)

(5) विज्ञानशिक्षाविभागः (Department of Science Education)

(6) समाजविज्ञानमानवीयशास्त्रविभागश्च (Department of Social Science & Humanities)

(7) अभिलेख–सूचनैककः (Documentation & Information Unit)

(8) पूर्वप्राथमिक–प्राथमिकशिक्षाविभागः (Department of Pre-Primary & Primary Education)

(9) शिक्षक–शिक्षाविभागः (Department of Teacher Education)

(10) पाठ्यपुस्तक–प्रकाशनैककः (Department of Text Book & Publication Unit)

अजमेर–भोपाल–भुवनेश्वर–मैसूरादिषु नगरेषु परिषदः चत्वारः क्षेत्रीय–महाविद्यालयाः वर्तन्ते। एते विद्यालयशिक्षाक्षेत्रेऽनेकगतिविधीनां सञ्चालनाय प्रयतन्ते तथा च गतिविधिषु सक्रियरूपेण सम्भागितापि कुर्वन्ति। विशिष्य विज्ञानशिक्ष–काणाङ्कृते ग्रीष्मसंस्थानानि (Summer Institute) सञ्चालयन्ति।

विविधप्रान्तेषु च सप्तदशक्षेत्रीयकार्यालयानामपि संस्थापनं कृतमनया।[1] एते प्रान्तेषु क्रियान्वितकार्यक्रमाणां विषये परिषदमवबोधयन्ति। परिषदकृतेषु

.1. India, 1986, P. 79.

पाठ्यक्रमविषयककार्येष्वपि साहाय्यं कुर्वन्ति। परिषद् द्वारा 10 + 2 + 3 पद्धतेः कृते एकतः द्वादशकक्ष्यापर्यन्तछात्राणाङ्कृते विषयक्रमातिरिक्तं पाठ्यक्रमोऽपि निर्मापितः। परिषदियं आङ्ग्लहिन्दीभाषाद्वयेऽपि विद्यालयस्तरीयविषयाणाङ्कृते आदर्शपरकपाठ्यपुस्तकानि प्रकाशयति। इमान्येव पुस्तकानि प्रान्तेषु आदर्शत्वेन प्रयुज्यन्ते।

किञ्चेयं परिषदधोनिर्दिष्टपत्रपत्रिकाणामपि प्रकाशनं करोति –

1. भारतीयशिक्षापुनरीक्षणम् (Indian Education Review)
2. भारतीयशिक्षा (Journal of Indian Education)
3. विद्यालयविज्ञानम् (School Science)
4. प्राथमिकशिक्षकः (Primary Teacher)
5. भारतीयाधुनिकशिक्षा
6. प्राथमिकशिक्षकः

अत्र अन्तिमद्वयव्यतिरिक्तं चत्वारि पत्राणि आङ्ग्लभाषायां प्रकाशितानि भवन्ति द्वे च हिन्दीभाषायां प्रकाश्येते।

परिषदियं विविधविभागैककक्षेत्रीयकार्यालयादीनां माध्यमेन राष्ट्रियशिक्षा-नीतेरारम्भणाय प्रयत्नशीला वर्तते। अनया निम्नलिखितक्षेत्रेषु विशिष्टं कार्यं कृतम् –

1- शैक्षिकानुसन्धानम् – साम्प्रतं परिषदियं विद्यालयशिक्षासम्बन्धेऽनुसन्धान-कार्यं करोति। अस्याः परिषदोऽनुसन्धानपरकक्रियाणां सञ्चालनं विशेषसमितिद्वारा क्रियते। समितिरियं 'Educational Research & Innovation Committee (ERIC)' इत्याख्येन प्रसिद्धा वर्तते। इयं प्रारम्भिकशिक्षायाः सार्वजनीकरणाय, व्यावसायीकरणाय, पाठ्यक्रमविकासाय चानुसंधानं कुर्वती अस्ति।

2- पाठ्यक्रमस्य पाठ्यपुस्तकानाञ्च निर्माणम्।

3- राष्ट्रियप्रतिभान्वेषणयोजनाः।

4- 'विज्ञान-किट' इति।

5- शैक्षिककार्याणि।

6- व्यावसायीकरणसम्बद्धकार्यक्रमाः।

7- समाजोपयोगि-उत्पादककार्यसम्बद्धनिर्देशकसामग्रयः।

8- अनुसूचितजाति-जनजातिसम्बद्धकार्यक्रमाः।

9- पूर्वबाल्यकालिकशिक्षा। (Early Childhood Education)

10- यूनाङ्कृते निरौपचारिकशिक्षा। (Non-formal Education for Youth)

11- राष्ट्रियजनसङ्ख्याशिक्षाकार्यक्रमाः।

12- मूल्यशिक्षा (Value Education)

13- स्वास्थ्यशिक्षा पर्यावरणस्वच्छता च (Health Education & Environmental Sanitation)।

(8) केन्द्रीयसमाज-कल्याणमण्डलम् (Central Social Welfare Board)

भारतसर्वकारेण मण्डलमिदं 1953 तमे वर्षे संस्थापितम्। अत्र प्रधानमेकं व्यतिरिच्य द्वादश सदस्याः भवन्ति। अस्य अधोनिर्दिष्टानि प्रमुखकर्त्तव्यानि वर्तन्ते –

1. विविधस्थानेषु समाजकल्याणसंस्थानां संस्थापनम्।
2. समाज-कल्याणसम्बन्धिकार्याणां नियोजनं सञ्चालनञ्च।
3. सेवारतनारीणाङ्कृतेऽऽवासव्यवस्था।
4. असहायान्धानां साहाय्यं कर्तुं प्रयासः।
5. राष्ट्रे समाज-कल्याणकार्यकर्तृकमण्डलानामावश्यकतायाः मूल्याङ्कनम्।

(9) वैज्ञानिकप्रौद्योगिकयोरनुसंधानपरिषद्

(COUNCIL OF SCIENTIFIC & INDUSTRIAL RESEARCH (CSIR)

परिषदियं 1942 तमे वर्षे स्वतन्त्रविभागत्वेन संनियोजिताऽभवत्। अस्याः माध्यमेन भारतसर्वकारः वैज्ञानिकानुसंधानं कारयति। अस्याः कतिपयकार्याण्येवं निर्दिष्टानि –

1. भारते वैज्ञानिकप्रौद्योगिकयोरनुसंधानाय प्रोत्साहनं निर्देशनञ्च।
2. वैज्ञानिकाध्ययनस्य कृते विशिष्टसंस्थानां विभागानाञ्च संस्थापनेन साकं तेषां विकासः।
3. अनुसन्धानछात्रवृत्तीनां व्यवस्थापनम्।
4. अनुसंधानकृतान्वेषणानामुपयोगः।
5. वैज्ञानिकप्रौद्योगिकानुसंधानयोरुन्नतये उपयुक्तप्रयोगशालाकार्यक्षेत्राणाञ्च व्यवस्थापनम्।

6. औद्योगिकवैज्ञानिकानुसंधानपरकपत्र–पत्रिकादीनां प्रकाशनञ्च।

(10) राष्ट्रियशैक्षिकयोजनाप्रशासनसंस्थानम्

(National Institute of Educational Planning & Administration)

संस्थानमेतद् भारतसर्वकारेण शैक्षिकनियोजनप्रशासनञ्चेति क्षेत्रद्वये राष्ट्रस्योत्कृष्टतमसंस्थानत्वेन अङ्गीकृतम्। एतद् 1962 तमे वर्षे 'यूनेस्को' इति संस्थया सह दशवर्षीयसंविदान्तर्गतत्वेन स्थापितम् तदानीं 'एशियन इन्स्टीट्यूट ऑफ एज्यूकेशनल प्लानिंग एण्ड एडमिनिस्ट्रेशन' इत्यभिधेयेन प्रसिद्धमासीत्। संविदासमाप्तेः पश्चाद् शिक्षायोगानुदेशं प्राप्य भारतसर्वकारेणाधिकृतमभिधेयञ्च 'नेशनल स्टाफ कॉलेज फॉर एज्यूकेशनल प्लानर्स एण्ड एडमिनिस्ट्रेटर्स' इति परिवर्तितम्। मई 1979 तमे वर्षे संस्थानमिदं ''राष्ट्रियशैक्षिकयोजनाप्रशासनसंस्थानम्'' इत्यभिधेयेनालंकृतभवत्। साम्प्रतञ्च नवदिल्लीनगरे संस्थितं वर्तते।

संस्थानस्य कार्याणि – अस्य कार्यविवेचनमेवमुद्घाटयितुं शक्यते –

(1) शिक्षानियोजकानां प्रशासकानाञ्च प्रशिक्षणम् – संस्थानमेतद् भारतस्य शैक्षिककार्यकर्तॄणां प्रशिक्षणाय विविधान् कार्यक्रमान् सञ्चालयति शैक्षिकनीतीनामुपरि विचाराय विविधसम्मेलनकार्यशालाः चायोजयति। अनेन अद्यावधि सहस्त्राधिकारिणः प्रशिक्षिता अभूवन्। मण्डलशिक्षाधिकारिणां कृते उपाधि– पाठ्यक्रमानपि सञ्चालयति तत्र DEPA (Diploma in Educational Planning & Administration) इति षण्मासीयप्रशिक्षणं प्रसिद्धं भजते। अत्र मासत्रयं यावत् पाठ्यक्रमकार्यमवशिष्टे समये च व्यवसायसम्बद्ध – प्रायोजनाकार्यं सम्पाद्यते। अनेन समायोजितेषु प्रशिक्षणकार्यक्रमेषु अफगानिस्थान–भूटान–बांग्लादेश–चीन–इथोपिया–हंगरी–इण्डोनिशिया–कोरिया–मलेशिया–नेपाल–मॉरीशस–पाकिस्तान–फिलीपीन्स–श्रीलङ्का–थाईलैण्ड–संयुक्तराज्यामेरिका–यूगोस्लाविया इति नैकराष्ट्राणि भागगृह्णन्। अनेन सिद्ध्यति यत् न केवलं भारतवर्षस्य कृते अपितु विदेशीयराष्ट्राणाङ्कृतेऽपि प्रशिक्षणकार्यक्रमान् संचालयति संस्थानमेतद्।

(2) अनुसन्धानम् – संस्थानमेतदनुसन्धानक्षेत्रेऽपि महत्प्राधान्यं भजते। अत्र सर्वेक्षणं, विश्लेषणात्मकाध्ययनमनुसंधानप्रायोजनाः प्रमुखाः वर्तन्ते।

(3) नवाचाराणां प्रसारः – नवाचाराणां प्रसारायापि महत्भूतकार्याणि सम्पादयतीदम्। अस्य कृते 1983 तमे वर्षे संस्थानेनानेन अन्ताराष्ट्रियभ्रमणान्यपि समायोजितानि किञ्च विविधप्रान्तेषु प्रयुक्तनवाचाराणां प्रसारणायानेकमाध्यमान्यपि

प्रयुक्तानि।

(4) परामर्शदातृसेवा - संस्थानमेतद् विविधप्रान्तानां संघीयक्षेत्राणाञ्च कृते परामर्शं ददाति। अनेन जम्मूकश्मीर-सिक्किम-दादरा-नागरहवेली-हरियाणादिप्रान्तेषु कार्यमेतद् सम्पादितम्। हरियाणाप्रान्तस्यानुशंसया विद्यालयानां स्थापने प्रोन्नतये च तत्तद्मानकान्यपि निर्मापितानि।

(5) प्रकाशनकार्यक्रमः - संस्थानमेतद् शैक्षिकनियोजन - प्रकाशन-सम्बन्धिनां पुस्तकानि, पत्र-पत्रिकाः प्रतिवेदानादिकं च विषये प्रकाशयति।

(अ) पुस्तकानि यथा - 1- 'एज्यूकेशन एण्ड दी न्यू सोशल आर्डर' (Education & The New Social Order)

2- 'रिवेटेलाइजिंग स्कूल कॉम्पलेक्सेज इन इंडिया' (Revitalising School Complexes In India)

(ब) पत्रिकाः - 'शैक्षिकयोजनाप्रशासनञ्च' इत्याख्येन प्रसिद्धैका पत्रिकापि प्रकाश्यते। इयञ्च आङ्ग्लहिन्दीभाषाद्वये प्रकाशिता भवति।

(स) प्रतिवेदनम् - संस्थानेन विभिन्नप्रायोजनानां प्रतिवेदनान्यपि प्रकाशितानि।

(6) सहयोगः - विश्वविद्यालयानुदानायोगः, राष्ट्रियशैक्षिकानुसंधान-प्रशिक्षणपरिषद्, विज्ञानप्रौद्यागिकञ्चानुसन्धानपरिषद्, योजनायोगः, भारतीय-लोकप्रशासनसंस्थानं, भारतीयसामाजिकविज्ञानानुसंधानपरिषद्, नेशनल इन्स्टीट्यूट ऑफ एप्लाइड मेनपावर रिसर्च, केन्द्रीयविद्यालयसङ्घटनं, प्रौढशिक्षानिदेशालयः इत्यादिविभिन्नराष्ट्रियसङ्घटनैस्सह सहयोगं सम्बन्धञ्च स्थापयति संस्थानमेतत्। न केवलं राष्ट्रियैरेवापितु अन्ताराष्ट्रिय सङ्घटनैरपि गरीयान् सम्बन्धो वर्तते अस्य। तत्र यूनेस्को-क्षेत्रीयकार्यालयः, बैंकॉक-इन्स्टीट्यूट ऑफ एज्यूकेशनप्लानिंग, पेरिस-कॉमनवेल्थसचिवालयः, लन्दने इत्येतादृशानि संस्थानानि प्रामुख्यं भजन्ते।

इत्थं केन्द्रसर्वकारीयशिक्षाक्षेत्रसम्बद्धकार्येषु तन्नेतृत्वं राज्यसर्वकारसञ्चालित-निजीविद्यालयानाङ्कृते साहय्यप्रदानं, उच्चशिक्षायाः विकासः, संघक्षेत्रेषु शिक्षणव्यवस्था, केन्द्रीयविश्वविद्यालयानां प्रशासनम्, अखिलप्रान्तेषु शिक्षाव्यवस्थायां सामञ्जस्यञ्च इत्यादिप्रावधानानि वर्तते संस्थानस्यास्य। यद्यपि केन्द्रसर्वकारेण शिक्षादायित्वस्य सम्पूर्त्तये नानापरामर्शदातृमण्डलानां परिषदाञ्च सङ्घटनं विहितं परं कार्यक्षेत्रस्यातिविस्तृतत्वात् इदानीं यावत् लक्ष्यं नाधिगतमास्माभिः यतो हि षट्तः चतुर्दशवर्षीयावस्थापर्यन्तानां सर्वेषाङ्कृते निःशुल्कानिवार्या च शिक्षा स्यात्

इति संविधाने स्पष्टीकृतं परं लक्ष्यसम्पूर्त्तिः न जाता। किञ्च माध्यमिकस्तरेऽपि शिक्षणं व्यवसायात्मकं स्यात्। माध्यमिकशिक्षा पूर्णा स्यात्। विश्वविद्यालयस्तरे संख्यात्मकपक्षापेक्षया गुणात्मकपक्षं प्रति अवधानं दातव्यम्। किञ्च 'सर्वेषाङ्कृते शिक्षा' सिद्धान्तमनुसृत्य शिक्षाया समतायै पक्षद्वयमवधेयम् –

(1) सर्वेषाङ्कृते जातिलिङ्गधर्मभाषाधारेण भेदभावं व्यतिरिच्य साम्यभावात् शिक्षाप्रदेयाः।

(2) छात्रस्य योग्यतानां क्षमतानाञ्चान्वेक्षणङ्कृत्वा तत्तत्सामर्थ्यानुगुणं मनोवैज्ञानिकरीत्या शिक्षणं प्रदेयम्।

अत्र कार्यद्वये केन्द्रसर्वकारः विशिष्टावधानं दद्यात्। साम्प्रतं शिक्षाक्षेत्रेऽनुशासनाभावः दरीदृश्यते। किञ्च गुरुन् प्रति छात्राणां मनस्सु तादृशः सम्मानभावो नास्ति। वैदिककाले गुरुशिष्ययोर्मध्ये सम्मानयुक्तः सम्बन्धः आसीत् तस्य साक्षादुदाहरणं मन्त्रेऽस्मिन् द्रष्टुं शक्यते –

सह नाववतु सह नो भुनक्तु सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै॥ इति

अतः अद्यापि छात्राणामनुशासनं महदावश्यकं वर्तते। यतो हि अद्यतनच्छात्राः श्वः राष्ट्रनिर्मातारो भविष्यन्ति। अतः सा शिक्षा या बालकानां सर्वाङ्गिकविकासे साहय्यं दद्यात् तादृशशिक्षायै सर्वकारेण महदवधानं दात्तव्यम्।

एतादृशशैक्षिकसमस्यानां निवारणाय राष्ट्रियशिक्षानीतौ विविधयोजनानाङ्कृते ध्यानं प्रदत्तम्। किञ्च शिक्षाक्षेत्रे उपर्युक्तप्रारूपनिर्माणाय ''भारतीयशिक्षासेवा'' अखिलभारतीयसेवारूपेण संस्थापिता वर्तते। आशास्महे यत् साम्प्रतिकशैक्षिक-समस्थानां निवारणं केन्द्रसर्वकारः राज्यसर्वकाराणां सहयोगं प्राप्य शीघ्रमेव करिष्यति।

पुनरावृत्तिप्रश्नाः

(1) केन्द्रसर्वकारेण राष्ट्रशिक्षां प्रति कियदुत्तरदायित्वं गृहीतम्?

(2) केन्द्रसर्वकारः सर्वदायित्वानि कथं निर्वहति? विवेचयत।

(3) शिक्षामन्त्रालयस्य सङ्घटनस्य व्याख्याङ्कृत्वा तत्कार्याणि विवेचयत?

(4) शिक्षायाः केन्द्रीयपरामर्शदातृमण्डलस्य कानि-कानि कार्याणि वर्तन्ते? तेषां सञ्चालनविधिञ्च वर्णयत?

(5) केन्द्रसर्वकारः प्राथमिकशिक्षां प्रति स्वदायित्वं कथं निर्वहति?

विवेच्यन्ताम् ?

(6) केन्द्रसर्वकारस्य केषु-केषु सङ्घटनेषु माध्यमिकशिक्षान्वेषणभारो वर्तते ? तत्सङ्घटनं कार्याणि च स्पष्टयत ?

(7) विश्वविद्यालयानुदानायोगस्य स्थापनाद्वारा शिक्षाक्षेत्रे को लाभः जातः ? स्पष्टयत ?

(8) केन्द्रसर्वकारः प्राविधिकाशिक्षां प्रति स्वदायित्वं कथं निर्वहति ? तस्याः वर्तमानावस्थायां परिष्कारोऽपेक्षते न वा, साङ्गोपाङ्गं विवेचयत ?

(9) भारतसर्वकारद्वारा 'राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्' इति संस्थानस्य संस्थापनं किमर्थं कृतम् ? स्पष्टयत ?

(10) 'राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषदः' कार्याणि उल्लिखत ?

(11) राष्ट्रियशैक्षिकयोजनाप्रशासनसंस्थानस्य कार्याणि उल्लेखनीयानि ?

लेखार्थप्रश्नः

संविधानद्वारा केन्द्रसर्वकारस्य कृते कानि शैक्षिकदायित्वानि प्रदत्तानि ? तेषान्निर्वाहे केन्द्रसर्वकारेण कियच्च साफल्यमधिगतम् ? स्पष्टयत।

4

राजकीयस्तरे शिक्षा-प्रशासनम्

(Educational Administration at State Level)

"The nature of the responsibility for elementary education assumed at the state level varies largely from state to state. At one extreme is a state like Punjab or Kerala both of which have made little devolution of authority to local bodies and are administering elementary education directly. At the other extreme are states like Maharashtra, Rajasthan or Andhra Pradesh which have transferred very large powers over elementary education to local bodies." **– J.P. Naik**

स्वातन्त्र्यप्राप्तेः प्राक् आङ्ग्लशासने भारतदेशः 560 राजाधिकृतक्षेत्रेषु बहुषु प्रान्तेषु च संविभक्तोऽऽसीत्। प्रथमराष्ट्रियगृहमन्त्रि-सरदारबल्लभभाई पटेल महोदयानां महतप्रयासेन भारतदेशोऽयं एकीकृतः एकोनत्रिंशत्प्रशासकीयक्षेत्रेषु च प्रतिनिबद्धः। नवम्बर 1956 तमे वर्षे राज्यानां पुनर्घटनमभवत् तदानीं राष्ट्रे चतुर्दश सङ्ख्यकानि प्रान्तानि षट् संघीयक्षेत्राणि च संस्थापितानि। ततश्च मुम्बई पंजाबप्रान्तञ्च भाषाभेदेन भागद्वयेन संविभक्ते। मुम्बईप्रान्तं गुजरातमहाराष्ट्रमिति भागद्वये पंजाबञ्च पंजाब हरियाणा इति भागद्वयेन संविभक्तावभवताम्। 2 अप्रैल 1970 तमे वर्षे ''आसाम'' प्रान्ते स्वायत्तायुक्तक्षेत्रस्य संस्थापनमभवत् तच्च साम्प्रतं ''मेघालयः'' इत्याख्येन प्रसिद्धिं भजते। साम्प्रतं भारतदेशः अष्टाविंशतिप्रान्तेषु सप्तसंघीयक्षेत्रेषु च संविभक्तोऽस्ति।[1]

राज्यं शिक्षा च –

1921 तमे वर्षे शिक्षा केवलं राज्यीयविषय आसीत्। तदानीं शिक्षा विधानमण्डलद्वारा निर्वाचितमन्त्रिणः नियन्त्रणे भवति स्म। 1976 ई. संशोधनात्परं शिक्षा राज्यसूचितः समवर्त्तिसूच्यां स्थानमवाप्तवती, स्वातन्त्र्यात्पश्चाद् शिक्षा राज्यसूच्यामेव सन्नियोजिताऽऽसीत्। संघ सूचे; 63, 64, 65, 66 उपबन्धानि समवर्त्तिसूचेः 25, उपबन्धं व्यतिरिच्य सर्वत्र शिक्षोपरि राज्यनियन्त्रणमासीत्।''शिक्षा यदि राज्यीया एव तर्हि कुत्रचिद् राज्येषु धनाभावात् व्यवस्थाभावाच्च शिक्षणं सम्यक्तया भवितुं नार्हति, तेन च समग्रराष्ट्रस्योन्नतिरसम्भवा इति चिन्तयन् राजनेतृभिः

.1. Manorama year book-2003

समग्रराष्ट्रस्य शैक्षिकोन्नतये शिक्षायै राज्यसूचितः समवर्त्तिसूचौ स्थानं प्रदत्तम्।''

तेन शिक्षायाः विषये राज्यं केन्द्रञ्च उभावपि नियमनिर्धारणे, परस्परं विरोधे सति, केन्द्रनियमः एव सर्वमान्य इति सिद्धान्तोऽङ्गीक्रियते।

राज्यस्तरे प्रशासकीयसङ्घटनम् -

प्रत्येकस्मिन् राज्ये 'राष्ट्रपतिमहोदयैः' राज्यसंवैधानिकाध्यक्षरूपेण राज्यपालमहोदयस्य नियुक्तिः क्रियते। तत्र राज्यपालमहोदयस्य कृते शासनकार्येषु परामर्शं दातुं सहायभूतैका 'मन्त्रिपरिषद्' भवति। परिषदियं मुख्यमन्त्रीणामाध्यक्ष्ये कार्यं सम्पादयति। शैक्षिककार्याणां तत्तद् विषयाणाञ्च कृते मन्त्रिपरिषदि 'शिक्षामन्त्री' भवति। स एव शैक्षिकनीतीनां निर्धारणाय प्रकाशनाय चोत्तरदायी भवति। किञ्चान्येऽपि मन्त्रिणः शिक्षाक्षेत्रे सहयोगं कुर्वन्ति। शिक्षामन्त्रिणः सहायतायै एकः द्वौ वा उपमन्त्रिणौ भवतः। प्रत्येकस्मिन् राज्ये शिक्षानिदेशकः सार्वजनिकशिक्षानिदेशको वा शिक्षाविभागाय प्रशासकीयाध्यक्षो भवति। सः शिक्षामन्त्रिण आधीने कार्यं करोति। किञ्च शिक्षामन्त्रिणः सहायतार्थं शिक्षासचिवोऽपि भवति। 'सचिवालयः' निदेशालयीय कार्मकारकविषयेषु विधानमण्डलस्य च नीतिनिर्धारकविषयेषु मध्यस्थत्वेन कार्यं सम्पादयति।

शिक्षाविभागाधिकारिणः स्तरत्रये कार्यं कुर्वन्तो दृश्यन्ते यथा -

(1) निदेशालयस्तरः, (2) क्षेत्रीयस्तरः, (3) मण्डलस्तरः।

कतिपयप्रान्तेषु ''ब्लॉकस्तरः'' इत्यपि चतुर्थः स्तरः स्वीक्रियते। अस्य सङ्घटनमेवं द्रष्टुं शक्यते -

राज्यस्य शिक्षाविभागः

अधिकारिणः	**स्तरः**
शिक्षामन्त्री	राज्यशिक्षामन्त्रालयः
शिक्षा सचिवः	शिक्षा सचिवालयः
शिक्षा-निदेशकः सार्वजनिक शिक्षा निदेशको वा	शिक्षा निदेशालयः
वृत्तशिक्षाधिकारी उपशिक्षानिदेशको वा	क्षेत्रीयस्तरः
मण्डलशिक्षाधिकारी मण्डलविद्यालयनिरीक्षको वा	मण्डलस्तरः
ब्लॉक शिक्षाधिकारी	ब्लॉकस्तरः

एतेषां विभागानां तत्तदधिकारिणाञ्च पृथक्त्वेन अत्र प्रस्तूयते -

शिक्षामन्त्रालयः –

राज्यस्तरे शिक्षामन्त्रालयस्य प्रमुखः 'शिक्षामन्त्री' भवति, तस्य साहाय्यं कर्तुं एकः द्वौ वोपमन्त्रिणौ भवतः। यथा – महाराष्ट्र–मैसूरः–पञ्जाब–राजस्थानम्–उत्तरप्रदेशादिषु। एवंविधः मन्त्रालयो द्रष्टुं शक्यते। शिक्षामन्त्रिमहोदयः जननिर्वाचितः भवति तस्य विधानमण्डलं प्रत्युत्तरदायित्वमपेक्षते च। सः शिक्षासम्बद्धनीतीनां निर्धारणं क्रियान्वयनञ्च कर्तुं शक्नोति। यद्यपि काश्चन शिक्षाः यथा – कृषिः, अभियन्तृशिक्षा वाणिज्यशिक्षा इत्यादीनां स्वतन्त्रविभागाः भवन्ति तत्र तत्सम्बद्धमन्त्रीणामेव प्राधान्यमङ्गीक्रियते। साम्प्रतमवधेयं यत् शैक्षिकगतिविधिषु सर्वत्र समन्वयो स्यादिति। अस्मिन् विषये 'कोठारी' आयोगोऽपि परामर्शं दत्तवान् यत् प्रत्येकस्मिन् प्रान्ते एकस्याः 'शिक्षापरिषदः' (Council of education) संस्थापनं स्यादिति। अस्याः परिषदोऽध्यक्षः ''शिक्षामन्त्री'' तथाचान्ये विश्वविद्यालयानां प्रतिनिधयः, शैक्षिकशाखासञ्चालकाः शिक्षामर्मज्ञाश्च सदस्यास्स्युः। परिषदियं विद्यालय–शिक्षासम्बद्धविषयाणामुपर्येव परामर्शं दद्यात्। विद्यालयेषु प्रचलितकार्यक्रमाणां मूल्याङ्कनं पुनरीक्षणञ्च कुर्यात्। किञ्च परिषदियं विविधकार्यसम्पादनाय विविधसमितीनामपि सङ्घटनं कर्तुं शक्नोति। अस्याः वार्षिक–प्रतिवेदनानि विविधानुशंसाभिस्सह राज्यविधानमण्डलस्य पुरतः प्रस्तुतानि स्युः।

शिक्षामन्त्रिणः कार्याणि –

शिक्षामन्त्रिणः कार्याण्यधोर्निर्दिष्टानि सन्ति –

(1) शिक्षानीतेः निर्धारणं राज्यस्य शिक्षापद्धतेः नेतृत्वञ्च।

(2) शिक्षासम्बद्धविषयेषु पृष्टप्रश्नानां विधानमण्डलस्य पुरतः उत्तरप्रदानम्, शिक्षासम्बन्धिविधेयकेषु परामर्शप्रदानञ्च।

(3) व्यक्तिगतप्रबन्धकानां स्थानीयसंस्थानाञ्च सञ्चालने साहाय्यप्रदानम्।

(4) शैक्षिकसमस्यानां समाधानायानुसंधानकार्याणाङ्कृते प्रोत्साहनम्, शैक्षिक–क्रियासु सामञ्जस्यस्थापनं, विविधशैक्षिककार्यक्रमाणां परिणामान्वेक्षणञ्च। उपर्युक्त–कार्यसम्पादनाय शिक्षासचिवालयः, शिक्षानिदेशालयश्चैत्तौ द्वौ विभागाङ्गौ भवतः।

शिक्षासचिवालयः (Secretariat of Education) –

सचिवालयः प्रत्यक्षरूपेण शिक्षामन्त्र्युपमन्त्रिभ्यां सम्बद्धो भवति। शिक्षासम्बद्धाः नीतयः शिक्षासचिवालयेन निर्णीताः भवन्ति। सचिवालयेऽखिलभारतीयसेवायाः सदस्यः शिक्षा–सचिवोऽध्यक्षपदमलङ्करोति। तत्साहाय्यं कर्तुम् उपसचिवाधीन–

सचिवाश्च संनियुक्ताः भवन्ति। पश्चिमबंगालप्रान्तं वर्जयित्वान्यत्र 'शिक्षासचिवः' शिक्षासञ्चालकात् न पृथक् भवति। सर्वकारेण प्रदत्तादेशाः 'शिक्षा सचिव' नाम्नैव प्रकाश्यन्ते। शिक्षासञ्चालकप्रदत्ताः नीतयः प्रस्तावाश्चाधीन-स्याधिकारिणामध्ययनात्परं शिक्षासचिवस्य पार्श्वे सम्प्रेष्यन्ते ततश्च ताः शिक्षामन्त्रिणां समक्षं प्रस्तूयन्ते।

शिक्षा-निदेशालयः (Directorate of education) -

संस्थेयं कार्यपालिकारूपेण संप्रसिद्धा वर्तते। वस्तुतः संस्थेयं राज्येषु संविभक्तानां विविधशिक्षासंस्थानानां सर्वकारस्य च मध्ये संयोजिका वर्तते। इयं सर्वकारं शिक्षायाः विविधशाखादशानां शिक्षानीतिं प्रति जनानां प्रतिक्रियाम् आवश्यकतां प्रगतिञ्चाव-बोधयति। शिक्षानिदेशालयस्य सर्वप्रथमोऽधिकारी शिक्षानिदेशकः वर्तते यः शैक्षिकविषयेषु शिक्षामन्त्रिणः विशेषज्ञः परामर्शदाता भवति।

किञ्च संस्थेयं शिक्षाक्षेत्रे सर्वोच्चकार्यपालिकाशक्तिः वर्तते या समग्रप्रान्तस्य शिक्षा-प्रशासनं प्रत्युत्तरदायिनी भवति। तस्याः विविधमण्डलेषु संस्थितसर्वकार-सञ्चालितविद्यालयैः निजीविद्यालयैः महाविद्यालयैश्च साकं साक्षात्सम्बन्धो भवति। उच्चप्राथमिकमाध्यमिकविद्यालयेषु कार्यरतानां शिक्षकाणां प्रशिक्षणस्य व्यवस्थाञ्चोद्पादयति। साम्प्रतं बालिकानाङ्कृते पृथक् शिक्षणविद्यालयाः सञ्चाल्यन्ते। अतः तादृशशिक्षाव्यवस्थां प्रत्युत्तरदायिनी वर्तते संस्थेयम्। इत्थं दाढर्येन वक्तुं शक्यते यत् प्रान्तस्य सम्पूर्णशिक्षापद्धतिः अस्या उपर्येव निर्धारिता भवति। अतः शिक्षा-निदेशकः विश्वविद्यालयस्य कार्यकारिपरिषदः, लोकसेवायोगस्य माध्यामिकशिक्षापरिषदश्च पदेन सदस्यो भवति।

एतादृशसमग्रकार्यसञ्चालनाय एक एव निदेशकः पर्याप्तो न अतः तत्साहाय्यं कर्तुं विभिन्नाः शिक्षाधिकारिणः, उप-शिक्षासञ्चालकाः, विद्यालय-निरीक्षकाः, उप-विद्यालयनिरीक्षकाः विद्यालयनिरीक्षकाः विद्यालयोपनिरीक्षकाश्च नियुक्ताः भवन्ति।

क्षेत्रीयस्तरः -

शिक्षाप्रशासनदृष्ट्या राज्यं विविधक्षेत्रेषु, वृत्तेषु संभागेषु च संविभज्यते। उत्तरप्रदेशप्रान्ते क्षेत्राण्येतानि उपशिक्षानिदेशकान्तर्गतानि भवन्ति। पंजाबप्रान्ते च एतानि वृत्तशिक्षाधिकारिणां सान्निध्ये कार्यक्रमान्संचालयन्ति केषुचन प्रान्तेषु च संभागीयाधिकारिणां सान्निध्ये। क्षेत्रीयव्यवस्था एतादृशी स्यात् यया तत्तत्क्षेत्रेषु संस्थितमण्डलाधिकारिणां कार्येषु समन्वयः सुव्यवस्थापनञ्च स्यात्।

मण्डल (जिला) स्तरः –

लोकतन्त्रेऽस्मिन् सर्वमपि खलु प्रान्तं मण्डलेषु विभाजितमस्ति शिक्षाक्षेत्रेऽप्येतादृश्येव स्थितिः दरीदृश्यते। यतो हि स्थानीयविद्यालस्योपरि तत्तद् मण्डलाधिकारिणः सम्यक्तयाऽवधानदाने सामर्थ्यमनुभवन्ति अतः मण्डलस्तरेऽपि एकः मण्डलाधिकारी तत्साहाय्यंकर्तुञ्चान्येऽधिकारिणो भवन्ति।

खण्ड (ब्लॉक) स्तरः –

केषुचन प्रान्तेषु शिक्षाप्रशासनस्य एकः स्तरः (खण्ड) ब्लॉक स्तरोऽपि भवति। पंजाबहरियाणाप्रान्तयोः शिक्षाप्रशासनस्य कृते स्तरोऽयमत्यन्तोपयोगी वर्तते। यत्र प्रान्तेषु प्राथमिकी शिक्षा प्रान्तस्य साक्षाद् नियन्त्रणे भवति तत्र स्थानीयमण्डलानां किमप्युत्तरदायित्वं न जायते। कुत्रचिद् प्रान्तेषु खण्डशिक्षाधिकारिणः कार्यम् उपविद्यालयनिरीक्षकैः क्रियते परं एतेऽधिकारिणः मण्डलेन सम्बद्धाः सन्तः प्राथमिकविद्यालयस्य निरीक्षणकार्यमपि कुर्वन्ति। किञ्च एतेऽधिकारिणः प्राथमिकशिक्षयामनिवार्यत्वं निःशुल्कत्वञ्च सम्पादयितुं प्रयतन्ते।

राज्यशिक्षायाः परामर्शदातृमण्डलम् (State Advisory Board of Education) –

सर्वकाराणाङ्कृते शैक्षिकविषयेषु परामर्शाय प्रायः सर्वत्र प्रान्तेषु शिक्षा-परामर्शदातृमण्डलानां व्यवस्थापनमस्ति। कुत्रचिद् प्रान्तेषु शिक्षायाः विभिन्नशाखा समन्वितमेकमेवमण्डलं भवति कुत्रचित् च विषयानुसारं पृथक्-पृथक् मण्डलानि जायन्ते। कुत्रचिच्च विशिष्टपरामर्शमण्डलान्यापि निर्माप्यन्ते। सन्दर्भेऽस्मिन् माध्यमिकशिक्षायोगेनापि परामर्शो दत्तः –

''राज्यशिक्षापरामर्शदातृमण्डलं, केन्द्रशिक्षापरामर्शदातृमण्डलवत् कार्यं कुर्यात्। तत्सङ्घटनञ्च शिक्षाव्यवसायद्वारा, विश्वविद्यालयैः, उच्चमाध्यमिकविद्यालयानां प्रबन्धकसमितिभिः, शिक्षायाः विविधक्षेत्रसमन्वितविभागाध्यक्षैः उद्योगव्यापारभ्यां विधानमण्डलेन जननिर्वाचितप्रतिनिधिभिश्च स्यात् किञ्च 'शिक्षामन्त्री' अस्याध्यक्षः तथा शिक्षासचिवोऽपि नियुक्तः भवेयुरिति।''[1]

माध्यमिकशिक्षायोगीयां रूपरेखामनुसरन्नैव बिहारप्रान्ते, केरलप्रान्ते च एतादृशाण्येव मण्डलानि संस्थापितानि।

1986 वर्षीयशिक्षानीतौ एतदर्थं बलं प्रदत्तम्। किञ्च मानवसंसाधनविकासेन

सम्बद्धराज्यसर्वकाराणां विभिन्न-विभागानां समाकलनाय महान्त्युपायानि स्युरिति।

स्थानीयस्तरे प्रशासकीयप्रारूपम् -

स्वातन्त्र्यप्राप्तेःपश्चाद् भारते लोकतन्त्रेण साकं सत्तायाः विकेन्द्रीकृतसिद्धान्तोऽप्यङ्गीकृतः तेन स्थानीयसंस्थानामधिकारेषु वृद्धिर्समायाता। भारतस्य समधिकप्रान्तेषु प्राथमिकशिक्षा तत्प्रान्ताधिकृतैवास्ति। तृतीयपञ्चवर्षीययोजनातः परमेव प्रान्तेषु पञ्चायतराज्यानां क्रियान्वयः अभवत्। यत् प्राथमिकशिक्षायां महदुपकरोति। अस्य स्तरस्य प्रशासकीयं स्वरूपमेवमभिनिर्दिष्टं वर्तते -

स्थानीयसंस्थाः

- जिला (मण्डल) परिषद्
  - परिषदः शिक्षासमितिः वा
    - खण्डपञ्चायतसमितिः
      - ग्रामपञ्चायतम्
- नगरपालिकाः
  - अधिकृतनगरपालिकाः
    - नगरपालिकाध्यक्षः
      - शिक्षासमितिः
        - शिक्षाधीक्षकः
          - उपस्थिताधिकारिणः
            - (पुरुषाः)
        - शिक्षाधीक्षिका
          - उपस्थिताधिकारिण्यः
            - (महिलाः)
  - अनधिकृताः नगरपालिकाः
    - नगरपालिकाध्यक्षः

नगरपालिकाः शिक्षा च -

भारतवर्षे नगरपालिकायाः अधिकृतानधिकृतरूपेण द्वैविध्यं दृश्यते। प्राथमिक-शिक्षायै एकलक्षरूप्यकैः समधिकं व्ययं कुर्वत्यः पालिकाः अधिकृताः तद् भिन्नाश्चानधिकृताः भवन्ति। अधिकृतनगरपालिकाः स्वशिक्षासमितीः विद्यालयमण्डलंसंस्थापयितुञ्च सक्षमाः भवन्ति। ताः विद्यालयानां निरीक्षणं स्वतः

1. The Board may function on the lines similar of the Central Advisory Board of Education and should be composed of representatives of the teaching profession, the universities, management of High Schools and Higher Secondary Schools, heads of Department dealing with different spheres of Education, representatives of Industry, Trade & Commerce and Legislature and the general public. The Minister of Education Should be the Chairman of the Board and Director of Education or Education Secretary should be the Secretary."

-Report of the Secondary Education Commission, 3. p. 93.5

नियुक्ताधिकारिणां माध्यमेन च कुर्वन्ति। अनधिकृता: नगरपालिका: यद्यपि शिक्षाक्षेत्रे साहाय्यमाचरन्ति परं तत्र अधिकाराणामभावो दरीदृश्यते।

प्राय: भारतस्य समधिकप्रान्तेषु नगरपालिका: एवं प्राथमिकशिक्षायै स्वोत्तर-दायित्वं भजन्ते। कुत्रचित् प्रान्तेषु एता: माध्यमिकोच्चमाध्यमिकविद्यालयानां, महाविद्यालयानाम् उपाधिमहाविद्यालयानाञ्च सञ्चालनं कुर्वन्ति।

जिलापरिषद् (मण्डलम्) तथा शिक्षा –

ग्रामीणक्षेत्राणां प्राथमिकशिक्षायै जिलापरिषत् स्वोत्तरदायित्वं भजते। साम्प्रतं जिलापरिषदियं जिला ''पञ्चायतम्'' इति नाम्नापि प्रसिद्धा वर्तते। किञ्च उत्तरप्रदेशे, आन्ध्रप्रदेशे च ''जिला बोर्ड्'' जिलापरिषदिति नाम्नापि प्रसिद्धमस्ति। कुत्रचित् परिषदियं माध्यमिकशिक्षामपि सञ्चालयति। उत्तरप्रदेशे, पञ्जाबप्रान्ते, चैन्नईप्रान्ते च त्रिंशत् प्रतिशततोऽधिकान् माध्यमिकस्तरीयविद्यालयान् सञ्चालयति परिषदियम्। प्रान्तेषु ग्रामीणक्षेत्राणां शैक्षिकप्रशासनाय पद्धतिद्वयमङ्गीकृतमस्ति। गुजरात-महाराष्ट्र-चेन्नई-राजस्थानमित्यादिषु प्रान्तेषु जिलापरिषद्, ग्रामपञ्चायतानां च माध्यनेन शिक्षा-प्रबन्धनं क्रियते कुत्रचिद् प्रान्तेषु यथा आन्ध्रप्रदेश-मध्यप्रदेश-राजस्थानेषु च पञ्चायतसमितिद्वाराऽपि शिक्षाप्रबन्ध:सञ्चाल्यते। पञ्चायतसमितिरियं जिलापरिषद्ग्रामपञ्चायतयोर्मध्ये संयोजिकारूपेण कार्यं करोति।

प्राथमिक-माध्यमिकविद्यालयानां शिक्षणव्यवस्था: सञ्चालयितुं जिलापरिषदेकां शिक्षासमितिं निर्माति, उत्तरप्रदेशे उपविद्यालयनिरीक्षक: शिक्षासमिते: मुख्याधिकारी भवति। मेहतासमितिद्वाराऽपि परामर्शो दत्त: यत् पञ्चायतसमितीनां वित्तीयस्थिते: प्रदर्शनाय स्वीकृत्यै च जिलापरिषदोऽधिकार: स्यात्। किञ्च परिषदियं पंचायतसमितीनां शैक्षिकावश्यकताया: सम्पूर्त्तये सर्वकाराय निर्देशं दद्यात् तथा सर्वकारप्रदत्तं धनवितरणञ्च कुर्यात्। पञ्चायतसमिते: प्रमुखाणि कार्याणि –

(1) प्राथमिकशिक्षाया: विकास: तत्कार्येषु साहाय्यञ्च। (2) नवीन-प्राथमिकविद्यालयानां संस्थापनम्। (3) भवनानां निर्माणं सज्जीकरणञ्च। (4) प्रारम्भिकविद्यालयानां कार्याणां परिषद: समितेरादेशानुगुणं निरीक्षणं, ग्रामपञ्चायतानां शिक्षासम्बद्धकार्याणां निरीक्षणमनुदाननिर्धारणञ्च वर्तते।

स्थानीयनिकायानां कार्यक्षेत्राणि –

राज्यसर्वकारेण प्राथमिकशिक्षाक्षेत्रे केचन अधिकारा: एवं प्रदत्ता: –

विद्यालयनिरीक्षणं, शिक्षकप्रशिक्षणम्, पाठ्यक्रमनिर्धारणं, वित्तीयव्यवस्थायां

नियन्त्रणञ्च एतदतिरिक्तम् सर्वमपि प्रशासकीयकार्यं स्थानीयनिकायानाङ्कृते प्रदत्तम् तद्यथा –

(1) शिक्षकाणां नियुक्तिः –

शिक्षकाणां नियुक्तेराधिकारः स्थानीयनिकायानां कार्यक्षेत्रमेव परं "चयनसमितौ" राज्यसर्वकारस्य अप्येकः प्रतिनिधिः स्यात् इति सर्वकारस्य प्रावधानं वर्तते।

(2) सेवादशाः –

शिक्षकाणां सेवास्थितेर्निर्धारणं स्थानीयसंस्थाभिरेव क्रियते। तत्र अस्मिन् सन्दर्भे राज्यसर्वकारस्य परामर्शः आवश्यकः।

(3) अन्ये कर्मचारिणः –

विद्यालयेषु शिक्षकेतरकर्मचारिणां लिपिकादीनां चयने, वेतनदाने च स्थानीयसंस्थाः स्वतन्त्ररूपेण कार्यं करिष्यन्ति। एताः संस्थाः आवश्यकतानुगुणं कर्मचारिणां सङ्ख्यानिर्धारणे, वेतनप्रदाने, चाधिकारिण्यो वर्तन्ते।

(4) पाठ्य-पुस्तकानि –

पाठ्य-पुस्तकानां निर्माणं निर्धारणञ्च सर्वकाराधीनं वर्तते। यदि सर्वकारद्वारा एकतोऽधिकानि पुस्तकानि विरच्यन्ते चेत् एकस्य पुस्तकस्य चयनं स्थानीय-संस्थानामधीनं वर्तते। एताः स्वतन्त्ररूपेण पाठ्यपुस्तकानि चिन्वन्ति।

(5) विद्यालयदिवसाः अवकाशाः च –

विद्यालये कार्यदिवसानाम् अवकाशानाञ्च निर्धारणं राज्यसर्वकारेण न क्रियते अपि तु स्थानीयसंस्थाभिरेव क्रियते।

किञ्च धनाभावात् एताः संस्थाः पूर्णतः स्वयोगदानं दातुं नार्हन्ति तथापि एतासां प्रयासः प्रशंसनीयः। उत्तरप्रदेशे तु एकाशीतिप्रतिशततोऽधिकविद्यालयानां सञ्चालनं एताभिः संस्थाभिरेव क्रियते। इदानीं लोकतान्त्रिकेऽस्मिन् युगे सत्तायाः विकेन्द्रीकरणात् एतासां दायित्वाभिवर्धनात् प्राथमिकशिक्षा सर्वकारहस्ते गता वर्तते। यदि सर्वकारः सम्यक्निर्देशनं दद्यात् तर्हि प्राथमिकशिक्षास्तरे उत्तरोत्तरमुन्नतिः सम्भवति। स्थानीय-स्तरे शिक्षाप्रशासनस्योन्नतये 'कोठारी आयोगेन' परामर्शो दत्तः यत् प्रत्येकस्मिन् मण्डले एकस्याः जिलापरिषदः स्थापनं स्यात् तत्र निम्नाङ्किताः व्यक्तयः सदस्यतां प्राप्नुयुः –

(1) जिलापरिषदः प्रतिनिधयः।

(2) नगरपालिकानां प्रतिनिधयः।

(3) राज्य-सर्वकारेणाभिचिताः शिक्षामर्मज्ञाः

(4) शिक्षा-कृषि-उद्योग-तदितरविभागानां पदाधिकारिणश्च।

तत्रोक्तम् यत् जिलापरिषदो नगरपालिकायाः सदस्याः च पृथक् निर्वाचितास्स्युः। किञ्च याः पालिकाः पृथक् स्वतो विद्यालयपरिषदं संस्थापयन्ति ताः अस्याः परिषदः कृते सदस्यान् न प्रेषयिष्यन्ति। इदानीं यावत् परामर्शोऽयं नाङ्गीकृतः।

1986 वर्षीयायां शिक्षानीतौ बलं प्रदत्तं यत् – ''उच्चतरमाध्यमिकस्तरं यावत् शिक्षाप्रबन्धस्य कृते 'जिला शिक्षा बोर्ड' संस्थायाः संस्थापनं स्यात्'' इति। अस्य संस्थापनस्य कृते राज्यसर्वकारः यथाशीघ्रं कार्यं सम्पादयेत्। शैक्षिकविकासस्य विभिन्नस्तरेषु प्रायोजनायां समन्वये, मूल्याङ्कने च केन्द्रीयाः, प्रान्तीयाः, जिलास्तरीयाः, स्थानीयस्तरीयाश्च समितयः सहयोगित्वं प्रदर्शयेयुः।

1986 तमशिक्षानीतेः समारम्भणाय पञ्चायतराज्यसमीतीः ''प्राथमिक-माध्यमिकशिक्षा'' प्राविधिकं प्रशिक्षणं, व्यावसायिकशिक्षा, प्रौढशिक्षा, निरौपचारिकशिक्षा पुस्तकालयः तथा सांस्कृतिककार्यकलापानां सम्प्रेषणाय प्रावधानो विहितः। प्रत्येकपञ्चायतं एकस्याः ग्रामशिक्षासमितेर्सङ्घटनं करिष्यति याः ग्रामस्तरे शिक्षाक्षेत्रे निर्धारितकार्यक्रमान् प्रत्युत्तरदायी भविष्यति।

जिलास्तरे जिलानिकायस्य सङ्घटनं भविष्यति यत् निरौपचारिकशिक्षायाः प्रौढशिक्षाया उच्चतरमाध्यमिकस्तरीयविद्यालयशिक्षायाः तथा विविधशैक्षिक-कार्यक्रमाणां कार्यान्वयनाय उत्तरदायि भविष्यति। अत्र शिक्षाविदां, नारीणां, यूनां, अभिभावकानां, अनुसूचितजाति-जनजातीनामल्पसङ्ख्यकानां तथा मण्डलस्य संस्थानां प्रतिनिधित्वं भविष्यति।

किञ्च 'जिला-निकायः' जिला-स्तरे प्रारम्भिकशिक्षायाः, निरौपचारिक-शिक्षायाः, प्रौढशिक्षायाः तथा शिक्षासम्बद्धकार्यक्रमेषु पर्याप्तपाठ्यचर्यायाः, शैक्षिक-निवेशानाञ्च कृते 'जिला-शिक्षाप्रशिक्षणसंस्थानाञ्च' (District Institute of Education and Training - DIET) विशेषज्ञत्वं प्राप्स्यति।[1]

पुनरावृत्तिप्रश्नाः

(1) राज्यानां प्रशासकीयं प्रारूपं स्पष्टयत ?

1. राष्ट्रियशिक्षानीतिः, 1986, कार्ययोजना-1992, पृ. 125

(2) राज्यस्य शिक्षाविभागीयसङ्घटनं वर्णयत ?

(3) शिक्षासचिवालयशिक्षानिदेशालययोः कार्याणां मध्ये कोऽयं भेदः ? स्पष्टयत।

(4) शिक्षाऽऽयोगेन प्रस्तावितायाः शिक्षापरिषदः सङ्घटनं तत्कार्याणि च वर्णयत ?

(5) राजकीयशिक्षापरामर्शदातृमण्डलस्य सम्बन्धे माध्यमिकशिक्षायोगेन के परामर्शाः दत्ताः ? तैः परामर्शैः कोऽयं लाभः स्पष्टयत।

(6) स्थानीयस्तरे शिक्षाभारः केषु निकायेषु उपरि वर्तते ?

(7) स्थानीयनिकायानां कार्यक्षेत्रं स्पष्टयन्तः, प्रचलितपरिस्थितिषु किमेते (निकायाः) साफल्यपूर्वकं स्वदायित्वं निर्वोढुं समर्थाः भविष्यति न वेति विचारयत ?

(8) यदि कोठारी–आयोगप्रदत्तः विद्यालयपरिषदः स्थापनायाः परामर्शः मन्यते चेद् को लाभः भविष्यति ?

(9) 'कोठारी–आयोगेन' विद्यालयपरिषदः संस्थापनायै के परामर्शाः दत्ताः एते समुचिता न वा ? किञ्च स्वीकृते सति का हानिः संभाव्यते ? स्पष्टयत।

(10) राज्यानां शिक्षासम्बद्धप्रशासकीयप्रारूपं समसामयिकसन्दर्भे समालोचयत ?

लेखार्थप्रश्नाः

राजकीयस्तरे शिक्षाप्रशासनस्य प्रारूपं वर्णयन्तः स्पष्टयत यत् अस्य कार्याणां प्रभाववर्धनाय कानि परिवर्तनानि अपेक्ष्यन्ते ?

5

प्राथमिक-माध्यमिक-विश्वविद्यालयशिक्षाणां प्रशासनम्

(Administration of Primary, Secondary and University Education)

"The Progress of Primary education is an index of the general social, political and economic progress of the country as a whole. The Sargent Plan was, therefore, quite justified in assuming that we shall need about 40 years to provide Universal Primary Education in the country. It is true we did not like the suggestion and that the Kher Committee proposed to reduce the period to sixteen years and that the constitution proposed to reduce it still further to ten. But these plans were hardly practicable and I, for one, would be happy if we can reach the goal, as suggested by the Sargent Plan."

- J. P. Naik

अस्माकं राष्ट्रस्य शैक्षिकयोजनायां विभिन्नपक्षाणां शिक्षायै महत्स्थानं प्रदत्तम्। अत्र शिक्षायोजनायां पूर्वप्राथमिकशिक्षा, प्राथमिकशिक्षा, माध्यमिकशिक्षा, विश्वविद्यालयशिक्षा, प्राविधिकशिक्षा, सामाजिकशिक्षा चेत्यादीनाङ्कृते स्थानं वर्तते। वस्तुतः शिक्षायाः प्रत्येकस्मिन् भागे क्षेत्रे वा किञ्चित्स्ववैशिष्ट्यं भवत्येव। अतः तत्प्रशासने सङ्घटने च वैभिन्न्यं स्वाभाविकमेवास्ति। भारतराष्ट्रं शिक्षायाः प्रत्येकं शाखायाः मूलभूतोद्देश्यानां प्राप्त्यर्थं कारकाणि धनञ्च वाञ्छति। तच्च नोपलभ्यते अतः महतीयं समस्या, अस्याः समाधानाय नूतनविधयः नीतयश्च प्रयुज्यन्ते।

अस्मिन्नध्याये वयं प्राथमिकमाध्यमिकविश्वविद्यालयानां च प्रशासनविधीनां प्रारूपाणाञ्च विवेचनं करिष्यामः -

(1) प्राथमिकशिक्षायाः प्रशासनम् -

भारते प्राथमिकशिक्षाप्रशासनस्य महत्त्वपूर्णं लक्ष्यद्वयं वर्तते। तद्यथा -

(1) भारतीयसंविधानस्य 45 अनुच्छेदान्तर्गतं सार्वजनीनप्राथमिकशिक्षायाः लक्ष्यप्राप्तिः।(2) सार्वभौमिकशिक्षास्तरे आधारशिक्षायाः राष्ट्रियशिक्षायाः आदर्शरूपेण प्रस्तुतिः।

संविधानानुसारं - ''चतुर्दशावस्थापर्यन्तं छात्राणाङ्कृते निःशुल्कानिवार्य-शिक्षाया च व्यवस्थां कुर्युः प्रान्तानि''[1] इति स्पष्टमासीत्। परमिदानीं यावद् लक्ष्यमेतद्

न लब्धमस्माभिः। 1960-61 वर्षस्य वार्षिकानुशंसायां स्पष्टीकृतम् यत् ''विविध-सामाजिकार्थिककारणानां प्रभावेण कार्यक्रमोऽयं नियतावधौ पूर्णतां न प्राप्तवान्'' इति।

अत एव नियोजनायोगेन नियुक्तशिक्षामर्मज्ञानां सदसि परामृष्टं यत् 1965-66 वर्षपर्यन्तं षट्तः एकादशवर्षावस्थापर्यन्तबालकानां निःशुल्कशिक्षायै द्रुतगत्या प्रयासः स्यादिति। भारतसर्वकारेण परामर्शोऽयमङ्गीकृतः, लक्ष्यप्राप्तये प्रयासोऽपि विहितः। परं विविधप्रयासाणामनन्तरमपि कार्यं पूर्णतां न गतम्। अतएव भारत-सर्वकारेण 1964 तमे वर्षे शिक्षायोगस्य नियुक्तिः कृता। तदानीं शिक्षायोगः परामृष्टवान् यत् ''1975-76 वर्षं यावत् षट्तः एकादशावस्थापर्यन्तसर्वेषां छात्राणाङ्कृते किञ्च 1985-86 वर्षं यावत् षट्तः अष्टावर्षापन्नच्छात्राणां कृते निःशुल्कानिवार्यशिक्षायाः च लक्ष्यस्य सम्पूर्त्तिः स्यादिति।''[2]

1986 वर्षीयायां शिक्षानीतावपि संघोषितं यत् 1990 वर्षं यावत् षट्तः एकादश-वर्षीयच्छात्राणां कृते उद्देश्यमिदं सम्प्राप्तं भविष्यति। इत्थमेव 1995 वर्षं यावत् एकादशतः चतुर्दशावस्थापर्यन्तछात्राणाङ्कृते निःशुल्कशिक्षायाः लक्ष्यं निर्धारितं परमिदानीं यावत् लक्ष्यमेतदस्माभिर्न लब्धम्।

प्रारम्भिककक्ष्यासु लिङ्गानुगुणं नामाङ्कनम् (लक्षेषु)

	प्राथमिककक्ष्याः (एकतः पञ्चमयावत्)			उच्चप्राथमिककक्ष्याः (षटतः अष्टमं यावत्)		
वर्षाणि	**बालकाः**	**बालिकाः**	**योगः**	**बालकाः**	**बालिकाः**	**योगः**
1. 1950-51	138.0	54.0	192.0	26.0	5.0	31.0
2. 1960-61	236.0	114.0	350.0	51.0	16.0	67.0
3. 1970-71	357.0	213.0	570.0	94.0	39.0	133.0
4. 1980-81	453.0	285.0	738.0	139.0	68.0	207.0
5. 1990-91	580.1	410.0	991.1	209.0	124.0	333.0
6. 1992-93	605.0	449.0	1054.0	237.0	150.0	387.02

1. The State shall endeavour to provide, within a period of ten years from the commencement of this constitution, for free and compulsary education for all childern until they complete the age of fourteen years.
- The Constitution of India, Schedule VII, Article 45.
2. Report of the Education Commission, p. 151

प्रारम्भिकशिक्षाया: मन्दगति: अत्र संस्पष्टा –

1990–91 वर्षं यावत् समग्रनामाङ्कनस्य 41.4 प्रतिशतं बालिका: प्राथमिक-कक्ष्यासु 37.4 प्रतिशतं बालिकाश्च उच्चकक्ष्यास्वासन्। अनेन स्पष्टं भवति यदस्माभि: इदानीं यावदपि 50 प्रतिशतं छात्रा: निशुल्कतयाऽनिवार्यतया च न शिक्षिता:।

सप्तम्यां पञ्चवर्षीययोजनायां सार्वभौमिकप्रारम्भिकशिक्षालक्ष्यमवाप्तुं (1990 वर्षं यावत्) बलं प्रदत्तं परमेतन्न लब्धम्। अत: अष्टम्यां योजनायां प्रारम्भिक-शिक्षालक्ष्याणि एवं निर्दिष्टानि –

क्रम सं.	**स्तर:**	**1997 वर्षं यावत् नामांकनयोग:**	**1997 वर्षं यावत् अतिरिक्तनामांकनम्**	**1997 वर्षं यावत् अतिरिक्त बालिका:**
(1)	प्रारम्भिकशिक्षा	16.64 कोटि:	5.61 कोटि: (67%)	3.76 कोटि:
	(अ) प्राथमिकी (1–5)	10.53 कोटि:	2.02 कोटि: (82%)	1.65 कोटि:
	(ब) उच्चप्राथमिक शिक्षा (6–8)	6.11 कोटि:	3.59 कोटि: (59%)	2.11 कोटि:

उक्तलक्ष्याणां सम्प्राप्तये अष्टम्यां योजनायां निम्नविषयाणामुपरि बलं प्रदत्तम् –

1. प्रारम्भिकशिक्षा लक्ष्यमवाप्तुं ''औपचारिकपद्धतेर्विस्तारो भविष्यति किञ्च परिष्कारोऽपि करिष्यते।

2. निरौपचारिक/अनौपचारिकशिक्षापद्धतेर्विस्तार: निम्नाङ्कितानां कृते करिष्यते–

(i) कार्यरतबालकानाङ्कृते।

(ii) गृहकार्येषु व्यस्तछात्राणाङ्कृते।

(iii) विद्यालयव्यवस्थाशून्यबालकानाङ्कृते च।

(3) अनावृत्तशिक्षापद्धतेर्विकास: करिष्यते।

(4) न्यूनतमाधिगमस्तरस्योपागमस्य (Minimum learning -MLL) विकेन्द्रीकरणं करिष्यते।

(5) विद्यालयसंकुलानां विकास: करिष्यते।

राष्ट्रियशिक्षानीति: 1986 तथा तत्कार्ययोजना 1992 'इति एतद् द्वयमनुसृत्य

प्राथमिकशिक्षायां सार्वभौमिकत्वं सार्वजनीनत्वञ्च सम्पादयितुं, इत्याख्येन प्रसिद्धः कार्यक्रमोऽयं प्रारब्धः। जिला (मण्डल) स्तरे शिक्षा सर्वसुलभा यथा स्यात्तदर्थं कार्यक्रमोऽयं सर्वसाधारणस्य शिक्षायै संनिर्धारितोऽस्ति। केषुचन मण्डलेषु कार्यक्रमोऽयं प्रारब्धः स्यात् एतदर्थं मण्डलानां मापदण्डः एवं विहितः यथा यत्र –

(क) परिवारस्य साक्षरता राष्ट्रियस्तरान्न्यूना स्यात्।

(ख) समग्रशिक्षाकार्यक्रमाः शिक्षायै आवश्यकतानुभूत्यर्थं सफलाः स्युः।

जिला–प्राथमिकशिक्षाकार्यक्रमे निम्नविषयेष्ववधानं दीयते –

(1) नियोजने प्रबन्धे च उत्तरदायित्वस्य कृते बलं दीयते।

(2) स्त्रीशिक्षायै महत्त्वं दीयते।

(3) शिक्षक–प्रशिक्षणे विकेन्द्रितप्रबन्धे च संसाधनानि संयोज्य विद्यालयानां प्रभावोत्पादकत्वाभिवर्धनाय प्रयासः क्रियते।

(4) राष्ट्रिय–प्रान्तीय–स्थानीयस्तरेषु क्षमतानिर्माणाय बलं दीयते। कार्यक्रमोऽयं मध्यप्रदेशे, असमप्रान्ते, कर्नाटके, महाराष्ट्रे, तमिलनाड्प्रान्ते, हरियाणाप्रान्ते, केरले च द्वाचत्वारिंशत् मण्डलेषु सञ्चाल्यते। कार्येक्रमेऽस्मिन् 1950 कोटिरूप्यकाणि 'अष्टम्यां पञ्चवर्षीययोजनायां' व्ययीभूतानीत्यनुमीयते।

किञ्चायं राज्यस्तरे साधारणपरिषद्द्वारा तथा कार्यकारिणीसमितेः पंजीकृतस्वायत्तशासिसंस्थया प्रारब्धोऽस्ति। अत्र शिक्षाविदः, सर्वकारेतरसङ्घटनानि, नार्यः भारतसर्वकारस्य राज्यसर्वकाराणाञ्च प्रतिनिधयः सम्बद्धाः क्रियन्ते।

प्राथमिकशिक्षाप्रशासने केन्द्रसर्वकारस्य कार्याणि

साम्प्रतं शिक्षायै समवर्तिसूचौ स्थानं प्रदत्तमतः शिक्षाविकासाय समुन्नतये च केन्द्रसर्वकारोऽपि स्वोत्तरदायित्वं भजते। केन्द्रसर्वकारेण प्रारम्भिकशिक्षायाः स्वदायित्वमभिपूरयितुं शिक्षामन्त्रालये 'अखिलभारतीयप्रारम्भिकशिक्षापरिषद्' इत्यस्याः संस्थायाः सङ्घटनं कृतम्। परिषदियं केन्द्रसर्वकारं प्रारम्भिकशिक्षाप्रसाराय–उन्नतये च विशेषज्ञसंस्थारूपे परामर्शयति।

एतदतिरिक्तं शिक्षामन्त्रालये एकस्य विशिष्टपरामर्शदातुः नियुक्तिः क्रियते यः विद्यालयशिक्षासम्बद्धो भवति। केन्द्रसर्वकारेण प्राथमिकशिक्षाप्रसाराय यानि कार्याणि क्रियन्ते तानि वर्गत्रये विभज्यन्ते –

(क) केन्द्रसर्वकारेण क्रियान्विताः कार्यक्रमाः –

अत्र वर्गान्तर्गताः कार्यक्रमाः केन्द्रसर्वकारेण समायोजिताः क्रियान्विताश्च भवन्ति।

(ख) केन्द्रसर्वकारेण राज्यसर्वकारस्य कार्यक्रमाणाङ्कृते दीयमानमार्थिकं साहाय्यम् –

वस्तुतः एते कार्यक्रमाः पूर्णतः राज्यसर्वकारेण संयोजिताः भवन्ति। एषां कार्यक्रमाणां सम्पूत्तर्यै केन्द्रसर्वकारद्वाराऽऽर्थिकं साहाय्यं दीयते।

(स) केन्द्रसर्वकारेण प्रस्तावितकार्यक्रमाः –

अत्र वर्गान्तर्गताः कार्यक्रमाः केन्द्रसर्वकारेण प्रस्ताविताः भवन्ति परमेते राज्य-सर्वकारैः क्रियान्वयं प्राप्नुवन्ति।[1]

उपर्युक्तकार्यक्रमाणां योजनानाञ्च संक्षिप्तविवेचनमधोनिर्दिष्टं वर्तते –

(1) प्रारम्भिकशिक्षाक्षेत्रे केन्द्रसर्वकारस्य योजनाः –

1957 तमे वर्षे केन्द्रसर्वकारेण राज्यसर्वकाराणां सहयोगेन राष्ट्रस्य शिक्षायाः पर्यवेक्षणं कारितम्, तच्च 1958–59 तमे वर्षे पूर्णताङ्गतम्। अनेन पर्यवेक्षणेन प्राप्ताः सूचनाः प्रकाशिताः अभूवन्। अनेन ज्ञातं यत् साम्प्रतं राष्ट्रस्य विभिन्नेषु प्रान्तेषु कियद् विद्यालयानामावश्यकत्वमनुभूयते। कुत्रचिद् कियन्तो विद्यालयाः सञ्चाल्यन्ते, कियन्तश्च साम्प्रतमपेक्ष्यन्ते। पर्यवेक्षणेनानेन शिक्षाविस्तारायाधारः संस्थापितः, अनेन उत्तरप्रदेशे, मध्यप्रदेशे राजस्थाने च प्राथमिकविद्यालयानां स्थितिः आवश्यकता च एवमभिनिर्दिष्टा वर्तते –

राज्य नाम	शिक्षापर्यवेक्षणेन प्रस्तावितविद्यालयानां संख्या	प्रचलितविद्यालयानां संख्या	नूतनविद्यालया-नामावश्यकतानुगुणं संख्या
उत्तरप्रदेशः	59,637	26,168	33,469
मध्यप्रदेशः	35,718	20,824	14,864
राजस्थानम्	17,773	8,933	8,840

षड्वर्षाणि यावत् कियत्प्रगतिः कृता, किञ्च प्रगतौ काः काः समस्याः समागताः, एतज्ज्ञानाय शिक्षामन्त्रालयः 1965 तमे वर्षे द्वितीयशैक्षिकपर्यवेक्षणस्योत्तरदायित्वं 'राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्' इत्यस्या उपरि संनिर्धारितवान्। अस्योद्देश्यं प्रथमशैक्षिकपर्यवेक्षणे प्राप्तदशानां पुनरीक्षणेन सह प्रचलितप्राथमिकविद्यालयानां स्थिते र्ज्ञानप्राप्तिरासीत्। किञ्चासामान्यक्षेत्रेषु नूतनविद्यालयानां स्थापने के-के दोषाः

1. First year book of Education (1947), NCERT, p. 16

समायान्तीति विषयकज्ञानं पुनरीक्षणस्योद्देश्यमासीत्।

'राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषदा' स्वोत्तरदायित्वं निर्वोढुं नैकानि सर्वेक्षणानि कारितानि।

(2) अनिवार्यप्राथमिकशिक्षायै आदर्शविधानम् –

शिक्षामन्त्रालयेन केषाञ्चन बाह्य्यप्रदेशानाामध्ययनात्परं 'अनिवार्यशिक्षायै' एकमादर्शविधानं सज्जीकृतम्, यत् 1960 तमे वर्षे दिल्लीनगरे प्रारब्धमभवत्। केन्द्रसर्वकारेण स्पष्टीकृतम्, यत् प्रान्तान्यपि अनिवार्यशिक्षायै विधानानि आचरेयुः, साम्प्रतं नागालैण्ड-सिक्किम-मेघालय-मणिपुर-त्रिपुरा-बिहारप्रान्तेभ्यः व्यतिरिक्तं प्रायः अन्येषु प्रान्तेषु अनिवार्यप्राथमिकशिक्षायै विधानानि निर्मापितानि।[1]

(3) शिक्षितव्यवसायरहितानां सहायता प्राथमिकशिक्षायाः प्रसारश्च –

अस्याः योजनायाः अन्तर्गततया केन्द्रसर्वकारेण राज्यसर्वकाराणां कार्यत्रये पूर्णमार्थिकसाहाय्यं प्रदत्तम् –

(1) प्राथमिकविद्यालयानां निर्माणं शिक्षकाणां नियुक्तिश्च।

(2) शिक्षाविस्तारं दृष्ट्वा तदनुकूलम् इतरनिरीक्षकाणां नियुक्तिः।

(3) ग्रामीणक्षेत्रेषु अध्यापिकानाङ्कृते समुचितावासव्यवस्थायाः परिकल्पनम्।

(4) बालिकानाङ्कृते शिक्षा –

सार्वजनीनशिक्षालक्ष्यमभिप्राप्तुं नारीणां शिक्षाऽऽवश्यकी यतो हि "सुशिक्षित-नारीणां सन्ततिरपि शिक्षितैव भवति" इति धिया भारतसर्वकारेण एका नूतनकार्ययोजना सञ्चालिता। तस्याः प्रमुखमुद्देश्यं समधिकबालिकानां प्रवेशः, अध्यापिकानाञ्च सङ्ख्यास्वभिवृद्धिरास्ताम्। अस्य कृते समग्रव्ययस्य पञ्चसप्तति-प्रतिशतभागः केन्द्रसर्वकारेणाभिप्रदत्तः। राज्यसर्वकारः पञ्चविंशतिप्रतिशतं व्ययं कर्तुं शक्नोति न वेति तस्य विचारः। इत्थं राज्यसर्वकाराः अमुमुद्देश्यमभिप्राप्तुं निम्नाङ्कितयोजनासु एकां तदधिकां वा चेतुं शक्नुवन्ति –

(1) ग्रामेषु शिक्षिकाणाङ्कृते निःशुल्काऽऽवासव्यवस्था।

(2) ग्रामीणक्षेत्रेषु विद्यालयधात्रीणां नियुक्तिः।

(3) वयस्कनारीणाङ्कृते सामान्यशिक्षायाः संक्षिप्तः विशिष्टश्च पाठ्यक्रमः।

(4) शिक्षकप्रशिक्षणार्थं शिक्षिकाणाङ्कृते वृत्तयः।

---

1. Hindustan year book, 1984, p. 144

(5) प्रशिक्षिताध्यापकानाङ्कृतेऽभिनवः पाठ्यक्रमः।

(6) शुल्करहितं शिक्षणम् उपस्थित्यानुसारं छात्रवृत्तिप्रदानञ्च।

(5) शिक्षायाः राजकीयसंस्थानानि –

प्राथमिकस्तरे, उच्चप्राथमिकस्तरे, माध्यमिकस्तरे च शिक्षास्तरस्योन्नतिर्यथा स्यात्तदर्थं केन्द्रसर्वकारेण शिक्षायाः राजकीयसंस्थानां स्थापनमित्येका योजना प्रस्ताविता। इयञ्च योजना केन्द्रसर्वकारस्य साहाय्येन 1963–64 तमे वर्षे कार्यान्विताऽभवत्। नागालैण्डप्रान्तं वर्जयित्वा सर्वत्र प्रान्तेषु–एताः संस्थाः संस्थापितास्सन्ति। एतादृशसंस्थानामुद्देश्यद्वयं वर्तते तद्यथा –

(1) विद्यालयशिक्षकाणां, प्रधानाध्यापकानां, विद्यालयनिरीक्षकाणां प्रशिक्षण–विद्यालयीयशिक्षकाणाञ्चकृते प्रशिक्षणप्रदानम्।

(2) प्रारम्भिकशिक्षाक्षेत्रेऽनुसंधानं तथा तच्छिक्षकाणां कृतेऽत्युप–युक्तसाहित्यनिर्माणम्।

1968–89 तमे वर्षेऽस्यै योजनायै व्ययं केन्द्रसर्वकारेणैव कृतमासीत्।

(6) अन्याः क्रियाः –

केन्द्रसर्वकारः उपर्युक्तकार्याणि योजनाश्च वर्जयित्वा प्रारम्भिकशिक्षाविकासाया–धोनिर्दिष्टक्रियाः योजनाञ्च सञ्चालयति –

(1) केन्द्रसर्वकारेण शिक्षकाणां कल्याणाय 1962 तमे वर्षे ‘‘नेशनल फाउण्डेशन फॉर टीचर्स वेल्फेयर’’ इत्याख्या योजना संस्थापिता।

(2) बालिकानां शिक्षायै समागतसमस्यानां निवारणाय परामर्शप्रदानाय च केन्द्रसर्वकारेण ‘राष्ट्रियशिक्षापरिषदः संस्थापनं कृतम्’ परिषदियं सर्वकारस्य स्त्रीशिक्षाक्षेत्रे कार्यरतसङ्घटनानाञ्च मध्ये सामञ्जस्यं स्थापयति।

(3) ‘अखिलभारतीयप्रारम्भिकशिक्षापरिषद्’- परिषदियं अनिवार्य–निःशुल्कशिक्षायै च विविधकार्यक्रमान् संयोजयति। प्रारम्भिकशिक्षाक्षेत्रे च केन्द्रसर्वकारस्य राज्यसर्वकाराणाञ्च कृते परामर्शं ददाति।

(4) जून् 1965 तमे वर्षे दिल्लीनगरे ‘बालभवनराष्ट्रियसंग्रहालय’ संस्थानस्य स्थापना कृता। अस्योद्देश्यं शारीरकक्रियाणां माध्यमेन बालकानाङ्कृते शिक्षाप्राप्तयेऽवसरप्रदानं वर्तते।

(5) चतुर्दशवयः पर्यन्तं छात्राणाङ्कृतेऽनिवार्या निःशुल्का च शिक्षा यथा

स्यात् तदर्थं संवैधानिकनिर्देशानामभिपूर्त्तये तत्सम्बद्धकार्यक्रमाणाङ्कृते प्राथम्यमभिप्रदत्तम्। राष्ट्रियशिक्षानीतौ संकल्पितं यत् 1990 वर्षं यावत् एकादशवयः पर्यन्तछात्राणाङ्कृते प्राथमिकाशिक्षाऽनौपचारिकी शिक्षाव्यवस्था च भविष्यति।

शिक्षाविभागेनास्य लक्ष्यस्य प्राप्त्यर्थं राज्यानां प्रयासेषु सहयोगायानेकाः केन्द्रीय-प्रारम्भिकशिक्षायोजनाः प्रारब्धाः –

(क) श्यामपट्टाभियानम् (ऑपरेशन ब्लैक-बोर्ड) –

सर्वेष्वपि प्राथमिकविद्यालयेषु न्यूनतमावश्यकतानां सम्पूर्त्तिर्यथा स्यात् तदर्थं योजनेयं प्रारब्धा। वस्तुतः शिक्षायाः समवर्त्तिसूचौ स्थानात् परं केन्द्रसर्वकारस्य औत्कण्ठ्यमस्ति यथा सर्वेषाङ्कृते प्राथमिकी शिक्षा स्यादेव अतः योजनेयं महत्त्वपूर्णा वर्तते। अत्र 'श्यामपट्टः' प्रतीकरूपेण प्रयुज्यते। अस्याः योजनायाः कृते केन्द्रसर्वकारेण निम्नरूपेण साहाय्यं प्रदीयते –

(1) एकलशिक्षकीयविद्यालयेषु द्वितीयाध्यापकस्य नियुक्तिः (यथासम्भवं शिक्षिकायाः नियुक्तिः स्यात्) तदर्थं धनराशिः दीयते केन्द्रसर्वकारेण।

(2) प्रत्येकस्मिन् विद्यालये – श्यामपट्टः, पाठ्यपुस्तकानि, शिक्षकमार्गदर्शिकाः, विज्ञानगणितयोः प्रयोज्यसाधनानि, क्रीडा-सामग्री, वाद्ययन्त्राणि, तथा द्विशतं पुस्तकानां व्यवस्था स्यात्तदर्थं धनराशिः दीयते।

(3) कक्ष्याकक्षनिर्माणायोपयुक्तव्यवस्थायै धनं दीयते।

योजनेयं मार्च 1992 वर्षं यावत् 5385 (84%) सामुदायिकविकासखण्डेषु 1142 (29%) नगरपालिकाक्षेत्रेषु प्रायः 4.14 लक्षविद्यालयेषु प्रारब्धाभवत्। पूर्वमेव परिकल्पितं यत् राष्ट्रस्य समग्रविद्यालयेषु योजनेयं प्रारब्धा भविष्यति परं संसाधनानामभावेन इयं पूर्णत्वं न गता। एतद् योजनान्तर्गततया 1.52 लक्ष विद्यालयेषु सप्ततिसहस्राध्यापकाः प्रतिनियुक्तास्सन्ति। 2.30 लक्षकक्ष्या-कक्षेषु निर्माणलक्ष्ये केवलं एकलक्षकक्षाणामेव निर्माणमभवत्।

(ब) औपचारिक/अनौपचारिकशिक्षाकेन्द्राणां संस्थापनम् –

ये खलु छात्राः परिस्थितिवशात् सौविध्याभावाच्च नियते समये विद्यालयमागन्तुं न शक्नुवन्ति तेभ्यः 'अनौपचारिकशिक्षणसंस्थानानि' संस्थाप्यन्ते। इयं योजना संशोधनात्परं 1987-88 तमे वर्षे पुनः प्रारब्धाऽभवत्। सर्वतः प्राक् योजनेयम् आन्ध्रप्रदेशे, अरुणाचलप्रदेशे, असमप्रान्ते, बिहारप्रान्ते, जम्मू कश्मीरप्रान्ते, मध्यप्रदेशे-उड़ीसा-राजस्थान-उत्तरप्रदेश-पश्चिमबंगालादिषु प्रान्तेषु च शैक्षिकदृष्ट्याऽसामान्यक्षेत्रेषु

प्रारब्धाभवत्। अस्यां योजनायां जनजातीयप्रान्तेषु, मरुस्थलीयप्रान्तेषु च निवसतां छात्राणाङ्कृते शिक्षणव्यवस्था समायोजिता। सह–शिक्षाकेन्द्राणां कृते वित्तीयव्ययं निर्वोढुं केन्द्रराज्याणां 50:50 इत्यनुपातः निर्धारितः। बालिकानां शिक्षाकेन्द्रेषु च 90% धनं केन्द्रसर्वकारेण 10% धनञ्च राज्यसर्वकारेण दीयेत इति निर्धारितम्।

प्रयोगात्मकनूतनानां परियोजनानाङ्कृते अनौपचारिकेतरशिक्षाकेन्द्राणि सञ्चालितुं च स्वैच्छिकसंस्थानाङ्कृते शत–प्रतिशतं साहय्यं प्रदत्तम्। अनौपचारिक– शिक्षाकेन्द्राणां संख्या 1986 तमे वर्षे 1.26 लक्षं यावत् आसीत्। किन्तु मार्च मासे 1992 तमे वर्षे संख्यायां वृद्धिः सञ्जाता। नामाङ्कनमपि 36.45 लक्षतः 68 लक्षपर्यन्तमभूत्। अस्मिन्नवधौ बालिकानां शिक्षाकेन्द्राणां संख्या 20,500 तः 81,600 अभूत्। कार्यक्रमेऽस्मिन् क्रमशः 390 स्वैच्छिकसंस्थाभिः भागः गृहीतः। अस्यां योजनायामन्तर्गततया सहायताऽनुदानमपि प्रदत्तम्। पञ्चाशत् प्रयोगात्मिका नूतना च परियोजना एकोनविंशति–जिला–संसाधनैकैकानाम् अनौपचारिकेतरशिक्षायाः क्षेत्रे सङ्घटनकार्याय स्वीकृतिः प्रदत्ताः।

(स) कार्ययोजना 1992 तमे वर्षे इदं सुनिश्चितं यत् प्रत्येकप्राथमिकविद्यालये अनिवार्यरूपेण त्रयः विशालकक्षाः, त्रयः शिक्षकाः अवश्मेव स्युः एभिः ऑपरेशन ब्लैक बोर्ड योजनायाः कार्यक्षेत्रमपि वर्धिष्यते। सहैव इयं योजना उच्चप्राथमिक–स्तरपर्यन्तमपि सञ्चालनीया।

(द) प्रारम्भिकशिक्षायाः सार्वभौमिककरणाय एकविंशतिशताब्द्याः प्रारम्भात् पूर्वं सर्वेषां बालकानां कृते सन्तोषप्रदात्री निःशुल्का अनिवार्यशिक्षा प्रदानीया।

(य) सामाजिकक्षेत्रे, विशेषतः साक्षरताकार्यक्रमनीतिं ध्याने धृत्वा 2000 पर्यन्तं प्राम्भिकशिक्षां सर्वसुलभीकर्तुं राष्ट्रिययोजनायाः प्रारम्भाय प्राक्कल्पना कृता।

राज्यसर्वकाराः प्राथमिकशिक्षायाः प्रशासनञ्च

संविधानस्यानुसारं 'शिक्षा' एकः राज्यीयविषयः आसीत् किन्तु अधुना केन्द्रराज्ययोश्च संयुक्तदायित्वमस्ति। प्रतिराज्यम् अस्य क्षेत्रस्य स्वदायित्वानि कार्याणि च शिक्षा–मन्त्रि–उपमन्त्रि–शिक्षासचिवालय–शिक्षानिदेशक तदधीनस्थाधिकारिभिः असर्वकारीयसंस्थाभिः पूर्यते।

स्वतन्त्रताप्राप्त्यनन्तरं राज्यसर्वकारैः स्वशिक्षायोजनासु प्राथमिक–आधारभूत–शिक्षायै च प्रमुखं स्थानं प्रदत्तम्। कतिपयराज्येषु गृहसचिवं अतिरिच्य शिक्षायाः सञ्चलनाय नवपदस्य व्यवस्थाऽपि कृता यः पूर्णरूपेण प्राथमिकशिक्षायाः प्रशासनाय

सञ्चालनाय च उत्तरदायी भवति। सामान्यतः राज्यानां शिक्षानिदेशालये एकः उप-शिक्षासञ्चालकः शिक्षायाः प्रसाराय उन्नतये च कार्यं करोति। अधिकांशराज्यानां सर्वकारैः अस्याः शिक्षायाः सञ्चालनस्य दायित्वं स्थानीयसंस्थानां कृते प्रदत्तम्। उत्तरप्रदेशे तु अस्य प्रशासनस्य कृते पृथक् निदेशालयस्य व्यवस्था अस्ति किन्तु अधुना अयं माध्यमिकशिक्षानिदेशालयेन सम्बद्धोऽस्ति।

शिक्षानीत्याः निर्धारणे असर्वकारीयजनैः परामर्शाय सहयोगाय च कतिपय-राज्यैः स्थायिपरामर्शदातृमण्डलानां, कतिपयराज्यैः प्राथमिकशिक्षायाः कृते वैधानिक-मण्डलानां स्थापना कृता। खेरसमितिः या प्राथमिकशिक्षायाः प्रशासने राजयसर्वकाराणां स्थानीयनिकायानां च मध्ये सम्बन्धनिर्धारणाय नियुक्ताऽऽसीत्-तया प्राथमिकशिक्षा परिषदः महत्त्वमनुभूय परामर्शाः प्रदत्ताः -- ''एतादृशं मण्डलं विचारणां विनिमयाय बहुमहत्त्वपूर्णं कार्यं करोति तथा च राज्यसर्वकारान् स्वनीतिनिर्धारणे असर्वकारीय विशेषज्ञानां स्थानीयनिकायानां च विचारावगमनेन बहुसाहाय्यं करोति। अतः अस्माकं मतं वर्तते यत् प्रत्येकऽस्मिन् राज्ये प्राथमिकशिक्षामण्डलस्य स्थापना स्यात् यत् असर्वकारीयविशेषज्ञैः, शिक्षाविभागेन, प्राथमिकशिक्षायाः प्रशासनेन च सम्बद्ध-स्थानीयनिकायेषु च मध्ये योजकशृंखलारूपेण स्यात्।''

1950 ईसवीयवर्षे भारतसर्वकारेण शिक्षाविकासस्य वित्तीयव्यवस्थायाः साधनेषु एका समितिः नियुक्ता, यया अनुशंसा कृता यत् प्रतिराज्येन स्वसम्पूर्णायस्य 20 प्रतिशतं शिक्षायाः कृते व्ययः करणीयः।

खेरसमित्या इदं मतं प्रदत्तम् यत् प्रत्येकराज्यद्वारा शिक्षा-आय-व्ययपत्रकस्य षष्टिप्रतिशतं प्राथमिकशिक्षायै व्ययीकरणीयम्।

अस्य परामर्शस्यानुसारं जम्मू-कश्मीर-उड़ीसा-उत्तरप्रदेशान् विहाय सर्वाणि राज्यानि स्वसम्पूर्णायस्य विंशतिप्रतिशततः अधिकं शिक्षायै व्ययं कुर्वन्ति। जम्मू-कश्मीरः 13%, उड़ीसा 17%, उत्तरप्रदेशः 17%, यावत् शिक्षायै व्ययं कुर्वन्ति।

माध्यमिकशिक्षायाः प्रशासनम् -

विगतद्विदशकेषु देशे माध्यमिकशिक्षायाः प्रसारः तीव्रगत्या अभूत्। अस्य प्रगतेः ज्ञानं निम्नाङ्कितसारिण्यां प्रस्तूयते --

स्वतन्त्रभारते माध्यमिकशिक्षायाः प्रगतिः

लिङ्गानुसारं नामाङ्कनम्

वर्षम्	उच्च.प्राथमिकस्तरः (कक्ष्या षष्ठीतः अष्टमी पर्यन्तम्)			उच्चमाध्यमिकस्तरः हा./हायर सै. (कक्ष्या नवमीतः द्वाद्वश कक्ष्या पर्यन्तम्)		
वर्ष	बालकः	बालिकाः	योगः	बालकः	बालिकाः	योगः
1950-51	26.0	5.0	31.0	13.0	2.0	15.0
1960-61	51.0	16.0	67.0	27.0	7.0	34.0
1970-71	94.0	39.0	133.0	57.0	19.0	76.0
1980-81	139.0	68.0	207.0	84.0	35.0	119.0
1990-91	209.0	124.0	333.0	140.0	69.0	209.0
1992-93	237.0	150.0	387.0	150.0	77.0	227.0

स्वतन्त्रभारते माध्यमिकविद्यालयानां शिक्षकाणाञ्च स्थितिः

विवरणम्	1950-51	1960-61	1970-71	1980-81	1992-93
उ. प्रा. विद्यालयः	13,596	49,663	90,621	1,18,355	1,53,921
उ./उच्चतर मा. विद्यालयाः	7,416	17,329	37,051	51,624	84,086
उ. प्रा. विद्यालयेषु शिक्षकाः	86.0	345.0	638.0	851.0	1082.0
उ./उच्चतर मा. विद्यायेषु शिक्षकाः	127.0	296.0	629.0	912.0	1353.0

राष्ट्रे माध्यमिकशिक्षायाः सञ्चालनं केन्द्रीयसर्वकारेण राज्यसर्वकारेण स्थानीय-संस्थाभिर्व्यक्तिगतसंस्थाभिश्चेत्थं साधनचतुष्टयेन क्रियते। एषां साधनानां कार्याणि पृथक्त्वेन एवं स्पष्टीक्रियन्ते —

(1) केन्द्रसर्वकारस्य कार्याणि :—

साम्प्रतं केन्द्रसर्वकारः माध्यमिकशिक्षाक्षेत्रे स्वकीयमहत्त्वपूर्णभूमिकां निर्वहति। अयं माध्यमिकशिक्षासम्बद्धविषयेषु राज्यसर्वकारेभ्यः परामर्शं वित्तीयसाहाय्यञ्च प्रयच्छति। किञ्च तेषां पथ-प्रदर्शनं नेतृत्वञ्च सम्पादयति। एतदतिरिक्तं केन्द्रसर्वकारः माध्यमिकशिक्षायाः समुन्नतये बहुकार्यक्रमान् सञ्चालयति प्रस्तौति च यथा —

राज्यशैक्षिकव्यावसायिकनिर्देशनयोराधारकः कृते (Establishment of State Bureau Educational & Vocational Guidance) राज्यमूल्याङ्कनेककः (State

Evaluation Unit), राज्यविज्ञानसंस्थानानि (State Institute of Science) चेत्यादयः।

केन्द्रसर्वकारः माध्यमिकशिक्षाक्षेत्रे यानि कार्याणि सम्पादयति तेषां संक्षिप्त-विवेचनमधः प्रस्तूयते —

(1) **शैक्षिकं व्यावसायिकञ्च निर्देशनम्** — केन्द्रसर्वकारः राष्ट्रियशैक्षिकानु-संधान-प्रशिक्षणपरिषदः, Development of Psychological Foundation विभागान्तर्गतं केन्द्रीय-शैक्षिकव्यावसायिकसंस्थानां (ब्यूरो) स्थापनं कृतवान्। एषां संस्थानानां कार्याणि यथा —

(1) निर्देशनसेवानां प्रकृतीनां तदावश्यकतानाञ्च कृते जागरूकतायाः विकासनम्।

(2) व्यावसायिकनिर्देशनसामग्रयाः एकत्रीकरणम्

(3) निर्देशनसम्बद्धसाहित्यस्य सज्जीकरणम् चेत्यादीनि वर्तन्ते।

अस्य परामर्शेन केन्द्रसर्वकारः राज्येषु शैक्षिकव्यावसायिकनिर्देशनसंस्थानस्य संस्थापनाय योजना प्रस्तुतवान्। साम्प्रतं सर्वेष्वपि प्रान्तेष्वेतादृशानि संस्थानानि संस्थापितानि। केन्द्रसर्वकारः एतादृक्प्रान्तीयसंस्थानानाङ्कृते पर्याप्तमात्रायामार्थिक-साहाय्यमाचरति।

(2) विद्यालयेषु विज्ञानशिक्षायाः प्रोन्नतिः —

भारतसर्वकारेण विद्यालयेषु विज्ञानशिक्षापरिष्काराय 1988 तमे वर्षे एका योजना सञ्चालिता। एतदन्तर्गतं राज्यानां संघीयप्रान्तानाञ्च कृतेऽऽर्थिकसाहाय्यं प्रदीयते।

किञ्च अस्याः योजनायाः अन्तर्गततया उच्चप्राथमिकविद्यालयेषु विज्ञान किट, उच्चमाध्यामिकेषु माध्यमिकेषु च विद्यालयेषु विज्ञानसामग्री, पुस्तकानि च दीयन्ते। अनेन साकमेव माध्यमिकेषु/उच्चमाध्यमिकेषु च विद्यालयेषु सन्निहितपुस्तकालयानां समुन्नतये आर्थिकसाहाय्यमपि प्रदीयते। योजनायाः अस्याः लक्ष्यम् अष्टमीयोजनान्तं यावत् राष्ट्रस्य सर्वेषाम् उच्चप्राथमिकमाध्यमिकोच्चमाध्यमिकानाञ्च विद्यालयानाङ्कृते लाभप्रदानं वर्तते।

(3) पर्यावरण-शिक्षा —

केन्द्रसर्वकारः विद्यालयशिक्षायां पर्यावरणशिक्षायाः परिचयाय 1988-89 तमे वर्षे एकां योजनां प्रारब्धवान् यत्र स्थानीयपर्यावरणस्य शिक्षाकार्यक्रमयस्य मध्ये संश्लेषणं विहितम्। अस्याः योजनायाः क्रियान्वयनाय भारतसर्वकारः राज्यानां संघशासितप्रदेशानाञ्च कृते 100 प्रतिशतं यावत् आर्थिकसाहाय्यं दत्तवान्। अत्र

नर्सरीशिक्षासंस्थापनायापि बलं प्रदत्तम्। किञ्चास्याः महदुद्देश्यं छात्रेषु पर्यावरणशिक्षाविषये सम्यक् दृष्टिकोणस्य जागरूकतायाः च विकासोऽपि वर्तते।

(4) केन्द्रीयविद्यालयाः –

द्वितीयवेतनायोगस्यानुशंसायां भारतसर्वकारः केन्द्रीयविद्यालयानामुद्घाटनस्य योजनां प्रस्तुतवान्। साम्प्रतं देशेऽस्मिन् 771 केन्द्रीयविद्यालयास्सन्ति, यत्र 6,45,472 छात्राः शिक्षामधीयते। किञ्चात्र 39,708 शिक्षकाः कार्यरतास्सन्ति। 1992–93 तमे वर्षे कस्यापि नूतनकेन्द्रीयविद्यालयोद्घाटनाय प्रावधानं न विहितम्। एषु विद्यालयेषु पाठ्यक्रमः शिक्षणमाध्यमञ्च सममेव दरीदृश्यते। अत्र अष्टमीकक्ष्यां यावत् निश्शुल्कशिक्षा दीयते। एवञ्च नवमीतः एकादशकक्ष्यापर्यन्तं शुल्कनिर्धारणं शिक्षणरतबालकानाम् अभिभावकानां वेतनानुगुणं क्रियते। वस्तुतः ये खलु निवासस्थानतोऽन्यत्र स्थानान्तरितास्सन्तः सर्वकारसेवायां संलग्नास्सन्ति तेषाङ्कृते विद्यालया एते संस्थाप्यन्ते। एतादृग्विद्यालयानां सञ्चालनं 'केन्द्रीयविद्यालय-सङ्घटनम्' इत्याख्यसंस्थाद्वारा विधीयते। अत्र शिक्षणरताः छात्राः केन्द्रीयमाध्यमिक-शिक्षामण्डलस्य "अखिलभारतीयमाध्यमिकपरीक्षायां भागं गृह्णन्ति। एतेषां महदुद्देश्यं अल्पव्ययेन शिक्षास्तरस्य व्यवस्थापनं वर्तते।

(5) केन्द्रीयमाध्यमिकशिक्षापरिषद् –

भारतसर्वकारेण माध्यमिकशिक्षाप्रारूपेऽनुरूपत्वसम्पादनाय, तथा च एतादृक्छात्राणां शैक्षिकावश्यकतायाः सम्पूर्तये येषाम् अभिभावकाः सर्वकारसेवायां संलग्नास्सन्तः एकराज्यतोऽन्यत्र राज्ये समये-समये स्थानान्तरिताः भवन्ति, जुलाई 1952 तमे वर्षे केन्द्रीयमाध्यमिकशिक्षापरिषदः स्थापना कृता। परिषदियं अखिलभारतीयोच्चतरमाध्यमिकस्तरीयां एकवर्षीयां त्रिवर्षीयां बहुद्देश्यीयां वा परीक्षां सञ्चालयति। 1968–69 तमे वर्षे भारते स्थिताः पञ्चदशसंख्यकाः सैनिकविद्यालयाः अनया परिषदा सह सम्बद्धाः अभूवन्।[1] साम्प्रतं परिषदाऽनया 1354 विद्यालयाः अनुबद्धाः सन्ति।[2] एषु एको विद्यालयः **तेहरान** मध्ये संस्थितोऽस्ति। अस्य सञ्चालनं Central Tibetan Schools Administration इत्याख्यसंस्थाद्वारा क्रियते।[3]

---

1. The Times of India Directory and year book, 1961, p. 83
2. Manorma year book, 1984, p. 535
3. Hindustan year book, p. 173

नवोदयविद्यालयाः —

सर्वमान्योऽयं सिद्धान्तः यत् विशिष्टप्रतिभावन्तः छात्राः द्रुतगत्या प्रगतये स्ववसराणि प्राप्नुयुः। इमामेव दृष्टिमनुसृत्य राष्ट्रियशिक्षानीतौ व्यवस्था कृता यत् राष्ट्रस्य विभिन्नभागेषु निश्चिताधारेण एतादृशः विद्यालयाः संस्थापितास्स्युः यत्र नूतनानुसंधानानां प्रयोगाणाञ्च कृते समुचितावसराः प्राप्तास्स्युः।

अनेनैवोद्देश्येन भारत-सर्वकारेणैकां योजनामनुसृत्य निर्णीतं यत् प्रत्येकस्मिन् मण्डले न्यूनातिन्यूनं एको एतादृक् सहशिक्षाऽऽवासीयविद्यालयः संस्थापितो भवेदिति। एतादृशः विद्यालयाः 'नवोदयविद्यालयाः' इत्याख्येन प्रसिद्धाः अभूवन्।

नवोदयविद्यालयानां प्रमुखोद्देश्यानि --

(1) प्रतिभावतां छात्राणां पारिवारिक-सामाजिकार्थिकस्थित्यनुसारेण भेदमननुसृत्य तेषां सर्वाङ्गिकविकासाय नूतनप्राविधिकसौविध्यालङ्कृत-श्रेष्ठस्तरीयाधुनिकशिक्षाया उपलब्धिः।

(2) त्रिभाषासूत्रमनुसृत्य भाषात्रये समुचितयोग्यतासम्पादनम्।

(3) अनुभवान् सौविध्याञ्चाधारीकृत्य तदनुगुणं शिक्षायाः समुन्नतये केन्द्ररूपेण कार्यसम्पादनम्। इति

इत्थं नवोदयविद्यालयानां सञ्चालनार्थं नवोदयविद्यालयसमितेस्संस्थापनं विहितं या मानव-संसाधनविकासमन्त्रालयान्तर्गतैका स्वायत्तसंस्था वर्तते।

संस्थेयं समितिरूपेण 28 फरवरी 1986 तमे वर्षे पंजीकृताऽभवत्। इयञ्च केन्द्रीयमाध्यमिकशिक्षापरिषदा सम्बद्धा वर्तते।

ग्रामच्छात्राणाङ्कृते सुष्ठुस्तरीयाधुनिकशिक्षायाः समुपलब्धये भारतसर्वकारेण 1985-86 तमे वर्षे प्रत्येकस्मिन् मण्डले न्यूनातिन्यूनमेकस्य नवोदयविद्यालयस्य संस्थापनार्थं योजना प्रारब्धा।

इदानीं यावत् देशस्य 23 राज्येषु सप्तकेन्द्रशासितप्रदेशेषु च 305 नवोदयविद्यालयाः संस्थापिताः अभूवन्।

अत्र षष्ठीकक्ष्यातः प्रवेशः प्राप्यते। एतत्तथ्यमवधार्य विद्यालयेषु प्रविष्टाः छात्राः, ये मातृभाषामाध्यमेन शिक्षां प्राप्तवन्तः तेषाङ्कृते अष्टमीं यावत्, मातृभाषामाध्यमेनैव शिक्षा दीयते। तदानीमेव हिन्द्याः आंग्लभाषायाश्चाध्ययनस्य सह-माध्यमभाषे विहिते।

ततश्च शिक्षणं हिन्दीमाध्यमेन/आंग्लमाध्यमेन वा भवति —

इमामवस्थां यावत् नवोदयविद्यालयच्छात्रेषु परस्परं 30% छात्राणामन्तरणं भवति। तच्च हिन्दी तदितरमण्डलस्थानां मध्ये जायते।

31 जनवरी 1993 वर्षं यावत् 305 संख्यकनवोदयविद्यालयेषु चयनितविद्यार्थीनां विवरणमेवमासीत् —

बालकाः	बालिकाः	ग्रामीणाः	नागरिकाः	सामान्याः	अनुसूचित-जातयः	अनुसूचित-जनजातयः
84,548 70%	35,755 30%	93,058 77%	27,245 23%	81,438 67%	24,772 21%	14,093 12%

(7) राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद् :—

अनया परिषदा स्वप्रमुखाभिकरणानि संस्थाप्य माध्यमिकशिक्षाक्षेत्रेऽत्यन्त-महत्त्वपूर्णकार्याणि कृतानि।

एतान्यभिकरणानि राष्ट्रियशिक्षासंस्थानम् (National Institute of Education), क्षेत्रीयप्रशिक्षणमहाविद्यालयाः (Regional College of Education) वा वर्तन्ते।

परिषदियं विद्यालयशिक्षापद्धतेः कृते आवश्यकशैक्षिकसामग्रयाः समुपलब्धये राज्यानां शिक्षाधिकारिभिः संस्थानैश्च साकं सुसम्पर्कं स्थापयति।

किञ्चेयं छात्राणां शिक्षायै, शिक्षायाः न्यूनतमस्तराय, विद्यालयस्तरोपरि शिक्षाप्रक्रियां विषय-वस्तु प्रत्याकर्षणार्थं, विद्यालये विज्ञानशिक्षायाः समुन्नतये संगणकसाक्षरतायै, शिक्षायाः व्यावसायिकत्वं सम्पादयितुं, अशक्तानां शिक्षायै, नारीणाङ्कृते साम्यभावेन शिक्षायै, अध्यापकशिक्षायै, अनुसूचितजात्युत्पन्नानां जनजात्युत्पन्नानां वा छात्राणां शिक्षणार्थं, शैक्षिकप्रविधेः प्रयोगाय, शैक्षिकानुसंधानाय प्रतिभावतां छात्राणाङ्कृते छात्रवृत्तये, शिक्षानुसंधानस्य परिवर्धनाय, समग्रे राष्ट्रे माध्यमिकशिक्षाकेन्द्रीयमण्डलेन सम्बद्धविद्यालयानाञ्चकृते पाठ्यपुस्तकानि प्रकाशयति।

क्षेत्रीयप्रशिक्षणमहाविद्यालयानां संस्थापनं अजमेर-भोपाल-मैसूर-चेत्यादि-क्षेत्रेषु कृतं वर्तते। महाविद्यालया एते शिक्षक-प्रशिक्षणक्षेत्रे नूतनप्रविधीनां प्रतिनिधित्वं कुर्वन्ति। किञ्च एतैः महाविद्यालयैः शिक्षकप्रशिक्षणस्य कृते व्यापकपाठ्यक्रमाः प्रदत्ताः। अत्र प्रशिक्षणकाले विषय-वस्तुनः, शैक्षिकसिद्धान्तानां, व्यवहारस्य च ज्ञानं प्रदीयते। किञ्चात्र शिक्षास्नातकोपाधिकच्छात्राणाङ्कृते ग्रीष्मविद्यालयानां पत्राचार-पाठ्यक्रमाणाञ्च स्थापना क्रियते।

(8) राष्ट्रियमुक्तविद्यालयाः (National Open Schools)

1979 तमे वर्षे माध्यमिकशिक्षा केन्द्रीय बोर्ड्द्वारा राष्ट्रे सर्वप्रथमः मुक्तविद्यालयः दिल्लीनगरे उद्घाटितः। भारतसर्वकारेण नवम्बर 1979 तमे वर्षे एकस्याः परियोजनायाः अनुशंसाधारेण शिक्षा विभाग– मानव संसाधनविकास– मन्त्रालयस्य प्रशासकीयनियन्त्रणे स्वायत्तशासि निकायरूपेण/पंजीकृतसमितिरूपेण वा राष्ट्रियमुक्त–विद्यालयस्य स्थापनाय निर्णीतम् मुक्तविद्यालयञ्चापि अत्रैव समायोजितम्। अक्टूबर 1990 तमे वर्षे भारतसर्वकारः प्रस्तावेनैकेन राष्ट्रियमुक्तविद्यालयं माध्यमिक/उच्चमाध्यमिकपरीक्षाणां सञ्चालनार्थं प्रमाण–पत्रप्रदानाय चाधिकृतवान्। विद्यालयोऽयं दूरशिक्षायाः माध्यमेन लक्षाधिकनागरिकाणां कृतेमुक्तशिक्षाव्यवस्थां सम्पादयति। यत्र ग्राम्याः, नागरिकाः निर्धनजनाः, नार्यः, निम्नवर्गीयाः, कार्यरतजनाः, युवानः, अनियमिताः च छात्राः ये औपचारिकविद्यालयव्यवस्थया सम्बद्धाः न भवितुमर्हन्ति शिक्षामधीयन्ते। किञ्चात्र समयस्य, स्थानस्य, क्षमतायाश्च विषये नमनीयत्वं दरीदृश्यते। साम्प्रतमेव विद्यालयोऽयं बहून् व्यावसायिकपाठ्यक्रमान् प्रारब्धवान्। वर्तमाने विद्यालयेऽस्मिन् राष्ट्रस्य केन्द्रशासितप्रदेशैः राज्यैश्च समागतानां लक्षद्वयाधिकछात्राणां नामाङ्कनं वर्तते। किञ्च साम्प्रतं समग्रे राष्ट्रे विद्यालयस्यास्य 339 मानिताध्ययनकेन्द्राणि वर्तन्ते यत्र 39 व्यवसायशिक्षासम्बद्धानि सन्ति।

(9) शैक्षिक–प्रविधि–कार्यक्रमः (Educational Technology Programme)––

शिक्षायां व्यापकरूपेण गुणात्मकपरिष्काराय तदभिवृद्धये च चतुर्थयोजना–वधिकाले 1972 तमे वर्षे शैक्षिकप्रविधिकार्यक्रमः प्रारब्धः। अस्याः योजनान्तर्गततया राष्ट्रियशैक्षिकानुसंधान–प्रशिक्षणपरिषदि एकं शैक्षिकप्रविधिकेन्द्रं संस्थापितम्, एकविंशराज्यानाङ्कृते च शैक्षिकप्रविधिकक्षसंस्थापनार्थं शतप्रतिशतं साहाय्य–मभिप्रदत्तम्।

अन्तरिक्षप्रसारणसुविधानां विस्तारस्य शैक्षिकप्रायोजनायाश्च प्रवर्धमाना–मावश्यकतामवधार्य शिक्षामन्त्रालयेन कृत्रिमोपग्रहाणां माध्यमेन प्रसारितशैक्षिक–दूरदर्शनकार्यक्रमाणां सज्जीकरणस्योत्तरदायित्वं ग्रहीतुं निश्चयः कृतः। तदनुगुणं राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषदि एकं केन्द्रीयशैक्षिकप्रविधिसंस्थानं, षट्सङ्ख्यकेषु च राज्येषु यथा–आन्ध्रप्रदेश–बिहार–गुजरात–महाराष्ट्र–उडीसा–उत्तरप्रदेशेषु राजकीयशैक्षिकप्रविधिसंस्थानानि संस्थाप्य, इतरराज्यानाञ्च प्रविधिकक्षान्

सशक्तीकृत्य, विकेन्द्रीकृताधारेण शिक्षाक्षेत्रान्तर्गतं शैक्षिकदूरदर्शनकार्य-क्रमनिर्माणसुविधानां सुलभीकरणार्थं शिक्षामन्त्रालयद्वारा एका योजना सज्जीकृता।

1986 ईस्वीयाया: राष्ट्रियशिक्षानीतेरुद्देश्यान्यवाप्तुं 1987 तमे वर्षे शैक्षिक-प्रविधियोजनायां संशोधनं विहितम्। अस्योद्देश्यं शैक्षिकदूरदर्शनस्य इतर-कार्यक्रमनिर्माणसौविध्यानां च सशक्तीकरणमासीत्। केन्द्रीयशैक्षिकप्रविधिसंस्थानेन सितम्बर 1992 वर्षं यावत् 715 शैक्षिकदूरदर्शनकार्यक्रमा: 914 भाषानुवादाश्च सज्जीकृता:। किञ्च राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषदा अपि एकस्या: समिते: सङ्घटनात्पदं तस्या: संरक्षणे बहिक्षेत्रीय निर्मातृभ्य: नवशैक्षिकदूरदर्शनकार्यक्रम:-निर्माणकार्यमभिप्रदत्तम्।

(10) विद्यालयेषु विज्ञानशिक्षायां परिष्कार: —

1987-88 तमे वर्षे केन्द्रप्रायोजितविद्यालयेषु विज्ञानशिक्षापरिष्कारायैका योजना प्रारब्धा। अस्या: योजनाया:अन्तर्गततया माध्यमिकोच्चमाध्यमिकविद्यालयेषु च विज्ञानप्रयोगशालानां नवीनीकरणाय, नूतनोपकरणानां सामग्रीणाञ्च एकत्रीकरणाय, विज्ञानगणितयो: शिक्षकेभ्य: उचितप्रशिक्षणप्रदानाय च राज्यानां केन्द्रशासित-प्रदेशानाञ्च कृते साहाय्यं दत्तम्। अस्यां योजनायां विज्ञानशिक्षाक्षेत्रे नूतनपरियोजनानां निर्माणाय, संसाधनसम्बद्धकारकाणामेकत्रीकरणाय च कार्यरतस्वयंसेविसङ्घटनानां कृते साहाय्यदानमप्यन्तर्भवति।

(11) विद्यालयेषु संगणकशिक्षा: —

संगणकस्य वैविध्यपूर्णमुपयोगं शिक्षामाध्यमरूपेण तत् सम्भावनाञ्च दृष्ट्वा छात्र-शिक्षकाणाङ्कृते तदभिज्ञानाय विद्युद्विभागेन शिक्षाविभागेन च संयुक्तरूपेण 1984-85 तमे वर्षे अभिचितमाध्यमिकोच्चतरमाध्यमिकविद्यालयेषु च संगणनज्ञानाय अध्ययनाय चैका मार्गदर्शकपरियोजना प्रारब्धा। 1989-90 वर्षं यावत् एतद् योजनान्तर्गततया 2,598 विद्यालया: अस्यां परियोजनायां सम्मिलिता: अभूवन्। एषु विद्यालयेषु सम्भारतन्त्राधारस्य समुपलब्धये शिक्षकाणां प्रशिक्षणाय च 61 (एकषष्टि:) संसाधनकेन्द्राणां स्थापना कृता।

तत्तत्संगणकप्रविधे: संस्थापनाय 'संगणकानुरक्षणनिगम:' स्व-उत्तरदायित्वं निर्वहति। प्रविधे: विकासाय, शैक्षिकसहायतायै, शिक्षकप्रशिक्षणव्यवस्थायै च राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषच्च प्रमुखसंस्थारूपेण कार्यं करोति।

राष्ट्रियशिक्षानीते: व्याख्यातोद्देश्यानुगुणं राष्ट्रस्य 13,000 उच्चतरमाध्यमिक-

विद्यालयानां समायोजनाय 1987–88 तमे वर्षे एको विस्तृतकार्यक्रमः समारब्धः। परन्तु धनराशेरभावेनेतरप्रशासनिककारणैश्च प्रस्तावोऽयं स्वलक्ष्यं नाधिगतवान्। किञ्च योजनेयम् अग्रिमविस्ताराय संशोधनमवाप्तवती।

(12) केन्द्रशासितप्रदेशा :—

भारतसर्वकारः केन्द्रशासितप्रदेशानां शिक्षायै पूर्णत उत्तरदायी वर्तते। केन्द्रेणैव तत्र प्राथमिकमाध्यमिकोच्चशिक्षायाश्च व्यवस्था क्रियते। अयमेव सर्वविधशिक्षाव्यवस्थां सम्पाद्य तद् व्ययं विभर्ति।

केन्द्रसर्वकारः संघीयक्षेत्राणां माध्यमिकविद्यालयातिरिक्तम् अष्टादश व्यक्तिगत-विद्यालयान् केन्द्रीयविद्यालयान् च सञ्चालयति। एतदतिरिक्तं तेन बहवः एतादृश्यः योजनाः संस्थाश्च सञ्चाल्यन्ते याः माध्यमिकशिक्षायाः समुन्नतये परिष्काराय च महत्त्वपूर्णानि कार्याणि सम्पादयन्ति। तासु प्रमुखयोजना एवं द्रष्ट्व्यः —

(1) राष्ट्रियानुशासनयोजना (National Discipline Scheme)

(2) लक्ष्मीबाई–शारीरकशिक्षामहाविद्यालयः (Lakshmibai Collage of Physical Education), ग्वालियर

(3) केन्द्रीयांग्लाभाषासंस्थानम् (The Central Institute of English), हैदराबाद

केन्द्रसर्वकारेण माध्यमिकशिक्षासौलभ्यमभिवर्धयितुं निम्नाङ्कितोपायानां परिकल्पनं विहितम् —

(1) अल्पकालिकोपायरूपेण विज्ञान–वाणिज्य–व्यावसायिकविषयैः सार्धं विविधपाठ्यक्रमाणाङ्कृते विद्यमानसंस्थासु अत्यावश्यकसौविध्यं प्रदातुं परामर्शो दास्यते।

(2) विद्यालयविहीनक्षेत्राणामनुसंधानाय ततश्च तत्तत्क्षेत्रेषूच्चतर विद्यालयोद्घाटनाय च द्रुतगत्या प्रयासार्थं परामर्शो दास्यते येन माध्यमिकविद्यालयेषूच्चप्राथमिकविद्यालयानामनुपातः 1:1:86 तः न्यूनः न स्यात्।

(3) विद्यालयविहीनजनसंख्यातः विद्यमानविद्यालयानां मार्गः कियद्दूरमस्तीति विषयेऽवधानं दास्यते।

(4) मध्यमदीर्घकालिकोपायरूपेण स्पष्टानां परिभाषितानाञ्च मानदण्डानां मापकानामाधारेण प्रत्येकस्मिन् राज्ये विद्यालयसंस्थापनार्थं कार्यक्रमः संशोधयिष्यते।

(5) बालिकानाम्, अनुसूचितजातीनां जनजातीनां वा शैक्षिकरूपेण नामा–

ङ्कनेऽभिवृद्धये राज्येषु संघशासितप्रदेशेषु च सक्षमायाः विशिष्टयोजनायाःनिर्माणायाग्रहः करिष्यते।

(6) ये खलु जनाः पूर्णकालं विद्यालयं गन्तुं न शक्नुवन्ति, किञ्च ये माध्यमिक-विद्यालयीयशिक्षां न प्राप्तवन्तः, तेषां शैक्षिकावश्यकतां सम्पूरयितुं मुक्तविद्यालयपद्धतेः विस्तारं कृत्वा तत्सुदृढीकरणं करिष्यते।

अष्टमीयोजनावधौ समग्रे राष्ट्रे विद्यालयशिक्षायाः 10+2 योजनार्थमेकस्य समशैक्षिकप्रारूपस्य स्वीकरणाय सुनिश्चितकरणाय चाधोनिर्दिष्टप्रयाससम्पादनस्य परिकल्पना कृता।

(1) येषु राज्येषु संघशासितप्रदेशेषु चेदानीं यावत् राष्ट्रियैकरूपशैक्षिककार्यक्रमः नाङ्गीकृतः, तत्र 5+3+2+2 इत्यस्य प्रारूपस्य स्वीकरणार्थं प्रयासः करिष्यते।

(2) समप्रारूपे समागतसमस्यानां काठिन्यानाञ्चापाकरणाय राज्यैः संघशासितप्रदेशैश्च शैक्षिकप्राधिकरणानां परामर्शेण प्रविधीनां सज्जीकरणाय च कार्यसमूहस्य सङ्घटनं करिष्यते।

(3) 'माध्यमिकशिक्षा' यत् सामान्यशिक्षायाः अन्तिमं चरणं भवति तस्य विषय-वस्तु पाठ्यक्रमस्य चाधोनिर्दिष्टक्षेत्राणि ध्यात्वा सज्जितं भविष्यति।

1. भाषा (मातृभाषा, हिन्दी, आंग्लभाषा), 2. गणितम्, 3. विज्ञानम्, 4. सामाजिकविज्ञानं (इतिहासः, भूगोलः, नागरिकशास्त्रं, अर्थशास्त्रञ्च), (5) कार्यानुभवः, (6) कलाशिक्षा, (7) स्वास्थ्यशारीरकशिक्षा, (8) मूल्याधारितशिक्षा, (9) जनसंख्याशिक्षा।

(4) "उच्चतर माध्यमिक" (10+2) स्तरमेतद् विद्यालयशिक्षायाः महत्त्वपूर्ण-चरणं वर्तते यतोह्यस्मात् परं छात्राः भविष्ये चिकित्सकाः, अभियन्तारः, प्रौद्योगिकविदः, शिक्षकाः वा भवितुं व्यावसायिकपाठ्यक्रमेषु प्रतिभागित्वं सम्पादयितुं तृतीयचरणे वा शैक्षिकक्रियाकलापानां निरन्तरतायै पात्रतां प्राप्नुवन्ति। अतः स्तरेऽस्मिन् छात्राणाङ्कृते भिन्न-भिन्नविषयाणां यथा - भौतिकी, रसायनशास्त्रं, जीवविज्ञानं, गणितं, भू-विज्ञानं, इतिहासः, भूगोलः, राजनीतिशास्त्रं, अर्थशास्त्रं, समाजशास्त्रं, दर्शनशास्त्रं, मनोविज्ञानं, भाषा एवं कलापूर्णविषयाणां संरचनायाः ज्ञानं दास्यते। किञ्चेतेषां विषयाणां विषयवस्तु अद्यतनविकासैः युक्तं स्यात्।

वित्तीयसाहाय्यम् :—

केन्द्रसर्वकारः अधोलिखितकार्याणाङ्कृते राज्यसर्वकारेभ्यः वित्तीयं साहाय्यं

प्रयच्छति --

(1) चतुर्दशतः षोडशवयोवर्गीयबालकानां बालिकानाञ्च कृते समधिक-विद्यालयानां संस्थापनार्थम्।

(2) माध्यमिकविद्यालयानाम् उच्चतरमाध्यमिकविद्यालयेषु प्रोन्नतये।

(3) शिक्षकाणामुपयुक्तपूर्त्तये।

(4) अप्रशिक्षितसेवारतशिक्षकाणां प्रशिक्षणार्थं सञ्चालितकार्यक्रमाणाङ्कृतेऽनुदानं दीयते।

(5) पुस्तकालयानां परिष्काराय।

(6) विज्ञान-शिक्षणार्थं सौविध्यं प्रदातुम्।

(7) केन्द्रप्रस्तावितयोजनानां सञ्चालनार्थम्।

राज्यसर्वकाराणां कार्याणि :—

माध्यमिकशिक्षा राज्यस्य साक्षात्नियन्त्रणे तिष्ठति। नियन्त्रणमेतदग्राङ्कितसाधनैः संस्थाप्यते —

(1) शिक्षामन्त्रालयः —

मन्त्रालयोऽयं शिक्षासम्बद्धनीतीनां प्रस्तावाय नियन्त्रणाय चोत्तरदायित्वं भजते। अयं माध्यमिकशिक्षासंहितायाः अवधेर्निधारणपाठ्यक्रमयोश्च सम्बन्धाय परामर्शं प्रददाति। एतदतिरिक्तं माध्यमिकशिक्षासंहितायाः स्वीकृतिं प्रदाय आय-व्ययपत्रकं निर्धारयति। स्वातन्त्र्यप्राप्तेः पश्चात् शिक्षामन्त्रालयस्य समक्षं माध्यमिकशिक्षासम्बद्धाः बहवः समस्याः समुत्पन्ना अभूवन्। यासां समाधानं कृतं मन्त्रालयेन यथा -- शिक्षकाणां पारिश्रमिकं, पाठ्यक्रमः, आंग्लभाषायाः हिन्द्याः वा स्थानं, पुस्तकानां राष्ट्रिय-करणञ्चेत्यादयः।

एतेषां विषयाणां सम्बन्धे प्रतिराज्यं स्वनीतीनां निर्धारणं करोति। अनेन समग्रराष्ट्रस्य शिक्षानीतौअनुरूपत्वस्याभावो दरीदृश्यते। यद्यपि केन्द्रसर्वकारेण अनुरूपत्वं सम्पादयितुं समये-समये बहवो निर्देशाः दीयन्ते परं स्थानीयस्थितीनां नीतीनाञ्च वैभिन्न्येनैकरूपत्वस्य अभावः भवत्येव।

(2) शिक्षा-विभागः —

विभागोऽयं शिक्षामन्त्रालयेन निर्धारितनितीनां क्रियान्वयनं करोति। किञ्चानुदानानां तत्सम्बद्धनियमानां वा पालनं क्रियते नवेत्येतदपि दृश्यतेऽनेन। अयं सर्वकार-

सञ्चालितानाम् अनुदानप्राप्तविद्यालयानाञ्चोपयुक्तसञ्चालनायापि स्वोत्तरदायित्वं बिभर्ति। अनेन च सर्वेषां खलु विद्यालयानां निरीक्षणं विधीयते — कार्यमेतद् निरीक्षकाणां निरीक्षिकाणां वा माध्यमेन सम्पादयति। समधिकप्रान्तेष्वस्य कृते उप-शिक्षासञ्चालकस्यापि नियुक्तिः क्रियते यः माध्यमिकशिक्षासम्बन्धे शिक्षा-सञ्चालकस्य साहाय्यमाचरति। शिक्षाविभागद्वारा अपि माध्यमिकविद्यालयानां सञ्चालनं क्रियते।

वस्तुतः सर्वकारः पञ्चसंख्यकेषु एकस्य खलु विद्यालयस्य स्वयं सञ्चालनं करोति यस्य सञ्चालनार्थं सः माध्यमिकशिक्षायाः आय-व्ययपत्रकम् इत्यस्य समधिकं भागं व्ययीकरोति। अस्य सञ्चालनेन बहुसमस्याः जायन्ते, यथा — अनेन सर्व-कारीयासर्वकारीयशिक्षकयोःपारिश्रमिकमध्ये महान् भेदः दरीदृश्यते। इत्थं असर्वकारीयशिक्षकाः पारिश्रमिकमसाम्यमपाकर्तुं सर्वकारं याचनां कृतवन्तः। विषयेऽस्मिन् शिक्षाऽऽयोगेन परामृष्टं यत् - एतादृग्विद्यालयानां शिक्षकेषु जायमानः वेतनादिक्रमभेदः अपाकरणीयः, साम्प्रतमुत्तरप्रदेशेऽसाम्यमेतद् समाप्तिं गतवत्।

हण्टर-आयोगेन परामर्शो दत्तः यत् सम्भवे सति माध्यमिकशिक्षा, अनुदानानामा-धारेणैव प्रदातव्या, सर्वकारश्च तादृग्विद्यालयानां प्रत्यक्षप्रबन्धात् पृथक् भवेत्। किञ्चानेनायोगेन स्पष्टं यत् -- सर्वकारः व्यावसायिकविद्यालयानां बालिकाविद्यालयानाञ्च व्यवस्थां कुर्यात्, एवञ्च सः विशेषतः एतादृक्क्षेत्रेषु विद्यालयानां स्थापनं कुर्यात् यत्र तत्रत्याः जनाः विद्यालयं सञ्चालयितुमसमर्थाः भवन्ति। अत्रैतदप्यवधेयं यत् सर्वकारीयविद्यालयास्तु स्युरेव चेत् तेषामान्तरिक-प्रशासने प्रजातन्त्रस्य विकेन्द्रीकरणस्य च सिद्धान्तानाङ्कृते स्थानं स्यात्। एवमेव तेषां समाजेन सहापि सम्बन्धस्थापनाय परामर्शदातृपरिषदां संस्थापनं भवेत् यत्र सामाजिका अपि प्रतिनिधित्वं प्राप्नुयुः।

माध्यमिकशिक्षापरिषद् :—

कलकत्ता-विश्वविद्यालयायोगस्य अनुशंसया भारते पञ्चदशमाध्यमिक-शिक्षापरिषदां संस्थापनमभवत्। परिषदां नाम्नि तत्तत्सञ्चालितपरीक्षाणां विवरणञ्च प्रथमपरिशिष्टे द्रष्टुं शक्यते। आसां परिषदां कार्याणि विभिन्नराज्येषु भिन्नानि सन्ति। अधिकांशतः परिषदियं परीक्षाणां सञ्चालनार्थं तत्तत्पाठ्यक्रमनिर्धारणाय च कार्यं सम्पादयति। काश्चन च परिषदः शिक्षाविभागाय परामर्शमपि ददाति। काश्चन यथा - विदर्भप्रान्तस्य माध्यमिकपरिषद् शिक्षाविभागस्य प्रशसकीयकार्यमपि प्रभावितं करोति। बिहारप्रान्तीयपरिषच्च सर्वकारस्य निरीक्षकाणां माध्यमेन आत्मना नियुक्त-

निरीक्षकाणाञ्च माध्यमेन विद्यालयानां निरीक्षणं करोति।

स्थानीयसंस्थानां कार्याणि :—

हण्टरायोगस्य परामर्शं प्राप्य माध्यमिकशिक्षायाः कार्य-भारं 1883-84 तमे वर्षे स्थानीयसंस्थाभ्यः अभिप्रदत्तम्। ततश्च संस्था एताः कार्यमेतद् सम्पादयन्ति। अखिलभारतीयद्वितीयशैक्षिकपर्यवेक्षणानुसारं प्रायः एकत्रिंशल्लक्षच्छात्राः स्थानीयसंस्थाभिः सञ्चालितविद्यालयेषु शिक्षणरताः आसन्।

व्यक्तिगत-संस्थानां कार्याणि :—

माध्यमिकशिक्षाविकासे व्यक्तिगतसंस्थानां महद्योगदानमस्ति। एतादृग्विद्यालयानां प्रबन्धं विविधसंस्थाः कुर्वन्ति यथा — धार्मिकसङ्घटनम्, पंजीकृतमण्डलानि, विभिन्नसम्प्रदायाश्च। भारतराष्ट्रस्य पञ्चशतप्रतिशततोऽधिक-विद्यालयानां सञ्चालनं व्यक्तिगतसंस्थाभिः क्रियते। आसां समितीनामान्तरिकप्रबन्धं समितीनां माध्यमेन भवति। आसु समितिषु प्रधानाचार्यः, स्थायिशिक्षकाणां प्रतिनिधयः, धार्मिकसङ्घटनानां प्रतिनिधयः, शिक्षाविभागस्य चैको प्रतिनिधिर्भवति। अत्रान्यराष्ट्रवत् अभिभावकानां प्रतिनिधयोऽपि प्रतिनिधित्वं कुर्युश्चेद् वरं यतो हि ते स्वबालकानां हितसंरक्षणार्थं, छात्राणामनुशासनहीनत्वस्य अपाकरणे स्वसहयोगं दास्यन्ति।

माध्यमिकशिक्षायाः वित्तीयव्यवस्था -

प्रबन्धदृष्टिकोणेन विद्यालयाः सर्वकारीयाः, स्थानीयसंस्थाभिः सञ्चालिताः, सहायतानुदानप्राप्तव्यक्तिगतविद्यालयाः, साहाय्यरहिताश्चेत्याहत्य चतुर्धा विभज्यन्ते। एतेषां वित्तीयव्यवस्थायाः विवेचनमेवं दृश्यते —

(1) सर्वकारीयविद्यालयाः —

एते पूर्णतः सर्वकारद्वारा सञ्चाल्यन्ते, सर्वकारप्रदत्तधनराशिं व्यतिरिच्य शुल्कमपि आयस्रोतः वर्तते।

(2) स्थानीयसंस्थाभिः सञ्चालितविद्यालयाः --

जिलापरिषदः, नगरपालिकाश्च एतान् विद्यालयान् आत्मनः आयद्वारा, अनुदानेन, शुल्कमाध्यमेन वा सञ्चालयन्ति।

(3) सहायताप्राप्तव्यक्तिगतविद्यालयाः —

एषां वित्तीयव्यवस्था मुख्यतः सर्वकारीयानुदानेन वृत्तिदानेन वा पूर्णतां याति।

(4) साहाय्यरहितव्यक्तिगतविद्यालयाः —

एषां वित्तीयव्यवस्था मुख्यतः विद्यालयशुल्कद्वारा वृत्तिदानेन वा भवति।

विश्वविद्यालयशिक्षाप्रशासनम्

विश्वविद्यालयशिक्षायाः अभिप्रायः केवलं विश्वविद्यालयैः दीयमानाशिक्षा एव नास्त्यपितु विश्वविद्यालयेन सह सम्बद्धमहाविद्यालयेषु दीयमाना शिक्षाऽपि वर्तते।

विश्वविद्यालयः एका साहाय्यप्राप्तसंस्था वर्तते येषां प्रबन्धः तैरेव क्रियते।

भारतराष्ट्रे त्रिविधाः विश्वविद्यालयाः दरीदृश्यन्ते यथा —

(1) केन्द्रीयविश्वविद्यालयाः —

एते केन्द्रशासिताः भवन्ति, एषां व्ययस्य प्रबन्धस्य च पूर्णभारः केन्द्रीयसर्वकारस्योपरि भवति। एतादृशः अनेकाः विश्वविद्यालयाः साम्प्रतं सञ्चाल्यन्ते।

(2) राज्यविश्वविद्यालयाः —

एते राज्यशासिताः भवन्ति। किञ्चैतेषां व्ययस्य प्रबन्धस्य च भारः राज्यस्योपरि भवति। केन्द्रीयविश्वविद्यालयान् व्यतिरिच्य अन्ये विश्वविद्यालयाः राज्यीयास्सन्ति।

(3) विश्वविद्यालयसमसंस्थाः (मानितविश्वविद्यालयाः) —

भारतसर्वकारद्वारा एतादृशः विश्वविद्यालयाः विश्वविद्यालयानुदानायोगस्य-तृतीयाधिनियमानुसारेण संस्थापितास्सन्ति। साम्प्रतं एतादृशः अनेकाः विश्वविद्यालयाः सञ्चाल्यन्ते।

अत्र उपरि निर्दिष्टेषु प्रथम-द्वितीयप्रकार-विश्वविद्यालयाः त्रेधा भवितुमर्हन्ति। तद्यथा —

(1) सम्बद्धविश्वविद्यालयाः (Affiliating University):—

विश्वविद्यालयोऽयं स्वाधिकारक्षेत्रे संस्थितमहाविद्यालयानाङ्कृते मान्यत्वं प्रददाति नियन्त्रणञ्च स्थापयति। किञ्च तेषाङ्कृते पाठ्यक्रमं सन्निर्धार्य परीक्षाणां व्यवस्थाञ्च करोति। एतादृशः विश्वविद्यालयाः आगरा, फैजाबाद, रीवा, बैंगलूर झाँसी इत्यादयस्सन्ति।

(2) एकात्मकमहाविद्यालयाः (Unitary University):—

विश्वविद्यालयोऽयं आत्मना नियुक्तशिक्षकाणाङ्कृतेऽध्ययनकार्यं विभाजयति प्रशासने च स्वाधिकारं स्थापयति। एतादृशः विश्वविद्यालयाः अधस्तनाः वर्तन्ते —

1. अन्नामलाई विश्वविद्यालयः अन्नामलाई नगरम्, 2. जादवपुरविश्वविद्यालयः, कलकत्ता, 3. जवाहरलाल नेहरू विश्वविद्यालयः, दिल्ली, 4. नरेन्द्रदेव कृषि-औद्योगिकविश्वविद्यालयः फैजाबादनगरम्, 5. जवाहरलालनेहरू प्रौद्योगिकी विश्वविद्यालयः, हैदराबादनगरम्, 6. रुड़की विश्वविद्यालयः ,रुड़की।

(3) संघात्मकमहाविद्यालयाः (Federal University):—

एतादृशविश्वविद्यालयाः तत्सङ्घटकमहाविद्यालयैः विश्वविद्यालयशिक्षां व्यवस्थापयन्ति। भारतवर्षे एतादृशः विश्वविद्यालयाः अपि वर्तन्ते यथा -- कोचीनविश्वविद्यालयः कोचीनम्, इन्दौर विश्वविद्यालयः, इन्दौरनगरम्, महात्मागाँधिकृषिविद्यापीठम् राहुरी मुम्बई विश्वविद्यालयः, मुम्बई।

इत्थं 1950-51 तमे वर्षे भारतवर्षे केवलं (27) सप्तविंशतिःविश्वविद्यालया एवासन् परं साम्प्रतं अनेका उच्चशिक्षाप्रदातृविश्वविद्यालयाः, मानित-विश्वविद्यालयाः, राष्ट्रियमहत्त्वशालिसंस्थानानि वा सन्ति। येषां विषये परिशिष्टद्वये विवरणं प्रस्तुतम्।

विश्वविद्यालयानामान्तरिकव्यवस्था -

विश्वविद्यालयानामान्तरिकव्यवस्था किञ्चिद् वैभिन्न्यमतिरिच्य प्रायः एकसमा एव वर्तते। केन्द्रीयविश्वविद्यालयान् विहाय राज्यविश्वविद्यालयानां कुलाधिपतिः, औपचारिकाध्यक्षो वा तत्तत्प्रान्तीयराज्यपालमहोदयः भवति। एतदतिरिक्तं प्रतिदिनं प्रशासनव्यवस्थां सम्पादयितुमेकः वैतनिकः कुलपतिर्भवति। अस्य नियुक्तिः निश्चितकालाय भवति। प्रायः त्रितः पञ्चवर्षाणियावत् अवधिरयं निश्चितः वर्तते।

विश्वविद्यालयशिक्षाऽऽयोगेनापि स्पष्टीकृतं यत् — कुलपतिः एतादृक् जनः स्यात् यः स्ववैदुष्येण व्यक्तित्वप्रभावेण वा शिक्षकाणां छात्राणाञ्च विश्वासं प्राप्नुयात्। किञ्च विश्वविद्यालयस्य चेतनां जागरयेत् सः। वस्तुतः कुलपतिः विश्वविद्यालयीय-व्यवस्थां सम्यग्रीत्या सम्पादयितुं विश्वविद्यालयस्य जनतायाश्च मध्ये सु-सम्पर्कं स्थापयेत्। कुत्रचिद् विश्वविद्यालयेषु कुलपतेस्साहाय्यं कर्तुमुपकुलपतेरपि व्यवस्था क्रियते। कुलपतेर्नियुक्तिः राज्यपालद्वारा चयनसमितिमाध्यमेन भवति। सामान्यतः विश्वविद्यालयस्य तिस्रः संस्थाः भवन्ति --

(1) शिष्टपरिषद् न्यायपालिका वा (Senate or Court):—

अस्यां संस्थायां विभिन्नरूपेण प्रतिनिधयः भवन्ति। यथा — प्राचार्यः, शिक्षकाः,

नगरपालिकाः, व्यावसायिकौद्योगिकहितानि, स्थानीयहितानि, प्रान्तीयविधान-मण्डलानि, दातर्णिां हितानि, पंजीकृतस्नातकाश्च। केचन सर्वकारीयविभागानामध्यक्षा अस्य पदेन सदस्याः भवन्ति। एतदतिरिक्तमस्य कृते कुलाधिपतिः विभिन्नप्रश्नान् निर्धारयति। इयम् आयव्ययपत्रक-विविधियाचिकादिविचारायापि अधिकृता भवति। साम्प्रतं संस्थायामस्यां निर्वाचितप्रतिनिधीनाङ्कृतेऽपि स्थानं प्रदीयते। शिक्षाऽऽयोगेन परामर्शो दत्तः यत् अस्यां संस्थायां छात्राणाङ्कृतेऽपि प्रतिनिधित्वं स्यात्।

(2) प्रबन्धकमण्डली कार्यपरिषद् वा (Syndicate or Executive Council):—

विश्वविद्यालयस्य प्रशासने संस्थेयं धुरं कार्यं सम्पादयति। किञ्च संस्थेयं समग्रप्रशासनसम्बद्धकार्याणि करोति। सम्पत्तेः कोषस्य दैनन्दिनप्रशासनञ्च सञ्चालयति। अयञ्चैको लघुनिकायो वर्तते अत्राधस्तनानाङ्कृते प्रतिनिधित्वं वर्तते —

(अ) कुलपतिः

(ब) प्रदेशस्य शिक्षासञ्चालकः,

(स) शिष्टपरिषत्प्रतिनिधयः

(द) सङ्कायानां सदस्याः

(य) महाविद्यालयानां वरिष्ठप्रधानाचार्याः

(3) संकायाः (Faculties):—

एतेऽध्ययनमण्डलानां माध्यमेन कार्यं कुर्वन्ति। वस्तुत एते समन्वयसंस्थापकाः निकायास्सन्ति ये विभिन्नविषयसम्बद्धसामान्यहितानां संरक्षणं कुर्वन्ति। विद्वत्परिषदस्साहाय्येन पाठ्यक्रमस्य, शिक्षणसङ्घटनानां परीक्षाणाञ्च विनियमनं कुर्वन्त्येते।

केषुचन विश्वविद्यालयेषु विश्वविद्यालयशिक्षणमण्डलमप्यस्ति यत् सम्बद्धमहा-विद्यालयेषु शिक्षणस्य नियन्त्रणं समन्वयञ्च स्थापयति। बहवो विश्वविद्यालयाः 'स्थायि वित्तसमितेः' विश्वविद्यालयीयशिक्षकाणां चयनं कर्तुं वैधानिकमण्डलानि च स्थापयन्ति। उत्तरप्रदेशे राज्यविश्वविद्यालयेन सम्बद्धाध्यादेशानां प्रवृत्तेर्पश्चाद् तत्प्रशासनेऽनेकमहत्त्वपूर्णानि परिवर्तनानि कृतानि येषां विवेचनमग्रिमाध्याये द्रष्टुं शक्यते —

विश्वविद्यालयस्य स्वायत्तत्वम् —

कोठारी-आयोगेन स्पष्टीकृतं यत् विश्वविद्यालयस्य स्वायत्तत्वं निम्नक्षेत्रेषु निहितं स्यात्।

(अ) छात्राणां चयने

(ब) शिक्षकाणां नियुक्तौ पदोन्नतौ वा

(स) अध्ययनविषये, शिक्षणविधिषु, अनुसंधानक्षेत्रे च समागतसमस्यानां चयने।

केन्द्रीयसर्वकारः विश्वविद्यालयाश्च :—

विश्वविद्यालयीयशिक्षाक्षेत्रे केन्द्रसर्वकारः अलीगढ़, बनारस, विश्वभारती, दिल्ली विश्वविद्यालयः, जवाहरलालनेहरूविश्वविद्यालयः, दिल्ली, इत्यादीनां विश्वविद्यालयानां समग्रव्यवस्थायै उत्तरदायी वर्तते। केन्द्रसर्वकार एव एषां विश्वविद्यालयानां कुलाधिपतेः कुलपतेश्च नियुक्तिं करोति। सम्पूर्णवित्तीयव्यवस्था च केन्द्रसर्वकारेणैव सम्पाद्यते। एतदतिरिच्य उच्चशिक्षाया आदर्शं यथावत् स्थापयितुं समन्वयं स्थापयितुञ्चोत्तर दायित्वं केन्द्रसर्वकार एव भजते। अस्योद्देश्यस्य सम्पूत्तर्यै एव विश्वविद्यालयशिक्षाऽऽयोगस्य अनुशंसया भारतसर्वकारेण 1953 तमे वर्षे विश्वविद्यालयानुदानायोगस्य स्थापना कृता। 1956 तः संस्थेयं वैधानिकनिकायरूपेण कार्यं सम्पादयति। किञ्च केन्द्रसर्वकारः विश्वविद्यालयानुदानायोगस्य माध्यमेन विश्वविद्यालयशिक्षायाः प्रसाराय परिष्काराय च महत्त्वपूर्णानि कार्याणि कर्तुं प्रवर्तते। एतदतिरिच्य आयोगेन शिक्षक-पुस्तकालय-प्रयोगशालासौविध्य-अनुसंधानकार्य-पुस्तक-काष्ठोपकरणानाञ्च कृते साहाय्यं कर्तुमनुदानराशिरपि दीयते।

एतानि दायित्वानि व्यतिरिच्य केन्द्रसर्वकारः विश्वविद्यालयीयशिक्षायाः विकासाय विस्ताराय च राज्यसर्वकाराणामैच्छिकसंस्थानाञ्च कृते सहायतानुदानं प्रददाति। किञ्चान्ताराष्ट्रियसहयोगसम्बद्धनैककार्यक्रमानपि सञ्चालयति।

राष्ट्रियशिक्षानीतिः 1986, उच्चशिक्षा च -

राष्ट्रियशिक्षानीतौ संकल्पितं यत् उच्चशिक्षा पूर्वापेक्षया गतिशीलत्वं प्राप्नुयात्। उच्चशिक्षापद्धतौ गतिशीलत्वं सम्पादयितुं राष्ट्रियशिक्षानीतेः कार्यक्रमाः नीतयश्च इत्थं वक्तुं शक्यन्ते —

(अ) संस्थानामेकीकरणं विस्तारश्च

(ब) स्वायत्तमहाविद्यालयानां विभागानाञ्च विकासः

(स) पाठ्यक्रमाणां पुनः सज्जीकरणम्

(द) शिक्षकाणां प्रशिक्षणम्

(य) अनुसंधाने सुदृढत्वसम्पादनम्

(र) कार्यक्षमतायां परिष्कारः

(ल) राज्यस्तरे राष्ट्रियस्तरे च समन्वयाय संरचनानां सज्जीकरणम्।

(अ) संस्थानामेकीकरणं विस्तारश्च —

विश्वविद्यालयानां पञ्चसहस्रमहाविद्यालयानाञ्च कृते न्यूनतमं स्तरं स्थापयितुं अवस्थापनाऽपि न प्रदत्ता। न्यूनतमस्तरेऽतिन्यूनत्वं मा भूत् तदर्थं सौविध्यप्रदान-मनिवार्यत्वं भजते। सप्तम्यां योजनायामासु संस्थासु सुविधानां सौष्ठवाय उपलम्भनाय च प्रस्तावोऽस्ति यः अष्टम्याः योजनायाः पश्चादपि जायमानासु योजनासु नैरन्तर्येण सञ्चालितो भविष्यति। एतानि लक्ष्याण्यवाप्तुं प्रस्तावोऽयमस्ति —

(1) निर्धारितमानदण्डानामाधारेण चरणेषु, विद्यमानसंस्थानां सज्जीकरणाय योजनानिर्माणम्।

(2) विश्वविद्यालयान्तर्गतस्वायत्तविभागानाङ्कृते प्रोन्नतिविकासादर्श-संविधिभिस्साकं वित्तीयसहायतायै प्रोत्साहनाय च विश्वविद्यालयानुदानायोगेन एकस्याः योजनायाः सज्जीकरणम्।

(3) योजनाम् अपेक्षितभौतिकसौकर्यं च विना न कापि संस्था स्थापिता भवेत् इत्येतदर्थं प्रयासः।

(4) नूतनमहाविद्यालयानाङ्कृते सम्बद्धत्वं प्रदातुं मार्गदर्शिरूपरेखाणां सज्जीकरणम्, यत्रैतरविषयैस्साकं दृश्य-श्रव्यपद्धतयः, वी.सी.आर., संगणकादिनूतन शिक्षणसाधनैस्सह प्रत्येकसंस्थायामपेक्षितन्यूनतमसुविधानां व्यवस्था स्यात्।

(5) भौतिकसौविध्यानामाधारेण प्रवेशे नियन्त्रणसम्पादनम् उच्चशिक्षासंस्थासु प्रवेशार्थञ्च प्रवेशपरीक्षायाः विकासकरणम्।

(ब) स्वायत्तमहाविद्यालयानां विभागानाञ्च विकासः —

अस्योद्देश्यस्य सम्प्राप्तये प्रस्तावाः सन्ति यत् —

(1) विश्वविद्यालयाधिनियमे, यत्रावश्यकत्वे सति एतादृशी व्यवस्था स्यात् यथा महाविद्यालयः स्वायत्तत्वं प्राप्नुयात्।

(2) सहायतापद्धतीनां मार्गदर्शिरूपरेखाणां सज्जीकरणं स्यात्।

(3) सम्बद्धमहाविद्यालयानां पद्धतिः, सुष्ठु महाविद्यालयानाङ्कृते पाठ्यचर्यायाः, अध्ययनपाठ्यक्रमस्य, मूल्याङ्कनस्य च स्वपद्धतीनां सज्जीकरणार्थं स्वातन्त्र्यं दद्यात्।

(4) अभिचितमहाविद्यालयानाङ्कृते विशिष्टसाहाय्यं यथा प्रोत्साहनानां योजनायाः प्रतिपादनम्।

(5) स्वायत्तमहाविद्यालयानां कार्यक्रमस्य कृते केन्द्रीयसर्वकारेण पञ्च वर्षाणि यावत् पूर्णतया राशिः प्रदातव्याः स्यात्।

(स) पाठ्यक्रमाणां पुनस्सज्जीकरणम् —

अस्य लक्ष्यस्य प्राप्तये परामर्शो दत्तः यत् —

(1) उच्चशिक्षायाः पाठ्यक्रमाणां पुनर्निर्माणाय अन्तर्विषयात्मककार्यक्रमाणां उद्योगसम्बद्धविषयाणाञ्च विकासाय विश्वविद्यालयेषु अध्ययनपरिषदः पुनर्घटितास्स्युः।

(2) उच्चशिक्षायाः पाठ्यक्रमाणां पुनर्निमाणाय पुनः स्थापनाय च विश्वविद्यालयानां सङ्कायानाञ्च पूर्णं सहभागित्वं सुनिश्चितं स्यात्।

(3) पाठ्यक्रमाणां पुनर्निमाणस्य विकासे स्वायत्तमहाविद्यालयाः स्वायत्त-प्रमुखाश्च साधनानि भविष्यन्ति।

(द) शिक्षकप्रशिक्षणम् —

एतत्सम्बन्धिप्रस्तावाः सन्ति यत् —

(1) प्राध्यापकपदेषु नवागन्तुकशिक्षकेभ्यः शिक्षणप्रणालीविज्ञानं, शिक्षाशास्त्रं, शिक्षामनोविज्ञानम् इत्यादिविषयेषु अनुस्थापनकार्यक्रमाणामायोजनं स्यात्।

(2) सेवारतशिक्षकाणाङ्कृते न्यूनातिन्यूनं पञ्चवर्षेषु प्रतिशिक्षकं एकवारं पुनश्चर्यापाठ्यक्रमाणामायोजनं स्यात्।

(3) संगोष्ठीषु, विचार-गोष्ठीषु प्रतिभागितायै शिक्षकाः प्रोत्साहितास्स्युः।

(य) विश्वविद्यालयेष्वनुसंधानम् —

अस्य लक्ष्यस्य प्राप्तये परामर्शाः सन्ति यत् —

(1) अवस्थापना सुदृढा स्यात् विश्वविद्यालयानामनुसंधानराशौ च वृद्धिर्भवेत्।

(2) विश्वविद्यालयक्षेत्रे सहयोग्यनुसंधानसेवाः स्थापिताः स्युः।

(3) शिक्षकाणामनुसंधानेन सह संयुक्तत्वसम्पादनाय, विश्वविद्यालय-

पद्धतेरन्तर्गततया सञ्चाल्यकार्याणां प्रारम्भणाय च विभिन्नानुसंधानाभिकरणैस्सह औपचारिकसम्पर्कः विकसितः स्यात्।

(4) अन्तःस्नातकस्तरे स्नातकोत्तरस्तरे च प्रतिभान्वेषणपरीक्षाः अध्यैतृवृत्ति-योजनाश्च प्रारब्धास्स्युः।

(5) अनुसंधानकार्यक्रमेषु प्रवेशाय 'अखिलभारतीयपरीक्षाः' समायोजितास्स्युः।

(र) कार्यक्षमतायां परिष्कारः—

अस्य लक्ष्यस्याभिप्राप्तये परामर्शाः सन्ति यत् —

(1) प्रत्येकस्मिन् विश्वविद्यालये छात्राभिलेख-लेख-प्रशासनप्रबन्धकाय चापेक्षितान्यप्रदत्तानां (Data) स्थापनाय संगणकस्य व्यवस्थाकरणम्।

(2) अनुसंधानायऽपेक्षितसूचनानां स्त्रोतस्सामग्रीणाञ्च कृते व्यवस्थायाः सुनिश्चयः।

(ल) राज्यराष्ट्रियस्तरयोश्च समन्वयायाभिलेखानां सज्जीकरणम् —

अस्य कृते परामर्शास्सन्ति यत् —

(1) वैधानिकसंस्थारूपेण उच्चशिक्षाराज्यपरिषदां स्थापनम्।

(2) राज्यसर्वकाराणां मार्गदर्शनाय विश्वविद्यालयानुदानायोगेन सज्जितानाम् आदर्शनियमादीनां व्यवस्थापनं यत्र राज्यस्य अधिकाराणां घटनस्य चोल्लेखः स्यात्-

(3) परिषदः मुख्यकार्याणि एवं भविष्यन्ति —

1. प्रत्येकस्मिन् राज्ये उच्चशिक्षाया समानविकासकार्यक्रमस्य सज्जीकरणम्।

2. विश्वविद्यालयस्य महाविद्यालयानाञ्च कृते विकासकार्यक्रमाणां प्रारम्भिक-सुरक्षा।

3. मानकानां स्थिरीकरणाय विश्वविद्यालयानुदानायोगस्य कृते परामर्शः साहाय्यञ्च।

4. क्षेत्रीयानुरक्षणानुदानानां सुनिश्चयाय राज्यसर्वकाराणां कृते साहाय्यम्।

5. स्वायत्तमहाविद्यालयस्य कार्यक्रमाणां प्रोत्साहनम्।

6. नूतनसंस्थानां स्थापने राज्यसर्वकाराणां प्रोत्साहनम्।

(4) राष्ट्रियस्तरे उच्चशिक्षायाः नीतिगतविषयाणां समस्यानां वा निवारणायैकी-कृतयोजनां प्रारब्धुं स्नातकोत्तरशिक्षामन्तर्विषयकशोधञ्च सुदृढत्वेन सम्पादयितुं च।

एकस्याः शीर्षस्थसंस्थायाः स्थापना करिष्यते। अस्याः निम्नकार्याणि भविष्यन्ति–

1. सर्वकाराय नीतिसम्बद्धपरामर्शप्रदानम्।
2. भिन्न-भिन्नक्षेत्रेषु इतरसंस्थानां कार्यकलापानां समन्वयनम्।
3. अन्तर्विषयकतायै प्रोत्साहनम्।
4. स्रोतसामवण्टनम्।
5. सामान्यसङ्घटनानां संस्थानाञ्च स्थापनं प्रबन्धनञ्च।
6. बाह्यशैक्षिकसम्बन्धेषु नीतीनां समन्वयनम्।

गतिशीलता —

अस्य लक्ष्यस्यावाप्तये राज्यसर्वकाराः विश्वविद्यालयाश्च स्थानीयनिवासोपरि अनवधानं दत्वा छात्राणां योग्यताऽऽधारेण प्रवेशार्थं समुत्सुकाः भविष्यन्ति। इतरराज्यीयछात्राणाङ्कृते प्रवेशार्थं संस्थानाङ्कृते आवश्यकसाहाय्यं मार्गदर्शनं प्रदातुञ्च योजनानां निर्माणं करिष्यते। अतः छात्रनामाङ्कनस्य संकायस्य च कर्मकराणां क्षमताया व्यवस्थायै देशे सर्वत्र एकरूपत्वं सुनिश्चितं स्यात्। छात्राणाङ्कृते छात्रावासाणां भवनानाञ्च निर्माणस्य छात्रवृत्तेश्च व्यवस्थायै प्राथमिकत्वं दास्यते। विस्तारसेवा सततशिक्षाकार्यक्रमाश्च सर्वेषां विश्वविद्यालयीयकार्यक्रमाणां क्रियाकलापानाञ्चानि-वार्याङ्गानि भविष्यन्ति।

राज्यसर्वकारः विश्वविद्यालयश्च :—

यथा अस्माभिः दृष्टं यत् विश्वविद्यालयः स्वतन्त्रनिकायः वर्तते। एतस्योपरि सर्वकारस्य प्रत्यक्षरूपेण किमपि नियन्त्रणं नास्ति। किन्तु सर्वकारस्य अप्रत्यक्षरूपेण पर्याप्तनियन्त्रणमस्ति। सर्वकारेण तेषामुपरि निम्नलिखितरूपेण नियन्त्रणं क्रियते –

(1) राज्यस्य राज्यपालः विश्वविद्यालयस्य कुलाधिपतिः भवति।

(2) राज्यस्य राज्यपालः कुलपतेः नियुक्तिं करोति।

(3) शिष्टपरिषद्द्वारा प्रदत्तनियमाः तावत्पर्यन्तं प्रभाविताः न भविष्यन्ति यावत् राज्यपालः तदुपरि स्वीकृतिं न दास्यति। स्वीकृतेः पश्चादेव तेऽधिनियमस्य रूपं प्राप्स्यन्ति।

(4) कार्यकारिण्यां शिष्टपरिषदि वा सर्वकारेण अभिचिताः सदस्याः भवन्ति, येषां माध्यमेन सर्वकारः विश्वविद्यालयानां निर्णयस्योपरि स्वप्रभावं स्थापयति।

(5) सर्वकारद्वारा विश्वविद्यालयस्यायव्ययस्य निरीक्षणं क्रियते यतो हि तेषामायस्य मुख्यं स्रोतः सर्वकारेण प्रदत्तसहायतानुदानमेवास्ति।

(6) राज्यसर्वकाराः विश्वविद्यालयानुदानसमितीनां माध्यमेन राज्यीय-विश्वविद्यालयेभ्यः अनुदानं प्रयच्छन्ति।

विश्वविद्यालय-शिक्षायाः वित्तीयव्यवस्था

विश्वविद्यालयानां तत्सम्बद्धमहाविद्यालयानाम् आयस्य प्रमुखाणि साधनानि निम्नलिखितानि सन्ति —

(1) राज्यसर्वकाराणामनुदानम्।

(2) केन्द्रसर्वकारस्यानुदानम्।

(3) शुल्कः।

(4) वृत्तिदानमादयः।

अद्य शिक्षा एकं सम्मिलितं दायित्वमस्ति, अतः केन्द्रसर्वकारेण शिक्षायाः क्षेत्रे महत्त्वपूर्णं कार्यं करणीयम्। तेन पूर्वप्राथमिकशिक्षायाः विकासस्य, परिष्कारस्य प्रोत्साहनस्य च दायित्वं वोढव्यं यतो हि स्तरोऽयं बालकस्य भाविजीवनस्य आधारोऽस्ति। किन्तु भारते अस्य स्तरस्य शिक्षां प्रति विशिष्टं ध्यानं नैव प्रदीयते। अतः केन्द्रसर्वकारेण क्षेत्रेऽस्मिन् विशिष्टप्रयत्नः करणीयः।

पुनरावृत्तिप्रश्नाः

(1) भारते प्राथमिकशिक्षा-प्रशासनस्य कानि लक्ष्याणि सन्ति?

(2) राष्ट्रियशिक्षानीत्या सार्वभौमिकप्राथमिकशिक्षायाः लक्ष्यं कियत्कालपर्यन्तं प्राप्तिकरणस्य परामर्शः दत्तः?

(3) प्राथमिकशिक्षाक्षेत्रस्य दायित्वमभिप्राप्तुं केन्द्रसर्वकारेण कस्य सङ्घटनस्य निर्माणं कृतम्?

(4) प्राथमिकशिक्षायाः प्रसाराय परिष्काराय च केन्द्रीयसर्वकारेण कासां-कासां योजनानां सञ्चालनं कृतम्?

(5) प्राथमिकशिक्षायाः प्रशासने राज्यसर्वकाराणां दायित्वानि स्पष्टयत।

(6) सञ्चालनस्य दृष्ट्या माध्यमिकविद्यालयानां कति भेदाः सन्ति?

(7) माध्यमिकशिक्षायाः क्षेत्रे केन्द्रसर्वकारस्य भूमिका का?

(8) केन्द्रसर्वकार: माध्यमिकशिक्षाया: क्षेत्रे कासां संस्थानां माध्यमेन स्वदायित्वानि निर्वहति ?

(9) केन्द्रसर्वकारेण केन्द्रीयविद्यालयानां स्थापना किमर्थं कृता ?

(10) केन्द्रीयमाध्यमिकशिक्षापरिषद् कासां-कासां परीक्षाणां व्यवस्थां करोति ?

(11) नवोदयविद्यालयानां प्रमुखाण्युद्देश्यानि कानि-कानि सन्ति ? स्पष्टयन्तु।

(12) राष्ट्रियशिक्षासंस्थानं माध्यमिकशिक्षाया: क्षेत्रे स्वकार्याणि केषां विभागानां साहय्येन करोति ?

(13) शिक्षा-आयोगेन केन्द्रीयशिक्षासंस्थानस्य सम्बन्धे क: परामर्श: दत्त: ?

(14) भारतवर्षे केषु-केषु स्थानेषु क्षेत्रीयप्रशिक्षणमहाविद्यालयानां स्थापना सञ्जाता ?

(15) एतेषु महाविद्यालयेषु कतिप्रकाराणां पाठ्यक्रमानां व्यवस्था अस्ति ?

(16) विस्तारसेवाकार्यक्रमाणां निदेशालयस्य कार्याणां व्याख्यां कुर्वन्तु।

(17) माध्यमिकशिक्षाया: क्षेत्रे केन्द्रसर्वकारस्य वित्तीयदायित्वं किमस्ति ?

(18) राज्यसर्वकारस्य माध्यमिकशिक्षाया: सञ्चालने किमुत्तरदायित्वमस्ति ?

(19) राज्यसर्वकारा: माध्यमिकशिक्षां प्रति स्वदायित्वानि कथं निर्वहन्ति ?

(20) कियत्पर्यन्तं माध्यमिकशिक्षाया: भार: स्थानीयसंस्थानां कृते प्रदातुं शक्यते ? स्पष्टयन्तु।

(21) 'माध्यमिकशिक्षाया: विकासे व्यक्तिगतसंस्थानां महती भूमिका वर्तते' कथनमिदं स्पष्टयन्तु।

(22) माध्यमिकविद्यालयानां कानि-कानि वित्तीयस्त्रोतांसि सन्ति ?

(23) भारतवर्षे कति प्रकारा: विश्वविद्यालया: प्रचलितास्सन्ति ?

(24) 'विश्वविद्यालया: स्वायत्तता-प्राप्त संस्थास्सन्ति' कथनमिदं स्पष्टयन्तु।

(25) विश्वविद्यालयस्य प्रशासनिकसंरचनां संक्षेपेण वर्णयन्तु।

(26) केन्द्रीयसर्वकारेण विश्वविद्यालयशिक्षाया: विकासाय परिष्काराय च का व्यवस्था कृता ?

(27) राज्यसर्वकार: विश्वविद्यालयानां कथं नियन्त्रणं करोति ?

(28) 'अस्माकं देशे शिक्षाया: दायित्वं केन्द्रेराज्येषु च सम्मिलितरूपेण अस्ति'

सोदाहरणं स्पष्टयन्तु।

(30) राष्ट्रियशिक्षानीत्याः कार्ययोजनायाम् उच्चशिक्षायाः गतिशीलतायै के के परामर्शाः प्रदत्ताः ?

लेखार्थप्रश्नः

प्राथमिक–माध्यमिक–विश्वविद्यालयशिक्षायाः शासनप्रणालीनां विवरणं प्रस्तुत्य वर्णयन्तु यत् कस्य स्तरस्य प्रशासनव्यवस्था अधिका सफला अभूत्?

खण्डः (ब)

विद्यालयसङ्घटने प्रधानाचार्य-शिक्षक-छात्राणां भूमिका

(Role of Personnel in School Organization)

- विद्यालयसङ्घटनस्योद्देश्यानि सिद्धान्ताश्च
- प्रधानाध्यापकः - विद्यालयस्य नेतृरूपेण
- अध्यापकस्य गुणाः भारतीय-समाजे तस्य स्थितिः च
- छात्राणां वर्गीकरणं तदुन्नतिश्च
- विद्यालय-भवनम्
- विद्यालयीयपरिबर्हः
- संग्रहालयः, प्रयोगशाला, कार्यशाला च
- विद्यालय-पुस्तकालयः
- विद्यालय-छात्रावासः
- विद्यालय-कार्यालयः
- विद्यालयस्याऽऽन्तरिककार्याणि तेषां सङ्घटनञ्च
- पाठ्यक्रमनिर्माणस्य सिद्धान्ताः तेषां प्रकाराश्च
- समयतालिकायाः महत्त्वं तस्याः निर्माणकसिद्धान्ताश्च
- गृहकार्यम्
- पाठ्यक्रमसहगामिक्रियाः
- मूल्याङ्कनम्

1

विद्यालयसङ्घटनस्योद्देश्यानि सिद्धान्ताश्च

(Aims & Principles of Organization)

"The organizational phase is chiefly concerned with making arrangements that permit the beginning of purpose realization. It may also be a process of making new arrangement to replace old ones. In this case we call it reorganization but it is actually the same process as when it is called organization. In fact, most of what we call organization is really reorganization."

- French, Hull and Dodds.

विद्यालयस्य सङ्घटनात्मकपक्षः मुख्यतः ताभिः व्यवस्थाभिः सम्बद्धो भवति याः निर्धारितोद्देश्यानां प्राप्तौ साहय्यं कुर्वन्ति। अस्यान्तर्गततया भौतिकानां मानवीय-तत्त्वानाञ्च साध्यप्राप्त्यर्थं व्यवस्था क्रियते। यदि कस्यचन एकस्य विद्यालयस्य संस्थापनं क्रियते तर्हि स्थानं, वातावरणं, जलं, भवनम्, काष्ठोपकरणानि, शैक्षिकसज्जाकरणं, शिक्षकाणां इतरकर्मकराणाञ्च प्रबन्धनमावश्यकं वर्तते। तथा अभीष्टसाध्यप्राप्तये एतादृशतत्त्वानां सुव्यवस्थाऽऽवश्यकी वर्तते यथा - शिक्षायै चरित्रनिर्माणस्योद्देश्यमवाप्तुं विद्यालये पाठ्यसहगामिक्रियाणां, नैतिकवातावरणस्य, सामाजिकक्रियाणाञ्च सङ्घटनमेव कर्त्तव्यं भवति येन बालकानां चारित्रिकविकासो सम्यग्दिशायां स्यात्।

किञ्चोपयुक्तवातावरणस्य निर्माणाय योग्यानुभववतां चरित्रवताञ्चाध्यापकानां नियुक्तिरपि आवश्यकी वर्तते।

वस्तुतः यत्र शिक्षकाः, छात्राः, प्रधानाध्यापकः, निरीक्षकः अन्ये च जनाः विद्यालयस्य सञ्चालनाय सम्भूय कार्यं कुर्वन्ति, सैव विद्यालयसङ्घटनसंरचना भवति। किञ्च शैक्षिकोद्देश्यानां प्राप्तये अखिलोपलब्धभौतिकानां मानवीयतत्त्वानाञ्च समुचितव्यवस्था सङ्घटनमित्याख्येनाभिधीयते।

सङ्घटनान्तर्गतं केवलं व्यवस्थैव नापितु विविधविद्यालयीयतत्त्वानां सामञ्जस्यं समन्वयः स्थापनञ्चावश्यकं वर्तते। सर्वेषामावश्यकतत्त्वानां समन्वयः इत्थं स्यात् येन निर्धारितलक्ष्याणां पूर्त्तिः प्रतितत्त्वमधिकतमः प्रयोगः विघ्नं विनैव स्यात्।

विविधवस्तूनां समन्वयाभावे विद्यालयकार्याणि लक्ष्यञ्च सम्यक्तया सञ्चालयितुं न शक्यन्ते। विद्यालये पुस्तकानां, पुस्तकालयाध्यक्षस्य भवनादीनाञ्च प्रबन्धो भवति। अतः एतेषां प्रयोगं कार्यञ्च सम्यक्तया न क्रियते चेत् लक्ष्यमवाप्तुं युगपत् न शक्यते पुस्तकानि ग्रहीतुमागच्छन्ति, किञ्च समयतालिकाया अभावाद् च सौविध्ये सत्यपि समन्वयाभावे पुस्तकानां लाभः छात्राणाङ्कृते न भविष्यति।

विद्यालयसङ्घटनस्योद्देश्यानि –

शिक्षा मानवस्यान्तर्निहितशक्तीनां विकासं करोति। शिक्षया एव बालकस्य मूलप्रवृत्तीनामुपयोगः रुचीनां प्रकाशनञ्च क्रियते। बालकस्य कृते शैक्षिकं वातावरणं विद्यालयेष्वेव भवितुमर्हति। अतः विद्यालयानां स्थापनस्य महदुद्देश्यं बालकानां सर्वाङ्गिकविकासो वर्तते। विद्यालयसङ्घटनस्योद्देश्यं बालकस्य शारीरिक-मानसिक-चारित्रकगुणानाञ्च विकासः स्याद् येन सः स्वभाविजीवने स्वोत्तरदायित्वनिर्वहनं साफल्येन नैतिकतया च कर्तुं समर्थः स्यात्।

बालकः समाजस्याभिन्नाङ्गं वर्तते। सः शिक्षां प्राप्य समाजस्योन्नतये प्रयततेऽतः सामाजिकावश्यकतानां सम्पूर्त्तये विद्यालयानां संस्थापनं क्रियते। इत्थं विद्यालय-सङ्घटनस्योद्देश्यं बालकानाङ्कृते एतादृशी शिक्षा वर्तते यया ते सामाजिकादर्शान्, मान्यताः, विश्वासं, मूल्यञ्च रक्षितुं समर्थास्स्युः।

केषाञ्चन विदुषां मतं वर्तते यत् विद्यालयः समाजस्य लघुरूपं वर्तते यस्मिन् सामाजिकक्रियाः, विचारधाराः, आवश्यकताः संस्कृतिश्च सर्वोत्तमरूपेण प्रतिबिम्बिताः भवन्ति। विद्यालयस्य संघटनमेवं स्यात् यत्र बालकाः सामाजिकजीवनस्य वास्तविकं उपयुक्तप्रशिक्षणञ्च प्राप्नुयुः। किञ्च ते स्वसमाजस्य, जातेः, राष्ट्रस्य च कल्याणा-योपयुक्ताः स्युः। परमेतदवधेयं यत् समाजोऽपि विद्यालयस्याभिवृद्धये सुरक्षायै च यथाशक्तिसाहाय्यं दद्यात्।

विद्यालयसङ्घटनस्य सिद्धान्ताः –

कस्यापि कार्यस्य साफल्याय, सिद्धान्तानां निर्माणमावश्यकं वर्तते। इत्थमेव शैक्षिकोद्देश्यानामपि प्राप्तये सङ्घटने केषाञ्चिद् सुविचारितसिद्धान्तानां निर्माण-मावश्यकम् अतः विद्वद्भिः केचन सिद्धान्ताः एवमभिप्रणीतास्सन्ति –

(1) बाल-केन्द्रितम् –

विद्यालयस्य स्थापनायाः उद्देश्यं बालकस्य सर्वाङ्गिकविकासो वर्तते अतः सङ्घटनमपि बाल-केन्द्रितं स्यात्। सङ्घटनम् एतादृशं स्यादयत्र बालकानां

विविधयोग्यतानामभिरुचीनां, शक्तीनां, संवेगानां मूलप्रवृत्तीनाञ्च सद्दिशायां विकासः स्यात्। किञ्च विद्यालयेषु एतादृशवातावरणनिर्माणं स्यात् येन ते शारीरक–मानसिक–सामाजिक–चारित्रिकगुणान् च सारल्येन प्राप्नुयुः। बालकानां वैयक्तिकवैभिन्न्यान् पूर्वानुभवान् विकासगतिं प्रगतिञ्चाभिलक्ष्य विद्यालयानां व्यवस्था स्यात्। येन बालकस्य सर्वोत्तमविकासाय सौविध्यं प्रदातुं शक्यते।

(2) समाजकेन्द्रितम् –

शिक्षायाः महदुद्देश्यं बालकानां शारीरकमानसिकविकासः एव नापितु सामाजिकविकासोऽप्यपेक्षते। यतो हि बालकः समाजस्याभिन्नाङ्गं वर्तते। यदि बालकाः सुशिक्षिताश्चेत् समाजोऽपि समुन्नतिं कर्तुं शक्नोति। अतः विद्यालयसङ्घटनस्योद्देश्यं समाजकेन्द्रितमपि वर्तते। विद्यालयसङ्घटनं बालकानां विकासात्मकावश्यकतानुगुणं सामाजिकादर्शाकांक्षावश्यकतामूल्यसंस्कृत्याधारितं स्यात् यथा – भारतदेशः कृषिप्रधानदेशः वर्तते। अत्र प्रायः सर्वे जनाः कृष्याधारितास्सन्ति तथापि खाद्यावश्यकतानां सम्पूर्त्तिः इदानीं यावत् नाभवत्। अतः कृषेः विकासाय समुन्नतये च वैज्ञानिकरीत्या शिक्षणमावश्यकं वर्तते।

किञ्च औद्योगीकरणमपि शिक्षायाः महत्त्वपूर्णाङ्गं वर्तते। अतः शिक्षा विज्ञानाधारिता, प्रोद्यौगिकी, अभियन्तृशिक्षा प्रविधियुक्ता च स्यात्।

किञ्च शिक्षा व्यवहारापेक्षया प्रयोगाधारिता स्यात् यया जनाः सुशिक्षितास्सन्तः स्वोद्योगमपि प्राप्तुं समर्थास्स्युः।

(3) लोकतन्त्रीयसिद्धान्तः –

लोकतन्त्रं खलु जनतायाः, जनतायै, जनतया च शासनं वर्तते। यदि जनाः सुशिक्षिताः न भवन्ति ते योग्यप्रतिनिधीनां चयने समर्थाः न भविष्यन्ति। यतो हि शिक्षां प्राप्यैव जनाः स्वमतं सम्यक्तयोपयोक्तुमर्हन्ति। अतः शिक्षा लोकतन्त्रीय–सिद्धान्ताननुसृत्य प्रवृत्ता स्यात्। तत्रावधेयं यत् –

1. वैयक्तिकभेदमभिलक्ष्य विद्यालये विविधक्रियाणां व्यवस्थापनं स्यात्।
2. अवसराणां साम्यप्रदानाय व्यवस्था स्यात्।
3. छात्राणाङ्कृते स्वातन्त्र्यं स्यात्।
4. शिक्षकाः व्यावसायिकस्वातन्त्र्यमुपयोक्तुं सावसराः स्युः।
5. विद्यालयेषु पाठ्यचर्याः शिक्षणविधयश्च नमनीयसिद्धान्तानुगुणं व्यवस्थितास्स्युः।

6. विद्यालयसङ्घटनं प्रशासनञ्च विभेदीकृतसिद्धान्ताधारितं स्यात्।

7. विद्यालयस्य समग्रव्यवस्था सहयोगसिद्धान्ताधारिता स्यात्।

(4) उपलब्धसाधनानामधिकाधिकोपयोगस्य सिद्धान्तः –

कतिपयविद्यालयेषु साधनानि तु उपलभ्यन्ते परं प्रयोगज्ञानाभावात् जनाः तान्युपयोक्तुं नार्हन्ति। अतः शैक्षिकोद्देश्यं प्राप्तुं विद्यालये उपलब्धसाधनानां सर्वोत्तमः प्रयोगः स्यात्। किञ्च विद्यालये शिक्षणोपयोगितत्त्वानां, शिक्षणविधीनां, पाठ्यक्रमस्य, पाठ्यसहगामिक्रियाणां, पाठ्यपुस्तकानाञ्च, सामाजिकावश्यकतानुगुणं सामर्थ्यानुसारञ्च निर्धारणं स्यात् येन ईप्सितलक्ष्यं पूर्णतयाऽवाप्तुं शक्यते।

(5) नमनीयत्वस्य सिद्धान्तः –

''परिवर्तिनि संसारे मृतः को वा न जायते'' इति लोकोक्तिरपि स्पष्टयति यद् अस्मिन् संसारे मानवस्य प्रकृतिः आवश्यकताश्च परिवर्तनशीलाः वर्तन्ते। लोकतान्त्रिकेऽस्मिन् युगे मानवविचारेषु, आवश्यकतासु च महत्परिवर्तनं जायते। अतः विद्यालयसङ्घटनेऽपि परिवर्तनशीलत्वमावश्यकम्। सङ्घटने एकरूपत्वं चेत् सामाजिकावश्यकतानां सम्पूर्त्तिः न भवितुं शक्यते।

विद्यालयप्रशासनस्यार्थः, तत्सिद्धान्ताश्च

विद्यालयप्रशासनस्यार्थः –

विद्यालयप्रशासनं सामान्यतः संकुचितार्थे व्यापकार्थे च प्रयुज्यते। संकुचितार्थे विद्यालयस्य व्यवस्था प्रबन्धो वाऽऽगच्छति। व्यापकार्थे विद्यालयसम्बद्धकार्याणां नियोजनं, संघटनं, नियन्त्रणं, निर्देशनञ्च, यत्किमपि विद्यालयसम्बद्धं भवति तत्सर्वं समाविश्यते। वस्तुतः विद्यालयप्रशासनं शिक्षकाणां कार्यवितरणमेव नापितु विद्यालयस्य समग्रकार्याणां समुचितनियोजनं, समन्वयः, पर्यवेक्षणं, मूल्यनिरूपणं मूल्याङ्कनञ्च वर्तते।

विद्यालयप्रशासनस्य सिद्धान्ताः –

एडमन्सन महोदयानुसारं विद्यालयप्रशासनस्य सिद्धान्ताः एवं वर्तन्ते –

1. विद्यालयस्य सर्वे शिक्षकाः शिक्षां, विद्यालयस्योद्देश्यानि च स्पष्टतयाऽवगच्छेयुः।

2. छात्राणां रुचिः, क्षमताऽभिवृत्तिः इत्याद्यनुगुणं पाठ्यक्रमः स्यात् अर्थात् पाठ्यक्रमे नमनीयत्वं स्यात्।

3. शिक्षकाणाङ्कृते स्वकार्यपरीक्षणस्यावसरः स्यात् येन ते विषयं प्रत्यरुचिमन्तः न स्युः।

4. विद्यालयकार्यक्रमाणां नियोजनं सर्वेषां शिक्षकाणां समन्वयानुगुणं स्यात्।

5. विद्यालयनीतिनिर्माणे, कार्यान्वयने च सर्वे शिक्षकाः साहाय्यं कुर्युः, अर्थात् शिक्षकाणां मतमवलम्ब्य नीतिनिर्माणं भवेत्।

6. शिक्षकाणाङ्कृते कार्यवितरणावसरे तेषां रुचिः, योग्यताऽभिरुचयश्चावधेयाः स्युः। येन ते स्वविषयं रुचिपूर्णतया पाठयितुं समर्थाः स्युः।

7. विद्यालये एतादृशकार्यक्रमाणामेव सञ्चालनं स्यात् येन समधिकाः छात्राः लाभान्विताः स्युः।

8. विद्यालये समायोजितेषु कार्यक्रमेषु सर्वे शिक्षकाः छात्राश्च प्रोत्साहनं प्राप्नुयुः।

9. बालकानां सर्वाङ्गिकविकासाय प्रशासने नमनीयत्वं स्यात्।

10. प्रशासनं विद्यालयस्य सञ्चालनार्थं छात्राणां, शिक्षकाणां, संरक्षकाणां तत्तद् नेतृणाञ्च सहयोगमनिवार्यतया प्राप्नुयात्।

सङ्घटने प्रशासने च भेदः -

केचन जनाः संघटनं प्रशासनञ्चैकमेव मन्यन्ते। परमेतादृशं नास्ति यतो हि सङ्घटनं खलु विशिष्टोद्देश्यस्य प्राप्तये साधनं प्रारूपं संरचना वा वर्तते। प्रशासनं तु विद्यालयस्य सञ्चालनं, परिचालनं वा भवति। अर्थात् सङ्घटनेन सर्वोत्तमोद्देश्यस्य प्राप्तये संभावनानिर्माणं भवति परं प्रशासनेन तेषां प्राप्तये प्रयासोऽपि क्रियते। यदा समयानुगुणं यादृश्यावश्यकता भवति तदा एव सङ्घटनं परिवर्त्य उद्देश्यानां प्राप्त्यर्थं प्रशासनिकं कार्यं क्रियते। अतः विद्यालयस्य प्रधानाध्यापकः उत्तमसङ्घटकातिरिक्तं प्रशासकोऽपि स्यात्। सङ्घटनं समीचीनं नास्ति चेत्तर्हि उत्तमप्रशासनं भवितुं नार्हति। अतः प्रशासकत्वं सङ्घटकत्वं इत्युभयगुणान्वितः स्यात् प्रधानाध्यापकः। सङ्घटनापेक्षया प्रशासनं व्यापकत्वमर्हति यतो हि विद्यालयप्रशासको वस्तुतः सङ्घटनात्मके प्रशासकीये च इति पक्षद्वये उत्तरदायित्वं भजते। विद्यालयसङ्घटनमेका एतादृशी संरचना वर्तते यस्याः संचालन-निर्माणञ्च प्रशासकस्य महत्त्वपूर्णं कर्त्तव्यं भवति।

अमरीकादेशस्य प्रसिद्धविद्वद्भिः ग्यूलिकमहोदयैः प्रशासकानामध्ययनात्परं प्रमाणितं यत् तेषां कार्येषु सङ्घटनात्मकानि प्रशासनसम्बद्धानि च सर्वाण्यपि कार्याणि अन्तर्निहितानि भवन्ति। तदनुगुणं प्रशासकस्य प्रमुखकार्याणि विद्यालयव्यवस्थायाः

नियोजनं, सङ्घटनं, समन्वयः, सञ्चालनञ्चेति वर्तन्ते। प्रशासकः विद्यालयस्य भौतिकानां मानवीयतत्त्वानाञ्च समन्वयं सञ्चालनञ्चेत्थं कुर्यात् येन अभीष्टोद्देश्यानां प्राप्तिः सारल्येनैव स्यात्। इत्थं स्पष्टतया वक्तुं शक्यते यत् सङ्घटनं प्रशासनञ्च मिथः सम्बन्धिते एव नापित्वन्योन्याश्रिते वर्तेते।

अन्ते **आर्थर बी. मोहमेन** महोदयानुगुणं वक्तुं शक्यते यत् ''शिक्षा योजनानां संरचनानां, प्रक्रियाणां, कार्यकर्तॄणां, सामग्रीणां, विद्यालयभवनस्य, धनस्य च निश्चित–सङ्घटनस्य माध्यमेन कार्यं कुर्यात्। कार्यस्तरः सदैव कार्यकर्तॄणां गुणान्, कौशलानि, आदर्शान् च बिभर्त्ति, ये स्वदृष्टिकोणेन प्रयासैश्च शिक्षायां प्राणान् सञ्चारयन्ति।[1]

पुनरावृत्तिप्रश्नाः

(1) विद्यालयसङ्घटनस्य तात्पर्यं सोदाहरणं प्रतिपादयत?

(2) सङ्घटनान्तर्गततया कानि–कानि तत्त्वान्यावश्यकतां भजन्ते?

(3) विद्यालयसङ्घटनस्य कान्युद्देश्यानि स्युः? किमर्थञ्च।

(4) विद्यालयसङ्घटनस्य सिद्धान्तान् सोदाहरणं प्रतिपादयत।

(5) सङ्घटने प्रशासने च कोऽयं भेदः? सोदाहरणं प्रतिपादयत।

लेखार्थप्रश्नः

(1) विद्यालयप्रशासने सङ्घटनस्य किं महत्त्वम्? सोदाहरणं स्पष्टयत।

---

1. "Education must function through a definite organization of structure of plans, procedures, personnel, material, plant and finance. The level of operation is at all times dependent upon the quality, technical skill, and idealism of personnel who, through their attitude and daily effort, breathe life into mechanics of structure." **—Arthur B. Moehlman**

2

प्रधानाध्यापकः – विद्यालयस्य नेतृरूपेण

(Headmaster as the Leader of the School)

"There is first of all a recognition that an individual human being is of surpassing worth, that he should be treated as an end in himself, and not a means to end. Related to this concept of worth is the belief that every normal individual has a unique contribution to make to our society, and that therefore, he deserves respect........ The high regard for the individual should become a basic principle underlying all policies and practices in personnel management."

—Elsbree & Reutter

रॉस एल. फिन्नी महोदयानुसारं ''विद्यालयप्रशासनस्य कार्यं प्रशासकीयकार्ये, नीति–निर्धारणे चेति भागद्वये विभक्तुं शक्यते। प्रथमं तु केवलम् आपणवत् द्वितीयञ्च शैक्षिकनीत्या सम्बद्धमस्ति। शिक्षाप्रशासकः प्रथमस्थितौ विद्यालयः यादृशोऽस्ति तादृशमेव सञ्चालयितुं प्रयतते, द्वितीयायां स्थितौ तु शैक्षिकनीतीनां निर्धारणङ्कृत्वा विद्यालयस्य वाञ्छितस्वरूपं दातुं शक्नुयात्। स्पष्टतया वक्तुं शक्यते यत् प्रथमरूपेण प्रशासकः विद्यालयं सञ्चालयति द्वितीयरूपेण च समग्रं खलु विश्वं सञ्चालयति।''[1]

शिक्षणक्षेत्रे प्रधानाध्यापकः एकः नेता भवति। अस्मिन् क्षेत्रे सः छात्राणां शिक्षकैः–सह, शिक्षकाणां शिक्षकैस्सह, शिक्षकाणामभिभावकैस्सह च जायमानान् सम्बन्धान् निरीक्षते। एषु सम्बन्धेषु तस्य व्यक्तित्वं प्रस्फुटति। प्रधानाचार्यस्य ज्ञानस्योपर्येव सम्पूर्णशैक्षिककार्यक्रमस्योन्नतिः, साफल्यञ्च निर्भरं भवति। यदि सः शिक्षासिद्धान्तान् ज्ञात्वापि तेषां व्यवहारे प्रयोगं न करोति तर्हि शिक्षकाणां छात्राणाञ्च नेतृत्वं कर्तुं न पारयति। सिद्धान्तज्ञानात् प्रयोगज्ञानाच्चैव सः स्वविद्यालयस्य शिक्षणस्तरमत्युन्नतं

---

1. "The School administrator's work may be roughly analysed into two major parts–executive details, and the formulation of policy. The first is mere school shop keeping, the second is educational statesmanship....In his first capacity the educational adminstrator is operating the school as it now is, in his second capacity, as an educational statesman he is making the school over into what it ought to become. In the one function he is merely running the school of today, in the other, he is running the world of tomorrow." --- **Ross L. Finney**

कर्तुं शक्नोति नान्यथा।

किञ्च प्रधानाध्यापकः विद्यालयस्यैव नेता नापितु समाजस्यापि नेता भवति। विद्यालयः एका सामाजिकसंस्था वर्तते। अतः समाजस्यादर्शरूपं प्रस्तुयात् सा। अतः नेतृरूपेण प्रधानाध्यापकस्य कर्त्तव्यं भवति यत् सः विद्यालयसमाजयोर्मध्ये सुसम्पर्कं स्थापयेत्। किञ्च सः समाजस्यावश्यकताम् आकांक्षादीञ्च दृष्ट्वा तादृशं शिक्षणं कारयेत्। इत्थं सः विद्यालयसमाजयोर्मध्ये संयोजकरूपेण कार्यं करोति। सः विद्यालये समाजस्यादर्शरूपं प्रतिबिम्बयन् समाजमपि प्रगतिपथेऽग्रेसर्तुं शक्नोति।

इत्थं स्पष्टतया वक्तुं शक्यते यत् स एव विद्यालयस्य प्रमुखा शक्तिः, यस्योपरि विद्यालयस्योन्नतिः अवनतिश्च निर्भरा भवति।

''विश्वे केचन एव जनाः प्रधानाध्यापकतोऽधिकमुच्चकर्तव्यमुत्तरदायित्वञ्च धारयन्ति'' इति नितान्तं सत्यं वर्तते। यतो हि कस्यापि राष्ट्रस्य निर्माणं विधानमण्डलेषु संसदि, उद्योगेषु नापितु विद्यालयेष्वेव भवति। विद्यालय एव राष्ट्रस्य भावीनागरिकान् निर्माति। इत्थं प्रश्नो भवति यत् प्रधानाध्यापकस्य कानि कर्त्तव्यानि वर्तन्ते येषां पूर्त्तिद्वारा सः कस्यापि राष्ट्रस्य निर्माणं कर्तुं शक्नोति? तेन ज्ञातं भवति यत् शैक्षिकोद्देश्यानां सम्पूर्तिरेव तस्य प्रथममुद्देश्यं वर्तते। किञ्च व्यक्तेः, समाजस्य, राष्ट्रस्य चावश्यकताम् आदर्शानाकाङ्क्षाञ्चावधार्य यान्युद्देश्यानि निर्धारितानि तेषां समधिकप्राप्तिरेव विद्यालयस्य प्रमुखं कर्त्तव्यं भवति। इत्थं प्रधानाध्यापकः विद्यालयस्य नेतुः रूपेणाग्राङ्कितकर्त्तव्यानि दायित्वानि च बिभर्त्ति –

(अ) नियोजनम् – प्रतिशैक्षिकसंस्थं प्रधानं दायित्वं नियोजनमिति भवति। स्वविभिन्नकार्यक्रमाणां क्रियाणाञ्च सञ्चालनात्पूर्वं कर्त्तव्यानां दायित्वानाञ्च निर्वहणाय आवर्षं नियोजनमावश्यकं भवति परं स नियोजनं स्तरत्रये कुर्यात् –

(क) विद्यालयोद्घाटनात्प्राक् –

अस्मिन् स्तरे निम्नकार्याणां नियोजनमावश्यकम् –

(1) ग्रीष्मावकाशात्परं नूतनविद्यालयसत्रस्य प्रारम्भतिथेरुद्घोषणा। प्रवेशस्य कृते प्रार्थनापत्रप्राप्तेः अन्तिमतिथेः प्रकाशनम्, यदि प्रवेशः परीक्षामाध्यमेन क्रियते परीक्षातिथेः प्रकाशनम् परीक्षायाः व्यवस्थापनञ्च, एतेषां सर्वेषां कार्यक्रमाणां सूचनापट्टे–प्रकाशनमावश्यकं वर्तते। सम्भवे सति समाचारपत्रेषु विज्ञापनञ्च।

(2) प्रवेशसम्बद्धनियमानां निर्धारणम्। किञ्च एतादृशसमितीनां निर्माणं येभ्यः

कार्यं प्रदीयते। किञ्च एकस्यां कक्ष्यायां कतिसंख्यकानां छात्राणाङ्कृते प्रवेशो दीयते इति निर्धारणम्।

(3) विद्यालयेऽपेक्षितशिक्षणसामग्र्यः सन्ति न वेति, उपयुक्तसामग्रीणां सम्यक् प्रयोगोऽपि भवति न वा इति व्यवस्थाकरणम्। काष्ठसामग्रीणामावश्यकता वर्तते चेद् व्यवस्थासम्पादनम्।

(4) आवश्यकपञ्जिकानां व्यवस्थाकरणम्।

(5) सम्पूर्णसत्रस्य कृते क्रियाणां समयतालिकायाः निर्माणम्।

(6) आवश्यकतानुगुणं शिक्षकाणामितरकर्मकराणाञ्च नियुक्तिः।

(7) विद्यालयभवनस्य व्यवस्थायां परिष्कारः।

(ख) विद्यालयस्थापनादिवसे –

विद्यालयोद्घाटनात् एकसप्ताहं यावत् निम्नकार्याणां व्यवस्थायै नियोजनं कर्त्तव्यम् –

(1) शिक्षकतालिकानां, छात्र–तालिकानां, कक्ष्या–कक्षतालिकानाञ्च निर्माणम्।

(2) शिक्षकाणां कार्यविभाजनमेवं स्यात्। कार्यविभाजनावसरेऽवधेयम् –

(1) **शिक्षकाणां रुचयः** – कार्यविभाजनावसरे शिक्षकाणां रुचयः दृष्टव्याः भवन्ति अर्थात् तेषाङ्कृते रुचिपरककार्याण्येव दातव्यानि।

(2) **शिक्षकाणां योग्यता** – रुच्यतिरिक्तं योग्यताः अपि दृष्टव्याः भवन्ति। योग्यतान्तर्गततया शास्त्रीययोग्यता, कार्यक्षमताः, कार्येऽत्युत्साहः, वास्तविकयोग्यताश्च द्रष्टव्याः भवन्ति।

(3) **कार्याणां समानवितरणम्** – प्रधानाध्यापकः सर्वेषां शिक्षकाणाङ्कृते कार्याणां समानरूपेण वितरणं कुर्यात्। समानकार्याभावे तेषु परस्परमसन्तोषस्य भावना उत्पद्यते।

(4) विविधपाठ्यसहगामिक्रियाणां व्यवस्थायै नियोजनं कुर्यात्। किञ्च शिक्षकाणां रुचिं योग्यताञ्चाधारीकृत्य तत्तद्रुच्यनुगुणं कार्यभारं दद्यात्।

(5) विद्यालयेऽऽवश्यकतानुगुणं भौतिकसौविध्यानां व्यवस्थां कारयेत्।

(6) विद्यालयसभायाः व्यवस्थां कुर्यात्। सभामाध्यमेन नूतनछात्राणाङ्कृते विद्यालयगतिविधीनां नियमानां, परम्पराणाञ्च ज्ञानं कारयेत्।

(7) पाठ्य–पुस्तकानां चयने, क्रयणे च छात्राणाङ्कृते निर्देशप्रदानम्।

(ग) सत्रकाले –

प्रधानाध्यापकः शैक्षिकसत्रकालेऽधोनिर्दिष्टकार्याणां नियोजनं कुर्यात् –

(1) शिक्षणकार्यस्य सङ्घटनम्।

(2) विभिन्नप्रयोजनानां पाठ्यसहगामिक्रियाणाञ्च सङ्घटनम्।

(3) मूल्याङ्कनस्य व्यवस्थासम्पादनम्।

(4) विशेषज्ञानां भाषणायोजनम्।

(5) कक्ष्यापरिनिरीक्षणस्य व्यवस्थापनम्।

(6) विद्यालयाभिलेखानां, छात्राभिलेखानां, लिखितकार्याणाञ्च सत्यापनाय व्यवस्थासम्पादनम्।

(7) निर्देशनसेवानां सङ्घटनम्।

(8) विद्यालये सांस्कृतिककार्यक्रमाणां व्यवस्थाकरणम्।

(9) शिक्षाविभागस्य, प्रबन्धसमितेः, पत्रव्यवहाराय च उपयुक्तव्यवस्था-सम्पादनम्।

(घ) सत्रस्य समाप्तिकाले –

प्रधानाध्यापकः निम्नकार्याणाञ्च आयोजनं कुर्यात् –

(1) वार्षिकक्रीडादिवसः, अभिभावकदिवसः, सांस्कृतिककार्यक्रमः, वार्षिक-पारितोषिकवितरणदिवसः इत्यादीनाञ्चायोजनम्।

(2) छात्राणां वार्षिकप्रतिवेदनस्य सज्जीकरणम्।

(3) उपस्थितेः, शुल्कादीनाञ्च निरीक्षणम्। अनेन परिणामघोषणात्पूर्वमेव ज्ञातव्यम् यत् कश्चन छात्रः तादृशः तु नास्ति येनेदानीं यावत् शुल्कं न दत्तम्।

(4) कक्ष्याप्रोन्नतेः नियमनिर्धारणम्।

(5) नूतनसत्रस्य सज्जीकरणायावश्यकविषयेषु विचार-विमर्शः, अत्र विकाससम्बद्धविषयाः द्रष्टव्याः भवन्ति।

(ब) शिक्षण-कार्याणि –

"प्रधानाध्यापकः प्रथमतः शिक्षकः ततश्च प्रशासको भवति"। तेन कृतं शिक्षणकार्यं न केवलं शिक्षकाणां मार्गदर्शनं करोत्यपितु छात्रैस्साकं सुसम्पर्कमपि स्थापयति। अनेन विद्यालयस्य चारित्रिकभावनाऽपि उन्नतिपथं गच्छति। प्रधानाध्यापकः द्वादशतः पञ्चदशकालांशं यावत् शिक्षणकार्यं सम्पादयेत्।

अस्मिन्नवधौ विद्यालयस्योच्चकक्ष्यासु निम्नकक्ष्यासु च विभाजनं कर्त्तव्यम्। अर्थात् प्रधानाध्यापकः विद्यालयस्योच्चतमकक्ष्याः निम्नकक्ष्याः च पाठयेत्। विद्यालयस्य शिक्षणस्तरं यथोन्नतिं प्राप्नुयात् तथा प्रयतेत सः। अस्य कृते विद्यालये यथेष्टशैक्षिकसामग्र्याः व्यवस्थापि परमावश्यकी वर्तते। किञ्च एतादृशनूतनविधिभिः शिक्षणं कारयेत् येन छात्राः कठिनमपि विषयं सारल्येनाधिगन्तुं समर्थास्स्युः।

नूतनविधीनां सम्बन्धे सः प्रशिक्षणसंस्थाभिः सुसम्पर्कं कुर्यात्। एतदतिरिक्तं सः विविधसम्मेलनेषु कार्यक्रमेषु च शिक्षकाणाम् उपस्थितिं कारयेत्।

(स) पाठ्यक्रमस्य पाठ्यपुस्तकानाञ्च चयनम् –

प्रधानाध्यापकः बालकानां योग्यतां रुचिञ्चाधारीकृत्य तदनुगुणं तेषां सर्वाङ्गिकविकासायोपयुक्तपाठ्यक्रमस्य चयनं कुर्यात्। यद्यपि पाठ्यक्रमनिर्धारणे प्रधानाध्यापकस्य दायित्वं नास्ति परं सः शिक्षाविभागस्य, माध्यमिकशिक्षापरिषदश्च निर्धारितनियमानवगच्छेत् तदनुगुणञ्च कर्त्तव्यानि निर्वाहयेत्।

किञ्चोच्चाधिकारिणो कस्मिन्नपि विषये परामर्शं वाञ्छन्ति चेत् अध्यापकैरितर–कर्मचारिभिश्च सह वार्तां कृत्वा ततः परामर्शं दद्यात्। यतो हि अध्यापकाः बालकानां रुचिं योग्यताञ्च सम्यक्तयाऽवगच्छन्ति।

पुस्तकान्यपि छात्राणां मानसिकविकासे साहाय्यमाचरन्ति। अतः प्रधानाध्यापकः बालकानां विकासदृष्ट्यैव पुस्तकानामपि चयनं कुर्यात्। सः एतादृशपुस्तकानां चयनं कुर्यात् यानि तेषां चिन्तने, स्वतन्त्रनिर्णये, विश्लेषणे च साहाय्यमाचरेयुः।

(द) पाठ्यसहगामिक्रियाणां व्यवस्था –

पाठ्यपुस्तकानामध्ययनेन छात्राणां केवलं बौद्धिकविकासः एव सम्भवति। शिक्षा बालकानां सर्वाङ्गिकविकासं कुर्यात्। अतः पाठ्यपुस्तकाध्ययनादतिरिक्तं पाठ्यसहगामिक्रियाणामायोजनमप्यावश्यकं वर्तते। विद्यालये पाठ्यसहगामिक्रियाणां सङ्घटनं प्रधानाध्यापकस्य महद्दायित्वं वर्तते। सङ्घटनात्पूर्वं विद्यालयानुसारं क्रियाणां विश्लेषणमपि करणीयम्। अत्र बालकानां योग्यताः रुचयश्च द्रष्टव्याः भवन्ति। अस्य संघटनस्य कृते कियद् धनमपेक्षितं वर्तते, तस्योपलब्धिः कथं स्यादिति निर्धारणात्परं कमप्येकं शिक्षकमस्य पथप्रदर्शनाय नियोजयेत्, समितेश्च सङ्घटनं कुर्यात्। सा समितिः सर्वदैव बालकानां सर्वाङ्गिकविकासाय चिन्तयेत् कार्यं कुर्याच्च।

(य) शारीरकशिक्षायाः व्यवस्था –

प्रधानाध्यापकस्य महत्कर्त्तव्यमेतद् वर्तते यत् सः छात्राणां शारीरकविकासाय

विद्यालये उपयुक्तावसराणां नियोजनं कुर्यात्। अस्य कृते विद्यालये शारीरकव्यायामः, क्रीडा, शारीरकशिक्षा चापेक्षते। अस्य सङ्घटने सञ्चालने च सः सहयोगिनां छात्राणाञ्चोत्तरदायित्वं सम्पादयेत्। किञ्च विद्यालये स्वच्छतापरिरक्षणचिकित्सा–सेवा–जलस्योपयुक्तव्यवस्थादीनाञ्चोपरि–अवधानं दद्यात्। छात्राणां शारीरक–प्रगतिविषये, दोषविषये च तदा तदा अभिभावकानपि सूचयेत्।

(र) अनुशासनस्य सामान्यचारित्रिकभावनायाश्च संस्थापनम् –

विद्यालयस्य कार्याणि सम्यग्रीत्या सम्पादयितुमनुशासनमावश्यकं वर्तते। अतः विद्यालयेऽनुशासनसंस्थापनं प्रधानाध्यापकस्य महद्दायित्वं वर्तते। अतो–ऽनुशासनसम्पादनाय छात्रेषु नैतिकगुणानां विकासः आवश्यकः। किञ्च प्रधानाध्यापकः विद्यालये सौहार्दपूर्णं वातावरणमुत्पादयेत्। एतादृशवातावरणस्थापने प्रधानाध्यापकस्य व्यक्तित्वं, आचरणं, मानवीयदृष्टिकोणः प्रशासनञ्च महत्वं भजते। विद्यालयस्य सामान्यचारित्रिकभावनायाः बालकानां सामाजिकविकासे नैतिकविकासे च महत्त्वपूर्णं स्थानं वर्तते। प्रधानाध्यापकः विद्यालये सौहार्द्रपूर्ण–चारित्रिक–विकासातिरिक्तं नैतिकशिक्षायाः प्रार्थनासभायाश्चायोजनं कुर्यात्।

किञ्च प्रधानाध्यापकः ''छात्राणां छात्रैस्सह अध्यापकानां छात्रैस्सह; अध्यापकानामध्यापकैस्सह च कीदृशो व्यवहारोऽस्ति'' इति निरीक्षेत अध्यापकैः छात्रैश्च सह सुसम्पर्कञ्च स्थापयेत्।

(ल) परिनिरीक्षणम् (Supervision) –

विद्यालयस्य समग्रकार्यक्रमाणां सम्यक्तया सञ्चालनं भवति न वा। एतत्सर्वं प्रधानाध्यापकेनावश्यं द्रष्टव्यम्। परिनिरीक्षणेनैव सः विद्यालयस्य समस्तगतिविधीन् ज्ञातुं शक्नोति। तथा विद्यालयस्य न्यूनतामपि ज्ञात्वा तान् अपाकर्तुं प्रयतते। विद्यालयपरिसरे जायमानक्रियाणामेव निरीक्षणं न करोत्यपितु तस्माद् बहिरपि छात्राः किं कुर्वन्ति। छात्रावासे छात्राणां निवासस्य भोजनादीनाञ्च व्यवस्था कीदृशीति सर्वं तेनावधेयं भवति। प्रधानाध्यापकः बौद्धिकविकासमेव ना पितु शारीरकं, सामाजिकं नैतिकविकासञ्चाभिलक्ष्य निरीक्षेत। तस्य निरीक्षणसम्बद्धदायित्वानि अध्य–यनात्परमधोनिर्दिष्टरूपेण स्थापयितुं शक्यन्ते।

(क) शिक्षणकार्याणि –

प्रधानाध्यापकह्यय क्षेत्रेऽस्मिन् महदुत्तरदायित्वं वर्तते। तस्य कृते नियमितरूपेण सर्वासां कक्ष्याणां निरीक्षणमावश्यकम्। समयस्योपरि निरीक्षणेन कक्ष्यास्वनुशासनं

तिष्ठति। निरीक्षणेन त्रुटिदर्शनं कृत्वा सः विद्यालयस्तरस्योन्नतये प्रयतेत, परामर्शञ्च दद्यात्। निम्नविषयानवधार्य सः परिनिरीक्षणे साफल्यं प्राप्तुं शक्नोति –

(1) प्रधानाध्यापकः कक्ष्यापरिनिरीक्षणे दोषान्वेषणमेव न कुर्यादपितु गुणानपि पश्येत्। यदि सः दोषान् अन्वेष्टुमेव कक्ष्यासु गच्छति चेत् शिक्षकाः तं प्रति शङ्कालवा भवन्ति। अतः कक्ष्यायां तस्य प्रवेशः परामर्शदातृरूपे, सहयोगिरूपेण मित्ररूपेण च स्यात्।

(2) प्रधानाध्यापकः मनोविज्ञानानुगुणं निरीक्षणं कुर्यात् अर्थात् ''अध्यापकः बालाकानां स्तरं दृष्ट्वा तदनुगुणं शिक्षणोपकरणानि शिक्षणविधीं च प्रयुङ्क्ते न वा, शिक्षकस्य विषयं प्रत्यभिरुचिः, पाठनयोग्यतास्ति न वेति'' धिया निरीक्षेत।

(3) प्रधानाध्यापकः कक्ष्याध्यापकैः विचार–विमर्शं कृत्वा परामर्शं दद्यात्, शिक्षकैस्सह परामर्शेण शिक्षकाः किमपि कार्यं रुचिं गृहीत्वा कर्तुं प्रयतन्ते।

(ख) छात्रावासः –

यत्र विद्यालयेषु छात्रावासव्यवस्था भवति तत्र प्रधानाध्यापकस्य कर्त्तव्यं वर्तते यत् सः छात्रावासं निरीक्षेत। छात्राणाङ्कृते भोजनजलविद्युदादीनां व्यवस्थाऽस्ति न वेति निरीक्ष्य व्यवस्थां सम्पादयेत्। बालकानां शयनकक्ष्याणाम् अपि निरीक्षणं कुर्यात् यत् तत्र शयनव्यवस्था समीचीना वर्तते न वेति। किञ्च छात्राः पुस्तकालय–वाचनालय सभाकक्ष्याणाञ्च समुचितोपयोगं कुर्वन्ति न वा, इति निरीक्षेत तथा उपस्थिति–पंजिकादीनामप्यध्ययनं कुर्यात्।

(ग) कार्यालयकार्याणि पञ्जिकाश्च –

प्रधानाध्यापकः कार्यालयकार्याण्यपि निरीक्षेत। सः प्रतिदिनं विभागीयपत्राणामध्ययनं कुर्यात्, द्रुतगत्या च तदुत्तरं दद्यात्। प्रतिदिनं कार्यालयस्य पञ्जिकानां, लेखादीनाञ्च सम्यक्तयाऽध्ययनं कुर्यात्सः। किञ्च विभिन्नपञ्जिकानां पूर्त्तिः सम्यक्तया कुर्यात् प्रधानाध्यापकः।

(घ) सामान्यपरिनिरीक्षणम् –

एतदतिरिक्तं इतराण्यपि दायित्वानि भवन्ति, सः, पाठ्यसहगामिक्रियाणां, विद्यालयीयभौतिकतत्त्वानां, शारीरकक्रियाणां, विषयगतक्रियाणां, छात्रसङ्घक्रियाणां, विद्यालयसम्बद्धभाण्डारादीनाञ्च निरीक्षणं कुर्यात्, किञ्च व्यर्थकार्येषु धनस्य दुरुपयोगः तु न भवति, इति पश्येत्, विद्यालयस्वच्छताञ्च यथायथं कुर्यात् इति।

(व) मूल्याङ्कनम् –

प्रधानाध्यापकस्य महत्त्वपूर्णं दायित्वमस्ति यत् सः समये-समये विद्यालयस्य समग्रव्यवस्थायाः मूल्याङ्कनं सम्पादयेत्। विद्यालये निर्धारिताः नीतयः क्रियान्वयनात्परं कियत् साफल्यमवाप्तवत्यः, इति पश्येत्। शिक्षणस्तरस्य समुन्नतये प्रगतये च निर्धारितसिद्धान्तानां प्रक्रियाणाञ्च सम्यग्रीत्या प्रयोगोऽभवत् न वेति निरीक्षेत। किञ्च विद्यालयस्यानुशासनं चारित्रिकभावना च बालकानां सामाजिकविकासे कियदपेक्षितेति मूल्याङ्कनं प्रधानाध्यापकेनावश्यं कर्त्तव्यम्। मूल्याङ्कनस्य कृते निरीक्षण-परीक्षण- साक्षात्कार-प्रश्नावली-अभिलेखसाक्षात्कारादिविधीन् प्रयुञ्जीत। प्रधानाध्यापकेन स्वबालकानामुन्नतेः प्रगतेः तन्मार्गे आगतकाठिन्यानाञ्च ज्ञानाय निम्नविषया अवधेयाः भवन्ति –

(1) परीक्षायामागतानां प्रश्नपत्राणां निरीक्षणमित्थं कुर्यात् यत् प्रश्नपत्राणि सरलानि दुर्बोध्यानि तु न वर्तन्ते इति।

(2) अङ्कानां स्तरान्वेषणं कुर्यात्।

(3) बालकानां सञ्चिताभिलेखाः निर्मेयास्स्युः। एष्वभिलेखेषु छात्राणां सम्बन्धे सामान्यज्ञानस्य, ज्ञानोपार्जनस्य, व्यावहारिकक्षमतायाः, सामाजिक-नागरिक क्रियाणामभिव्यक्तेः, सेवाभावस्य, सहयोगादिगुणान्वेषणस्य, स्वास्थ्यप्रगतेः, व्यक्तिलक्षणानि यथा – चरित्रं, दृढता, नेतृत्वमध्यवसायात्मविश्वासात्मनियन्त्रणानि सामाजिकभावनादीनाञ्चान्वेषणस्य च विवरणं स्यात्। अस्मिन् कार्ये सः शिक्षकैरभिभावकैश्च सह विचार-विमर्शं कुर्यात्। किञ्च प्रधानाध्यापकः स्वनीतीनां, प्रक्रियाणां, बालकानां कार्याणामेव मूल्याङ्कनं न कुर्यादपितु सहयोगिनां, विद्यालयस्यान्यकर्मचारिभिः कृतानाञ्च कार्याणामन्वेक्षणं कुर्यात्। एषां मूल्याङ्कनावसरे निम्नविषयाः अवधेयाः भवन्ति –

(1) स्वसहयोगिनां दोषाणां गुणानाञ्च स्पष्टीकरणं कुर्यात्।

(2) तेषां कार्याणां मूल्याङ्कनं परिष्कारदृष्टिकोणेन स्यात्।

(3) स्वकार्यकर्तृषु, आत्ममूल्याङ्कनस्यात्मोन्नतेश्च भावनायाः विकासं कुर्यात्।

(4) मानवीयसम्बन्धान् उपयोक्तुं कार्यकर्तॄन् प्रति सहानुभूतेः साहाय्यस्य च दृष्टिकोणं स्थापयेत्। मूल्याङ्कनं ध्वंसात्मकदृष्ट्या न स्यात्।

(य) मानवीयसम्बन्धानां संस्थापनम् –

प्रधानाध्यापकः तदा एव साफल्यमधिगन्तुं शक्नोति यदा सः सहयोगिभिः

अधीनस्थकर्मचारिभिरभिभावकैः समाजसदस्यैश्च साकं मानवीयसम्बन्धं स्थापयेत्। अस्य कृते निम्नविषयाः अवधेयाः भवन्ति –

(1) प्रधानाध्यापकः सहयोगिभिस्सह वैयक्तिकं परिचयं कुर्यात्, सर्वस्य व्यक्तित्वं जानीयात्, एतादृशव्यवहारेणैव सः तैस्साकं मानवीयसम्बन्धातिरिक्तं सम्मतसहयोगमपि प्राप्स्यति।

(2) प्रधानाध्यापकः सर्वैः जनैस्सह सहभागित्वं प्राप्तुं प्रयासं कुर्यात्। निर्णयप्रक्रियायां सर्वेषां समधिकं सहयोगं प्राप्नुयात् तेन ते सर्वेऽपि सहयोगिनः, सर्वेष्वपि विषयेषु स्वदायित्वं विज्ञायोपयुक्तरीत्या कार्यं निर्वहेयुः।

(3) प्रधानाध्यापकः विद्यालयस्य नीतीः प्रक्रियाञ्च विकासदृष्ट्या सम्पूरयेत् तेन तस्य सहयोगिभिः छात्रैश्च साकं सम्यङ्मानवीयसम्बन्धानि स्थापयितुं शक्यन्ते।

(4) प्रधानाध्यापकः स्वसहयोगिभिरधीनस्थकर्मचारिभिः छात्रैरभिभावकैश्च साकं विश्वासप्रेमादरभावनां विकासयेत्।

(5) प्रधानाध्यापकः आत्मनः स्वसहयोगिनां विकासाय च सततं प्रयासं कुर्यात्।

प्रधानाध्यापकस्य गुणाः

वयं जानीमः यत् प्रधानाध्यापकस्य पदमतीव दायित्वपूर्णं वर्तते। सर्वे खलु शिक्षाशास्त्रिणो मन्यन्ते यत्, अस्य पदस्य दायित्वानि निर्वोढुं व्यक्तौ केषाञ्चन विशिष्टगुणानां समावेशः आवश्यकोऽस्ति।

जी. रीडर-ब्रे महोदयाभ्यां प्रधानाध्यापकस्य कृते उत्तमव्यक्तिः, चारित्रिक-शुद्धता, दृढता, नेतृत्वक्षमता, इत्यादयो गुणाः आवश्यकतां भजन्ते इति उक्तम्।

पी. रेन महोदयानुगुणं प्रधानाध्यापकः प्रकृत्या प्रदत्तं, निर्मित्तञ्चेति गुणद्वयं बिभर्ति। केचन गुणाः प्रधानाध्यापके प्रकृतितोऽतिविशिष्टाः भवन्ति यथा दृढता, साधन-सम्पन्नता, हृदयस्पर्शित्वम्, व्यक्तित्वनिर्माणस्य क्षमताश्चेति।

एतेभ्यः गुणेभ्यः अतिरिक्तं सः स्वव्यवसायस्याध्ययनेनानुभवेनानुकरणेन च आदर्शप्रधानाध्यापको भवति।

इत्थं प्रधानाध्यापकस्य गुणानां विवेचनं कर्तुं शक्यते।

(1) **वैयक्तिकगुणाः** – वैयक्तिकगुणेषु प्रधानाध्यापकस्येते गुणाः अधोनिर्दिष्टाः भवन्ति –

1. सर्वोत्तमस्वास्थ्यस्फूर्तिश्च – ''स्वस्थे शरीरे स्वस्थमस्तिष्कस्य विकासो

भवति'' स्वास्थ्यमस्तिष्कयोर्मध्येऽन्योन्याश्रयसम्बन्धो दरीदृश्यते। अतः प्रधानाध्यापकस्य स्वास्थ्यमेव समीचीनं न स्यादपितु स्फूर्तिवानपि स्यात्।

2. सुव्यसनानि वैयक्तिकजीवनस्य शुद्धत्वञ्च – प्रधानाध्यापकः आत्मनि सद्व्यसनानां निर्माणं कुर्यात्, यदि सः स्वयमेव सुव्यसनान्वितो नास्ति छात्रेषु सुव्यसनत्वमापादयितुं समर्थो न भवति। सः वैयक्तिकजीवने शुद्धत्वमाचरेत्, यदि प्रधानाध्यापकः दुश्चरितश्चेत्छात्राः तदनुकरणेन दुःचरित्रशीलाः भवितुमर्हन्ति। अतः प्रधानाध्यापकेन वैयक्तिकजीवने शुद्धत्वमाचरणीयम्।

3. उच्चचरित्रम् – ''प्रधानाध्यापकः चरित्रवान् स्यात्।'' चारित्र्याभावात्सः कदापि विद्यालयस्य शैक्षिकस्तरस्याभ्युदयं कर्तुं न शक्नोति।

4. कार्यशीलत्वम् – ''विद्यालयस्य नेता व्यावहारिकः स्यात् सः यानपि सिद्धान्तान् आदर्शान् च छात्राणां सहयोगिनाञ्च पुरतः स्थापयति, तानेव अनुकृत्य तेऽपि सैद्धान्तिकाः आदर्शगुणान्विताश्च भवन्ति'' अतः सः छात्राणां सहयोगिनाञ्च पुरतः सद्व्यवहारमाचरेत् सदुदाहरणानि प्रस्तुयात् च।

5. नेतृत्वक्षमता – किमपि सङ्घटनं साफल्येन सञ्चालयितुं योग्यनेतुरावश्यकताऽनुभूयते। विद्यालयोऽपि एका सामाजिकसंस्था वर्तते अतः विद्यालयं साफल्यपूर्वकं सञ्चालयितुं प्रधानाध्यापके नेतृत्वशक्तिः स्यात्। ये जनाः शैक्षिकयोग्यतायां प्रायः समानाः भवन्ति तेषां नेतृत्वं प्रधानाध्यापकेन कर्त्तव्यं भवति। अतः सहयोगिनामनुगामिनाञ्च सुसहयोगं प्राप्यैव सः नेतृत्वं कर्तुं पारयति। सहयोगिनां योग्यतायाः क्षमत्वस्य च सम्यक् प्रयोगं कृत्वा सः लोकतान्त्रिकं नेतृत्वं करोति न तु राजतान्त्रिकम्। तत्रावधेयं यत् तस्मिन् प्रेरणाशक्तिः वर्तते न वा। स्वप्रेरणाभिरुपदेशैश्च सः छात्रेषु नागरिकेषु च कर्त्तव्यभावं समुत्पादयितुं शक्नोति।

6. सहानुभूतेः भावना – प्रधानाध्यापके छात्राणां सहयोगिनाञ्च विश्वासप्राप्त्यर्थं सहानुभूतिपूर्वकं व्यवहारोऽपेक्षितः भवति। एतादृशव्यवहारेणैव सः नेतृत्वे साफल्यमर्हति यतो हि तथैव छात्राः सहयोगिनश्च तत्साहाय्यं कर्तुं तत्पराः भविष्यन्ति।

7. मानवीयसम्बन्धस्थापने क्षमता (क्षाम्यम्) – प्रधानाध्यापके मानवीयसम्बन्धस्थापनस्य योग्यता स्यात्। यदि सः छात्राध्यापकाभिभावककर्मचारिभिः साकं सुसम्बन्धं स्थापयितुं न शक्नोति तर्हि विद्यालयं सम्यग्रीत्या सञ्चालयितुं साफल्यं नावाप्स्यति, यतो हि विद्यालयस्य सम्यग्रीत्या सञ्चालनस्य कृते सुसम्बन्धस्थापनमावश्यकम्।

8. बौद्धिकाः संवेगात्मकाश्च गुणाः – प्रधानाध्यापके बौद्धिकाः संवेगात्मक-गुणाश्च भवेयुः। यथा –

(1) योजनानां व्याख्याने क्षमत्वम्।

(2) अनुसंधानेऽन्वेषणे चाभिवृत्तिः।

(3) आत्मभूमिकां प्रति जागरूकता।

(4) परिश्रमः अध्यवसायश्च।

(5) उच्चबुद्धिलब्धिः।

(6) विचारप्रेषणक्षमता।

(7) छात्राणामभिवृद्धेर्ज्ञानम्।

(8) सामाजिकसमस्यानां ज्ञानम्।

(9) साधनसम्पन्नत्वम्।

(10) सम्प्रेषणशक्तिः।

(11) वैयक्तिकवैभिन्नस्य ज्ञानम् (अवबोधः)।

(12) विविधविषयाणां ज्ञानम्।

(13) साम्प्रतिकशिक्षासिद्धान्तानां व्यवहारस्य च ज्ञानम्।

(14) स्वदोषान्वेषणस्य तदपाकरणस्य च क्षमत्वम्।

(15) संवेगात्मकस्थिरता।

(16) चिन्तनेन संघर्षेण च मुक्तत्वम्।

(17) उत्प्रेरकत्वम्।

(18) आशावान् प्रेरणायुक्तश्च इति।

9. वैयक्तिकसामाजिकनैतिकाश्च गुणाः – ते यथा – 1. चातुर्यम्, 2. विश्वसनीयत्वम्, 3. सर्जनात्मकशक्तिः, 4. निष्पक्षता, 5. वस्तुपरकदृष्टिकोणः, 6. आत्मविश्वासः, 7. अनावृत्तमस्तिष्कः, 8. नियमितता, 9. परव्यक्तित्वे समादरभावना, 10. सहयोगी, 11. अन्यं प्रति सदिच्छान्वितत्वम्, 12. सामाजिकता, 13. सहानुभूतिपूर्णत्वम्, 14. परामर्शात्मकः, 15. निष्ठायुक्तत्वम्, 16. समाजं प्रति सेवाभावना, 17. सच्चरित्रम्, 18. आत्म-नियन्त्रणम्, 19. आत्मसम्मानः, 20. स्वदोषस्वीकारे तत्परता।

(ब) व्यावसायिकगुणाः –

ते खल्वधो निर्देष्टुं शक्यन्ते –

(1) व्यावसायिकं ज्ञानम् – प्रधानाध्यापके स्वविद्यालयस्योद्देश्यानां प्राप्तिसाधनानाञ्च निर्धारणाय माध्यमिकस्तरीयविद्यालयानामावश्यकतानामादर्शानाञ्च विषये ज्ञानं स्यात्। शिक्षापद्धतौ तस्य विद्यालयस्य किं महत्त्वम्? कानि च कार्याणि? एतत्सर्वं तेनावधेयम् सः सामाजिकसंस्थानां शैक्षिकान्दोलनानाञ्च दर्शनस्य इतिहासस्य च वैशिष्ट्यानां, मनोवैज्ञानिकाधिगमप्रक्रियायाः चावबोधे समर्थः स्यात्। माध्यमिकविद्यालयस्य प्रधानाचार्यः किशोरावस्थायाः वैशिष्ट्यं किम्? इति जानीयात्। यतो हि एषैवावस्था छात्रजीवनस्य अवबोधाधिगमप्रक्रियायाः सर्वोत्तमावस्था वर्तते। अस्यामवस्थायां छात्राः संघर्षशीलाः भवन्ति। यदि प्रधानाध्यापकः छात्रैस्सह सुसम्पर्कं स्थापयति छात्राः अधिगमशीलाः भवितुमर्हन्ति। सः विद्यालयप्रशासनस्य रीतीनां, पाठ्यक्रमनिर्धारकसिद्धान्तानां शिक्षणविधीनाञ्च विषये ज्ञानवान् स्यात्। व्यावहारिकज्ञानाभावे सः स्वकर्त्तव्यानि दायित्वानि च निर्वोढुं समर्थो न भवितुमर्हति। व्यावसायिकज्ञानस्य प्राप्त्यर्थं सः व्यावसायिकसाहित्यं पठेत्।

(2) वैदुष्यम् – प्रधानाध्यापकः शिक्षकवर्गसमाजयोर्नेता भवति। शिक्षकवर्गे सम्मानस्य कृते तस्मिन् वैदुष्यं भाव्यम्। विद्वान् सर्वत्र पूज्यते इति लोकोक्तिरपि जगति प्रसिद्धा। सः न्यूनातिन्यूनमेकस्य विषयस्य विशेषज्ञः स्यादेव। सम्यक् नेतृत्वायाधुनिकशैक्षिकसिद्धान्तान् प्रयोगान्चाभिजानीयात्। उपदेशादनुकरणं प्रधानं भवति इति धिया सः उपदेशदानपेक्षया सत्कार्यं सम्पादयेत् येन छात्राः अनुकरणशीलास्सन्तः स्वोन्नतिं कर्तुं पारयन्ति। स्वविषयव्यवसाययोर्विद्यार्थी सन् स शिक्षकवर्गस्योन्नतिं कर्तुं शक्नोति।

(3) निष्ठावान् – प्रधानाध्यापकः निष्ठावानपि स्यात्, तस्य व्यवसाये निष्ठा नास्ति चेत् सः स्वकर्त्तव्याणि दायित्वानि च वोढुं समर्थो न भविष्यति। किञ्च साफल्येन नेतृत्वमपि कर्तुं न शक्नोति। अतः प्रधानाध्यापकः निष्ठावान् स्यादेव।

(स) प्रशासकीयगुणाः –

प्रधानाध्यापके निम्नाङ्किताः प्रशासकीयगुणास्स्युः –

(1) कुशलप्रशासकः – प्रधानाध्यापकः कुशलप्रशासकः स्यात्। प्रशासनस्य कृते तस्मिन् प्रशासकीययोग्यताऽऽवश्यकी। सुनियोजकः, सङ्घटकः योग्यशिक्षका–णामितरकर्मकराणाञ्च नियुक्तौ योग्यतावान्, व्यवस्थापकः, सञ्चालकः, सूचना–

प्रकाशकः आयव्ययपत्रकस्य निर्माता च प्रधानध्यापकः कुशलप्रशासकः भवितुमर्हति।

(2) कुशलसङ्घटनकर्ता – प्रधानाचार्ये सङ्घटनकुशलतापि आवश्यकी, अस्य कृते सः विद्यालयसङ्घटनस्य मुख्यसिद्धान्तान्, सामाजिकावश्यकताः आदर्शान् चाभिजानीयात्, अनया योग्यतयैव सः शिक्षालयसङ्घटनसम्बद्धसमस्यानां निवारणे साफल्यमर्हति। किञ्च प्रधानाध्यापकः उपर्युक्तगुणालङ्कृतो नास्ति चेत् स्वकर्त्तव्यानि दायित्वानि च निर्वोढुं नार्हति। अतः प्रधानाध्यापके एते गुणाः अवश्यं स्युरिति।

पुनरावृत्तिप्रश्नाः

(1) विद्यालये प्रधानाध्यापकस्य स्थितिः कीदृशी भवतीति मूल्याङ्कनं कुर्यात्? विद्यालयः तस्य व्यक्तित्वं प्रतिबिम्बयतीति कथनं सम्यगस्ति न वेति विवेच्यताम्?

(2) विश्वे कतिपयैव जनाः प्रधानाध्यापकतोऽधिककर्त्तव्यवन्तः उत्तर-दायित्वशीलाश्च भवन्ति'' इति कथनं सयुक्तिकं समीक्ष्यताम्?

(3) प्रधानाध्यापकस्य कानि-कानि दायित्वानि कर्त्तव्यानि च स्युरिति भवतां मतं स्पष्टयत?

(4) प्रधानाध्यापकः विद्यालयं सम्यग्रीत्या सञ्चालयितुं कानि कर्त्तव्यानि दायित्वानि च निर्वहेत्? प्रतिपादयत।

(5) ''माध्यमिकविद्यालयस्य प्रधानाचार्यस्य कर्त्तव्यानि विद्यालयकार्यक्रमस्य सञ्चालनात् व्यापकत्वं भजन्ते'' इति कथनं विवेचयत?

(6) विद्यालयस्य समग्रकार्यक्रमस्य सम्यक् सञ्चालनाय ज्ञानमवाप्तुं प्रधानाध्यापके के गुणाः उपायाश्चावधेयाः इति विशदीक्रियताम्?

(7) प्रधानाध्यापकस्य विद्यालयनिरीक्षणस्य कानि कानि कर्त्तव्यानि इति सोदाहरणं स्पष्टयत?

(8) छात्रावासनिरीक्षणे प्रधानाध्यापकः कान् कान् विषयान् अवगच्छेत्? विशदं प्रतिपादयत।

(9) प्रधानाचार्यः ''प्रशासकः, सङ्घटनकर्ता, अध्यापकः, निर्देशकः, निरीक्षकश्चेति गुणानां समन्वितं रूपं वर्तते'' इति कथनं प्रकाशयत?

(10) प्रधानाध्यापके तस्य कर्त्तव्यानां दृष्टिकोणे के वैयक्तिकगुणाः अपेक्षितास्सन्तीति सतर्कं विशदीक्रियताम्?

(11) प्रधानाध्यापकः स्वसहयोगिनां कुशलनेतृत्वाय कान् विषयान् अवगच्छेत्?

इति प्रतिपादयत।

(12) प्रधानाध्यापके कुशलप्रशासनस्य कृते आत्मनि के-के गुणाः भवितव्याः ? सोदाहरणं प्रतिपादयत।

लेखार्थप्रश्नाः

कस्यापि परिचितस्य प्रधानाध्यापकस्य कार्याणां दैनिककार्यक्रमाणाञ्च सम्पादनविधिं वर्णयत ? तस्य साफल्यकारणाणि च स्पष्टयत।

3

अध्यापकस्य गुणाः, भारतीय-समाजे तस्य स्थितिः च

(Qualities of teacher and her position in Indian society)

"The teacher's place in society is of vital importance, He acts as the pivot for the transmission of intellectual traditions and technical skills from generation to generation, and helps to keep the lamp of civilization burning" **– Dr. Radhakrishnan**

"I owe my birth to my father, but life to my teacher"

– Alexander the great

शिक्षक एव विद्यालयस्य शिक्षापद्धतेश्च वास्तविकगत्यात्मिका शक्तिः वर्तते। यद्यपि शैक्षिककार्यक्रमे विद्यालयभवनस्य पाठ्यक्रमस्य, पाठ्यसहगामिक्रियाणां निर्देशनकार्यक्रमाणां पाठ्यपुस्तकानाञ्च महत्त्वपूर्णं स्थानं वर्तते परं सुयोग्य-शिक्षकस्याभावे एतत्सर्वं निरर्थकमेवास्ति। शिक्षक एव एतादृशशक्तिः वर्तते या सन्ततिषु प्रत्यक्षरूपेणाप्रत्यक्षरूपेण च स्वप्रभावं स्थापयति। स एव राष्ट्रियां भौगोलिक-सीमाञ्चाधिकृत्य विश्वव्यवस्थां मानवजातिञ्चोन्नतिपथेऽग्रेसारयति। अतः स्पष्टरूपेण वक्तुं शक्यते यत् मानवजातेः राष्ट्रस्योन्नतिश्चोत्तमशिक्षकाणामुपरि एव निर्भरा वर्तते।

हुमायूँ कबीरमहोदयस्य कथनमस्ति यत् –

''ते (शिक्षकाः) एव राष्ट्रस्य भाग्यनिर्णायकास्सन्ति। कथनमेतत्प्रत्यक्षरूपेण सत्यमस्ति परं शिक्षक एव शिक्षायाः पुनर्निर्माणस्य महत्त्वपूर्णकुञ्जिका वर्तते इति विषयस्योपरि बलं प्रदेयम्। इयमेव शिक्षकवर्गस्य निर्णायकयोग्यताऽस्ति॥''[1]

पुनश्च शिक्षकाणां महत्त्वमभिप्रदर्शयन् कथयति **हुमायूँ कबीरमहोदयः**– ''यत् शिक्षापद्धतेः कौशलं शिक्षकाणां योग्यतायाः उपरि निर्भरमस्ति। सुशिक्षका-णामभावे सर्वोत्तमशिक्षापद्धतिरपि साफल्यं नाधिगच्छति। सुशिक्षकाश्चेद् दोषपूर्णाऽपि शिक्षापद्धतिः दोषरहिततामभिप्राप्नोति।''[2]

---

1. "They are literally the arbiters of a nation's destiny. It may sound altruism, but it needs to be stressed that the teacher is the key to any educational reconstruction..........It is the quality of the personnel which is decisive."

   —Humayun Kabir : Education in New India, P. 201.

2. "........The efficiency of a system of education rests on the quality of teacher. Without good teacher even the best of the system is bound to fail. With good teachers even the defects of the system can be largely overcome," **—Humayun Kabir : Education in New India, P. 199.**

माध्यमिकशिक्षायोगेनापि स्वप्रतिवेदने स्पष्टीकृतम् यत् – ‘‘अपेक्षितशिक्षायाः पुनर्निर्माणे सर्वतो महत्त्वपूर्णं तत्त्वं शिक्षकः, तद्वैयक्तिकगुणाः, शैक्षिकयोग्यताः, व्यावसायिकप्रशिक्षणं, विद्यालयेन समाजेन च तेन गृहीता स्थितिः, चेति वर्तन्ते। किञ्च विद्यालयस्य प्रतिष्ठा सामाजिकजीवने तत्प्रभावश्च निस्संदेहरूपेण शिक्षकाणामुपर्येव निर्भरौ स्तः ये खलु विद्यालये कार्यरतास्सन्ति।’’[1]

इत्थं शिक्षकस्य महत्त्वं समाजे शिक्षापद्धतौ च उभयत्रापि स्पष्टमेवास्ति। वस्तुतः शिक्षक एव भाविनागरिकान् निर्माति, येषामुपरि राष्ट्रस्योन्नतिः अवनतिश्च निर्भरा वर्तते।

आदर्शशिक्षकस्य गुणाः –

आदर्शशिक्षकः एव मनुष्याणां निर्माता, शिक्षापद्धतेराधारशिला, समाजस्य गतिप्रदायकश्च भवति। सामान्यतया एतादृशशिक्षके एव बालकस्यावबोधनशक्तिः, कार्यक्षमता, शिक्षणयोग्यता, कार्यकरणस्येच्छाशक्तिः सहकारित्वञ्चेते गुणाः अपेक्षन्ते। प्रायः एते गुणाः न हि प्रत्येकस्मिन् शिक्षके उपलभ्यन्ते, न हि सर्वाव्यक्तिः शिक्षणकार्यं सम्पादयितुं शक्ता भवति। वस्तुतः यस्मिन् कतिपयविशिष्टशारीरक–बौद्धिक–सामाजिकनैतिकसंवेगात्मकाश्च गुणाः भवन्ति स एव शिक्षणकार्यं कर्तुं पारयति।

शिक्षणं जगत एका मानसिकी प्रक्रिया वर्तते यस्यां मस्तिष्कस्य मस्तिष्केण सह सुसम्बन्धः स्थाप्यते। अस्य सम्बन्धस्य उपयुक्तताऽनुपयुक्तता चेति बहवो गुणाः शिक्षकस्य व्यक्तित्वस्योपरि एव निर्भरा भवन्ति। संयुक्त–राष्ट्र–अमेरीकादेशे डॉ. एफ. एल. क्लैप[2] महोदयेन 1913 तमे वर्षेऽध्ययनात्परं शिक्षकाणां व्यक्तित्वस्य निम्नाङ्किता दश गुणाः समुल्लेखिताः –

(1) सम्बोधनम् (2) वैयक्तिकाकृतिः (3) आशावादिता (4) संयमः (5) उत्साहः (6) मानसिकनिष्पक्षता (7) सम्यक्–चिन्तनम् (8) सहानुभूतिः (9) जीवनशक्तिः (10) विद्वत्ता।[3]

---

1. "The most important factor in the contemplated educational reconstruction is the teacher—his personal qualities, his educational qualifications, his professional training and the place that he occupies in the school as well in the community. The reputation of a school and its influence on the life of the community invariably depends on the kind of the teacher working on it." **—Re port of the Secondary Education Commission, P. 155**
2. Dr. F. L. Clapp.
3. Address, personal appearance, optimism, reserve, enthusiasm, fairness of mind, sincerity, sympathy, vitality and scholarship..

अमेरिकादेशे **बागले–कीथ**[1]–महोदयौ अध्ययनात्परमुपर्युक्तगुणेषु चातुर्यं, नेतृत्वक्षमता, सुस्वर[2]ञ्चेति गुणत्रयं संयोजितवन्तौ।

अध्यापकस्य गुणानां सूचिनिर्माणे विद्वांसः विद्यालयानां प्रधानाचार्याणां निरीक्षकाणामधीक्षकाणाञ्च सम्मतिं प्राप्तवन्तः, छात्राणां सम्मतिः तै र्न प्राप्ता – **वॉसिग[3] महोदयास्तु** – ''बालकानां सम्मतेः पश्चात् शिक्षकाणां व्यक्तित्वस्य गुणेषु विनोदप्रियत्वं, छात्रान् प्रति मैत्रीपूर्णदृष्टिकोण[4] श्चेति गुणद्वयं संयोजितवन्तः।''

रेमॉन्ट महोदयानुसारं – ''अध्यापकः निरर्थकविषयाणां त्यागं कुर्यात् यतो हि छात्राः निरर्थकविषयेषु समधिकमवधानं ददति। अतः शिक्षकः उच्चादर्शैः विचारैश्चालङ्कृतो भवेत्। राष्ट्रपिता महात्मागांधिमहोदयः खेदमनुभवन् कथितवान् यत् शिक्षकाणामादर्शेषु व्यवहारे च सामञ्जस्यं नास्ति। ते भाषणे कार्यकरणे च समानाः न भवन्ति।''

उपर्युक्तविवेचनानुगुणं शिक्षकाणां गुणाः वैयक्तिकं व्यावसायिकञ्चेति भागद्वये भवितुमर्हन्ति।

(अ) वैयक्तिकगुणा :–

(1) उत्तमस्वास्थ्यं जीवनशक्तिश्च –

शिक्षकस्य स्वास्थ्यमुत्तमं स्यात्। स्वस्थशरीरस्य स्वस्थमस्तिष्केन सह–उच्चतमसहसम्बन्धो भवति इति परीक्षणैः प्रमाणितम्।

हरबर्ट स्पेन्सर महोदयानुसारं – ''जीवने साफल्यमवाप्तुं सुष्ठुप्राणित्वमावश्यकम्''[5] यदि शिक्षकस्य स्वास्थ्यं समीचीनं नास्ति चेद् सः शिक्षणं सम्यग्रीत्या सम्पादयितुं न प्रभवति। यतो हि शक्त्याः स्फूर्तेश्च माध्यमेनैव सः उत्साही, आशावादी, च भवितुमर्हति। किञ्चोक्तिरपि जगति प्रासिद्ध्यं भजते ''शरीरमाद्यं खलु धर्मसाधनम्'' इति। शिक्षकः शरीरेणैव स्वच्छो नापितु चेतनशीलः अपि स्यात्।

आर्थर बी. मौलमेन महोदयानुसारं – ''सफलशिक्षणस्य कृते जीवनशक्तिरावश्यकी'' अस्याः माध्यमेनैव सः छात्राणामुपरि प्रतिबिम्बात्मकं प्रभाव–

---

1. Bagley and Keith.
2. Tact, capacity for leadership, good voice.
3. Bossing.
4. Humorous and friendly attitude towards students.
5. "The first essential for success in life is being a good animal."

—Herbert Spencer.

मेव न अभिपातयति अपितु क्लान्तशरीरेण प्रादुर्भूतानां बाधानां निवारणाय अपि इयम् आवश्यकी अस्ति।[1]

(2) संवेगात्मकं सन्तुलनम् –

छात्राणां भावात्मकविकासस्य कृते शिक्षके संवेगात्मकसन्तुलनमावश्यकम्। संवेगात्मकशिक्षणाभावे विद्यालये बहवः समस्याः समुज्जायन्ते।

(3) सामाजिकगुणाः –

सामाजिकावबोधः सामाजिकसम्बन्धैरनुप्राणितविश्वासमाध्यमेनैव प्राप्तुं शक्यते। प्रत्येकस्यां व्यक्तौ सामाजिकगुणाः अपेक्षितास्सन्ति। शिक्षकः कक्ष्याकक्षे समुदाये च सहायकान् सामाजिकगुणान् अवश्यं प्राप्नुयात्। तेन कतिपयगुणाः सम्पर्केण प्रशिक्षणेन च प्राप्तव्याः भवन्ति यथा – सामाजिकचातुर्यम्, उत्तमनिर्णयशक्तिः, जीवनं प्रत्याशावादिदृष्टिकोणः, परिस्थितीनां ज्ञानेऽपाकरणे च तत्परत्वम्, सहयोगेन कार्यकरणस्य क्षमता चेति।

(4) उच्चचरित्रं दृढसंकल्पश्च –

शिक्षकः राष्ट्रनिर्माता भवति, अतः सः सच्चरित्रवान् स्यात्, शिक्षके सच्चारित्र्यं नास्ति चेद् सः छात्राणां समाजस्य च सम्यग्रीत्या पथं प्रदर्शयितुं न शक्नोति।

(5) नेतृत्वक्षमता –

शिक्षके नेतृत्वक्षमताऽऽवश्यकी, तस्य नेतृत्वं, चरित्रशक्तिप्रभावकारितादर–भावनानाञ्चोपरि निर्भरमस्ति। अर्थात् शिक्षकस्य नेतृत्वं तद्व्यक्तित्वस्योपर्येवाधारितं भवति। एतादृशनेतृत्वं पथप्रदर्शनस्य कृते, समूहेन साकं कार्यकरणस्य साहाय्यप्रदानस्य कृते, सामान्यध्येयमभिप्राप्तुमग्रेसर्तुं प्रोत्साहनस्य क्षमतायाञ्च निर्भरो वर्तते।

डॉ. बैलार्ड महोदयानुसारं – ‘‘शिक्षकः स्वकीयं व्यक्तित्वं नाभिलक्ष्य छात्राणां व्यक्तित्वमभिज्ञातुं तथा तद्गुणानन्वेष्टुं प्रयत्नशीलो भविष्यति ये गुणाः तेषां व्यक्तित्वमभिवर्धयन्ति किञ्च शिक्षकः तेषां प्रेरकशक्तेरन्वेषणं करिष्यति।’’[2]

1. "Good vitality is essential to successful teaching, not only in its reflex influence upon the children but also in minimizing the number of interruptions due to general fatigue." **— Moehlman Arthur, B : School Administration, P. 21**

2. "The teacher of the future will be less concerned with impressing his personality on his pupils than with gaining as much insight as he can into the personalities of his pupils and trying to find in each of them the lamp that illuminates and the spring that motivates." - - - **Dr. Ballard**

(6) मैत्रीपूर्णः स्वानुभूतिपूर्णश्च व्यवहारः -

शिक्षकः छात्रैः सहयोगिशिक्षकै च साकं मैत्रीपूर्णं व्यवहारं स्थापयेत्। एतादृश-व्यवहारेणैव सः छात्राणां विश्वासं जेतुं शक्नोति। किञ्च विद्यालयशिक्षणं सहयोगेनैव भवितुमर्हति। यावत्पर्यन्तं छात्राः सर्वे शिक्षकाश्च सहयोगशीलाः न भवन्ति तावत् शिक्षणमपि सञ्चालयितुं न शक्यते। अतः शिक्षणसाफल्याय परस्परं सहयोगः आवश्यकः। इत्थं शिक्षकः कर्मचाऊँभिः शिक्षकैश्च साकं सहानुभूतिपूर्णव्यवहारं स्थापयेत्। सः सदैव उच्चाधिकारिनः, प्रधानाध्यापकं निरीक्षकान् च पथप्रदर्शकत्वेन पश्येत्।

(ब) व्यावसायिकगुणाः

(1) विषयस्य पूर्णं ज्ञानम् -

काऽपि व्यक्तिः विषयज्ञानाभावे शिक्षकः न भवितुमर्हति, अतः शिक्षकः तमेव विषयं पाठयेत् यस्य सः पूर्णज्ञानवान् स्यात्। पूर्णज्ञानाभावे छात्राणामुपरि मनोवैज्ञानिकं प्रभावं स्थापयितुमर्हो न भवति। अस्मिन् सन्दर्भे उक्तं केनापि विदुषा -

''एकोऽयोग्यचिकित्सकः रुग्णस्यैव हानिः कर्तुं शक्नोति, परमयोग्यशिक्षकश्चेद् समग्रं राष्ट्रमवनतिपथं नेतुं शक्नोति। राष्ट्रविकासमवरोधयति, आत्महननञ्च करोति।'' अतः शिक्षकः पूर्णविषयज्ञः स्यात्।

के.जी. सैयदैन् उक्तवान् - ''शिक्षकः यदि बुद्धिहीनश्चेत्छात्राणां बुद्धिं प्रवर्धयितुं स्फुटयितुञ्च न शक्नोति। अन्धो दीपः कदापि प्रकाशं प्रसारयितुं नार्हति।''[1]

(1) व्यावसायिकं प्रशिक्षणम् -

शिक्षणं तेन विधिना स्याद् येन सर्वेऽपि छात्राः कठिनमपि विषयं सारल्येन ज्ञातुं शक्तास्स्युः। अस्य कृते शिक्षकेण व्यावसायिकं प्रशिक्षणं प्राप्तव्यम्। व्यावसायिक-शिक्षणस्य पाठ्यक्रमे मनोविज्ञान-विद्यालयप्रशासन-स्वास्थ्यशिक्षाशिक्षणसिद्धान्तादि-विषयाणाञ्च महत्स्थानं भवति। अनेन शिक्षकाः प्रशिक्षणं प्राप्य छात्रान् रुच्यनुकूलं योग्यतानुसारञ्च पाठयितुमुत्तमशिक्षणविधिमनुसृत्य समर्थाः भवन्ति। शिक्षक-पदमलङ्कृत्य ते व्यावसायिकज्ञानस्य नूतनत्वं यथा यथं सम्पादयितुं विविधसभानां,

---

1. "You cannot pour out of a vessel except that you have put into it and if a teacher is poor and shallow from within, he cannot quicken the mind or humanise the emotions of his children—If he is not delighted candle himself he will never be able to lighten up the flames in others."

—K.G. Saiydain

विचार–सम्मेलनानां संगोष्ठीनाञ्चायोजनेषु भागं गृह्णन्ति। अतः शिक्षकस्य कृते प्रशिक्षणं, शैक्षिकगोष्ठीषु च भागग्रहणमावश्यकं वर्तते।

(2) व्यावसायिकनिष्ठा –

शिक्षकः स्वविषये व्यवसाये च निष्ठावान् स्यात्। निष्ठाभावे सः विषयं रोचकं न पाठयति तेन छात्राणां विकासः अवरुद्धः भवति।

मार्क पैटिसन महोदयेनोक्तम् – ''शिक्षकस्य प्रथमगुणः तस्मिन्नध्यापकत्वं स्यात् शिक्षकरूपेण प्रशिक्षितश्च स्यात् प्रशिक्षणात्परं तेनावश्यं निष्ठावता भवितव्यम्।''

(5) पाठ्यसहगामिक्रियास्वभिरुचिः –

शिक्षायाः प्रधानभूतमुद्देश्यं जीविकोपार्जनमेव नास्ति परं सर्वाङ्गिकविकासो वर्तते। सर्वाङ्गिकविकासाय शिक्षणातिरिक्तं पाठ्यसहगामिक्रियाणामप्यायोजनमावश्यकतां भजते। यतो हि छात्रः सामाजिकनागरिकोऽपि वर्ततेऽतः क्रीडा–बालचरसंघ–नाटक–वाद–विवाद–भ्रमण–प्राथमिकचिकित्सा–छात्रसंघादिषु पाठ्यसहगामिक्रियासु शिक्षकेण रुचिः ग्रहीतव्या। सः पाठ्यसहगामिक्रियासु रुचिं प्राप्तुं तत्परः स्यात्।

(6) प्रयोगेऽनुसंधाने च रुचिः –

साम्प्रतिकेऽस्मिन् युगे शिक्षकाणाङ्कृते शिक्षणातिरिक्तमनुसंधानकार्यमप्यपेक्षते। शिक्षकाः कक्ष्याकक्षे जायमानानां समस्यानां निवारणाय वैज्ञानिकविधीनां प्रयोगं कृत्वा शिक्षाप्रगतौ सहयोगं दद्युः। किं, किमर्थं, कथञ्च पाठनीयमिति? धिया अध्यापकाः शैक्षिकसमस्यानां समाधानायानुसंधाने तत्परास्स्युः।

शिक्षकेषु केचन गुणाः प्रकृतितो जायन्ते। उच्यतेऽपि यत् सुशिक्षकाः जन्मत एव जायन्ते न तु शिक्षणतः इति। तथापि शिक्षणकार्ये प्रशिक्षणानुभवयोर्महत्प्राधान्यं वर्तते। प्रशिक्षणविद्यालयेषु अनुभवहीनशिक्षकाणां पुरतः शिक्षणस्योत्तमप्रारूपाणि साधनानि च प्रस्तूयन्ते। यानि तेषां कक्ष्याकक्षे साहाय्यमाचरन्ति। एतानि प्रारूपाणि मानदण्डरूपेण दीयन्ते येषां माध्यमेन सः स्वप्रयासानां मूल्याङ्कने सामर्थ्यं प्राप्नोति।

शिक्षकस्य व्यक्तित्वं कीदृशं स्यादिति विषये मतानि संस्तुतानि सन्ति –

(1) सः समयनिष्ठः स्यात्।

(2) सः प्रत्येकस्मिन् कार्ये निष्पक्षत्वमाचरेत्।

(3) सर्वान् प्रति सहृदयः स्यात्।

(4) सः स्वतन्त्रवक्ता भवेत्।

(5) शिक्षकः सम्मानं प्राप्तुमर्हः स्यात्।

(6) सः व्यवहारे भाषणे च विवेकी स्यात्।

(7) सः दयावान् सहानुभूतिपूर्णश्च भवेत्।

(8) सः प्रत्येकस्यां परिस्थितौ निष्ठाव्यवहारमाचरेत्।

(9) सः बालाध्ययनस्य, विषयाणां शिक्षणशास्त्रस्योत्साहीच्छात्रः स्यात्।

(10) सः आत्मज्ञो भवेत्।

शिक्षकाणां स्थितौ समुन्नतिप्राप्त्यर्थं माध्यमिकशिक्षाऽऽयोगेन प्रदत्तपरामर्शाः –

भारतीयसमाजे शिक्षकस्य सामाजिकस्थितिरेव नापितु आर्थिकस्थितिरपि दयनीया वर्तते यतो हि अन्यक्षेत्रेष्वल्पयोग्यतावन्तोऽपि जनाः शिक्षकाणामपेक्षया समधिकं पारिश्रमिकं प्राप्नुवन्ति। अतः शिक्षकेषु असन्तोषो दरीदृश्यते।

भारतसर्वकारेण माध्यमिकशिक्षानुसंधानाय ''**माध्यमिकशिक्षाऽऽयोगः**'' (मुदालियर आयोग) 1952-53 इत्यस्य संस्थापनं कृतम्। अस्यायोगस्य प्रतिवेदने स्वीकृतं यदिदानीं भारतीयशिक्षकाणां स्थितौ परिष्कारः परमावश्यकः'' इति।

तस्यानुसारम् - ''शिक्षकाणां सामाजिकस्थितिः पारिश्रामिकं सामान्यसेवा-दशाश्चासन्तोषयुक्ताः सन्ति, इति तथ्येनास्माभिः महद्दुःखमनुभूयते वस्तुतोऽती-तापेक्षयाऽपि शिक्षकाणां स्थितिरत्यन्तदयनीया वर्तते। ये खलु स्वल्पयोग्यतावन्तस्तेऽपि तदपेक्षया महत्त्वपूर्णास्सन्ति समयोग्यतावतां तु वार्तैव का।''[1] इत्युक्तम् इत्थं माध्यमिकशिक्षायोगेन शिक्षकाणां स्थितौ समुन्नतये महत्त्वपूर्णाः परामर्शा एवमभिप्रदत्ताः-

(1) नियुक्तिः वैशिष्ट्यञ्च –

(1) सर्वविधविद्यालयेषु शिक्षकाणां चयने नियुक्तौ च समाना नीतिः स्यात्।

(2) वैयक्तिकसंस्थाभिः स्थानीयसंस्थाभिश्च सञ्चालितविद्यालयेषु शिक्षकाणां

1. "We were painfully impressed by the fact that social status the salaries and the general service conditions of teachers are far from satisfactory. In fact, our general impression is that on the whole their position today is even worse than it was in the past. It compares unfavourable not only with persons of similar qualifications in other professions, but also in many cases with those of lower qualifications who are entrusted with less important and socially less significant duties."

—Report of the Secondary Education Commission, P. 155.

नियुक्तये चयनसमितेः घटनं स्यात् यत्र प्रधानाध्यापकः पदेन सदस्यः स्यात्।

(3) प्रशिक्षिताध्यापकस्य कृते परीक्षणकालः एकवर्षीयः स्यात्।

(4) उच्चस्तरीयविद्यालयेषु शिक्षकः न्यूनातिन्यूनं स्नातकः स्यात् प्राविधिक-विषयाणामध्यापकाः तत्तद्विषयेषु स्नातकोपाधिवन्तः स्युः। किञ्च सामान्यशिक्षका-णाङ्कृते प्रशिक्षणमावश्यकं वर्तते ये जनाः उच्चतरमाध्यमिकविद्यालयेषु शिक्षकास्ते प्रशिक्षिताः स्नातकोत्तरोपाधिमन्तश्च स्युः।

(2) वेतनक्रमः

(1) शिक्षकाणां वेतनक्रमं संशोधयितुं विशिष्टसमितीनां नियुक्तिः स्यात्। ताः एतादृशं वेतनस्तरं निर्धारयेयुः यत् आवासादिव्यवस्थां सम्पूरयेत्।

(2) कस्यामपि शिक्षणसंस्थायां कार्यरतानां समयोग्यतावतां पारिश्रमिकं सममेव स्यात्।

(3) योग्यजना अपि एतादृशव्यवसायं प्रत्याकृष्टाः यथा स्युस्तदर्थं शिक्षकाणां प्रधानाध्यापकानाञ्च कृतेऽत्युच्चवेतनं वार्षिकसौविध्यञ्च स्यात्।

(3) सामाजिकस्थितिः सेवादशाश्च -

(1) शिक्षकाणां सामाजिकस्तरस्य समुन्नतये व्यवसाये सम्मानप्रदानाय च समाजस्य प्रतिष्ठितजनैरुच्चाधिकारिभिश्च ते सम्मानितास्स्युः।

(2) अन्यशैक्षिकसंस्थानामन्वेषणाय उच्चाध्ययनस्य कृते च शिक्षकाणाङ्कृते-ऽवसरः स्यात्, अध्ययनकाले अवकाशव्यवस्थापि स्यात्।

(3) अवकाशादिविषयेषु सर्वत्र सदृशाः नियमास्स्युः।

(4) अध्यापकानां विवादयुक्तविषयाणां समाधानाय मध्यस्थमण्डलानां समितीनां वा संस्थापनं स्यात्। मध्यस्थमण्डले शिक्षासञ्चालकः, प्रबन्धकानां प्रतिनिधिः, शिक्षकसङ्घस्य प्रतिनिधयश्च स्युः।

(5) व्यक्तिगतशिक्षणपद्धतिः नष्टा स्यात् यतो हि तस्मात्परमेव कक्ष्याशिक्षणे उन्नतिः भवितुमर्हति।

(4) इतरसौविध्यानि -

(1) विद्यालयेषु शिक्षकबालकानाङ्कृते निःशुल्कं शिक्षणं स्यात्।

(2) सहकारगृह-निर्माणसमितीनां माध्यमेन विद्यालयस्य इतस्ततः एव शिक्षकाणाङ्कृते आवासव्यवस्था स्यात् येन ते सारल्येन विद्यालये स्वसमयं सदुपयोक्तुं

तत्परास्स्युः।

(3) शिक्षकाणाङ्कृते चिकित्सालयेषु निःशुल्कचिकित्सा स्यात्।

(4) क्वचित् शिक्षकः संगोष्ठ्यां शिविरे वा भागं गृह्णाति चेत् विद्यालय-तोऽवकाशव्यवस्था स्यात्।

(5) शिक्षकाः स्वविषये स्वाश्रितानां विषये च चिन्तनरहिताः यथा स्युः तदर्थं ''त्रिमुखी लाभयोजना'' क्रियान्विता स्यात्। अस्यानुसारं तेषाङ्कृते निवृत्तिराशिः भविष्यनिधिः (पेन्शन प्रॉवीडेन्ट फण्डः) जीवनसुरक्षा (बीमा) इति व्यवस्थादीनां निर्धारणं स्यात्।

(6) शिक्षकः स्वस्थः कार्यकरणे समर्थश्चेत् शिक्षानिदेशकस्यानुमतिं प्राप्य षष्टिवर्षावस्थां यावत् कार्यं यथा कुर्यात्, तथा व्यवस्था कर्त्तव्या।

(5) शिक्षक-प्रशिक्षणम् -

(1) प्रशिक्षणं द्विविधं स्यात् - (क) प्राथमिकविद्यालयेषु पाठनस्य कृते द्विवर्षीयं प्रशिक्षणं स्यात्, अस्य कृते उच्चमाध्यमिककक्ष्यां यावत् शिक्षाऽऽवश्यकी। स्नातकोपाधियुक्तछात्राणाङ्कृते शिक्षकप्रशिक्षणं एकवर्षीयं स्यात्, किञ्चित् कालात्परमेतदपि द्विवर्षीयं स्यात्।

(2) प्रथमं प्रशिक्षणं मण्डलाधीनं स्यात् यस्य नियुक्तिः अस्योद्देश्यस्य सम्पूर्त्तये एव स्यात्। द्वितीयं तावत् विश्वविद्यालयसम्बद्धं स्यात्।

(3) छात्राध्यापकाः एकतोऽधिकपाठ्यक्रियासु प्रशिक्षितास्स्युः।

(4) प्रशिक्षणमहाविद्यालयेषु अभिनवपाठ्यक्रमस्य, विशिष्टविषयेषु लघुगहनपाठ्यक्रमस्य, कार्यशालासु व्यावहारिकप्रशिक्षणस्य च व्यवस्था स्यात्।

(5) प्रशिक्षणमहाविद्यालयेषु शिक्षणशास्त्रस्य विविधपक्षेष्वनुसंधानं स्यात्। अस्य कृते प्रदर्शनात्मकविद्यालयाः स्युः।

(6) प्रशिक्षणमहाविद्यालयेषु प्रशिक्षणं निःशुल्कं स्यात्, छात्राध्यापकानाङ्कृते च राज्यपक्षतः छात्रवृत्तिव्यवस्थाऽपि स्यात्। कार्यरतशिक्षकाणां प्रशिक्षणस्य कृते पूर्णपारिश्रमिकेण सह अवकाशव्यवस्थाऽपि स्यात्।

(7) सर्वेषु प्रशिक्षणमहाविद्यालयेषु छात्राध्यापकानाङ्कृते निवासव्यवस्था स्यात् येन तेषाङ्कृते सामुदायिकजीवनस्य अन्योपयुक्तक्रियाणाञ्च व्यवस्था स्यात्।

(8) शिक्षाचार्ये/शिक्षाधिस्नातके वा तेषाङ्कृते एव प्रवेशः स्यात् ये

प्रशिक्षणातिरिक्तं त्रिवर्षीयमध्यापनकार्यमपि कृतवन्तः।

(9) प्रशिक्षणमहाविद्यालयानामधिकारिषु, विद्यालयेषु चित प्रधानाध्यापकेषु विद्यालयनिरीक्षकेषु च विचार-स्वातन्त्र्यं स्यात्।

(10) प्रशिक्षिताध्यापिकानामभावमपाकर्तुमंशकालिकप्रशिक्षणपाठ्यक्रमस्य व्यवस्था भवेत्। इति

माध्यमिकशिक्षाऽऽयोगप्रदत्तपरामर्शानां व्यावहारिकरूपं प्रदातुं राज्यसर्वकारैः प्रयासो विहितः परमिदानीं यावत् एषां सर्वत्र कार्यान्वितिर्नाभवत्।

शिक्षकस्तरस्योन्नतये शिक्षाऽऽयोगप्रदत्तपरामर्शाः -

भारतसर्वकारेण सर्वस्तरीयशिक्षानुसंधानाय 1964 तमे वर्षे डॉ. डी.एस. कोठारी महोदयानामाध्यक्ष्ये एकस्यायोगस्य संस्थापनं कृतम्। सोऽयं साम्प्रतं ''शिक्षाऽऽयोगः'' इत्याख्येन प्रसिद्धिमवाप।

अनेनायोगेनानुभूतं यत् शिक्षाव्यवसायं प्रति प्रतिभावतां जनानामाकर्षणं शिक्षकाणामार्थिक-सामाजिक-व्यावसायिकस्थितेरुन्नतिः पश्चादेव भवितुमर्हति। अतस्तेषामुन्नतिरावश्यकी येन ते रुचिधैर्योत्साहवन्तः भूत्वा स्वदायित्वानि कर्त्तव्यानि च सम्पूरयितुं तत्परास्स्युः। विषयम् इममाधारीकृत्य शिक्षाऽऽयोगेन शिक्षकाणां स्थितौ समुन्नतयेऽधोनिर्दिष्टपरामर्शाः दत्ताः।

(1) पारिश्रमिकमार्थिककलाभश्च -

(1) भारतसर्वकारेण विद्यालय-शिक्षकाणाङ्कृते न्यूनतमवेतनक्रमस्य निर्धारणं स्यात्।

(2) सर्वकारीयेऽसर्वकारीये च विद्यालये कार्यरतानां सर्वेषां शिक्षकाणां वेतनक्रमः समानताया भावमाधारीकृत्यैव स्यात्।

(3) विश्वविद्यालयेषु तत्सम्बद्धमहाविद्यालयेषु च कार्यरतानां शिक्षकाणां वेतनक्रमे वृद्धिस्स्यात्, वेतनेऽसाम्यं नष्टं भवेत्।

इत्थं शिक्षाऽऽयोगेन शिक्षायाः विभिन्नस्तरेषु शिक्षकाणाङ्कृते विभिन्नरूपेण वेतनक्रमोऽभिनिर्दिष्टः। श्रीछागलामहोदयाः एतादृशपरामर्शान् शिक्षकाणां 'महाधिकारपत्रम्' (Magna Charta) इत्युक्तवन्तः। वस्तुतः 'शिक्षायोगः' एतादृशवेतनक्रमाणां परामर्शं दत्वा शिक्षणे आकर्षणं सम्पादयितुं प्रयासं कृतवान्। अस्माकं देशस्य समधिकक्षेत्रेषु शिक्षायोगप्रदत्तपरामर्शानां क्रियान्वयनाय प्रयासो विहितः। अत एव ''विश्वविद्यालयानुदानायोगस्यानुशंसायां 1974 तमे वर्षे

भारतसर्वकारेण विश्वविद्यालयस्य शिक्षकाणां वेतनक्रमः संशोधितः। तदानीमेव राज्यसर्वकारैरपि विद्यालयशिक्षकाणां वेतनक्रमः संशोधितः। साम्प्रतमपि एषां वेतनक्रमं संशोधयितुं प्रयासः क्रियते येन परिवर्तितपरिस्थितिषु शिक्षकः स्वजीवनं साफल्येन व्यतीतं कुर्यात्, शिक्षणव्यवसायं प्रति आकृष्टः स्याच्च।

(2) विद्यालय-शिक्षकाणां वेतनक्रमाणां कार्यान्वयनम् -

(1) उपर्युक्तवेतनक्रमाणां द्रुतगत्या क्रियान्वयनाय केन्द्रसर्वकारः राज्य-सर्वकारेभ्यः आर्थिकसाहाय्यं दद्यात्।

(2) निम्नतमप्राथमिकविद्यालयानामुच्चतमप्राथमिकविद्यालयानाञ्च प्रधानाध्यापकाः प्रशिक्षितस्नातकास्स्युः।

(3) ये शिक्षकाः प्रथमश्रेण्या द्वितीयश्रेण्या वा स्नातकाः (B.A, B.Sc.) अधिस्नातकाः (M.A., M.Sc.), शिक्षाचार्यः /शिक्षाधिस्नातकः उपाधिमन्तो वा वर्तन्ते तेषां वेतनवृद्धिः स्यात्।

(4) सर्वेषां खलु शिक्षकाणां वेतनक्रमः पञ्चवर्षेभ्यः परं वृद्धिं प्राप्नुयात्।

(5) सर्वकारस्य कर्मचारिभिः समं शिक्षकाणां कृतेऽपि महार्घवृत्तिः प्रदेय।

(3) पदोन्नतेः सम्भावनाः

(1) प्राथमिकविद्यालयेषु कार्यरताः योग्याः प्रशिक्षिताः वा शिक्षकाः 'प्रधानाचार्यपदस्य कृते' चितास्स्युः।

(2) माध्यमिकविद्यालयेषु कार्यरताः प्रशिक्षितस्नातकाध्यापकाः ये खलु शिक्षाक्षेत्रे विशिष्टं कार्यं कृतवन्तस्तेऽधिस्नातकयोग्यताधारिशिक्षकैः तुल्यं वेतनं प्राप्नुयुः। तेषां चयनं विश्वविद्यालयेषु महाविद्यालयेषु च स्यात्।

(3) विश्वविद्यालयानुदानायोगः माध्यमिकविद्यालयस्य प्रतिभाशालिनां शिक्षकाणाङ्कृतेऽनुसंधानप्रवृत्तिप्रोत्साहनार्थमनुदानं दद्यात्।

(4) ये शिक्षकाः शिक्षाक्षेत्रेऽसाधारणकार्यंकर्तुमुद्धतास्सन्ति तेषां वेतनवृद्धिः स्यात्।

(5) ये खलु व्याख्यातारः प्रवाचकाः वाऽसाधारणं कार्यं कृतवन्तः, ते पदाभावेऽपि अस्थायिरूपेण तादृशोच्चस्तरीयपदेषु संनियोजितास्स्युः।

(6) असाधारणप्रतिभावतां शिक्षकाणाङ्कृते विश्वविद्यालयानुदानायोगस्य परामर्शेण 1600-1800 रूप्यकैरपि वेतनक्रमेऽभिवृद्धिः स्यात्।

(4) सेवानिवृत्तेर्लाभः –

(1) समस्तस्तरीयशिक्षकाणां कृते सेवानिवृत्तेः समो लाभः स्यात्। राज्यसर्व-काराणां, स्थानीयाधिकारिणां व्यक्तिगतप्रबन्धकानाञ्चाधीने कार्यं कुर्वन्तः सर्वेऽपि शिक्षकाः भारतसर्वकारीयान्यकर्मचारिभिः तुल्यमेव निवृत्तेर्लाभं प्राप्नुयुः।

(2) सर्वेषां शिक्षकाणां कृते 'त्रिमुखिलाभयोजनायाः' (Triple Benefit Scheme) (यथा – प्रॉवीडेण्ट फण्ड – पेंशन–बीमा इति) व्यवस्था स्यात्। तेषाङ्कृते अधिकाधिकवृद्धिव्यवस्था भवेत्।

(3) सेवानिवृतेर्वयः षष्टिवर्षाणां स्यात्। विशिष्टपरिस्थितिषु पञ्चषष्टि वर्षाणि यावत् वर्धयितुं शक्यते।

(5) कार्याणि सेवावस्थाश्च

(1) शिक्षणसंस्थासु कार्यावस्था इत्थं परिमार्जितास्यात् यया शिक्षकाः उत्कृष्ट-कौशलानुगुणं कार्यं सम्पादयेयुः।

(2) प्रत्येकस्यां संस्थायां कुशलकार्यस्य कृते न्यूनतमसौविध्यानि स्युः।

(3) सर्वेषां शिक्षकाणां व्यावसायिकस्तरस्योन्नतयेऽत्युपयुक्तसौविध्यानि स्युः।

(4) शिक्षकाणां कार्यकरणस्य कालांशनिर्धारणकाले शिक्षणकार्यातिरिक्तं सर्वेऽपि विषयाः अवधेयास्स्युः।

(5) पञ्चवर्षेषु न्यूनातिन्यूनमेकवारं भारतप्रान्ते यत्र कुत्रापि भ्रमणस्य कृते वेतनानुसारं लौहपथगामिन्यां यात्राकर्तुं भाटकव्यवस्थाऽपि स्यात्।

(6) सर्वकारीयविद्यालयेषु कार्यकर्तर्णिां शिक्षकणाङ्कृते आचरणानुशासन-सम्बद्धनियमनिर्माणं स्यात्।

(7) वैयक्तिकविद्यालयेषु सर्वकारविद्यालयेष्वेव कार्यरतशिक्षकाणां वेतनादिकं समानमेव स्यात्।

(8) शिक्षकाणामावासस्य कृते एतादृशी व्यवस्था स्यात् –

(अ) ग्राम्यक्षेत्रेषु कार्यकर्तर्णिां शिक्षकाणाङ्कृते ग्रामेष्वेवावासव्यवस्था स्यात्, राज्यसर्वकारैश्च तेषाङ्कृते पृथक् अनुदानं स्यात्।

(ब) शिक्षकेभ्यः सहकारगृहनिर्माणयोजनानां प्रोत्साहनं दद्यात् सर्वकारः।

(स) गृहनिर्माणस्य कृते शिक्षकेभ्यः निम्नवृद्धौ ऋणव्यवस्था स्यात्।

(द) विश्वविद्यालयस्थ शिक्षकाणाङ्कृते न्यूनातिन्यूनं पञ्चाशत् प्रतिशतं

तत्सम्बद्धविद्यालयस्थेभ्यश्च विंशतिप्रतिशतमावासव्यवस्था भवेत्।

(य) महानगरेषु शिक्षकाणाङ्कृते आवासभाटकस्य वृत्तिदानस्य शुल्कदानस्य वा व्यवस्था स्यात्।

(9) वैयक्तिकरूपशिक्षणं नियन्त्रितं स्यात्।

(10) असामान्यछात्राणाङ्कृते विशिष्टकक्ष्यायोजनं स्यात्।

(11) विश्वविद्यालयस्तरशिक्षकाणाङ्कृतेऽनुसंधानाय प्रोत्साहनं दद्यात् सर्वकारः।

(12) निर्वाचने भागग्रहणस्य कृते शिक्षकाणामुपरि प्रतिबन्धो न भवेत्।

(13) जन-जातीयक्षेत्रेषु कार्यरतशिक्षकेभ्यः विशिष्टवेतनव्यवस्था, तेषां छात्राणां निश्शुल्कशिक्षणमावासव्यवस्था च स्यात्।

(14) जन-जातीयक्षेत्रेषु कार्यकरणाय विशिष्टप्रशिक्षणव्यवस्था भवेत्।

(15) अध्यापिकानां/शिक्षिकाणाङ्कृतेऽधोनिर्दिष्टसौविध्यानि स्युः -

(1) कक्ष्यायाः विविधस्तरेषु शिक्षिकाणां नियुक्तये प्रोत्साहनमंशकालिककार्यस्य कृते सौविध्यञ्च स्यात्।

(2) ग्रामीणक्षेत्रेष्वावासव्यवस्था भवेत्।

(3) केन्द्रीयसमाजकल्याणपरिषदा वयस्कस्त्रीणाङ्कृते संचालितस्य संक्षिप्त-पाठ्यक्रमस्य विस्तारो भवेत्।

(4) स्त्रीणाङ्कृते पत्रव्यवहारद्वारा शिक्षायाः अधिकाधिकव्यवस्था भवेत्।

(5) ग्रामीणक्षेत्रेषु कार्यकरणस्यावश्यकतायां सत्यां शिक्षिकाभ्यः विशिष्टं शुल्कं दद्यात्सर्वकारः।

(6) नागरिकाधिकाराः -

(1) शिक्षिकाणाङ्कृते स्वनागरिकाधिकाराणामुपयोगाय स्वातन्त्र्यं भवेत्। सार्वजनिकपदे कार्यकरणाय तासाङ्कृतेऽवकाशग्रहणस्य व्यवस्था भवेत्।

(2) शिक्षिकाः निर्वाचने भागग्रहणात् प्रतिबद्धा न स्युः।

राष्ट्रियशिक्षानीतिः (1986) शिक्षकश्च

शिक्षाक्षेत्रे शिक्षकाणां कार्यमत्यन्तं महत्त्वं भजते। शिक्षाक्षेत्रे संनिर्धारितनितीनां कार्यान्वयनं शिक्षका एव स्वव्यक्तित्वद्वारा शिक्षणप्रक्रियामाध्यमेन च कर्तुं शक्ताः भवन्ति। अध्यापकानां चयनं प्रशिक्षणयोग्यताः च शिक्षणकार्ये निष्पादने प्रभावं स्थापयन्ति। इत्थं राष्ट्रियशिक्षानीतौ शिक्षकाणां चयनपद्धतौ परिवर्तनाय महद्बलं

प्रदत्तम्। तेषां चयनं तद्योग्यानुगुणं व्यक्तिनिरपेक्षत्वेनतद्कार्यापेक्षानुगुणं च वर्तते। शिक्षकाणाां पारिश्रमिक सेवादशाश्च तत्सामाजिकव्यावसिकदायित्वानुगुणञ्चेवं विधाः स्युः येन प्रतिभावन्तोऽपि जनाः शिक्षणव्यवसायं प्रत्याकृष्टास्स्युः। किञ्च शिक्षकाणामुत्तरदायित्वस्य मानदण्डं संनिर्धार्य सुकार्यकर्त्तॄणां प्रोत्साहनं दास्यते, न्यूनानाङ्कृते प्रोत्साहनं न दास्यते।

शिक्षकाणामुत्तरदायित्वमत्यन्तं महत्त्वं भजते यतो हि त एव विद्यालयेषुएतादृशं सुष्ठु वातावरणं निर्मातुं शक्नुयुः येन प्रतिभाप्रस्फुटनं भवेत् छात्राः विद्यालयं प्रत्याकृष्टाः स्युः, तेऽसाधाराणछात्राणां शिक्षणे जायमानं काठिन्यं न्यूनताञ्चाभिज्ञायोपयुक्तस्तरस्य कृते ''उपचारात्मकशिक्षणव्यवस्थां सम्पादयेयुः, शिक्षणस्तरे नैरन्तर्येणोन्नतये मूल्याङ्कनं स्यात्।''

किञ्च शिक्षकगरिम्णः विकासाय 'समुचिताचारसंहिता' निर्वाचिता स्यात्। स्थानान्तरणे वैयक्तिनिरपेक्षतायै उपयुक्तनिर्देशकसिद्धान्तानां निर्माणं स्यात्।

राष्ट्रियशिक्षानीतौ शिक्षकस्य महत्त्वमेवमङ्गीकृतं यत् कस्यापि समाजस्य सांस्कृतिकस्थितेर्ज्ञानं शिक्षकाणां स्तरेणैव भवितुमर्हति। उच्यतेऽपि –

'किमपि राष्ट्रं स्वशिक्षकाणां स्तरादुपरि गन्तुं न शक्नोति। अतः राष्ट्रस्य विकासाय समुन्नतये च शिक्षकाणां भूमिका महत्त्वं भजते।'[1] अत एव राष्ट्रियशिक्षा–नीतौ तेषां स्तरे अभिवृद्धिं सम्पादयितुं बलं प्रदत्तम्, कानिचन दायित्वान्यपि संनिर्धारितानि। शिक्षकाः रचनात्मककार्ये सर्जनात्मककार्येषु च प्रेरणां प्रोत्साहनञ्च प्राप्नुयुः, तदर्थं शिक्षानीतौ एतादृशपरिस्थितिनिर्माणे बलं प्रदत्तम्। किञ्च शिक्षकाः समुदायस्यावश्यकतानुगुणं सम्प्रेषणे, विविधकार्य सम्पादने च उत्तमोपायान्, विधीञ्च प्रयुञ्जीरन् तदर्थं स्वातन्त्र्यं स्यात्।

आचार्य राममूर्तिसमित्या (1990) स्पष्टीकृतं यत् साम्प्रतं प्रशिक्षणमहाविद्यालयेषु प्रशिक्षणकार्यक्रमः क्षमताऽधारितः स्यात्, अयञ्च भाविशिक्षकेषु निम्नगुणान् अभिवर्धयेत् –

(1) शिक्षके सञ्ज्ञानात्मक–भावात्मक–मनःचालितपक्षेषु शिक्षाप्रदानस्य क्षमतोत्पादनम्।

(2) सर्जनात्मककार्याणां नवाचाराणाञ्च कृतेऽभिवृत्तेर्निष्पादनम्।

1. "The status of the teacher reflects the socio-cultural ethos of a society, it is said that no people can rise above the level of its teachers."

—National Policy on Education, 1986.

(3) समग्रशैक्षिकप्रक्रियायाः व्यावसायीकरणे तत्परत्वम्।

(4) विशिष्टक्षेत्रेषु योग्यतासम्पादनम्।

(5) विकेन्द्रीकृतप्रशासनिकव्यवस्थायां स्वभूमिकायामधिगमस्य प्रवृत्तिः।

पुनरावृत्तिप्रश्नाः

(1) "शिक्षकः राष्ट्रस्य भाग्यनिर्णायकोऽस्ति" इति कथनं सयुक्तिकं विवेचयत?

(2) शिक्षा-पद्धतौ शिक्षकस्य कः कार्यभागः? सोदाहरणं स्पष्टयत।

(3) शिक्षके के-के वैयक्तिकाः व्यावसायिकाश्च गुणा अपेक्षन्ते किमर्थञ्च? भवतां मतं स्पष्टयत।

(4) अद्यतनीय शिक्षकः उद्विग्नः निराशावादी व्यग्रः च वर्तते' कथनस्य अस्य विवेचनां कृत्वा स्पष्टयत यत् शिक्षकाः कथमस्य कृते उत्तरदायिनः सन्ति?

(5) शिक्षकाणां स्तरस्योन्नतये माध्यमिकशिक्षाऽऽयोगेन के-के परामर्शाः दत्ताः?

(6) शिक्षाऽऽयोगप्रस्तावितवेतनपरकपरामर्शाः 'शिक्षकाणां महाधिकारपत्रम्' इति कथ्यन्ते। अत्र भवतां सम्मतिरस्ति न वा?

(7) शिक्षकाणां कार्याणां सेवादशानाञ्च सम्बन्धे शिक्षाऽऽयोगेन के-के परामर्शाः प्रदत्ताः? स्पष्टयत।

(8) शिक्षकाणां सामाजिकस्थितेरुन्नतये शिक्षाऽऽयोगप्रदत्तपरामर्शान् समालोचयत?

(9) राष्ट्रियशिक्षानीति-(1986) द्वारा शिक्षकमहत्त्वं कैः-कैः दृष्टिकोणैः समाजेऽङ्गीकृतम्? विवेचयत।

(10) शिक्षकाणां सम्मानं प्रतिष्ठाञ्चाभिवर्धयितुं राष्ट्रियशिक्षानीतौ केषां-केषां विषयणामुपरि बलं प्रदत्तम्?

(11) राष्ट्रियशिक्षानीतौ शिक्षकस्योत्तरदायित्वस्योपरि किमर्थं बलं प्रदत्तम्? विवेचयत।

लेखार्थप्रश्नः

"शिक्षकः सा धुरी वर्तते यां परितः समग्रशिक्षाप्रणाली परिभ्रमति' कथनमेतत् सत्यमस्ति न वेति युक्तियुक्तं प्रतिपादयत?

4

छात्राणां वर्गीकरणम् उन्नतिश्च

(Classification & Promotion of Students)

"The grouping and sorting of pupils in a school and the size of the groups are necessary consideration because schools must educate their pupils in groups and because such groups must be organized in a way that will eliminate as far as possible extreme variations in the pupils."

—Raevis and Others.

छात्रा एव विद्यालयस्य वास्तविकाधिभोक्तारो भवन्ति। तानेवाधारीकृत्य विद्यालयस्य शैक्षिकप्रयासानाञ्च सङ्घटनं विधीयते, वस्तुतः कस्यापि विद्यालयस्य संस्थापनं बालकानां सर्वाङ्गिकविकासायैव क्रियते, किञ्च पाठ्यक्रमनिर्धारणं, विद्यालयपरिसरस्य संस्थापनं, योग्यशिक्षकाणां प्रधानाध्यापकस्य च नियुक्तिः, सहायकनिर्देशनसेवाः, शारीरकशिक्षाकार्यक्रमश्चेत्येतत् सर्वं छात्रानभिलक्ष्यैव क्रियते। त एव विद्यालयप्रशासनस्य सङ्घटनस्य च धुराः भवन्ति।

छात्राणां प्रवेश : –

विद्यालयशिक्षायां प्रवेशसमस्या वस्तुतः प्रथमकक्ष्यायां, षष्ठीकक्ष्यायां, नवम्यां वा भवति। माध्यमिकस्तरीयविद्यालयेषु प्रायः षष्ठीकक्ष्यायां, नवम्यां कक्ष्यायां वा प्रवेशो वाञ्छति, अतः छात्राणां प्रवेशस्य कृते कुत्रचिद् विद्यालयेषु शिक्षाविभागेन प्रवेश–परीक्षा समायोज्यते कुत्रचिद च प्रधानाध्यापकैः परीक्षा–व्यवस्था क्रियते, कुत्रचिच्च पूर्वकक्ष्यायां प्राप्ताङ्कानां माध्यमेन प्रवेशो भवति। इतरकक्ष्यासु प्रवेशः पूर्वपरीक्षाप्रमाणपत्रेण भवति।

छात्राणां वर्गीकरणम् –

साम्प्रतिकयुगं शिक्षाक्षेत्रे मनोवैज्ञानिकयुगं वर्ततेऽतः छात्राणां वर्गीकरणं नितान्तमावश्यकं यतो हि छात्राः रुचियोग्यताक्षमताधारैश्च भिन्ना भवन्ति। लघुविद्यालयेषु वर्गीकरणसमस्या नोत्पद्यते परं यत्र विद्यालयेषु बहवः छात्राः पठन्ति तत्र शिक्षकैः प्रधानाचार्येण च वर्गीकरणे महत्काठिन्यमनुभूयते। वर्गीकरणाभावे विद्यालयस्य शैक्षिकोद्देश्यानां सम्पूर्त्तिर्नभवितुमर्हति। अत एवोक्तं **ब्रेमहोदयैः** – ''विद्यालय–

सङ्घटनस्य महत्केन्द्रमाधारो वा समुचितवर्गीकरणमेव वर्तते।''[1] छात्राणां वैयक्तिकवैभिन्न्येऽवधानं न दीयते चेत् व्यक्तेः समाजस्य च प्रगतिः न भवितुमर्हति। **रीडरमहोदयेनाप्युक्तम्** – ''साम्प्रतं विद्यालयेषु परम्परागतपद्धतीः वर्जयित्वा बालकानां रुचियोग्यतानुगुणञ्चावश्यकतासम्पूर्त्तिः क्रियते।''[2] इति।

शैक्षिककार्यक्रमं प्रभावोत्पादकरीत्या सञ्चालयितुं वर्गीकरणावश्यकतां स्पष्टयितुं संक्षेपतोऽधोनिर्दिष्टविषयाः प्रस्तूयन्ते –

1. भिन्न-भिन्नयोग्यतारुचिक्षमतावश्यकतावताञ्च छात्राणां संख्यास्वधिकाधिक-वृद्धिः।

2. पाठ्यक्रमस्य वैभिन्न्यं विस्तारश्च।

3. बालकानां सामाजिकार्थिकसांस्कृतिकपारम्परिकपर्यावरणे च वैभिन्न्यम्।

4. शिक्षणकार्ये नूतनविधीनां रीतीनाञ्च प्रयोगः।

वर्गीकरणस्य सामान्यसिद्धान्ताः –

(1) वर्गीकरणकाले बालकस्य योग्यतारुच्यावश्यकतादीनां पूर्णं ज्ञानं प्राप्तव्यं यदेको बालकः अपरेभ्यः एषु क्षेत्रेषु भिन्नो भवतीति।,

(2) वर्गीकरणात्पूर्वं बालकस्य व्यक्तित्वविश्लेषणं कर्त्तव्यं यतो हि प्रत्येकस्मिन् बालके शारीरकमानसिकसंवेगात्मकदृष्टिषु च वैभिन्न्यं भवति। तस्य व्यक्तित्व-सम्बद्धप्रमुखतथ्यानि लेखनीयानि।

बालकानां वर्गीकरणकाले तेषामभिभावकानां सहयोगं प्राप्य व्यसन-सामान्यव्यवहारस्वभावादीनाञ्च विषये ज्ञातव्यम्।

(3) मानवविकासे वंशपरम्परायाः वातावरणस्य च महान् प्रभावो भवति, इति मनोवैज्ञानिकानुसंधानैः प्रमाणितम् – अतः वंशपारम्पर्यं वातावरणञ्च यथाशक्ति ज्ञातव्यम्।

(4) वर्गीकरणं नमनीयं स्यात् यतो हि मन्दबुद्धिमन्तोऽपि छात्राः प्रतिभावतां संसर्गेण परिश्रमं विधाय सामान्यछात्रश्रेणौ समागन्तुं शक्नुवन्ति।

---

1. "The nucleus of school organization is sound classification." **— Bray**

2. "In fact, no recent movement in education has been more important than the attempt to break up the traditional lock step in the school and to meet the interests, abilities and the needs of the individual pupils."-

   - Reader, Ward G. : The Fundamentals of Public School Administration, P. 474

वर्गीकरणस्याधारः –

बालकानां वर्गीकरणे सामान्यतो निम्नधाराः प्रयोक्तव्याः –

(1) कालानुगुणं वयः – वर्गीकरणे सर्वेभ्यः सरलोऽयमाधारः अस्यानुसारं समवयसो बालकाः एकस्मिन् वर्गे स्थाप्यन्ते। अत्र समवयसामपि बालकानां बुद्धि-योग्यतारुचयश्च समानाः न भवन्ति, अतो वर्गीकरणमेतद् मनोविज्ञानानुगुणं नास्ति। इति महान् दोषः।

(2) मानसिकवयः (Mental age) – अत्र बालका बुद्धिलब्धिद्वारा विभज्यन्ते, मानसिकवयसः निर्धारणं बुद्धिपरीक्षणामाधारेण भवति। मानसिक-वयसः आधारेण तेषां बुद्धिलब्धिः (Intellgent quotient) प्राप्यते, बुद्धिलब्ध्या बालकाः विभिन्नवर्गेषु संविभक्ताः क्रियन्ते। परमेताः परीक्षाः बालकस्य स्वभावस्य पूर्णज्ञानस्याधारा न भवन्ति, यतो हि सममानसिकवयसोऽपि रुच्यभिरुचिभिश्च एकसदृशाः न भवन्ति।

(3) शिक्षालयविषयाणां ज्ञानप्राप्तिः – वर्गीकरणस्येकोऽन्याधारः शिक्षालयविषयाणां ज्ञानप्राप्तिरपि वर्तते। एतद् वर्गीकरणस्योन्नतेश्च परम्परागतप्रारूपं वर्तते। अत्र विद्यालयानां मुख्यविषयाणां योग्यताः समधिकत्वेन द्रष्टव्या भवन्ति।

एच. बी. एल्बर्टी महोदयानुसारं – ''अनेन वर्गीकरणेन बालकेषु सामाजिक-मूल्यानां भावः उत्पादयितुं न शक्यते। यतोह्यत्र योग्यताधारेण मूलभूतकौशलेषु ज्ञानप्राप्तौ च सदृशं स्तरं प्राप्तुमेव प्रयासो विधीयते।''[1]

(4) रुचिः – वर्गीकरणं रुचिमाधारीकृत्यापि भवति। अत्र समरुचिमन्तो बालकाः एकस्मिन् वर्गे स्थाप्यन्ते, एतादृशवर्गीकरणेनाध्यापनकार्ये शिक्षकाणाङ्कृते सौविध्यं भवति।

(5) सामाजिकवयः – अत्र बालकाः सामाजिकपरिपक्वताऽऽधारेण वर्गीकृताः भवन्ति। विभिन्नदेशेषु वर्गीकरणस्याधारा अपि भिन्नैव सन्ति। फ्रांसदेशे छात्राणां वर्गीकरणायेकोऽत्यन्तरोचकप्रयोगो भवति सः – Biotypological Examination Plan इत्याख्येन प्रसिद्धो वर्तते। अनेन बालकानां शारीरक-मानसिक-संवेगात्मक-नैतिकपक्षाणाञ्च विषये पूर्णज्ञानं प्राप्यते, इदमेव ज्ञानं वर्गीकरणस्य आधारो भवति। कुत्रचिद् देशेषु वर्गीकरणस्य कृते एकतोऽधिकाः प्रणाल्यः प्रयुज्यन्ते। परं भारते समधिकत्वेन विद्यालयविषयाणां ज्ञानप्राप्तिरेव वर्गीकरणस्याधारो भवति। ज्ञानप्राप्तिश्च

1. H. B. Alberty

निबन्धात्मकपरीक्षामाध्यमेन क्रियते। इदानीमस्मिन् क्षेत्रे नूतन– प्रकाराणामनुसंधानानां प्रयोगोऽपि सामान्यतया न क्रियते –

(1) योग्यतानुसारं वर्गीकरणम् (Ability Grouping)

(2) सरूपवर्गीकरणम् (Homogeneous Grouping)

(3) विजातीयवर्गीकरणम् (Heterogeneous Grouping)

(1) योग्यतानुसारं वर्गीकरणम् –

विंशतिशताब्द्याः आदौ सामूहिकबुद्धिपरीक्षणानां विकासात्परं शैक्षिकनेतारः छात्राणां वर्गीकरणस्य कृते योग्यतामेव स्वीचक्रुः। बालकानां योग्यताज्ञानाय ते बुद्धि-परीक्षणानि कृतवन्तः ततश्च निर्देशात्मकसमूहाणां वैषम्यं वैभिन्न्यञ्चापाकर्तुं प्रयासं कृतवन्तः।

(2) सरूपवर्गीकरणम् –

अत्र योग्यतां व्यतिरिच्य समरुचयः सामाजिकपरिक्वताश्च अवधेयाः भवन्ति। संयुक्तराज्यअमरीकादेशे 'माध्यमिकशिक्षायाः राष्ट्रियपर्यवेक्षणानुसारं सरूपवर्गीकरणाय विद्यालयेषु षोडशप्रकारकाधाराणां प्रयोगः कृतः। परं कोऽपि विद्यालयः एकमेवाधारीकृत्य वर्गीकरणे समर्थो नाभवत्। अर्थात् वर्गीकरणस्य कृते ते विद्यालयाः एकतोऽधिकाधारान् प्रयुक्तवन्तः, एष्वाधारेषु मुख्यतः मानसिकवयः, मानसिकपरीक्षाद्वारा प्राप्ता बुद्धिलब्धिः, समस्तविषयाणां मध्यमानं, निष्पत्तिलब्धिः (Achievement quotient) शारीरकपरिपक्वता, बालकानां योग्यताः, बुद्धिविषये शिक्षकाणामनुमानञ्चेत्यादयः परीक्षाः भवन्ति।

(3) विजातीयवर्गीकरणम् – आधुनिकयुगे शिक्षायाः धारणा व्यापकत्वं गता। अतः सदृशं वर्गीकरणं सर्वोच्चं नास्तीति केचन मन्यन्ते। सदृशवर्गीकरणे प्रखरसामान्यमन्दबुद्धिमन्तः सर्वेऽपि बालकाः स्युरिति मन्यन्ते केचन। ते कथयन्ति यत् आधुनिकविद्यालयीयकार्यक्रमेषु केवलं परम्परागतविषयाणामध्ययनमेव संयुक्तं नास्त्यपितु तान्यपि क्षेत्राण्यन्तर्भवन्ति यैः बालकाः विभिन्नकौशलेषु सौन्दर्यानुभूतौ च परिपक्वतां नयन्ति। किञ्च सौन्दर्यात्मककार्येषु, नाटकेषु, सङ्घटनात्मकक्रियासु हस्तकलादिषु च बुद्धेरेव महत्स्थानं न वर्तते। अपि च केषुचन क्षेत्रेषु प्रतिभावन्तोऽपि बालकाः सामान्येभ्यः मन्दबुद्धिबालकेभ्यश्चाधिगच्छन्ति वा। अतः एकस्मिन् समूहे विविधस्तरीयबालकानां निवासः फलदायकः एव वर्तते।

वैयक्तिकं सामूहिकञ्च शिक्षणम् -

ये बालकाः विद्यालयं शिक्षणार्थं समागच्छन्ति तेषु योग्यतायां, बुद्धौ, रुचौ, अधिगमशक्तौ च वैभिन्न्यं दरीदृश्यते। शिक्षकाः वैभिन्न्यमभिलक्ष्य स्वावधानं न दास्यन्ति चेत् छात्राणां शिक्षकाणां च समयहानिरेव भविष्यति। यतो हि निश्चप्रचं वक्तुं शक्यते यत् समावस्थापन्नौ अपि द्वौ छात्रौ सर्वेषु विषयेषु समानौ न भवतः। सरूपवर्गीकरणेनास्माकं तात्पर्यं समयोग्यतावतामेकत्र संस्थापनं नास्त्यपितु येषामधिगमसामर्थ्ये कस्मिन्नपि विषये क्रियायां वा प्रायः समानं वर्तते त एव एकत्र संस्थापनीयाः इति वर्तते। अर्थात् शिक्षणकार्ये अधिगमकार्यक्रमे च शिक्षकाणां–बालकानाञ्च कृतेऽधिकाधिकमुपयोगित्वं सम्पादयितुं यथासम्भवं समानं वर्गीकरणं कर्त्तव्यम्।

प्राचीनकाले विद्यालयेषु वैयक्तिकशिक्षणं भवति स्म। छात्राः शिक्षणसामर्थ्या–धारेणैव वर्गीकृताः भवन्ति स्म। बालकः स्वाध्ययनं करोति स्म, किञ्च ते व्यक्तिगतकार्यमपि कर्तुं तत्पराः आसन्, इयं परम्परा अष्टादश शताब्दी पर्यन्तमासीत्। परमिदानीं सामूहिकशिक्षणस्य कक्ष्याशिक्षणस्य वा प्रचलनं जातम्। इत्थं उभयोरपि विध्योः समालोचकाः दरीदृश्यन्ते, अतः प्रश्नो भवति यत् कोऽयं विधिरनुसरणीयः ? अत्र समाधातुम् उभयोरपि गुणाः विविच्यन्ते -

क्लैप–चेज–मैरीमैनमहोदया उपर्युक्तगुणान् एवमुक्तवन्तः -

वैयक्तिकशिक्षणस्य गुणाः -

(1) अत्र मन्दबुद्धिबालकस्य कृतेऽपि स्वगत्या शिक्षणस्यावसरः प्रदीयते। इत्थं सः विषयवस्तु सम्यक्तया ज्ञातुं प्रभवति।

(2) शिक्षणमेतद् बालके स्वप्रगतेरनुमानज्ञाने सामर्थ्यमुत्पादयति।

(3) अत्र कक्ष्याकार्ये सामान्यापेक्षया वैयक्तिकशिक्षणं प्रत्यवधानं दीयते।

(4) शिक्षणमेतद् मेधावी छात्रस्य प्रगतये, स्वरुच्यनुकूलञ्च अतिरिक्तशक्तेः प्रयोगायावसरं ददाति।

(5) शिक्षका अपि वैयक्तिकरूपेण प्रतिबालकं रुचिं शिक्षणसामर्थ्यञ्च ज्ञातुं समर्थाः भवन्ति।

(6) ''बालकस्य मस्तिष्कं कथं कार्यं करोतीति शिक्षकेण ज्ञायतेऽत्र। इत्थं सः बालकानां समस्यासमाधानाय समुचितरीतीनां प्रयोगं कर्तुं शक्नोति।

सामूहिकशिक्षणस्य गुणाः –

(1) शिक्षणमेतद् सामाजिकपक्षाणाङ्कृते उत्तमोत्तमां व्यवस्थां सम्पादयति यतो ह्यत्र सामाजिकराजनैतिकसहभागितायै चावसराः प्रदीयन्ते।

(2) इदं प्रेरणां प्रदातुं साहाय्यमाचरति यतोह्यत्रपरेषां सहमतिज्ञानायेच्छा उत्पद्यते।

(3) इदं मितव्ययि वर्तते, अत्र मुहुर्मुहुः स्पष्टीकरणस्यावश्यकता नानुभूयते।

(4) अत्र मन्दबुद्धि–बालकाः प्रतिभापन्नैः बालकैः किमपि ज्ञातुं प्रभवन्त्येव।

(5) शिक्षणमिदं तीव्रगत्याऽधिगमशीलछात्राणाङ्कृतेऽत्यन्तोपयोगि यतो हि ते स्वविषयवस्तु सम्यक्तया साक्षात्कर्तुं सामर्थ्यवन्तः भवन्ति। यथा मन्दबुद्धिबालकानाङ्कृते विषयवस्तुनः अभिज्ञानाय मुहुर्मुहुः स्पष्टीकरणं व्याख्या वा क्रियते तदा प्रतिभावन्तः तं विषयं सम्यक्तयाऽधिगच्छन्ति।

इदानीमुभयोः गुणव्याख्यानात्परं वक्तुं शक्यते यत् यत्र उभयोः सन्तौल्यं वर्तते स विधिः अत्युत्तमः। अत्र प्रश्नो भवति यत् कक्ष्यायाः आकारः कियान् स्यात्? इति विषये बहवो मताः संस्तुतास्सन्ति। यथा कक्ष्यायाः आकृतिनिर्धारणे निर्देशस्तरः (Stage of instruction) प्रारम्भिकस्तरः, माध्यमिकस्तरः, विषयः विद्यार्थीनां संख्या कक्ष्याकक्षस्याकृतिः शिक्षकस्य प्रशासकीयशैक्षिकयोग्यताश्चावधेयाः भवन्ति। इत्थं केचन शिक्षाशास्त्रिणः कक्ष्यायां त्रिंशत् छात्रान् स्थापयितुं प्रभवन्ति। केचन च पञ्चविंशतिं छात्रान् इति। भारतस्य बहुषु प्रान्तेषु शिक्षासंहिताभिः उच्चस्तरीय–विद्यालयशिक्षायां शिक्षणस्य कृते चत्वारिंशत् छात्राः निर्धार्यन्ते। यदि कक्ष्यायां छात्राः समधिकाः न चेत् सामूहिकवैयक्तिकशिक्षणयोर्लाभः अवाप्तुं शक्यते। यतो हि अल्पीयांसः छात्राः चेत् शिक्षकः वैयक्तिकरूपेण बालकानामुपरि अवधानं दातुं समर्थो भवति।

उन्नतेः सिद्धान्ताः

प्रायः प्रशासकैरुन्नतेर्नीतिरपेक्ष्यते। उन्नतये ते आवश्यकतानुगुणं कालानुगुणञ्च कतिपयनियमान् निर्धारयन्ति। परमेतदुपयुक्तं नास्ति, यतो हि अनेन बहव्यः समस्याः प्रादुर्भवन्ति। उन्नतेः केचन सिद्धान्ताः अधोनिर्दिष्टास्सन्ति तानधारीकृत्य उन्नतिः करणीया यथा –

(1) उन्नतेर्निर्धारणं वैयक्तिकछात्राणामाधारेण स्यात्।

(2) उन्नतेराधारः बहुमुखिशैक्षिकोपलब्धिः, सामाजिक–शारीरक–

नैतिकविकासादिकञ्च स्यात्। अस्मिन् शिक्षणस्य निरीक्षणस्य, बाह्यपरीक्षण-स्यान्तरिकपरीक्षणस्याभिरुचिपरीक्षणादीनाञ्च निर्णयाः आधारत्वेन स्वीकरणीयाः भवन्ति।

(3) उन्नतिप्रदानकरणस्य कार्यमेकः सहयोगिप्रयासो वर्तते। अत्र छात्राः अपि सहभागित्वं प्राप्नुयुः।

(4) अत्र नमनीयतया सहोन्नतेः प्रक्रियाणामपि सततविश्लेषणं कर्त्तव्यं भवति।

उन्नतेर्भेदाः –

साम्प्रतिकेऽस्मिन् युगे उन्नतिप्रदानसम्बन्धे बह्व्यः प्रणालयः प्रचलन्ति। तासां संक्षिप्तविवेचनमत्र द्रष्टव्यम् –

(1) वार्षिकोन्नतिः –

अस्माकं राष्ट्रियविद्यालयेषु सामान्यतः वार्षिकपरीक्षाधारेण बालकानामेक-कक्ष्यातः अपरस्यां कक्ष्यायामुन्नतिर्विधीयते। यद्यपि व्यवस्थेयं सरला मितव्ययी च वर्तते परमाधुनिकशैक्षिकधारणया सह संयुक्ता नास्ति। एतदनुसारं वर्षं यावत् पाठ्यक्रमो निर्धार्यते बालकश्च तमधीते। वर्षान्ते परीक्षा समायोज्यते, यदि बालकपरीक्षायां निर्धारिताङ्कान् प्राप्नोति चेत् अपरस्याम् उच्चस्तरीयायां वा कक्ष्यायामुन्नतिं प्राप्नोति। नो चेत् तस्यामेव कक्ष्यायां पुनरधीते। अत्र सर्वप्रथमो दोष एवं द्रष्टुं शक्यते यत् बालकः अनुत्तीर्णत्वं प्राप्य संवेगात्मकविक्षिप्ततामधिगच्छति। एतदतिरिक्तं पितरावपि आर्थिकव्ययेन दुःखितौ भवतः धनस्याप्यपव्ययो भवति।

(2) अर्द्धवार्षिकोन्नतिः –

वार्षिकोन्नतेः दोषान् अपाकर्तुं मेधाविनां स्वगत्यनुकूलमग्रेसर्तुं प्रणालीयं व्यवस्थिता अभवत्। योजनेयम् अमरीकाराष्ट्रस्य बहुषु प्रान्तेषु सञ्चाल्यते। एतदनुसारं पाठ्यक्रमः भागद्वये विभज्यते। प्रथमे समग्रपाठ्यक्रमस्यार्धभागः द्वितीये चोच्चश्रेणियुक्तः पाठ्यक्रमो भवति। यदा बालकः प्रथमभागं सम्पूरयति निर्धारितस्तरं यावद् शिक्षते तदा सः द्वितीये पाठ्यक्रमे प्रविष्टो भवति।

(3) त्रैमासिकोन्नति :-

योजनेयं अमरीकादेशे **हैरिस महोदयेन सेण्ट लुई** इत्याख्ये स्थाने प्रारब्धाऽभवत्। अत्र विद्यालयसत्रं भागचतुष्टये विभज्यते। अत्र कस्मिन्नपि भागे सन्तोषयुक्तकार्यकरणात्परमुन्नतिर्दीयते। कश्चन बालकः कस्मिन्नपि भागे सकुशलं कार्यं न सम्पादयति चेत् पुनः तमेव पाठ्यक्रममधीते। अत्र समग्रसत्रीयपाठ्यक्रमस्य

पुनरावृत्तिर्न विधीयते।

(4) वार्षिकसत्रीयमिश्रितोन्नतियोजना च –

अत्र साधारणानां प्रतिभावताञ्च छात्राणाङ्कृते उन्नतिप्रदानायावसरो दीयते। यदि कश्चन छात्रः निर्धारितपाठ्यक्रमं निश्चितावधेः प्राक् एव सम्पूरयति तर्हि सः अग्रिमकक्ष्यायामुन्नतेरर्हतां प्राप्नोति। अत्र पाठ्यक्रमः 2:1, 5:1 इत्यनुपातद्वये विभज्यते।

(5) विषयद्वारा उन्नति :-

अस्यां योजनायां कक्ष्यां विस्मृत्य विषयानुगुणमुन्नतिः प्रदीयते। यथा कश्चन इतिहासे प्रतिभावान् वर्तते यदि सः विषयेऽस्मिन् निर्धारितं पाठ्यक्रमं सम्पूरयति तर्हि अपरस्यां कक्ष्यायामुन्नतिं प्राप्तुं शक्नोति। इत्थं सः इतरविषयाणामध्ययनं पूर्व कक्ष्यास्थैः छात्रैस्साकं करिष्यति। इतिहासविषयाध्ययनञ्चाग्रिमकक्ष्यास्थछात्रैस्सह करिष्यति। अतः इमां योजनामनुसृत्य बालकः गणितविषयम् अष्टम्याम् इतिहासे सप्तम्याम् इतरविषयेषु च षष्ठीकक्ष्यायां भागं गृहीत्वाऽधीते। योजनेन तदैव सञ्चालयितुं शक्यते यदा सर्वासु कक्ष्यासु एकस्मिन् समयचक्रे एकस्य विषयस्य शिक्षणं स्यात्।

उन्नतिविषये बहुषु विद्यालयेषु एका अन्याऽपि प्रथा प्रचलति सा प्रथा ''परीक्षणोन्नतिः'' इत्याख्येन प्रसिद्धा वर्तते। अस्यानुसारं तेऽपि छात्राः अपरस्यां कक्ष्यायामुन्नतिमधिगन्तुं शक्नुवन्ति ये एकाधिकविषयेषु कतिपयैर्वाङ्कैः असाफल्यं प्राप्तवन्तः। परमत्रावधेयं यत् यदि बालकः निश्चितकालावधौ तत्तद् विषयन्यूनतामपाकरोति तदैवाग्रेसर्तुं शक्यते नान्यथा। तेषां प्रगतेर्दायित्वं न केवलं बालकेष्वेवापितु शिक्षकेषु अपि भवति। यतो हि शिक्षकाणां मार्गदर्शनेनैव ते तान् विषयान् अधिगन्तुं शक्नुवन्ति।

उन्नतिप्रदानकरणस्यैतासां योजनानामध्ययनात्परं ज्ञायते यत् विद्यालये आसु सर्वास्वपि योजनासु काऽपि ग्रहीतुं शक्यते। परमत्र बालकानां योग्यताः, शिक्षालयविषयाणामुपलब्धयः, स्वास्थ्यं, नैतिकाचरणमित्येतत्सर्वमपि द्रष्टव्यं भवति। एतदतिरिक्तम् उन्नतिप्रदानकाले तेषां सत्रीयप्रगतिरपि द्रष्टव्या भवति। किञ्च निश्चिता निष्पक्षा च नीतिः स्यात्।

पुनरावृत्तिप्रश्नाः

1. छात्राणां वर्गीकरणस्य कः अभिप्रायः ? अस्यावश्यकतां सोदाहरणं स्पष्टयतु।
2. भवन्तः छात्राणां वर्गीकरणकाले कान् कान् सिद्धान्तान् प्रति ध्यानं दास्यन्ति ?

3. वर्गीकरणस्य के के आधारास्सन्ति ? भवन्मते छात्राणां वर्गीकरणाय सर्वाधिकोपयुक्तः आधारः कः ? किमर्थञ्च ?

4. अस्माकं देशे विद्यालयेषु वर्गीकरणाय कः आधारः स्वीक्रियते ?

5. वैयक्तिकसामूहिकशिक्षणयोश्च गुणानां दोषाणाञ्च विवेचनां कुर्वन्तु।

6. भारते वैयक्तिकसामूहिकशिक्षणप्रणाल्योश्च प्रायः कस्याः प्रणाल्याः प्रयोगो भवति ? किमर्थञ्च ?

7. विभिन्नदेशेषु एककक्ष्यातः अपरकक्ष्यायाः कृते उन्नतिप्रदानाय के के प्रविधयः प्रचलितास्सन्ति ?

8. अस्माकं देशे उन्नतिप्रदानाय कं प्रविधिमनुसरन्ति ? तत्र के दोषास्सन्ति ?

9. भवन्मते भारतस्य शैक्षिकसंस्थाभिः उन्नतिप्रदानस्य कृते कः प्रविधिः अनुस्रियते ? किमर्थञ्च ?

10. विषयाणामाधारेण उन्नतिः अस्य सम्प्रत्ययस्य कोऽर्थः ? व्यवहारे अस्याः प्रयोगे कानि कानि काठिन्यानि आगच्छन्ति ?

लेखार्थप्रश्नाः

उच्चमाध्यमिकस्तरे अनुत्तीर्णछात्राणां संख्यान्यूनीकरणाय विद्यालये कक्ष्योन्नतये के के विधयः प्रयोक्तव्याः सकारणमुत्तरं ददतु ?

5

विद्यालय-भवनम्

(The School Building)

"The School plant is one of the major concerns and opportunities of the school administrator. It is of great importance because of the impact of the plant on the educational processes and programme."

– Reller & Others.

विद्यालय-भवनमितीदं पदं व्यापकमस्ति। शिक्षाशास्त्रिणो वदन्ति यत् विद्यालयभवनमित्युक्ते तस्य स्थिति-क्रीडाङ्गण-उपकरण-यन्त्र-छात्रावासादीनां तत्सम्बन्धिवस्तु-स्थानानां च बोधो भवति। यावद् विद्यालयस्योपयुक्तरीत्या स्थितिचयनं न भवति तावद् तस्य सुनियोजितभवनेनापि न कोऽपि लाभो भवति। विद्यालयस्य स्थितेः प्रभावः शैक्षिकव्यवस्थायां छात्राणां सर्वतोमुखविकासे च पतति। विद्यालयाय समुचिता भूमिः, शुद्धौ जलवायू, प्रकाशश्चेति सर्वं नितरामपेक्षते।

विद्यालयस्य साधुस्थित्या सह भवननिर्माणमपि साधुरीत्या भवेत् चेत् शैक्षिकं वातावरणमधिकं साधु भवेत्। अधुना शैक्षिकावश्यकताः प्राचीनकालाद् भिन्नाः सन्ति। पुरातनसमये तु गुरवः वृक्षाणां छायासु शिष्यान्, शिक्षणसामग्र्यभावेऽपि (मौखिकरूपेणैव) पाठयन्ति स्म। किञ्चाधुनिके विकटेऽस्मिन् युगे विज्ञानस्य मनोविज्ञानस्योन्नतेः कारणात् शिक्षणविधयोऽपि जटिलताङ्गताः। साम्प्रतं तु विद्यालये प्रतिविषयं विशिष्टोपकरणानि शिक्षणार्थमपेक्ष्यन्ते। वस्तुतः वर्तमानयुगे विद्यालयाः स्वलक्ष्यसिद्धौ कर्त्तव्यपूर्तौ च तदैव समर्थाः भवन्ति यदा तेषामुपयुक्तस्थितिः भवनादीनां भवेत्।

अस्माकं देशे सहस्रशः विद्यालयाः सुविधापूर्णे सौन्दर्य-संयुक्ते वातावरणे संस्थापिताः नैव सन्ति। प्रायः कोलाहलमये प्रदुष्टेऽन्धकारमये वातावरणे विद्यालयाः स्थापिताः भवन्ति। अतः एतादृश-विद्यालयेषु छात्राणां शारीरकं मानसिकं च विकासं कथं कर्तुं शक्नुमः। प्रायः विद्यालयेषु वर्तमानसमयानुकूलावश्यकतासम्पूर्त्तयेऽवकाश एव नास्ति। अतः तेषु त्वाधुनिकशिक्षायाः परिवर्धिताऽऽवश्यकतापूर्त्यै समुचितव्यवस्थाविस्तारोऽपि दुष्कर एवेति।

विद्यालयः न केवलं तत्स्थानमात्रमस्ति यत्र परम्पराप्राप्तरीत्या परम्पराप्राप्तविषयाणां शिक्षणं भवति वस्तुतो विद्यालयः छात्राय गृहवत् भवेत्, यत्र वसन् सौविध्येन

जीवनस्याद्यो भागः तस्य व्यतीतो भवेत् तथा सोऽस्मिन्नेव समये स्वकीयं भविष्यं सज्जीकुर्यात्। विद्यालयेषु प्रयोगशालानां विशिष्टं महत्त्वं भवति। प्रयोगशालाभिः स व्यावहारिकं ज्ञानं प्राप्नोति। आधुनिके वैज्ञानिके प्राविधिके च युगे व्यावहारिक-ज्ञानस्यात्यधिकाऽपेक्षा वर्तते। समाजोऽपि याचते व्यावहारिकं ज्ञानं छात्राणां भवेदिति। अस्तु, यावद् विद्यालयेषु प्रयोगशालाः न भविष्यन्ति तावत् शिक्षातः छात्रा अपि लाभान्विताः न भविष्यन्ति। शारीरकोन्नतेः सांस्कृतिकोन्नतेश्चापि महत्त्वं मानसिक-बौद्धिकविकासान्न्यूनं न भवति। अत एव, क्रीडाक्षेत्राणां, सांस्कृतिक-सामाजिक-क्रियाकलापानाङ्कृते सभागृहस्य च व्यवस्थापि विद्यालययोजनायामवश्यमेव करणीया।

विद्यालयभवननियोजने निर्माणे च ध्यातव्यतत्त्वानि

केनापि विदुषा— "विद्यालयभवननियोजने निर्माणे च शिक्षा-समाज-स्थापत्य-यन्त्र-स्वास्थ्यविज्ञानविशेषज्ञानामर्थशास्त्रिणाञ्च सम्मिलितप्रतिभायाः महत्यावश्यकता भवति" इति यदुक्तं तत्समीचीनमेवोक्तम्। शिक्षाशास्त्रिणः समाजशास्त्रिणः च सामाजिकावश्यकतां विचार्य शैक्षिकोद्देश्यानां ज्ञानं यच्छन्ति। येषां पूर्त्यै विद्यालयभवनं निर्मीयते। स्थापत्यशास्त्रज्ञः विद्यालयभवनस्य रूपरेखा (Plan) प्रस्तुतौ सहायको भवति। यान्त्रिकः (इंजीनियर) उपर्युक्तानां जनानां विचारान् व्यावहारिकान् करोति। स्वास्थ्यविज्ञानवेत्ता स्वास्थ्यरक्षादृष्ट्या विद्यालयभवननिर्माणे योगदानं करोति।

अर्थशास्त्री चेदं पश्यति यदुपलब्धेनैव धनेन विद्यालयः सुविधायुक्तः कथं भवेत्। अस्तु धन-श्रमयोरपव्ययवारणाय शैक्षिकाऽऽवश्यकतानामुद्देश्यानाञ्च पूर्त्यै, पूर्वोक्तानां विदुषां ज्ञानमनुभवं वाऽऽधारीकृत्य तत्तत्क्षेत्रे शैक्षिकव्यवस्था सम्पादनीया स्यात्।

विद्यालयभवनाय भूचयनं भूम्यवाप्तिश्च — विद्यालयभवनाय या भूमिः क्रयेण दानेन वान्येन वैधानिकोपायेन प्राप्तव्या विद्यते, तद्विषयेऽस्ति किञ्चिदवधेयम् तन्निर्दिश्यते —

1. विद्यालयः प्राथमिको माध्यमिको वेति विचारो भूमिप्राप्तेः प्रागेव कर्त्तव्यो भवति।

2. विद्यालयः नगरक्षेत्रे ग्रामीणक्षेत्रे वा स्थापनीय इत्यपि भूमिप्राप्तेः पूर्वमेव विचारः कर्त्तव्यः।

यदि वयं प्राथमिकविद्यालयं स्थापयितुमिच्छामः तदा तत्कृते माध्यमिक-विद्यालयायापेक्षितभूभागान्न्यूनं एव भूभागोऽपेक्षितो भवति। कक्ष्याणां संख्या न्यूना क्षेत्रञ्च स्वल्पं भवति। क्रीडाक्षेत्राण्यपि क्षेत्रफलदृष्ट्या लघूनि भवितुं शक्नुवन्ति। माध्यमिकविद्यालयात् भिन्नैव तस्य सज्जा च भवति। यदि ग्रामीणक्षेत्रे विद्यालयं स्थापयितुमिच्छामः तदा तु विद्यालयाय भूमिचयने तादृशं काठिन्यं नैव भवति यादृशं नगरक्षेत्रे भवति। नगरीयक्षेत्रे तु वातावरणे कोलाहल-राजमार्गसामीप्यादीनां ध्यानं रक्षणीयं भवति। विद्यालयस्य स्थितेः (भूमिः) चयनेन सह तस्य रेखा-चित्रस्य (School Maping) तथा सूक्ष्मयोजनम् (Micro Planning) इत्यस्य माध्यमेन स्थान/क्षेत्रविशेषस्य शैक्षिकावश्यकताया अनुभवः प्राप्तव्योऽपि भवति।

विद्यालयो नगरक्षेत्रे ग्रामीणक्षेत्रे वा भवेत् किन्तु तस्य स्थितिचयने जलवाय्वादीनां विषये विचारोऽवश्यमेव भवेत्। विद्यालयस्य स्थापना तत्र भवेत् यत्र जलवायू समं भवेताम्, भूमिरपि नातीव शुष्का स्यात् नहि सर्वथा नीरसा स्यात्। विद्यालयसमीपे वातावरणं न केवलं सौन्दर्यवत् स्यात् अपि तु तत् कयापि दृष्ट्याऽस्वस्थमपि न स्यात्। अस्तु विद्यालयस्य स्थापना शान्तवातावरणे शुद्धे पर्यावरणे च समुचिता भवति। पुनश्च भवेद् विद्यालयः सुगमस्थाने, येन बालकाः सरलतया विद्यालयं प्राप्नुयुः। ग्रामीणक्षेत्रीयो विद्यालय एतादृशे स्थाने भवेत् यस्मिन् आल-वालस्थिताः छात्रा अध्ययनाय नातिदूरं गच्छेयुः। यद्यपि ग्रामे ग्रामे विद्यालयान् स्थापयितुं सर्वकारः प्रयतते। किञ्च बहवो हि ग्रामाः देशे सम्मिलिताः सन्ति अर्थात् अत्यधिकनिकटता ग्रामाणां भवति। अत एतादृशेषु ग्रामेषु पृथक् पृथक् विद्यालयानां स्थापना सुकरा नास्ति सर्वकारस्यापि। तथापि समूहरूपेण स्थितानां ग्रामाणां बालकान् शिक्षयितुं व्यवस्था तु भवेदेव। अतः समूहे वर्तमानानां ग्रामाणां मध्ये यद्येक एव विद्यालयः स्थापितः स्यात् तदा सः तत्र स्थापनीयो विद्यते यत्रावयस्का अपि छात्राः सरलतया गन्तुं शक्नुवन्ति।

नगरक्षेत्रे विद्यालयानाङ्कृते भिन्नैव समस्योदेति। नगरमध्ये तु विद्यालयाय पर्याप्तभूमेरभावस्तु भवत्येव, किञ्च विद्यालयाय नगरमध्यभागोऽसुरक्षितोऽनुपयुक्तश्च भवति। अतः नगरक्षेत्रेऽपि विद्यालयाय नगराद् बहिरेवागत्य भूभागश्चयनीयो भवति। किन्तु भूमेरधिग्रहणात् प्राक् इदमपि चिन्तनीयं यत् तत्रयातायातस्योपयुक्तानि सुलभानि साधनानि सन्ति न वा।

विद्यालयाय भूमिः, उपयुक्ते स्थाने भवेत्। वर्षाकाले जलसंचयो यत्र भवति, यत्र च नगरस्य दूषितं जलं वहति, यत्र भूमिः जलावशोषणे क्षीणसत्त्वा वर्तते, तत्र

विद्यालयभवनस्य निर्माणं स्वास्थ्यहानिप्रदत्वात् नैव करणीयम्। भूमिक्रयोऽपि सावधानतया कर्तव्यः। विद्यालयायाधिकमूल्यदानेन विषमभूमेः क्रयो नैव करणीयः, न चेदृशी मितव्ययता भवेत् यया भाविनि काले व्ययभारो वृद्धिं गच्छेत्। यथा — स्वल्पतममूल्यं दत्त्वोत्खातिनीं भूमिं विद्यालयाय क्रेष्यामस्तदा तस्याः समीकरणे हि बहुव्ययो भविष्यति।

विद्यालयाय भूमेरवाप्तिः तावती करणीया भविष्यत्कालेऽपि या विद्यालयस्य भौतिकविकासाय पर्याप्ता स्यात्। विद्यालयाय तत्स्थानं चेतव्यं, यत्र पेयजलस्योपलब्धिः सरलतया भवेत्। विद्यालयस्य समग्रो भूभागः प्रयोगयोग्यः सम्पादनीयः। एतदर्थं श्रमिकाणां नागरिकसमुदायानां सहायतापि स्वीकर्तव्या। एवं कृते तत्रत्याः जनाः विद्यालयं प्रति समौत्सुक्यवन्तो भविष्यन्ति।

भवनसम्बन्ध्यावश्यकतानां निर्धारणम् —

विद्यालयभवननिर्माणस्य निर्णयात् प्राक् यत्र भवन-निर्माणं चिकीर्षितमस्ति तत्र विद्यालयशिक्षाभवनसम्बन्धिन्य आवश्यकताः सर्वेक्षणेन ज्ञातव्याः सन्ति। विद्यालयस्य भविष्यत्कालिकावश्यकतानां परिज्ञानमपि सर्वेक्षणेन सहैवार्जनीयम्। यथा — वर्तमाने कति छात्राः सन्ति? कति कक्ष्याः सन्ति? आगामिकाले कति छात्राः नूतनाः समायास्यन्ति? तेषां व्यवस्थायै किं करणीयं भविष्यतीत्यादिकं सर्वमा-कलनीयम्। विद्यालयस्थछात्रेषु कति छात्राः गृहेभ्यः प्रतिदिनमध्ययनायागमिष्यन्ति, कति च छात्राः अत्र छात्रावासे स्थास्यन्ति? इत्यपि विचारणीयम्। ग्रामीणक्षेत्रे तु छात्रावासस्यापरिहार्याऽऽवश्यकता नास्ति किन्तु नागरिकक्षेत्रे तु छात्रावासस्या ऽऽवश्यकताऽपरिहार्या एव भवति। यतो हि, नागरिकाभिभावकाः प्रायः छात्रावासमिच्छन्ति छात्रेभ्य इति। इयं सामयिकी आवश्यकतापि वर्तते। अतः सर्वं संचिन्त्यैव, विद्यालयभवनस्य निर्माणयोजना निर्मेया स्यात्।

कक्षसज्जा, कक्षसंख्यादिविचारः —

स्थापत्यकलाकारस्य (Architect) पथप्रदर्शनाय विद्यालयप्रबन्धकाः प्रस्तावितकक्षाणां तेषां सज्जाविषयकं चिन्तनं कृत्वा, सूचीमेकां निर्मान्तु। अस्या सूच्याः निर्माणं विद्यालयस्य वर्तमाने भविष्यति च काले काः काः आवश्यकताः भविष्यन्तीति विचार्य कुर्वन्तु। अतः प्रबन्धकाः विशेषज्ञानां सहयोगेन सूचीं निर्माय भवननिर्माणं कारयन्तु। निर्मिता सूची स्यादीदृशी यत्तस्यां तत्सर्वं लिखितं स्यात् यद्विद्यालयभवनस्योपयोगितासम्पादनायापेक्षितं विद्यते। यथा-कस्य कक्षस्य कीदृश

आकारप्रकारो भविष्यति, कीदृशी तस्य सज्जा भविष्यतीति। अस्मिन् प्रकरणे उच्चतर–माध्यमिकविद्यालयस्य श्रेणीकक्षाणां, विशेषकक्षाणां, सभागारादीनामाकार–सज्जादि–विषये विचारकरणमप्राकरणिकं नास्ति।

6. सामान्यकक्षः तस्य सज्जा च —

सामान्यतया श्रेणीभ्यः ये कक्षाः निर्मीयन्ते तेषामाकारः क्षेत्रफलं वा छात्रसंख्यया, सर्वकारीयानुदानोपात्त–विद्यालये शिक्षाविभागस्यादेशेन निश्चीयते। शिक्षाविभागीय–नियमानुसारेण तु प्रायः श्रेण्यर्थं निर्मिते कक्षे 40 चत्वारिंशच्छात्राणां स्थानम् अपेक्षितं भवति। स्वास्थ्यदृष्ट्या प्रतिछात्रं अष्टतः दसवर्गफुटस्थानं भवेत्। श्रेणीकक्षाणां संख्याऽपि श्रेणीनां श्रेणीखण्डानां च गणनया निश्चिता भवति।

एकस्मिन् श्रेणीकक्षे सामान्यतया चत्वारिंशच्छात्राणां कृते लेखपीठिकाना–मासन्दिकानाञ्च व्यवस्था स्यात्। सा व्यवस्थापि तथा स्यात् यया यथासुखं शिक्षकः प्रतिछात्रमुपेयात्। शिक्षकासनायापि पर्याप्तं स्थानं कक्षे भवेत्। श्रेणीकक्षे भित्तिश्यामपट्टो भवेत् शैक्षणिकसम्भार–संस्थापनाय संरक्षणाय तत्रालम्वार्यादिकेभ्योऽपि व्यवस्था कक्षसज्जायां गण्यते। श्रेणीकक्षेषु प्रकाशस्य वातप्रसरणस्य च सुव्यवस्थापि करणीया।

7. विशेषकक्षसज्जा —

आधुनिकशैक्षिकप्रवृत्तयो बलात् बोधयन्ति यद् विद्यालयेषु प्रतिविषयमेको विशिष्टः कक्षोऽपि भवेत्, यस्मिन् तद्विषयकं वातावरणं निर्मितं स्यात्। तथा तत्र कक्षे विषयसम्बन्धितोऽखिलः सम्भारः साधु सज्जितः स्यात्। तेन शिक्षकः छात्रश्च लाभान्वितो भवेत्। एतादृशकक्षस्याऽऽयामो विषयविशेषस्य विशेषावश्यकतानुरूपो भवेत्। तात्पर्यमिदमस्ति यत् एतादृशाः विशेषकक्षाः सामान्यश्रेणीकक्षेभ्यस्तु विशाला एव भवन्ति। यतो हि तेषु छात्राणामध्यापकानाञ्चोपवेशनस्य व्यवस्थया सहैव सम्पूर्णं तत्तद्विषयोपयोगिसाहित्यमपि सुव्यवस्थितरूपेण स्थापितं भवति। विषय–सम्बन्धिसामग्री कक्षे व्यवस्थिता न भवेत् चेत् कथं शिक्षकः छात्रो वा लाभान्वितो भवेत्।

8. गृहविज्ञानकक्षस्य सज्जा —

शिक्षायाः माध्यमिकस्तरे बालिकानाङ्कृते गृहविज्ञानमित्यनिवार्यो विषयः। विषयोऽयं व्यापको व्यावहारिकश्चास्ति। गृहविज्ञाने, गृहसञ्चालन–पाकविद्या–वस्त्र क्षालन–सीवन–चित्रसीवनादि (Embroidary) कमन्तर्भूतमस्ति। अत एतेषां शिक्षणं गृहविज्ञान– विषयान्तर्गतमेव भवति। अतः स्पष्टं यत् एकस्यां कक्ष्यायां तु शिक्षणम्

एतेषां भवितुं न शक्नोति। गृहविज्ञानस्य विशेषकक्षेषु व्यावहारिकं शिक्षणं प्रायोगिकशिक्षणञ्च भवति। अत एव व्यावहारिक-प्रायोगिक-कार्येभ्यः उपवेशन व्यवस्था तत्र भिन्नैव भविष्यति। गृहविज्ञानविषयाय विशेषकक्ष एक एव पर्याप्तं न भवति, तत्कृते तु बहवो विशेषकक्षा अपेक्षिताः सन्ति। यथा-पाकार्थमेकः कक्षः, एको वस्त्रसीवनकक्षः, एवमेव प्रक्षालनकक्षः, प्राथमिकचिकित्साकक्षश्चेति उक्तकक्षाणामभावे विषयस्य व्यावहारिकं प्रायोगिकं ज्ञानं शिक्षकः छात्राभ्यः दातुं पूर्णतया सक्षमो न भवति न च छात्रा तज्ज्ञानमात्मसात्कर्तुं प्रभवति।

9. प्रयोगशालायाः स्थितिः --

आधुनिके वैज्ञानिके युगे व्यावहारिकज्ञानस्य कौशलस्य नूतनविचारदृष्टेश्च प्राप्तिः महत्त्वपूर्णा स्वीक्रियते। विद्यालयस्य विभिन्नस्तराय पाठ्यक्रमेषु वैज्ञानिकविषयाणां महत्त्वपूर्णं स्थानमस्ति। अतः तेषां शिक्षणं व्यावहारिकं विधातुं सुव्यवस्थितानां सुसज्जितानां प्रयोगशालानामावश्यकता वर्तते। वैज्ञानिकविषयाणां शिक्षणं रुचिकरं सम्पादयितुमपि प्रयोगशालानामावश्यकताऽस्ति। प्रयोगशालाभिः बालकाः स्वतः अन्वेषणादिकं कृत्वा ज्ञानप्राप्तौ समर्थाः भवन्ति। अन्वेषणे कौशलं प्राप्नुवन्ति। प्रयोगशालानां कार्यशालानां तत्सम्बन्धिन्सम्भाराणां व्यवस्था कीदृशी भवेत् इति विवेचनमग्रे करिष्यामः।

10. पुस्तकालयस्थितिः —

पुस्तकालयो विद्यालयभवनमध्ये भवेच्चेत् सौविध्यं जनयति सर्वेषाम्। पुस्तकालयो वर्धमानो भवति। अतोऽस्य विस्तारं विलोक्यैवास्य भवनस्य नियोजनं निर्माणं वा भवेत्। वायु-प्रकाश-स्थानानां समुचितव्यवस्थायुक्तश्चायं भवेत्।

11. सभाकक्ष (हॉल) स्थितिः —

विद्यालयेऽस्य कक्षस्यावश्यकता भवत्येव। नगरक्षेत्रीयविद्यालयेषु तु विशेषेणास्यावश्यकता भवति। अस्य निर्मितिः भविष्यत्कालिकीमावश्यकतां विचार्य करणीया। यावन्तो विद्यालयीयाः छात्राः सन्ति तेषामुपवेशनाय पर्याप्तं स्थानं सभाकक्षे भवेच्चेत् शोभनं स्यात्। अस्मिन् कक्षेत्वेका वेदिकापि भवेत्। यस्याः प्रयोगः सांस्कृतिककार्यक्रमाणां प्रदर्शने, नाटकादौ च भवेत्।

विद्यालयभवने एकः प्रधानाचार्यकक्षः, कार्यालयश्च निर्मितो भवेत्। विद्यालयस्य सञ्चालनायोक्तकक्षयोरावश्यकता वर्तते। अनयोः कक्षयोः सज्जार्थमावश्यक-सम्भारोऽपि स्यात्।

विद्यालयभवने, पुनश्चैकोऽतिरिक्तः शिक्षककक्षोऽपि (स्टाफ रूम) स्यात्। यत्र शिक्षकाः विश्रमेरन्। यदि सहशिक्षाव्यवस्था शालायां स्थापनीया स्यात् तदेदृशै-वापरः कक्षः छात्राणाङ्कृतेऽपि भवेत् यत्र तेऽनध्ययनसमये स्थित्वा स्वल्पाहारादिकं कर्तुं शक्नुयुः। विद्यालये स्वल्पाहारादिकं छात्राः यत्र लभेरन् एतादृशमेकमापणमपि स्यात्। विद्यालयभवने शिक्षकवाहनानां, छात्रावाहनानाङ्कृतेऽपि स्थानं निर्मेयं भवति। शरीरशङ्कानिवृत्त्यर्थं शौचालयानामपि व्यवस्था, एवमेव शुद्धपेयजलस्य व्यवस्थापि विद्यालयभवने कर्तव्या भवति।

भवननिर्माणयोजनायां सम्पन्नायां, विद्यालयप्रबन्धकः विशेषज्ञाश्च तां योजनां विचार्यानुमोदयन्ति। अनुमोदने परिवर्तनं परिवर्धनं वा इष्टं भवेत् चेत् तदपि करणीयम्।

पानीयं जलमपि व्यवस्थितं भवेत्। यो हि प्रबन्धः स्यात्सः व्यवस्थारक्षानिय-मानुकूलमेव स्यात्। एतदतिरिक्तं विद्यालये प्रकाशस्य वायुप्रसरणाय च कृत्रिमा प्राकृतिकी च व्यवस्था स्यात्। येन बालकानां स्वास्थ्यवर्धनेन साकं कार्ये उत्तमत्वमपि समागमिष्यति।


भवननिर्माणविषयकसेवाप्राप्तिः, योजनानिर्माणं, तदनुमोदनञ्च —

विद्यालयभवननिर्माणस्य निर्णयात्पूर्वं स्थापत्यकर्मकारस्य नियुक्तिः कर्त्तव्या। तस्य कार्योपर्येवान्यजनानामपेक्षया भवनस्योपयुक्ततायाः समधिकभारः भवति। सः एकतः अभियान्त्रिकाणामावश्यकतायाः, अपरतश्च विद्यालयप्रबन्धकानां योजनायाश्च मध्ये समन्वयं स्थापयेत्। भवनस्य सौन्दर्यमुपयुक्तत्वञ्च नियोजितप्रारूपोपर्येवाधारितं भवति। विद्यालयभवनस्य नियोजनकाले स्थापत्यकर्मकारविद्यालयप्रबन्धकानाञ्च शैक्षिकावश्यकतानुकूलत्वेन साकमेव सुरक्षा व्यवस्थाऽपि ध्यातव्या। किञ्च एतादृशी व्यवस्था स्यात् यत् संकटकाले शीघ्रमेव विद्यालयभवनं रिक्तत्वं प्राप्नुयात्। प्रत्येकस्मिन् कक्षे च स्वास्थ्यदृष्टिकोणे प्रकाशवायुप्रसारणयोश्चोपयुक्तव्यवस्था महत्त्वं भजते। वातावरणं स्वच्छं, सौष्ठवं स्वास्थ्यप्रदञ्च स्यादित्ययं सिद्धान्तः कदापि न विस्मर्तव्यः। एकस्मात् कक्षात् अन्यस्मिन् कक्षे गमनागमनयोः सौविध्यातिरिक्तं भवननिर्माणे मितव्ययता अप्यवश्यं ध्यातव्या।


सामान्यतः विद्यालयभवनानाङ्कृते आवृत्ताऽनावृत्ता चेति द्वे रूपरेखे प्रयुज्येते। अनावृतयोजनासु E, H, I, T, U, Y, L आकारकभवनानां समधिकोपयोगं दरीदृश्यते। आवृत्तयोजनासु प्रकारत्रयस्य समवेतदीर्घचतुस्रकः, शून्यदीर्घचतुरस्रकः, शून्यायतं (यत्र भवनमध्ये रिक्तस्थलं स्यात्) परितश्च भवनस्य व्यवस्था भवति। आयतस्य

विद्यालयभवनस्य मानचित्रम्


(1) E-आकारस्य भवनम्




(2) H-आकारस्य भवनम्



(3) U-आकारस्य भवनम्



(4) अन्तःप्राङ्गणभवनम्



मध्ये सुदीर्घकक्षस्य लघुकक्षाणाञ्च निर्माणं विधीयते। साम्प्रतिके युगेऽस्मिन् अनावृत्तयोजनैवाधिकत्वेन दरीदृश्यते। भवननिर्माणस्य योजनानिर्धारणात्परं निर्धारितं प्रारूपं प्रबन्धकानां विशेषज्ञानाञ्च परामर्शेणानुमोदयितव्यम्। यदि ते परिवर्तनमिच्छन्ति तर्हि परामर्शानुगुणं यथाविधि परिवर्तनं करणीयम्।

भवननिर्माणकार्यस्य कृते उत्तरदायित्वप्रदानम् —

यदा विद्यालयभवनस्य योजना निर्मिता स्यात्तदा तस्य निर्माणकार्यस्योत्तरदायित्वं सुशिल्पकाय दातव्यम्। उतरदायित्वग्रहीत्रा सह लिखितानुबन्धोऽपि स्यात्।

प्रस्तरचतस्त्राधारः (चौखट) कपाट–वातायनादीनां निर्माणाय पृथक्–पृथक् रूपेण शिल्पीनाङ्कृते दायित्वं प्रदातव्यम् उत स्वतः सामग्रीभिः निर्मापयितव्यम्। सामग्र्याः क्रयणात्पूर्वमापणकैः मूल्यसूचिका प्राप्तव्या, किञ्च सामग्री सम्यग्रूपेण दर्शनात्परमेव क्रेतव्या। विशेषज्ञानां परामर्शं प्राप्य वस्तुनः मापनं कर्त्तव्यम्।

एवमेव उत्पीठिका–आसन्दिका–काष्ठनिर्मितश्यामपट्ट–वस्तुधान्यादीनाञ्च निर्माणाय कार्योत्तरदायित्वं पृथक्त्वेन दातव्यं निर्मितसामग्री वा क्रेतव्या। वस्तुक्रयणात्पूर्वं मूल्यसूचिका प्राप्तव्या ततश्चाध्ययनात्परमेव क्रेतव्यम्। काष्ठस्थितेः तत्तद्रञ्जकादीनां विषये पूर्णतः ज्ञानात्परं क्रयणात् आपणकैः नास्माभिः बालतया हानिरवाप्तुं शक्यते।

विद्यालयभवने विद्युतः स्थिरीकरणार्थमपि विद्युत् कर्मचारीणाङ्कृते उत्तरदायित्वं प्रदानीयम्। कक्षेषु विद्युत्व्यवस्था कक्षोपरिभागे स्यात् येन भित्तीः सम्यक्तयोपयोक्तुं समर्थाः भवेम। विद्युत्व्यवस्था सम्पादनात्पूर्वं विचारः कर्त्तव्यः यतो हि दुर्व्यवस्थया बहव्यो बाधाः समायातुं शक्नुवन्ति। विद्युत्व्यवस्थायै उत्तरदायित्वं प्रमाणीकृतजनायैव दातव्यम्। इतः पूर्वं योजना निर्मातव्या ततश्च प्रकाशस्य वातयन्त्रादीनां व्यवस्था करणीया। किञ्च विद्यालये जलस्य व्यवस्थाऽपि समीचीना यथा स्यात् तदर्थं कार्यकर्तुः कृते पृथक्त्वेनोत्तरदायित्वं प्रदानीयम्। जलनलिकाः भूमितः उपरि स्युश्चेद् वरं यतो हि दुर्घटनाकाले तान् शीघ्रतया द्रष्टुं शक्यते, तत्रावधेयं यत् नलिकामार्गेण जनमार्गोऽवरुद्धो न स्यात्। यद्येता भित्तीनां पार्श्वे संस्थाप्यन्ते चेत् वरं। किञ्च तत्र जलनिस्सारणव्यवस्था अपि समीचीना स्यात्, विषयेऽस्मिन् विशेषज्ञानां परामर्शं प्राप्य योजना निर्मेया भवति।

निर्माणकार्यस्य निरीक्षणं पर्यवेक्षणञ्च –

निर्माणकार्यस्य निरीक्षणं परमावश्यकं, यतो हि तेन ज्ञातुं शक्यते यत् कर्मकारेण

विद्यालयभवने उपयुक्तसामग्री प्रयुज्यते न वेति। एतदतिरिक्तं भवन-निर्माणं योजनानु-कूलं वर्तते न वेत्यवधेयं भवति। निर्माणकाले समये-समये जायमानसमस्यानां निवारणं प्रबन्धकाः निरीक्षणेनैव कर्तुं शक्नुवन्ति। अतः निरीक्षणं परमावश्यकतां भजते।

भवननिर्माणविषये तत्तत्सम्बन्धपरामर्शाः शिक्षाऽऽयोगेन अपि प्रदत्ताः - शिक्षाऽऽयोगस्यायं विचारः - "अस्माकं नैकशिक्षणसंस्थानां भवनस्थिति-रसन्तोषजनका वर्तते। साकमेव कुत्रचित् लघुभवनानि वर्तन्तेऽतो वाञ्छनीयं यत् शिक्षासंस्थानानामायोजनेन सम्बद्धराज्यशिक्षाविभागः प्रथमश्रेण्याः शिक्षासंस्थानां स्थित्याकारं वा निश्चित्य केषाञ्चन मार्गदर्शकसिद्धान्तान् विकासयेत्।"

शिक्षाऽऽयोगेन विद्यालयभवनानां सम्बन्धे महत्त्वपूर्णपरामर्शा एवं प्रदत्ताः -

(1) केन्द्रीय-राज्यीयाय-व्ययपत्रकेषु (बजट्) विद्यालयभवनानां निर्माणाय नियतधनराशौ वृद्धिः स्यात्। समुदायसाधनानि च साकमेव साम्याधारेण प्राप्तव्यानि स्युः।

(2) ग्रामीणक्षेत्रेषु विद्यालयभवनस्य निर्माणाय स्थानीययोगदानं प्रोत्साहितं स्यात्।

(3) विद्यालयभवनानां शीघ्रनिर्माणाय ग्राम्यक्षेत्रेषु निर्माणकार्यं ग्राम पञ्चायतानाङ्कृते, नगरीयक्षेत्रेषु च नगरपालिकानां नगरनिगमानां वा कृते दातव्यम्।

(4) विद्यालयभवनानां निर्माणकार्यस्य निरीक्षणाय मार्गदर्शनाय वा प्रत्येकस्मिन् राज्ये सार्वजनिकनिर्माणविभागान्तर्गतमेकस्य शैक्षिकभवनविकासवर्गस्य स्थापनं स्यात्।

(5) सर्वकारीयविद्यालयभवनानां द्रुतगत्या निर्माणाय शैक्षिकभवनकार्यक्रमं प्रारब्धुं लोकनिर्माणविभागे पृथक्त्वेन एकस्य विभागस्य स्थापनं स्यात् यत् कार्यमेतद् सम्पूरयेत्।

पुनरावृत्तिप्रश्नाः

(1) विद्यालयभवनेन भवतां कोऽभिप्रायः ?

(2) भारते कस्यापि विद्यालयभवनस्य प्रचलितदशाः सोदाहरणं स्पष्टनीयाः ?

(3) विद्यालयभवननियोजनकाले के-के विषयाः अवधेयाः ?

(4) विद्यालयभवनस्य स्थितेः चयनार्थं के विषयाः ध्यातव्याः ?

(5) विद्यालयभवनस्यावश्यकतानां निर्धारणे के-के विषया अवधेया: भवन्ति? सोदाहरणं विवेचयत।

(6) कक्ष्या-कक्षाणां, सज्जतायां, काष्ठोपकरणानाञ्च सूचिका निर्माणकाले के-के विषया: ध्यातव्या: भवन्ति?

(7) इतिहासभूगोलयो: विशिष्टकक्षेषु कानि कान्युपकरणानि आवश्यकतां भजन्ते?

(8) गृहविज्ञानस्य विशिष्टकक्षस्यावश्यकसामग्रीणामेका सूचिका निर्मातव्या?

(9) विद्यालयभवने पुस्तकालयस्य स्थिति: कुत्र स्यात्? स्पष्टयत।

(10) प्रधानाचार्यस्य कार्यालयस्य स्थिति: सतर्कं स्पष्टयत?

(11) भवन्त: विद्यालये जलव्यवस्थां सम्पूरयितुं कान् प्रयासान् करिष्यन्ति?

(12) विद्यालयभवनस्य नियोजननिर्माणयो: तद्विस्ताराय च भवन्त: किं प्राविधानं करिष्यन्ति?

(13) विद्यालयभवनस्य नियोजनकाले प्रधानाध्यापकस्य शिक्षकाणाञ्च परामर्शो कथमावश्यक:? पूर्णत: स्पष्टयत?

(14) विद्यालयभवननिर्माणकाले भवन्त: केषां-केषां विशेषज्ञानां परामर्शं प्राप्स्यन्ति? किमर्थञ्च?

(15) विद्यालयभवननिर्माणकार्यस्योत्तरदायित्वप्रदानं किमर्थमावश्यकम्? तर्केण स्पष्टयत।

(16) भवन्त: निर्माणकार्यस्य निरीक्षणपर्यवेक्षणयोर्भारं केषां-केषामुपरि संनियोजयिष्यन्ति? किमर्थञ्च?

(17) शिक्षाऽऽयोगेन विद्यालयभवनानां सम्बन्धे के विचारा: प्रकटिता:? संक्षेपेण प्रतिपादयत।

लेखार्थप्रश्न:

कस्मिन्नपि नगरे विद्यालयभवनस्य नियोजननिर्माणयोश्च कृते भवन्त: केषां-केषां विषयाणामुपरि स्वावधानं दास्यन्ति? येन समधिकमुपयुक्तमुपयोगित्वञ्च प्राप्तं स्यादिति।

6

विद्यालयपरिबर्हः

(School - Furnitures)

"Furniture plays an extremely important part in the physical, moral and mental welfare of the scholars." **– P.C. Wren**

विद्यालये बालकानां स्वास्थ्यरक्षणाय सदा प्रयतितव्यम्। छात्राणां शारीरक–मानसिक–नैतिकविकासाय विद्यालयपरिबर्हाणां महती भूमिका भवति यथा – विद्यालयकक्षासु छात्रासनानि समुचितस्वरूपाणि सुव्यवस्थितानि च यदि भवेयुः तर्हि छात्राः न केवलं सुखेन पठितुमेव प्रवृत्ताः भवन्ति, अपितु, तेष्वनुशासनस्य भावनापि भविष्यति, तेषां शारीरकं स्वास्थ्यमप्यविकृतं भविष्यति। अव्यव–स्थितानुचितस्वरूपाणामासनादीनां प्रयोगात् पाचनतन्त्रं दुष्प्रभावितं भवति, छात्राणां नेत्रदोषादयो बहवो हि शारीरकविकाराः भवितुं शक्नुवन्ति। चित्तैकाग्र्यमपि न भवति अनुपयुक्तासनादिप्रयोगात्। अतो विद्यालये छात्राणाङ्कृते समुपयुक्ताकार– प्रकारकाणां परिबर्हाणां प्रयोगः स्यात्।

परिबर्हेषु लेखोत्पीठिका 'डेस्क' इत्यपरपर्यायस्यापि कक्षास्थश्यामपट्टस्य च महत्त्वपूर्णं स्थानमस्ति। भारतीयविद्यालयभवनेषु प्रायः लेखोत्पीठिका–आसन्दिका–श्यामपट्टानामभाव एव भवति। उपलब्धेषु चैषु नहि समुपयोग एषां भवति। एषां महत्त्वविषये वयमुदासीना अपि स्मः। नगण्येषु विद्यालयेषु प्रधानाचार्याः विद्यालयीयासनादिसम्भार–महत्त्वं जानन्तो जागरूकाः भवन्ति। प्रायः सर्वत्र विद्यालयेषु समानाकारप्रकारकासनादिसम्भाराः दृष्टिगताः भवन्ति। वस्तुतः नहि सर्वेऽध्येतारः समानशरीरसंस्थानवन्तो भवन्ति। अतः तेषाङ्कृते शरीस्याकारानुकूला एव सम्भाराः भवेयुः। यथा शरीराकृत्यनुकूलानि वस्त्राण्यपेक्षन्ते तथैव अध्ययनसम्भारा अपि स्युः। असमानाध्ययनसम्भारश्च्छात्रस्याभिवृद्धौ बाधां जनयति स्वास्थ्योपघातकश्च भवति। अतोऽवधेयं यदध्ययनसम्भारेष्वासन्दिका प्रयोक्तुः बालकस्य नितम्बान्तोन्नता एव स्यात्। लेखोत्पीठिका (डेस्क) अपि आकटिदेशमेवोन्नता स्यात् इति आधुनिकानां शिक्षाशास्त्रिणां विचारधारा विद्यते।

परिबर्हाकारप्रकारस्य निर्धारणपरिस्थितयः –

कक्ष्यायामासनादीनामुपयुक्तोत्तानतानेनाङ्किता भवति यदा बालकः आसन–

मधिरुह्य अनावश्यकतया स्वशरीरस्य नत्युन्नत्तिं विनैव संतुलनं स्थापयितुं शक्नुयात्। तथा सर्वत्र तस्य दृष्टिपातोऽप्यनायासेन सम्भवेत्। आसन्दिकायां संस्थितस्य पादौ धरां सम्यक् स्पृशन्तौ स्याताम्। अनेन पादजङ्घात् 90 डिग्री कोणः क्षैतिजरूपेण सम्भविष्यति।

आसन्दिकायां (कुर्सी)निम्नलिखितवैशिष्ट्यमपेक्ष्यते –

1. आसन्दिका तावत् उच्छ्रिता भवेत् यावत् छात्रस्य पादौ सम्यग्धरां स्पृशन्तौ स्थितौ भवेताम्।

2. आसन्दिकाया आसनपट्टः तावदविस्तृतः स्यात् यावत् 2/3 भागमितः संविशतुः जङ्घायाः भागः संन्निवेशितः स्यात्।

3. आसन्द्या आसनपट्टस्याग्रिमो भागः गोलाकारः स्यात् तेन जंघायाः रक्तप्रवाहिकाः स्नायवो दुष्प्रभाविताः न भवेयुः।

4. आसन्दिकायाः पृष्ठमप्येवं भवेत् येनासितुः पृष्ठं पूर्णरूपेण तत्र सौविध्यं प्राप्नुयात्। आसन्दिका पृष्ठभागस्य उन्नतिरपि स्कन्धान्ता भवेत्।

5. आसन्दिकासनपट्टस्य निम्नता (गहराई) सामान्यतया 3/8" (इंच) आङ्गुलप्रमाणा भवितुं शक्नोति।

लेखोत्पीठिका –

उपयुक्तलेखोत्पीठिकायां निम्नलिखिताः विशेषताः स्युः –

1. लेखासनमियदुन्नतं भवेत् आसन्दिकातो यच्छात्रः लेखनसमये स्कन्धौ नमयितुमुन्नमयितुं न यतेत।

2. लेखासनम् आनाभेः छात्रस्योच्छ्रितं स्यात्।

3. विस्तारोऽपि तस्य इयान् भवेत् यच्छात्रः स्वहस्तौ सुखेन स्थापयितुं समर्थः स्यात्।

4. लेखासनस्य सम्मुखस्य भागस्य विस्तारः 18" प्रमाणकः तु भवितव्यः।

5. अत्र विस्तारेऽपेक्षानुसारं न्यूनाधिक्यमपि भवितुं शक्यते। लेखासनस्यान्त्यो भागः 15° नाभिदेशतोऽधिकोन्नतः स्यात्।

6. आसन्दिका लेखासनपादेषु ईदृशी व्यवस्थापि करणीया, ययोरुभयोरासनयोः 1/4" नत्युन्नती सम्भवेतां। छात्रसौविध्याय इयं व्यवस्थाऽपेक्षते।

आसनानां भेदाः (Types of seats) –

कक्ष्यायां भूमौ कटमास्तीर्य छात्राः तिष्ठन्ति, किन्तु इयं व्यवस्थानुपयुक्तास्ति। अस्यां व्यवस्थायां छात्रः पट्टिकां जान्वोः संस्थाप्य एव लिखति, एतादृशासने छात्रः

चिरं स्थातुं न शक्नोति। पुनश्च बहूनां छात्राणां कृते दीर्घासन्दिका बेंच नामिकाया भवति सा अपि अनुपयुक्ताऽस्ति। दीर्घासनेऽपि छात्राः सुखेन चिरं स्थातुं न शक्नुवन्ति। ईदृशानाम् आसनानां प्रयोगात् छात्राणां शारीरक–मानसिक–नैतिकक्षतिः भवति। अन्यदपि आसनं शालासु प्रयुज्यते तच्च सपृष्ठं भवति, लेखासनमपि दीर्घासनमिव लम्बायमानं शालासु प्रयुज्यते। किञ्च ईदृशानां लम्बायमानानाम् आसन–लेखासनानां प्रयोगः अनुचित एव भवति। यतो हि इमानि स्थिराणि भवन्ति, सञ्चरणे छात्राः क्लेशमनुभवन्ति कक्ष्या–स्वच्छतायामिमानि व्यवधानस्वरूपाणि भवन्ति।

सर्वोत्तमव्यवस्था तु प्रतिछात्रम् आसन्दिका–लेखासनञ्च भवेदित्येवोच्यते। अधुना तु महाविद्यालयेषु उच्चकक्ष्यास्थछात्रेभ्यः पृथक्–पृथक् हस्तपट्टयुतासन्दिकाः प्रदीयन्ते। आसन्दिकायाः दक्षिणपार्श्वे काष्ठपट्टिकासंयुक्ता भवति। अस्यां पट्टिकायां छात्रः स्वपुस्तिकां संस्थाप्य लेखने समर्थो भवति। इयं सर्वाधिका मितव्ययिव्यवस्थाऽस्ति।

कक्ष्यायाम् आसन्दिका–लेखासनयोः सापेक्षिका स्थितिः

(Relative Position of the Seats & Desks) –

आसन्दिकाः लेखोत्पीठिकाश्च कक्षायां त्रिविधतया व्यवस्थापयितुं शक्नुमः –

(अ) धनात्मकस्थितौ (Plus Position)

(ब) शून्यात्मकस्थितौ (Zero Position)

(स) ऋणात्मकस्थितौ (Minus Position)

(अ) धनात्मिका स्थितिः (Plus Position) –

आसन्दिकां लेखोत्पीठिकामन्तराऽवकाशो भवेत् चेत् तदोभयोः आसन्दिकालेखोत्पीठिकयोः धनात्मिका स्थितिः कथ्यते। अस्यां स्थितौ आसन्दिकायामुपविष्टच्छात्रः सुखेनोभयोरन्तराले समुत्थातुं शक्नोति। किञ्च लेखन–पठनकार्येषु तु इयं स्थितिः समुचिता न भवति। अत एतादृशी व्यवस्था न हि स्थिरा भवेत्।

(ब) शून्यात्मिका स्थितिः (Zero Position) –

शून्यात्मकस्थितौ तु आसन्दिका–लेखोत्पीठिकयोर्मध्ये स्थानशून्यता भवति इयमासनव्यवस्था धनात्मकासनव्यवस्थया उत्तमा वर्तते। तथापि अस्यामपि बालकः चिरं सुखेन स्थातुं न शक्नोति।

(स) ऋणात्मिका स्थितिः (Minus Position) –

उक्तोभयोरासनयोः व्यवस्था ऋणात्मिका भवति, यस्यां आसन्दिका लेखोत्पीठस्य

अधोभागेऽन्तर्निवेशिता तिष्ठति। इयं स्थितिः लेखनकार्यायोपयुक्ता भवति। आसनयोरस्याः अवस्थायाः समुचितः लाभोऽपि तदैव भवति यदा शरीराद-कूलोन्नतिरासनयोः स्यात्। इयमवस्थासनानामध्ययने लेखने च सुखदा भवति। विद्यालये तु आसनानामियं स्थितिः प्रयोक्तव्या।

कक्ष्यायामासनव्यवस्था –

कक्ष्यायामासन्दिका लेखोत्पीठिकानां (डेस्क) व्यवस्थां त्रेधा कर्तुं शक्नुमः –

(अ) क्षैतिजरूपेण (Horizontal Way) –

कक्षे लेखोत्पीठिकानां अध्यापकासनसम्मुखे मीटर-मितं मार्गं विहाय उभयोः पार्श्वयोः घनीभूतरीत्या स्थापनं क्रियते। यथा – लेखोत्पीठिकानामग्रिमपङ्क्तौ अध्यापकस्य दक्षिणवामपार्श्ववर्तिन्यां परस्परं संयोज्य लेखोत्पीठिकाः स्थाप्यन्ते। एवमेव द्वितीय-तृतीयादिषु पङ्क्तिष्वपि मध्यस्थानरहिताः लेखोत्पीठिकाः स्थाप्यन्ते। लेखोत्पीठिकाः सम्मुखीकृत्य आसन्दिकाः स्थाप्यन्ते। यदा कक्षे एवंविधासनव्यवस्था भवति तदा तत्र छात्राणां गमनागमन असौविध्यात् अध्यापनं बाधितं भवति। अत इयं क्षैतिजरूपा व्यवस्था दोषपूर्णा वर्तते।

(ब) शीर्षात्मकरूपेण (Vertical Way) –

का नाम शीर्षात्मिका व्यवस्था? यथा कस्मिन्नपि कक्षे यदा मानवाः भूमौ पङ्क्तिबद्धाः परस्परं संयुक्ताश्च तिष्ठन्ति तदा यद्यपि ते सन्ति सम्पृक्ताः किञ्च तेषां शिरांसि तु पृथक् पृथग् अर्थात् सावकाशानि एव भवन्ति। अस्तु जनसम्मर्देऽपि जनानां शिरसामसम्पृक्तता अक्षुण्णा भवति, तथैव कक्षे लेखोत्पीठानि सावकाशानि पङ्क्तिबद्धानि च स्थाप्यन्ते तदा सा आसनस्थापनव्यवस्था शीर्षात्मकस्वरूपवती भवति। इयमासनस्थापनव्यवस्था सौख्यकरी भवति अतोऽधिकोपयुक्तापि स्वीकृता।

(स) अर्धगोलाकृतिर्व्यवस्था (Semi-Circular Way) –

अस्यां व्यवस्थायां अधिकस्थानस्यापेक्षा भवति। अतः व्यवस्थेयं बहुधनमपि अपेक्षते। इयं व्यवस्था कक्षेऽपि भवितुं शक्नोति, किञ्च यस्मिन् कक्षे शतं छात्राः स्थातुं शक्नुवन्ति चेदस्यां व्यवस्थायां तस्मिन्कक्षे सप्ततिः अशीतिर्वा एव छात्राः उपवेशनं कर्तुं प्रभविष्यन्ति।

श्यामपट्टः (Black Board) – शिक्षणस्य महत्त्वपूर्णम् उपकरणं श्यामपट्टोऽस्ति। प्रतिविद्यालयम् अस्य व्यवस्था परमावश्यकी वर्तते। श्यामपट्टस्य प्रयोगेण अध्यापकः पाठं बोधगम्यं रोचकं च कर्तुं सफलो भवति। श्यामपट्टाः

बहुविधाः भवन्ति, यथा–

(अ) भित्तिश्यामपट्टः (Wall Black Board) –

स: श्यामपट्टो यः भित्यवयवभूतो भवति, भित्तिश्यामपट्टः कथ्यते। कक्षभित्तेरेकदेशं कृष्णरागेणोपरज्य भित्तिश्यामपट्टस्य निर्माणं क्रियते। अयम् अचलः श्यामपट्टोऽस्ति।

(ब) चतुरस्राधारः भित्तिपट्टः (Framed Wall Board) –

चतुरस्राधारकाष्ठपट्टिकायुक्तः काष्ठमयः कृष्णवर्णश्च भवति। अयं श्यामपट्टः भितौ नागदन्तिकाश्रितो लम्बते।

(स) विसर्पणभित्तिपट्टः (Sliding Wall Board) –

अयं भित्तिस्थनागदन्तिकामाश्रित्य भित्तौ लम्बते। अस्मिन् द्वौ काष्ठपट्टौ सहैव भवतः। आवश्यकतानुसारं एकं पट्टम् उर्ध्वम् अधो वा संचारयितुं शक्नुमः।

(द) त्रिपादश्यामपट्टः (Easel Black Board) –

स: काष्ठमय्यां त्रिपादिकायां स्थापनयोग्यः काष्ठपट्टः कृष्णवर्णः भवति। त्रिकोणत्रिपादिकाश्रितोऽयं श्यामपट्टः कुत्रापि स्थापयितुं शक्योऽस्ति। अस्य श्यामपट्टस्य त्रिपादिकयावनत्युन्नतिमपि कर्त्तुं शक्नुमः। प्रायः त्रिपादश्यामपट्टस्य कक्षतो बहिः प्रयोगो भवति। कक्ष्यायामन्योपयोगि–शिक्षणसम्भारसुरक्षायै आलन्दिकानां व्यवस्थापि कर्त्तव्या। कक्ष्यायां मानचित्राधाराणामपि व्यवस्था कर्त्तव्यास्ति।

पुनरावृत्तिप्रश्नाः

1. परिबर्हस्य (Furniture) महत्त्वं किमस्ति ?
2. लेखोत्पिठीका–आसन्दिकानाञ्च आकार–प्रकारनिर्धारणे किं किमवधेयम् ?
3. उपयुक्तासन्दिकायां लेखोत्पिठीकायां च किं वैशिष्ट्यं स्यात् ?
4. आसन्दिकायाः लेखोत्पिठीकायाश्च सापेक्षिकां स्थितिं निरूप्य, लेखने पठने च तयोः कीदृशी स्थितिः सर्वोत्तमा विद्यते ?
5. कया रीत्या कक्षे भवताऽऽसनानां व्यवस्था कर्त्तव्या ?
6. श्यामपट्टमहत्त्वमुपपाद्य तस्य कति भेदाः भवन्तीत्यपि विवेचयत ?

लेखार्थप्रश्नः

विद्यालयीयपरिबर्हेषु लेखोत्पिठीकायाः (डेस्क) आसन्दिकायाश्च (कुर्सी) महत्त्वं प्रतिपादयन्तो भवन्तस्तत्रोभयोरासनयोः उपयुक्तताविषये स्वविचारान् प्रतिपादयन्तु।

7

संग्रहालयः, प्रयोगशाला, कार्यशाला च

(Museum, Laboratory & Workshop)

"Nothing can impress students in the formative age as much as the actual visualising of these experiments in a graphic manner."

- A Hand-book for Teachers of Basic School

शिक्षायाः नवीनविचारधारया शिक्षाजगति बहुपरिवर्तनं जातमस्ति। प्रत्येकस्मिन् क्षेत्रे नवदृष्टिकोणं स्वीकुर्वन्ति सम्प्रति शिक्षाविदः। अत एव विद्यालयेषु व्यावहारिक-कार्याणि पूरयितुं संग्रहालयस्य, प्रयोगशालानां, कार्यशालानाञ्च स्थापनोपरि बलं ददति शिक्षाशास्त्रिणः। एतेषां स्थापनामात्रमेव पर्याप्तं नास्त्यपित्वावश्यकतानुसारमेतत् सर्वम् आधुनिकतममपि भवेत्। अतएवैतत्कृते केन्द्रीयराज्यीयौ सर्वकारौ अनुदानं यच्छतः। एतेषामावश्यकोपकरणानां महत्त्वस्य विवेचनमधः प्रस्तूयते -

(अ) संग्रहालयः (Museum) -

'म्यूजियम' (Museum) शब्दस्योत्पत्तिः म्यूज़ेज् इति (Muses) शब्दात् जाता। येन कला-संगीत-विज्ञानादीनां यूनानीयप्रतिनिधिदेव्यः निर्दिश्यन्ते। अनेन प्रकारेण संग्रहालयः तत् स्थानं वर्तते यत्र कला-साहित्य-विज्ञानदीनां सम्बन्धितो वस्तु-संग्रहो भवेत्।

संग्रहालयस्य विद्यालयीयजीवनेऽत्यधिकं महत्त्वं वर्तते। अस्य वस्तूनि दृष्ट्वा बालकानां जीवने प्रेरणोत्साह-जिज्ञासानाञ्च विकासो जायते। यस्य शिक्षायां बहुमहत्त्वमस्ति। जिज्ञासैव ज्ञानप्राप्त्याधारो भवति। अनेन संग्रहस्य मूलप्रवृत्तिः सन्तुष्यते। संग्रहालयोऽयं बालानां सामान्यज्ञानवृद्धौ सहायको वर्तते। संग्रहालयः राष्ट्रियपारम्पर्यप्रतिबिम्बं प्रदर्शयति। एषो बालकानां रचनात्मक-मूलप्रवृत्तिमपि सन्तोष्टुं महान् सहायको भवति।

माध्यमिकाशिक्षायोगानुसारं - ''विद्यालयबालानां शिक्षायां संग्रहालयः महत्त्स्थानं भजते। यतः संग्रहालयः विज्ञान-प्रविध्योः क्षेत्रेषु अतीते सेवृत्तानाम् अन्वेषणानां विविधविकासानां च चित्रं नीरसव्याख्यानापेक्षया विविधतापूर्वकं सुबोधम् उपस्थापयति।''[1] आयोगेनोक्तं यत् पाश्चात्यदेशेषु संग्रहालयस्य निरीक्षणे

बहुबलं प्रदीयते। अनेन कला-ज्ञानेतिहासानामन्यक्षेत्रेषु उपयुक्तवातावरणं दीयते किन्त्वस्माकं देशे एतादृशाः संग्रहालयाः न वर्तन्ते। अस्माकं विश्वासो वर्तते यत् शैक्षिकदृष्ट्या संग्रहालयाः सर्वेषु विद्यालयेषु स्थापिताः न स्युश्चेदपि नगरे समस्तविद्यालयानां कृते एकस्य वा संग्रहालयस्य स्थापनं कुर्यात्। एतदतिरिक्तं सर्वकारोऽपि प्रमुखस्थानेषु संग्रहालयानां स्थापनं कुर्यात्। येषु प्राचीनाधुनिक-कालस्य विभिन्नवस्तूनां संग्रहो भवेत्। बालकानाङ्कृते एतद्दर्शनार्थं व्यवस्था स्यात्। इह प्रश्नः समायाति यत् विद्यालये संग्रहालयस्य कान्युद्देश्यानि भवेयुः? एवञ्च तस्य सज्जा कथं भवेत्? विद्यालये संग्रहालयस्य निम्नाङ्कितान्युद्देश्यानि सन्ति –

(1) बालकेषु सौन्दर्यपरकभावनानां विकासाय।

(2) बालकेषु विभिन्नवस्तूनां निरीक्षणं सर्जनात्मकशक्तिं जिज्ञासाप्रवृत्तिं च प्रोत्साहयितुम्।

(3) प्राकृतिकाऽध्ययनेतिहास-विज्ञान-कलादीनां विषयाणां शिक्षणे सहायतार्थम्।

(4) बालकेषु सामान्यज्ञानप्राप्त्यर्थम्।

एतेषां स्थापनार्थं विद्यालये एकः दीर्घकक्षो भवितव्यः। अस्य विभागाः भवितव्याः उदाहरणार्थम् – प्राकृतिकविज्ञानम्, इतिहासः, भूगोलम्, कृषिः इत्यादयः। एषु विभागेषु विषयसम्बन्धितप्राचीनार्वाचीनसामग्रीणां संग्रहो भवितव्यः। वस्तु निरीक्षितुम् अस्मिन् कक्षे पारदर्शिकाः वस्तुधान्यः, प्रदर्शनस्थानं (शोकेस), उत्पीठिका इत्यादीनां व्यवस्था भवितव्या। अस्याः व्यवस्थायाः भारः बालकेषु भवेत्। परन्तु समीचीनमार्गदर्शनार्थं योग्याध्यापकस्यापि नियुक्तिर्भवेत्। अस्मिन् बालकनिर्मितवस्तून्यपि भवितव्यानि। तेषाङ्कृते विशेषस्थानं भवितव्यम्। समग्रसामग्र्यः लेखबद्धाः भवेयुः। यदि विद्यालये स्थानाभावो भवति चेदस्य व्यवस्था निम्नप्रकारेण कर्त्तुं शक्यते –

प्रत्येकस्मिन् विभागे विषयसम्बन्धिविचित्रवस्तूनि एकत्रीकृत्यैकस्मिन् स्थाने

---

1. "Museum play a great part in the education of school children as they bring home to them much more vividly than any prosaic lectures the discoveries of the past and various developments that have taken place in many fields of Science and Technology."

- Secondary Education Commission.

धर्तुं शक्यते, उदाहरणार्थं – जीवविज्ञानस्य प्रयोगशालायां तस्मै पृथक् स्थानं प्रदात्तुं शक्यते। अस्मिन् बालकनिर्मितवस्तूनि संग्रहालयनिर्मितवस्तूनि च भवितव्यानि। कृषि–कक्षे कृषिसम्बन्धितानि, इतिहासकक्षे इतिहाससम्बन्धितानि, कलाविज्ञानकक्षे कलाविज्ञानसम्बन्धितानि वस्तूनि पृथक्–पृथक् कक्षेषु भवितुं शक्यन्ते। विद्यालयीय–छात्रेषु एतेषां वस्तूनां प्रदर्शन्यपि भवेत्। प्रदर्शनेऽस्मिन् ते छात्रा अपि आमन्त्र्यन्तां येषां विद्यालये संग्रहालयो न भवेत्। अनेन प्रकारेण संग्रहालयः प्राचीनार्वाचीन–ज्ञानस्य भाण्डारो भवति। अस्य प्रयोगेण च जीवने सजीवत्वं सम्पादयितुं शक्यते।

(ब) प्रयोगशालायाः महत्त्वं तस्य सज्जीकरणञ्च –

वैज्ञानिकपद्धत्यनुसारं प्रतिविषयं शिक्षणाय प्रयोगशालाया आवश्यकता भवति। एतत् परिणामस्वरूपेण सम्प्रति प्रतिविषयं प्रयोगशालायाः महत्त्वं स्वीक्रियते। प्रयोगशालायां बालकः स्वयमेव क्रियाङ्कृत्वा ज्ञानं लभतेऽत एवास्याः महत्त्वमधिकं मन्यते। अनया बालकाः विभिन्नवस्तूनि निरीक्ष्य प्रयुज्य च सैद्धान्तिकज्ञानस्य वास्तविकतां विजानाति। प्रयोगशालया विभिन्नक्रियाप्रधानशिक्षणविधयः सफला अभवन्। अनया विषयविशेषस्योपयुक्तमनुकूलञ्च वातावरणं निर्मीयते यत् प्रभावशालिव्यवहारिकशिक्षणाय अतिलाभदायकं भवति। अनया व्यावहारिक–कार्यमपि कारयितुं शक्यते यत् विविधतां प्रेरणाञ्च प्रददाति। प्रयोगशाला छात्रेषु अहमहमिका–आलोचनात्मकदृष्टिकोण–साधनसम्पन्नता–सहयोग–वैयक्तिककार्य–शक्तीनां गुणान् विकासयति तथा च विभिन्नविषयाणां सम्बन्धे व्यावहारिककार्येभ्यः योजनाभ्यश्च प्रोत्साहयति।

प्रयोगशालायाः सज्जा– प्रतिविषयम् आवश्यकताः भिन्नाः भवन्ति। अतस्तस्य सज्जापि भिन्नैव भवति। अधः केषाञ्चिद् विषयाणां प्रयोगशालायाः सज्जायाः कृते संकेताः प्रदीयन्ते –

(1) सामाजिकाध्ययनस्य प्रयोगशाला – सामाजिकाध्ययनस्य प्रयोगशाला कीदृशी भवेदस्मिन् सन्दर्भे पाश्चात्यराष्ट्रेषु बहून्यनुसन्धानकार्याणि सम्पन्नानि सन्ति। वयमत्र जे. वी. वीचमैन[1], जे. डब्ल्यू. बाल्डविन महोदययोः[2] पर्यवेक्षणाधारेण सज्जामुल्लिखामः।

(1) सामान्यकक्षात् दीर्घकक्षः यस्मिन् प्रायोगिकोत्पीठिकानामासन्दिकानाञ्च समुचितव्यवस्था भवेत्।

1. J. B. Wichman
2. J. W. Boldwin

(2) समाचारपट्टः (Bulletin-Board)।

(3) श्यामपट्टः।

(4) वस्तुदान्यः – शिक्षणसामग्रीणां सुरक्षायै।

(5) पञ्जिका (Files)।

(6) चित्रप्रक्षेपकस्य व्यवस्था (ओवरहेड प्रोजेक्टर स्लाइड च)।

(7) उपवेशनव्यवस्था।

(8) दृढपत्राणि, मानचित्राणि, रेखाचित्राणि, विश्वप्रतिकृतिः (ग्लोब), चलचित्रपट्टिकाः (फिल्म स्ट्रिप्स, इत्यादयः)।

(9) पाठ्यपुस्तकानि, शब्दकोशः, समाचारपत्राणि, पत्रिकाः विभिन्नप्रति-वेदनानि च।

(10) आकाशवाणी, दूरदर्शनं, दृश्यश्रव्यपञ्जिका (वी. सी. आर.)।

(2) विज्ञानप्रयोगशाला – साम्प्रतिके वैज्ञानिके युगे उच्चतरमाध्यमिक-विद्यालये यत्र विज्ञानवर्गस्य शिक्षा प्रदीयते तत्र भौतिकशास्त्र-रसायनशास्त्र-जीवशास्त्राणां प्रयोगशालायाः विशेषमहत्त्वं भवति। एतदतिरिक्तं व्याख्यानकक्षोऽपि भवितव्यः। तथा च प्रत्येकप्रयोगशालया सम्बन्धितमेकं भाण्डारगृहमपि भवितव्यं, यतो हि तेन सौविध्यम्भवति। एतेषां प्रयोगशालानामाकारः छात्रसंख्यानुसारं भवेत् यत्र प्रतिछात्रं 30 वर्गफीट स्थानमवश्यं भवितव्यम्।

आसु प्रयोगशालासु व्याख्यानकक्षेषु च पवनप्रकाशयोरुचितप्रबन्धः भवेत्। द्वाराणि वातायनानि चैतादृशानि भवितव्यानि यत् छात्राः पठनसमये च काठिन्यं नाऽनुभवेयुः।

(क) भौतिकशास्त्रस्य प्रयोगशालायाः सज्जा –

(i) प्रायोगिकोत्पीठिकाः – उत्पीठिकासु नीचैः वस्तुधान्यः भवेयुः उपर्याधारश्च चतुर्भुजीयः स्यात्।

(ii) अङ्गारजवायोः (गैसस्य) उपर्युक्तव्यवस्था तथा च अङ्गारजवायुदाहकः (गैस-बर्नर) स्प्रिट-दीपः च भवेत्।

(iii) भित्तिवस्तुधान्यः – यासु वस्तूनि सुरक्षितानि भवेयुः।

(iv) भित्तिना सह तुलां स्थापयितुं एतादृशी व्यवस्था स्याद्येन प्रयोगः सारल्येन पूर्णत्वं प्राप्नुयात्।

(v) भिन्न-भिन्न प्रयोगसम्बन्धितयन्त्राणि (Apparatus) तथा चोपयुक्तसामाग्र्यः।

(vi) अपामुपयुक्तव्यवस्था - नलिका (पाइप), दीर्घबन्धनी (टेप), जल निर्गमः (सिंक Sink) च।

(ख) रसायनशास्त्रस्य प्रयोगशालायाः सज्जा -

(i) शुद्धपवनस्योचितप्रबन्धनं-एतदर्थं पर्याप्त वातायनानि, द्वाराणि, गवाक्षाः, वायुनिष्कासनाय व्यजनानां समुचितव्यवस्था च भवेत्।

(ii) प्रायोगिकोत्पीठिकाः - यासु-कमबोर्ड, चलकोष्ठः (ड्राअर), अङ्गारजवायोः नालिका, जलनालिका, टेप, जल निर्गमः (सिंक), परीक्षण नलिकायाः आधारश्च (टैस्ट ट्यूब स्टैण्ड) इत्यादीनां व्यवस्था भवितव्या।

(iii) तुलां स्थापयितुं कार्यं कर्तुञ्च पारदर्शककक्षः स्यात्। कक्षोऽयं मुख्यप्रयोग-शालायाः पूर्णतः पृथक् स्यात्। तत्र भित्युपरि प्रस्तरोत्पीठिकाः स्युः विद्यार्थिना-मुपवेशनस्य कृतेऽऽसन्दिका अपि स्युः।

(iv) अम्लसहन-जलनिस्तरण (ड्रेनेज) व्यवस्था।

(v) भित्तिवस्तुधान्यः।

(vi) फ्यूम कम-बोर्ड।

(vii) विभिन्नप्रयोगेभ्यः यन्त्राणि उपयुक्तसामग्री च।

(viii) स्त्रवितजलनिर्माणस्य व्यवस्था।

(ix) सूक्ष्मदर्शिकायाः (Microscope) संख्या ईयती भवेत् यत् एकस्यां सूक्ष्मदर्शिकायां (Microscope) युगपद् द्वौ एव छात्रौ कार्यं कुर्यास्ताम्।

(ग) जीव-विज्ञानस्य प्रयोगशालायाः सज्जा -

(i) विभिन्नप्रकारकाणि मृतजीवजन्तुसम्बन्धि, इतिहाससम्बन्धिदृढपत्राणि, प्रतिकृतिः (मॉडल), विसर्पिकाः (Slides) आदि।

(ii) प्रायोगिकोत्पीठिकाः - यासु चलकोष्ठस्य (ड्राअर) जलस्य च व्यवस्था स्यात्।

(iii) द्रोणि (ट्रे)-यत्र जीव-जन्तूनामान्तरिकाङ्गनिरीक्षणव्यवस्था स्यात्।

(iv) वस्तुधान्यः - सामग्रीहेतुः।

(v) जन्तुपादपयोः जलाशयः (Aquarium) भेकरक्षिका रक्षणार्थं (Frogerry), अङ्कुरणफलकः (Germination Bed) इत्यादीनां च स्थानं भवेत्।

(vi) प्रयोगशालायाः बहिः पुष्पवृक्षादीनां रोपणव्यवस्था।

(vii) Epidiascope, विसर्पिकाप्रक्षेपकः (Slide Projector)। विज्ञानस्य व्याख्यानकक्षे प्रदर्शनोत्पीठिकाः भवितव्याः। तत्र प्रकाशस्य जलस्य च प्रबन्धनं भवेत्। एतदतिरिक्तं श्यामपट्टः वस्तुधान्योऽपि भवेयुः। उपवेशनव्यवस्था समीचीना भवेत्।

(स) कार्यशाला तस्याः सज्जा –

अद्यतनयुगः वैज्ञानिकः प्रविधियुगश्चास्ति। देशस्य समृद्धये वैज्ञानिक-प्रविधिशिक्षायाः परमावश्यकतास्ति। परन्तु केवलमस्य सैद्धान्तिकज्ञानमेव नास्त्यावश्यकमपितु व्यावहारिकज्ञानमप्यपेक्षितं वर्तते। अत्र व्यावहारिकप्रशिक्षणाय विषयवस्तुसम्बन्धितकार्यशालानामत्यन्तावश्यकता वर्तते।

माध्यमिकशिक्षायोगेन बहूद्देश्यीयविद्यालयानां स्थापनस्योपरि बलं दत्तम्। एभ्यो विद्यालयेभ्यः प्राविधिकवर्गस्यापि (Technical Group) व्यवस्था जाताऽस्ति। अस्मिन् वर्गे परिगणितविषयेषु सम्बन्धितकार्यशालायाः सज्जायाः संक्षेपेण विवेचनं प्रदीयते।

(क) काष्ठकार्यस्य कार्यशाला –

(i) एको विशालकक्षः – यस्याकारः छात्रसंख्यानुसारं भवेत्।

(ii) अस्मिन् पवनप्रकाशयोरुचितप्रबन्धः भवेत्।

(iii) एकः लघुकक्षोऽपि भवेत् यस्मिन् छात्रोपकरणानाम् उत्पेटिकाः सुरक्षिताः स्युः।

(iv) काष्ठकर्तनस्य विभिन्नयन्त्राणि।

(v) कुन्दः (Lathe) येन काष्ठं गोलाकारं प्रदीयते।

(vi) उत्पीठिकाः – यत्र दृढग्राहकः (Vice) स्यात्।

(vii) श्यामपट्टः – यत्र चित्राङ्कनं भवेत्।

(viii) पारदर्शकवस्तुधान्यः रैक (Rack) च–काष्ठनिर्मितवस्तूनां सज्जायाः कृते।

(ख) लौहकारशाला (Smithy workshop) –

(1) कक्षे पर्याप्तस्थानस्य वायुप्रकाशयोश्च सम्यक्प्रबन्धो भवेत्।

(2) अग्निष्ठं, तद्धूमस्य च बहिर्निस्सारणायोचितप्रबन्धः स्यात्। अग्निष्ठप्रज्वालनाय वायुव्यजन व्यवस्था।

(3) प्रत्यग्निष्ठं काष्ठे स्थापिता शूर्मी (Anvil)।

(4) विभिन्नभारयुक्ता: मुद्गरा: संदंशिकाश्च।

(5) इतराणि विभिन्नयन्त्राणि लोहाश्च।

(6) निर्मित्तवस्तूनां स्थापनाय वस्तुधान्य:।

उक्तसमस्तसामग्रीभिस्सहोभयो: कार्यशालयो: जलप्रकाशयोरुपयुक्तव्यवस्था स्यात्। एतदतिरिक्तं प्राथमिकचिकित्साया: समीचीनप्रबन्ध: स्यात् येन कस्यापि बालकस्य आघातात्परं शीघ्रमेव प्राथमिकसाहाय्यं दातुं शक्यते।

पुनरावृत्तिप्रश्ना:

(1) बालकानां शिक्षायां विद्यालयसंग्रहालयस्य किं स्थानम्?

(2) भवन्त: विद्यालयसंग्रहालयं कथं सुसज्जितं करिष्यन्ति?

(3) विद्यालयसंग्रहालयस्य आवश्यकतत्त्वानि विवेचयन्तु।

(4) विद्यालये प्रयोगशालाया: महत्त्वं स्पष्टयन्तु।

(5) भवन्त: उच्चस्तरीयाणां माध्यमिकस्तरीयछात्राणाङ्कृते च प्रयोगशाला-कार्यशालयोर्व्यवस्थां कथं करिष्यन्ति ये सामान्यविज्ञानं, काष्ठकार्यं, धातुकार्यं वा विषयत्वेन गृहीतवन्त: ?

(6) विद्यालयकार्यशालाया: महत्त्वस्य मूल्याङ्कनं कुर्वन्तु।

लेखार्थप्रश्न:

'विज्ञानस्य युगे संग्रहालय-प्रयोगशालयोश्चाभावं दुर्भाग्यपूर्णमेव वर्तते।' कथम्?

8

विद्यालयपुस्तकालयः

(School Library)

"Libraries are the shelves where all the relics of saints full of virtue and that without delusion and importance are preserved and reposed."

— Bacon.

पुस्तकालयो विद्यालयस्य हृदयं वर्तते। छात्राः विद्यालयपुस्तकालयं विभिन्नानुभव–समस्या–प्रश्नान् मनसि निधाय समागच्छन्ति, तेषु विषयेषु विचारयन्ति च। पुस्तकालये संगृहीतग्रन्थान् अधीत्य ज्ञानमर्जयन्ति।

पुस्तकालयः शैक्षिककार्यक्रमेण सह सम्बद्धोऽस्ति। पुस्तकालयः शैक्षिककार्यक्रमस्य प्रमुखाङ्गमनिवार्याङ्गञ्च वर्तते। अयं तदैव स्वात्मन उच्चतमं महत्त्वं प्राप्तुं समर्थो भविष्यति यदैषः छात्रान् शिक्षयितुं मुख्यसाधनरूपेण कार्यं कुर्यात्। अत एव पुस्तकालयो विद्यालयस्य हृदयं वर्तते।[1] अस्य कथनस्याभिप्रायोऽयं न वर्तते यत् पुस्तकालयः विद्यालयस्य प्रत्यङ्गं पुस्तकानि दद्यात् तदैव स आत्मनो परिपूर्णतां प्राप्नोति। एतत्तु तत्स्थानं वर्तते यस्य बालकान् शिक्षयितुमावश्यकरूपेण साहाय्यं प्राप्नुयात्। पुस्तकपठनमेव नास्ति शिक्षा। इयमेका क्रिया वर्तते योत्तम–रूपेण शिक्षयितुमेकं महत्त्वपूर्णं साधनं वर्तते। अतः पुस्तकालयः शिक्षाया एकानिवार्या सेवा वर्तते।

अत एव पुस्तकालयः विद्यालयस्य महत्त्वपूर्णाङ्गं वर्तते। शिक्षका अपि सम्प्रतीदं स्वीकुर्वन्ति यत् पाठ्यपुस्तकैरेव सम्पूर्णज्ञानं न प्राप्यते। अपितु तस्य पूर्तिरन्योपयोगि–पुस्तकैर्भवति। पुस्तकालयस्य विषये इदानीं नवविचाराः स्वीक्रियन्ते। अधुना पुस्तकालयं विद्यालयस्य बौद्धिकप्रयोगशालायाः रूपेण पश्यन्ति जनाः। येन छात्रेषु पठने–पाठने एव रुचिर्न उद्भवत्यपितु व्यक्तिगतसामूहिकयोजनाः, साहित्यिकक्रियाः, प्रियक्रियाः (Hobbies) तथा च पाठ्यसहगामिक्रियाः च पूरयितुं साहाय्यं प्रदीयते।

---

1. "Library is the heart of the school and it is to this centre pupils bring varied experiences, problems and questions and then discuss and pursue them in search of new light from the experience of others and specially from the accumulated wisdom of the world garnered, arranged and displayed in the library." **—John Dewey**

एतदतिरिक्तम् अनेन प्रगतिशीलशिक्षणपद्धतावपि व्यावहारिकरूपं प्रदीयते।

भारते पुस्तकालयानां स्थितिः –

अस्माकं देशे अधिकांशविद्यालयेषु पुस्तकालयानां स्थितिः बहुशोचनीया वर्तते। इदानीमपि बहवः एतादृशविद्यालयास्सन्ति येषु पुस्तकालयानां केवलं नामैव प्रचलति। सन्दर्भेऽस्मिन् माध्यमिकशिक्षायोगस्येदं कथनमुल्लेखनीयमस्ति –

अधिकांशतः माध्यमिकविद्यालयानां पुस्तकालयेषु सामान्यतः प्राचीनानि, अनुपयुक्तानि, अरुचिकराणि पुस्तकानि सन्ति। तानि पुस्तकानि कासुचित् काष्ठ–मञ्जूषासु निधाय तासां मञ्जूषाणां पिधानं कृतम्। मञ्जूषाः अनुपयुक्तेऽनाकर्षके च कक्षे वर्तन्ते। पुस्तकालयः यस्य जनस्याधीनोऽस्ति यः लिपिकः शिक्षको वा वर्तते य अंशकालिकाधारेण कार्यमिदं सम्पादयति। न तस्य कार्येऽस्मिन् रुचिः वर्तते। नहि पुस्तकेषु प्रेम न च पुस्तकालय–सम्बन्धिज्ञानम्। अतः स्वभावतस्तत्र सुव्य–वस्थितपुस्तकालयसेवा नाम्नः किमपि वस्तु एव नास्ति यद् बालकान् अध्ययनं कारर्ितुं तथा च तेषु पुस्तकानि प्रति प्रेम जागर्ति।[1]

विद्यालयपुस्तकालयानामुद्देश्यानि –

विद्यालयीयपुस्तकालयस्य निम्नाङ्कितान्युद्देश्यानि स्वीक्रियन्ते –

(1) बालकेषु स्वाध्यायस्य प्रवृत्तेः निर्माणम्।

(2) बालकानाङ्कृते विद्यालयाध्ययनपाठ्यपुस्तकातिरिक्तं विभिन्नपुस्तकानां पत्रिकादीनाञ्च व्यवस्थाकरणम्।

(3) बालकेषु विभिन्नरुचीनां विकासकरणं तथा च छात्रेषु बौद्धिककार्यकरणस्य साहसवृद्धिः।

(4) बालकेषु साधनसम्पन्नतायाः, जिज्ञासाप्रवृत्तेश्च विकासः।

---

1. "The books are generally old, outdated, unsuitable usually selected without reference to the student's tastes and interests. They are stocked in a few book-shelves, which are housed in an inadequate and unattractive room. The person in-Charge is often a clerk or an indifferent teacher who does this on part-time basis and has neither a love for books nor knowledge of library technique. Naturally, therefore, there is nothing like an imaginative and well-planned library service which could inspire students to read and cultivate in them a sincere love of books."

—Report of the Secondary Education Commision, p. 180.

(5) बालकेषु शब्दकोषस्य सन्दर्भपुस्तकानामुचितप्रयोगकरणस्य कुशलतायां विकासः सामान्यज्ञाने वृद्धिश्च।

(6) बालकेषु सहयोगिदृष्टिकोणस्य विकासनं तथा च नागरिकदायित्वानि प्रति जागरणम्।

(7) अध्यापकानां विषयज्ञानस्य सामान्यज्ञानस्य च पूर्तिः, तेषाङ्कृते नवीनतम-शिक्षणविधीनां सूचनाप्राप्तेः साधनप्रदानम्।

केषाञ्चित् पुस्तकानां संग्रहमात्रमेव पुस्तकालयो न भवति। बालकेभ्यः शैक्षिक-कार्यक्रमं रुचिकरं बोधगम्यञ्च कर्तुमपि पुस्तकालयस्योचितव्यवस्था भवितव्या। सन्दर्भेऽस्मिन् प्रधानाध्यापकस्य महत्त्वपूर्णदायित्वं भवति। पुस्तकालयस्य कृते प्रधानाध्यापकः पर्याप्तस्थानस्य, सज्जायाः, उचितवातावरणस्य योग्य प्रशिक्षित-पुस्तकालयाध्यक्षस्य उपयोगिपुस्तकानाम् अन्याध्ययनसामग्रीणाञ्च व्यवस्थां कुर्यात्। एतेषां सर्वेषां तथ्यानां विस्तृतविवेचनमधः क्रियते -

पुस्तकालयकक्षः सज्जा च -

उत्तमपुस्तकालयस्य महत्त्वपूर्णतत्त्वमिदं वर्तते यत् तस्य समीपे पर्याप्तस्थानं भवेत्। यदा विद्यालयभवनं निर्मीयते तदानीं पुस्तकालयायोपयुक्तस्थानं प्राप्तुं शक्यते। विद्यालयभवने पुस्तकालयकक्षो नास्ति चेत् पुस्तकालयः एतादृक्कक्षे स्थापयेत् यः कक्षः विस्तृतो भवेत्। पुस्तकालयं सम्भवतः विद्यालयस्य केन्द्रे एव स्थापयेत्। एतदतिरिक्तं विद्यालयं परितः वातावरणं शान्तं भवेत्, पुस्तकालयकक्षेण सहाध्ययनकक्षोऽपि भवेत्। एवञ्च तस्य द्वारमेकं पुस्तकालयेभवितव्यम्। पुस्तकालयाध्यक्षस्य कक्षोऽपि पृथगेव भवितव्यः।

पुस्तकालयकक्षे तथा च सहायककक्षेषु प्राकृतिकप्रकाशागमनस्यापि पूर्ण-व्यवस्था भवितव्या। समुचितरूपेण कृत्रिमप्रकाशस्यापि व्यवस्था भवेत्। एषु कक्षेषु भित्तिमञ्जूषानामपि व्यवस्था करणीया। एतेषां कक्षाणां स्थलं ध्वनिरोधकं भवितव्यम्। एतदतिरिक्तं पुस्तकालयाय विद्यालये आकर्षकस्थानं भवितव्यम्। पुस्तकालयः सुसज्जितो भविष्यति तदैव छात्रास्तत्र समायास्यन्ति, अतः एषः कक्षः सुसज्जितो भवितव्यः। अस्य सज्जायां छात्राणां सहयोगोऽप्यपेक्षितः। यदि छात्राणां सहयोगः प्राप्यते तदा छात्राणां मनःसु स्वत एवेदमायास्यति यदेषः पुस्तकालयस्त्वस्माकमेव वर्तते। एकस्मिन् उत्तमपुस्तकालये पुस्तक-पत्र-पत्रिकातिरिक्तमधोलिखिता सज्जापि भवितव्या-

(1) पठनार्थमुत्पीठिका :- एतासामाकारः 3' × 5' भवितव्यः - एतासां उच्छ्रायत्वनिर्धारणं तेषां बालाकानामनुगुणं स्यात् यैः इमाः प्रयुज्यन्ते।

(2) आसन्दिका :- एतासामुच्छ्रायत्वमुत्पीठिकानां समानान्तरं भवितव्यम्।

(3) पत्रिकाः, समाचार-पत्राणि, मानचित्राणामाधारः।

(4) पुस्तकालयाध्यक्षस्योत्पीठिका।

(5) पत्रक-तालिकामञ्जूषा (Card-Catalogue Case)।

(6) पुस्तकानामादानप्रदानस्थानम् (काउंटर)

(7) घटिका।

(8) सूचनापट्टः।

(9) पुस्तकानाङ्कृते वस्तुधान्यः।

पठनयोग्यसामग्रीणाञ्चयनम् -

अध्ययनसामग्र्याः उपयुक्ततायाम् अधिकांशतः पुस्तकालयस्य महत्त्वं निर्भरं वर्तते। एषाञ्चयनसमये विद्यालयस्यावश्यकताः ध्यातव्याः। उत्तमपुस्तकालयः विद्यालयस्य प्रतिविभागं, प्रतिविषयं, प्रतिक्रियाञ्चावश्यकताः पूरयति। पुस्तकालयस्य महत्त्वं तथा चावश्यकतानां पूर्त्यर्थं पुस्तकालये उपयुक्ताध्ययनसामग्री अत्यावश्यकी भवति। अत्र प्रश्नोऽयं समायाति यत् काऽध्ययन सामग्री समीचीना वर्तते? वस्तुतः सम्बन्धेऽस्मिन् नैकोऽपि निश्चितो नियमः येन सामग्री चेतुं शक्यते। परन्तु निम्नाङ्किताः केचित् सामान्यसिद्धान्ताः सन्ति यान् सिद्धान्तान् ध्यात्वोपयुक्ताध्ययनसामग्र्याः चयनं कर्तुं शक्यते -

(1) अध्ययनसामग्रीचयने बालकानां रुचय आवश्यकताश्चावधेयाः। तथ्यमिदं ध्यात्वा पुस्तकालयस्य कृते विषयसम्बन्धिपुस्तकानि, सन्दर्भपुस्तकानि, कथासंग्रहः विभिन्नकुशलतासम्बन्धिविश्वसाहित्यं बालकेषु निरीक्षणात्मप्रवृत्ति-मानवीयगुण-नागरिक-सामाजिकादर्शानां विषये पुस्तकानि चेतव्यानि। एतदतिरिक्तं बालकानां वयोऽपि ध्यातव्यम् अर्थात् वयोऽनुगुणमपि पुस्तकानाञ्चयनं करणीयम्। विकासस्य प्रत्येकस्तरे बालकस्य स्वात्मनः काचित् विशेषताः भवन्ति। ताः विशेषता अपि ध्यातव्याः।

(2) अध्ययनसामग्रीचयने शिक्षकाणामप्यावश्यकता अवधेयाः अर्थात् तेषां दृष्टिकोणेनापि पुस्तकानि भवितव्यानि। एतदतिरिक्तं तेषां शिक्षकाणां विषयावश्यकता

अपि रक्षणीयाः।

(3) पुस्तकालयाध्यक्षो विद्यालयाधिकारिणश्चास्मिन् तथ्ये ध्यानं दद्युर्यत् पुस्तकालयः पठनाय वर्तते न तु प्रदर्शनाय। अतस्ते पुस्तकानां संख्योपरि बलं न दत्त्वा तेषां गुणेषु बलं दद्युः। यतो हि एकमेवोत्तमं पुस्तकं सहस्रनिम्नपुस्तकेभ्योऽपि श्रेष्ठं भवति।

(4) पुस्तकचयनकालेऽवधेयम् यत् –

(1) पुस्तकानां बाह्यस्वरूपम्।

(2) आवरणम् – अस्मिन् सम्बन्धे आवरणस्य सुदृढतायाः उपरि ध्यानं दद्यात्।

(3) कर्गद प्रकृतिः।

(4) मुद्रणस्य स्पष्टता–अस्मिन् सम्बन्धे बालानां वयो ध्यातव्यम्। शिशूनाङ्कृते स्थूलमुद्रणं तथा च यूनाङ्कृते सामान्यमुद्रणं भवितव्यम्।

(5) भाषा, शैली, विषय–प्रतिपादनं, एवञ्च तस्य निष्पक्षता।

(6) पुस्तकानां लेखकाः, तथा च तेषां लेखकानामनुभवः प्रसिद्धिश्च।

(5) विद्यालयाधिकारिणां समीपे पुस्तकानि क्रेतुं स्वल्पमेव वित्तं भवति। अतः अनेनैव वित्तेनोत्तमपुस्तकानि क्रेतव्यानि। अस्य कृते तैरध्यापकैः विभिन्नपुस्तक–विक्रेतृभिः सह मूल्य–अपकर्षयोर्विषये वार्ताः कर्त्तव्याः।

पुस्तकानाञ्चयनस्य कार्यभारः एकस्मिन्नेव जने न भवितव्यः, अपितु तत्र लोकतन्त्रीय दृष्टिकोणं भवेत्। अस्य कार्यस्य सहायतायाः कृते एका पुस्तकालय–समितिः निर्मातव्या। यस्यां समित्यां पुस्तकालयाध्यक्षातिरिक्तं शिक्षकछात्रयोः प्रतिनिधयोऽपि भवेयुः। अस्याः समितेः सहाय्येन बालकानां रुच्यावश्यकतयोरपि ज्ञानं भवति। अनेनैको लाभोऽयमपि वर्तते यत् प्राप्तधनराशेः सर्वेषु वर्गेषु आवश्यक–तानुसारं स्वत एव विभाजनं भविष्यति।

समाचारपत्र–पत्रिकाणाञ्चयनम् –

प्रत्येकस्मिन् पुस्तकालये पत्र–पत्रिकाणाञ्चयनं बालानां रुच्यनुसारमेव भवितव्यम्। आसु पत्रिकासु काश्चित् मनोरञ्जनपरकाः काश्चिच्च विषयसम्बन्धिन्यः भवितव्याः। प्रत्येकऽस्मिन् विद्यालये एकाधिकसमाचारपत्राणि भवितव्यानि। एतदतिरिक्तं स्थानीयसमाचारपत्रं पुस्तकालयाय क्रेतव्यम्। शिक्षकाणां दृष्टिकोणत्वात् विषयसम्बन्धितपत्रिका अप्यानेतव्याः। यासु पत्रिकासु नवीनज्ञानस्य शैक्षिकसिद्धान्तानां,

शिक्षण-विधीनाञ्च विवेचनं भवेत्।

पुस्तकालयाध्यक्षस्य कार्याणि -

यथा शिक्षकवर्गः विद्यालयं निर्माति तथैव पुस्तकालयाध्यक्षः पुस्तकालयं प्रकाशयति। यथा पुस्तकालयाध्यक्षस्तथैव पुस्तकालयो भविष्यति। यदि पुस्तकालये उत्तमपुस्तकानां संकलनं, अध्ययनकक्षः, सर्वा सामग्र्यः अपि वर्तन्ते तथापि तस्मिन् कुशलपुस्तकालयाध्यक्षः यदि नास्ति तदैतत् सर्वं निष्फलमेव। अतः प्रति विद्यालयं प्रशिक्षितपुस्तकालयाध्यक्षस्यावश्यकता भवति। पुस्तकालयाध्यक्षाणां नियुक्तिः पूर्णकालिकरूपेण भवितव्या। प्रायःअस्माकं विद्यालयेषु अंशकालिकरूपेण पुस्तकालयाध्यक्षाणां नियुक्तिर्भवति। तथा च तदभावे कश्चिदध्यापक एव पुस्तकालयाध्यक्षस्य कार्यं सम्पादयति। किन्त्वेतादृशी व्यवस्था नहि सन्तोषयोग्या यतो ह्येतादृश्या व्यवस्थया पुस्तकालयस्य सदुपयोगो न भवति। फलस्वरूपं पुस्तकालयो निजोद्देश्यानि पूरयितुमशक्तो भवति। पुस्तकालयस्य सफलता कुशलसेवया एव जायते। एतत् तदैव भविष्यति यदा पुस्तकालये एकः प्रशिक्षितोऽध्यक्षो भवेत्। पुस्तकालयाध्यक्षस्य वेतनसेवादि शिक्षकस्य सममेव भवितव्यम्। यतो हि तस्य कार्यं तावदेवमहत्त्वं भजते यावदध्यापकस्य कार्यम्। ते शिक्षका इव भवन्ति। उदाहरणार्थम् - उत्साहः, चातुर्यं, सहृदयता, अभिगम्यता (Approachability) मनः शान्ति (Poise)। तेषु एतादृशाः गुणाः भवन्ति। यतो हि स संस्थायां व्यावसायिकप्रशासकीयकार्याणि सम्पादयति। स विद्यालयस्य प्रतिभागमपि सेवते। तथा च बालक-बालिकानां सहायतार्थं तेषां रुचीनां प्रत्येकक्षेत्रे विस्तृतचर्चां करोति। पुस्तकालयाध्यक्षस्य निम्नलिखितकार्याणि महत्त्वपूर्णानि सन्ति-

(1) पुस्तकानां, पत्र-पत्रिकाणाञ्च वर्गीकरणम्।

(2) उत्तमपुस्तकानां प्रचारं कुर्यात् शिक्षकेषु छात्रेषु च।

(3) बालकेभ्यः शिक्षकेभ्यश्च पठन-पाठनाय पुस्तकप्रदानं लेखापनञ्च।

(4) विभिन्नस्तरीयबालकानाङ्कृते उत्तमपुस्तकानां सूचिनिर्माणम्।

(5) पुस्तकालये आगतानां नवपुस्तकानां विषये सूचनापट्टे सूचनाप्रदानं छात्रेभ्यः।

(6) बालकेभ्यः पुस्तकानां विषये परामर्श-प्रदानम्। एतदतिरिक्तं वैयक्तिक-सामूहिकयोजनाः क्रियान्वेतुं येषां वस्तूनामावश्यकता भवेत् तद्विषये वार्ताकरणम्।

(7) पुस्तकालयस्य सुव्यवस्थापनम्।

पुस्तकालयस्याधिकाधिकोपयोगाय प्रोत्साहनम् -

प्राय उच्यते यत् पुस्तकालय एको विश्वविद्यालयो भवति। परन्तु कथनमिदं पूर्णतया नास्ति सत्यम्। केवलमेतदांशिकसत्यम्। यद्यस्माकं समीपे सुव्यवस्थित-पुस्तकालयकक्षः, मूल्यवतीसज्जा, सर्वोत्तमपुस्तकानि, पत्र-पत्रिकाः कुशल-पुस्तकालयाध्यक्षश्चेति सर्वं भवति चेदपि यदि वयं पुस्तकालयस्योपयोगं न कुर्मस्तदा नास्ति किञ्चिदपि तस्यौचित्यम्। प्रायः दृश्यते यत् विद्यालयेषु समधिकं बालकाः पुस्तकालयं न प्रयुञ्जते। पुस्तकालयानां स्थापना केवलं प्रदर्शनायैव न क्रियतेऽपितु तद्उपयोक्तुं क्रियते। यद्येवं कथ्यते यत् ''यस्य पुस्तकालयस्य प्रयोगः क्रियते स एव विश्वविद्यालयो वर्तते'' तदैवोचितम्। पुस्तकालयस्याधिकाधिक प्रयोगं प्रोत्साहयितुं पुस्तकालयाध्यक्षः विद्यालयाधिकारिणश्चाग्राङ्कितसाधनानि प्रयुञ्जीरन् -

(1) पुस्तकालयदिवसस्यायोजनं भवेत्।

(2) सूचनापट्टे पुस्तकानां मुखपत्रस्य, पुनरीक्षणस्य अध्ययनसामग्रीणां सूच्याः तथा चान्यरोचकसामग्रीणां प्रदर्शनम्भवेत्।

(3) पुस्तकानां विषयानुसारं प्रदर्शनं स्यात्।

(4) वस्तुदानिषु तेषां विषयसामग्रीणां सूचिकापि भवितव्या।

(5) विभिन्नमहत्त्वपूर्णप्रकरणेषु पुस्तकानां सूचिकां निर्माय तेषां प्रयोगः प्रोत्साहनीयः।

(6) पुस्तकालयाध्यक्षः प्रत्येकपाठके व्यक्तिगतरुचिं प्रदर्शयेत् । एवञ्च तैः पाठकैः सह सद्व्यवहारं कुर्यात्।

(7) विभिन्नपुस्तकानां विषये संक्षेपतः परिचयो दद्यात्। एवञ्च पुस्तकालयस्याधिकाधिकप्रयोगं प्रोत्साहयेत्।

(8) बालकानां पुस्तकालयसमितिरपि भवितव्या। यस्याः प्रमुखं कार्यं बालकेषु पुस्तकालयं प्रति रुचिजागरणम् प्रयोगाय प्रचारश्च स्यात्।

(9) शिक्षकाणामपि एका पुस्तकालयसमितिः भवेत् या पुस्तकालयाध्यक्षाय पुस्तकचयने, पुस्तकालयीयप्रशासने च परामर्शं दद्यात्।

(10) कक्षापुस्तकालयाः भवेयुः। एते पुस्तकालयाः कक्षाध्यापकाधीनाः भविष्यन्ति। एषु समग्रविषयाणां बालस्तरानुसारं पुस्तकानि भवितव्यानि। एतैः पुस्तकालयैः बालकेषु पठन-पाठनप्रवृत्तेः विकासो भवेत्। एषः पुस्तकालयः

केन्द्रीयपुस्तकालयस्याङ्गमेव भविष्यति। अनेन बालकेषु स्वाध्यायभावनाया: विकास: कर्त्तुं शक्यते।

(11) पुस्तकालयस्याधिकाधिकप्रयोगं प्रोत्साहयितुं विषयपुस्तकालया अपि महत्त्वपूर्णा भवन्ति। अनेन बालकेषु विशेषरुचीनां विकासो भवति। तथा च स्वाध्याय-प्रवृत्तेरपि विकासो भवति। विषय-पुस्तकालये विषयसम्बन्धिपुस्तकानि पत्रिकाश्च भवन्ति। अनेन छात्रशिक्षकयोर्मध्ये सम्बन्ध: स्थाप्यते।

प्रधानाध्यापकस्य पुस्तकालयसङ्घटने प्रशासने च कार्यभागः -

वस्तुत: विद्यालयस्य प्रतिक्रियायां सङ्घटनप्रशासनयोरन्तिमं दायित्वं प्रधाना-ध्यापकस्योपरि एव भवति। प्रधानाध्यापक: पुस्तकालयस्योपरि अधिकाधिकं ध्यानं दद्यात्। पुस्तकालय: बौद्धिकप्रयोगशाला वर्तते। यदि प्रयोगशालाया: उचितव्यवस्था न कृता तदा शैक्षिककार्यक्रम: सफलो न भवति। सम्बन्धेऽस्मिन् प्रधानाध्यापकस्य प्रमुखं कर्त्तव्यं वर्तते यत् स: यदा कदा पुस्तकालयं गत्वा तं निरीक्षेत। पुस्तकालयाध्यक्षस्य काठिन्यानि परामर्शाञ्च शृणुयात्। एतदतिरिक्तं स: क्रेयपुस्तकसूचिकां पश्येत् समये-समये च पञ्जिका: निरीक्षेत यत्र बालानां कृते दीयमानपुस्तकानि लेखबद्धानि वर्तन्ते। स: एतद् दृष्ट्वा अवगच्छेत् यद्बालका: कीदृशानि पुस्तकान्यध्येतुं प्रभवन्ति। एतादृशरुची: ज्ञात्वा तेषाङ्कृते यथासम्भवं परामर्शं दत्वा सन्मार्गस्य निर्माणं कुर्यात्।

प्रधानाध्यापकोऽपि बालकै: पुस्तकालयस्य समधिकप्रयोगार्थं महत्त्वपूर्णं प्रयासं कुर्यात् एतदर्थं स विद्यालयपुस्तकालयं सुदीर्घावकाशकालेऽपि उद्घाटयेत्। एतदतिरिक्तं समयतालिकायां विभिन्नकक्षाणाङ्कृतेऽस्य प्रयोगार्थं समयं निर्धारयेत्। बालकानां माध्यमेन एकस्या: पञ्जिकाया: निर्माणं कारयेत्। यत्र एते छात्रा एतादृशपुस्तकानां नाम, लेखकनाम, महत्त्वपूर्णमुदाहारणादिकं लिखेयु:, येषां तेऽध्ययनं कृतवन्त:। समये-समये शिक्षका अपि एतादृशपञ्जिकानां निरीक्षणं कुर्यु:।

प्रधानाध्यापक: पुस्तकालयस्याभिवृद्धये विद्यालयस्य आय-व्ययपत्रकत: उदारतया धनं दद्यात्। स्थानीयसंसाधनानामपि समधिकं प्रयोगं कुर्यात् यदि नगरे कश्चिद सार्वजनिकपुस्तकालयश्चेद् वर्तते तर्हि स: तदधिकारिभि: सह सम्पर्कं कुर्यात् स्वविद्यालयस्थबालकै: तत्प्रयोगार्थं स्वीकृतिं प्राप्नुयात्। यदि विद्यालयस्यार्थिक-स्थिति: न्यूना वर्तते तर्हि स: सार्वजनिक-पुस्तकालयस्याधिकारिणां सहयोगेन पुस्तकानां

पत्रिकाणां चाभावमपाकुर्यात्। सः तेभ्यः परामर्शं दत्वा महत्त्वपूर्ण–दुर्लभ–पुस्तकानां व्यवस्थां कारयितुं प्रयासं कुर्यात्, बालकाश्च तत्र तेषां पुस्तकानां प्रयोगार्थं सम्प्रेषयेत्।

पुनरावृत्तिप्रश्नाः

1. पुस्तकालयः विद्यालयस्य हृदिति कथ्यते। कथनमिदं स्पष्टयन्तु।

2. 'आधुनिकविद्यालयपुस्तकालयः आवश्यकसेवारूपेण स्वीक्रियते' कथनमिदं तर्केण स्पष्टयन्तु।

3. भारते माध्यमिकविद्यालय–पुस्तकालयानां स्थितिः कीदृशी वर्तते, संक्षेपेण वर्णयन्तु।

4. विद्यालय–पुस्तकालयस्य कान्युद्देश्यानि सन्ति?

5. पुस्तकालयकक्षस्य स्थितिं संक्षेपेण वर्णयन्तु।

6. पुस्तकालयाय अध्ययनसामग्र्याः चयनसमये भवन्तः कान् बिन्दून् प्रति ध्यानं दास्यन्ति?

7. सफलपुस्तकालयाध्यक्षस्य कृते व्यक्तौ केषां गुणानामावश्यकता भवति?

8. भवन्तः पुस्तकालयाध्यक्षेण केषां कर्त्तव्यानां पालनस्यापेक्षां कुर्वन्ति?

9. भवन्तः पुस्तकालयस्य अधिकाधिकोपयोगाय केषामुपायानाम् अनुसरणं करिष्यन्ति?

10. प्रधानाध्यापकस्य पुस्तकालयसङ्घटने प्रशासने च भूमिका का?

लेखार्थप्रश्नः

विद्यालयपुस्तकालयं साहित्यिकबौद्धिकजीवनस्य केन्द्रं निर्मातुं पुस्तकालय–सज्जीकरणाय भवन्तः कान् प्रयत्नान् करिष्यन्ति?

9

विद्यालय-छात्रावासः

(School - Hostel)

"It must always be remembered that the boarding house is taking the place of house for a considerable portion of the pupil's year and it should, therefore, be made as attractive as possible."

– W.M. Ryburn

भारते सर्वत्र निःशुल्क-सार्वभौमिक-प्राथमिकशिक्षादानमनिवार्यं भवेद्, इति प्रस्तावानन्तरं माध्यमिकशिक्षायाः प्रसारोऽपि तीव्रगत्या सम्भवेत्। परन्तु माध्यमिकोच्चमाध्यमिकशिक्षायै विद्यालयाः प्रतिग्रामं तु भवितुं नार्हन्ति। अतोऽस्त्यावश्यकमिदं यत् यत्र माध्यमिकविद्यालयः, उच्चमाध्यमिकविद्यालयो वा भवेत् तत्रालवालस्थ-छात्राणामावश्यकतापूर्तिं सैव कुर्यात्। यदीदृशो विद्यालयो ग्रामान्नगराद् वा दूरे विद्यते, तदा छात्राः प्रतिदिनं गमनागमने काठिन्यमनुभवन्ति। अतोऽत्र विद्यालयप्रबन्धकैः सम्यक्तया विचिन्त्य छात्राणां भोजनावासादिव्यवस्था विद्यालयसमीपे कर्त्तव्या। तथा च विद्यालयछात्रावासेष्वेव भवितुं शक्नोति। गृहे ये छात्रा अध्ययनानुकूल-सुखद-वातावरणं न लभन्ते ते छात्रावासे स्थातुं शक्नुवन्ति। विद्यालयछात्रावासस्तेषां छात्राणामावश्यकतां पूरयति येषामभिभावकानां सेवाकाले स्थानान्तरणं भवति।

अभिभावकानां नवस्थितिः छात्रस्याध्ययने व्यवधानमुत्पादयति। छात्रावास-व्यवस्थयोक्तकठिनतायाः निवारणं भवितुं शक्यते। अतः छात्रावासो भवति महत्त्वपूर्णैकावश्यकसंस्था शिक्षाक्षेत्रे।

नेदं कथनमनुपयुक्तमस्ति यदेक उत्तमः छात्रावासः शिक्षायां महत्त्व-पूर्णमुत्तरदायित्वं निर्वहति। बालकानां शारीरक-मानसिक-नैतिकादीनां सर्वेषां पक्षाणां विकासाय छात्रावासे सुविधाः प्राप्नुवन्ति छात्राः। सामान्यतया तु इमाः सुविधाः गृहे न लभन्ते छात्राः। शारीरकविकासाय पौष्टिकभोजनं, जलं, व्यायामशालां, क्रीडास्थानं छात्रावासव्यवस्थायां छात्राः प्राप्नुवन्ति। मानसिकविकासाय छात्रावासे पुस्तकालयस्य, वाचनालयस्याध्ययनस्य च समुचितव्यवस्था क्रियते। नियमितदिनचर्यया, उपयुक्तप्रवृत्तिभिः छात्राः छात्रावासे नैतिकविकासं प्राप्नुवन्ति। छात्रावासे छात्राः आत्मविश्वासात्मनिर्भरतादिगुणान् प्राप्नुवन्ति, स्वानुशासितं जीवनञ्च लभन्ते।

छात्रावासीयजीवनोपयोगितायाः विषये रूसो महाभागाः लिखन्ति – "बालकाः परस्परं यत्शिक्षन्ते, छात्रावासे क्रीडाङ्गने च तत् विद्यालयशिक्षातः शतगुणमधिकं भवति।"[1]

छात्रावास-स्थितिः, भवनं, सज्जा च –

वास्तविकतायामुत्तमगृहस्थानापन्नो भवति छात्रावासः। सामान्यगृहापेक्षयोत्तम सुविधाप्रदानेन महत्त्वपूर्णं कार्यं सम्पादयितुं शक्नोति छात्रावासः। अतश्छात्रावासस्य स्थापना विद्यालयसमीपे शुद्ध-शान्त-शिक्षोपयोगिवातावरणे हि कर्त्तव्या। छात्रावासो मुख्यमार्गात् दूरे, कोलाहलरहिते, स्वच्छस्वास्थ्यप्रदस्थाने स्थापनीयः। क्रीडाङ्गनं तस्य पार्श्वे भवेच्चेत् सौविध्यं छात्राणां भवति।

छात्रावासभवनाकारस्तूपलब्धभूखण्डानुसारी तथा आवश्यकतानुसारी भवेत्। एककक्ष्यं भवनमेव छात्रावासायोत्तमं भवति। यस्मिन् भूखण्डे छात्रावासभवनं निर्मीयते, तत्र भूखण्डस्य मध्यवेदीं विहाय परितः कक्षनिर्माणं कर्त्तव्यम्। विशाल-मध्यवेदीयुत्तं परितो निर्मितं छात्रावासभवनं सुरक्षादृष्ट्या नियन्त्रणदृष्ट्या चोपयुक्तं भवति। एतादृशभवनस्य निरीक्षणं-नियन्त्रणं प्रभावशालिरीत्या भवितुं शक्नोति। यदि छात्रावासीयछात्राणां संख्या स्वल्पतमा चेत् छात्रावासभवनम् आई-वर्णाकृतिवत्, 'एल' वर्णाकृतिवत् वा निर्मातुं शक्नुमः।

आधुनिकदृष्ट्या तु छात्रावासाः परिवारस्थानीयाः भवेयुः। यद्येवं चिन्तयामः तदा तु छात्राणाङ्कृते कुटीराणि स्युः। यथा प्राचीने वैदिककाले गुरुकुलव्यवस्थायां छात्राः कुटीरेषु वसन्ति स्म। एकस्मिन् कुटीरेऽष्टानां छात्राणामधिकया द्वादशछात्रा-णामावासव्यवस्था भवेत्। एवं छात्रसंख्यानुरूपमेव कुटीरसंख्यायां वृद्धिरपि भवेत्। प्रतिकुटीरं शयनाशनादिव्यवस्था पृथगेव स्यात्। छात्रकुटीरेषु वसतः छात्रान् प्रबोधयितुं तेषां कुटीराणां समीपेऽध्यापकाय अप्येकं कुटीरं निर्मितं स्यात् एवं छात्राः अध्यापकाश्च विशालकुलमिव मिलित्वा निवसेयुः। यथा – पारिवारिकाः सदस्याः मिलित्वा गृहव्यवस्थां कुर्वन्ति तथैव छात्रा अध्यापकनिर्देशने, कुटीरमार्जन-सज्जा-भोजनजलादिसर्वकार्याणि सम्पादयेयुः। अस्यां पद्धतौ प्रतिकुटीरे छात्राणां पथप्रदर्शनं भिन्न-भिन्नशिक्षकैः कर्तुं शक्यते चेत्, अधुनाऽपेक्षिता प्रबोधनवर्गपद्धतिः (Tutorial Method) कुटीरपद्धत्या पर्याप्तरूपेण क्रियान्विता भवितुं शक्नोति।

---

1. "The lessons that boys get from each other in the playing fields and the hostel are a hundred times useful to them than lessons given in schools." - **Rousseau.**

छात्रावासभवनं भवेत् कीदृशमपि किञ्च तस्मिन् आवश्यकतानुसारं शयानागार (Dormitory) व्यवस्था, पाकशाला–भोजनालय–स्नान–शौचालयानां व्यवस्था स्यात्। अतः परमपि अधस्तनप्रकारक–कक्षाणां समुचितव्यवस्था छात्रावासेषु परमावश्यकी विद्यते –

(1) सामान्यकक्षः (Common Room) – कक्षेऽस्मिन् अवकाश–समयसदुपयोगचिकीर्षया छात्राः शारीरकश्रमजनितकष्टापनोदाय परस्परं वार्तालापाय चोपवेष्टुमर्हन्ति। छात्रमनोरञ्जनायान्तरिकक्रीडाणां व्यवस्थापि कर्तव्या। युगानुरूपा कक्षसज्जा स्यात्। कक्षेऽस्मिन् आकाशवाणी–दूरदर्शनाद्युपकरणानि भवेयुः। यद्ययं कक्षो विशालश्चेत् गोष्ठी–कविसम्मेलन–वादविवादप्रतियोगितादिक्रियाकला–पानामायोजनमपि कक्षे भवितुमर्हति।

(2) वाचनालयः – छात्रावासे वाचनालयस्यापि महत्यावश्यकता भवति, अत्र समाचारपत्र–पत्रिकाः, विभिन्नानि ज्ञानवर्द्धनोपयोगिपुस्तकानि च भवेयुः। अवकाशसमयस्य सदुपयोगं कर्तुं छात्राः वाचनालयमपीच्छन्ति।

(3) अतिथिकक्षः – ये छात्राः छात्रावासे निवसन्ति, तेषाम् अभिभावका अपि तान् सम्मिलितुं समायान्ति। अतस्तेषाङ्कृतेऽन्यागन्तुकानाञ्च कृतेऽयं कक्षः छात्रावासेऽवश्यमेव भवेत्। अनेन विद्यालयपरिवारं प्रति सामान्यजनोऽपि समाकृष्टो भवति, सामाजिकसद्भावना च विकासमायाति।

(4) चिकित्सालयः – छात्रावासे प्राथमिकोपचारप्राप्त्यर्थं छात्रावासीय–छात्राणाङ्कृतेऽस्यावश्यकता नितरां विद्यतैव। अस्मिन् छात्रावासीयचिकित्सालये एकः कक्षः ईदृशोऽपि भवेत्, यत्रास्वस्थबालकाः विश्रामं कुर्युः। अस्य कक्षस्यावश्यकता विशेषत एतदर्थमस्ति, यत्रच्छात्रावासीयान्यछात्राणां कार्यक्रमाः निर्बाधं भवेयुः।

(5) छात्रावासाध्यक्षकक्षः – विद्यालय–छात्रावासे छात्रावासाध्यक्षस्य कक्षोऽपि पृथगेव भवेत् यत्राध्यक्षः समुपविश्य छात्रावासप्रशासनिककार्याणि कर्तुं प्रभवेत्। छात्रावासस्य गतिविधिनियन्त्रणेऽपि अस्य कक्षस्य महत्यावश्यकता विद्यते। छात्रावासाध्यक्षस्यावासोऽपि छात्रावाससमीपे एव स्यात्। अनेन सः छात्रावासनियन्त्रणे सौकर्यमनुभवति, समये–समये छात्रावासनिरीक्षणं कर्तुं शक्नोति। पुनश्च छात्रावासे समुत्पन्नकठिनतानिवारणेऽपि सः समर्थो भवति।

(6) अन्यकक्षाः – उपर्युक्तेभ्यः कक्षेभ्योऽतिरिक्तोऽन्यश्चैको कक्षो विद्यालयीयछात्रावासपरिसरेऽपेक्षते, यस्मिन् छात्रावासीयोपयोगिसामग्रीणां स्थापनस्य व्यवस्था स्यात्। छात्रावास–सेवकानामावश्यकावासव्यवस्थार्थमपि कक्षाणां व्यवस्था

छात्रावासे भवेत्।

एषु समस्तेषु कक्षेष्वपेक्षितरूपेण प्रकाशस्य शुद्धवायोश्च सुव्यवस्थया सहावश्य-कोपयोगयोग्या समग्री चापि भवेत्। छात्रावासे खट्वासन्दिका, उत्पीठिका, आलवालम्बरिः छात्रेभ्यः संस्थापिताः स्युः। एषां छात्रोपयोगिसम्भाराणां प्रबन्धेन सह सामूहिकभोजनकक्षे तु आसनपीठिकादीनां, स्नानगृहेषु वस्त्राधार-फेनिलादीनां व्यवस्था स्यात्। शौचालये समुचितप्रवहम् (फ्लश) व्यवस्था करणीया। ईदृशी सर्वविधसुविधायां स्वच्छता-समस्या समाप्तप्राया भविष्यति।

छात्रावासाध्यक्षः तस्य कर्त्तव्यानि च –

शिक्षासाधनभूतछात्रावासस्योपयोगिता पर्याप्तरूपेण छात्रावासाधीक्षकव्यक्तित्वे तस्यात्मगुणेषु वाश्रिता विद्यते। छात्रावासाध्यक्षः छात्रावासीयक्रियाकलापानां केन्द्रबिन्दुः भवति। अध्यक्षेण एव छात्रावासस्य दुश्चरित्रं सच्चरित्रं निर्धार्यते। यदा बालकः छात्रावासे प्रवेशं गृह्णाति तदा सोऽपरिपक्वोऽपि भवति। ईदृश-बालकान् सुयोग्यनागरिकान् कर्तुं सामूहिक-जीवन-योग्यतां तेषूत्पादयितुं छात्रावासाधीक्षक एवाधिकृतोऽस्ति। तस्मादिच्छति लोकः यदयं छात्रान् योग्यनागरिकान् विधातुं प्रयत्नं कुर्यात्। छात्रावासस्य सर्वाः व्यवस्थाः तत्रानुशासनञ्च स्थापयितुं छात्रावासाधीक्षक एव पूर्णतयाधिकृतो भवति। सामान्यतया छात्रावासाध्यक्षपदं विद्यालयस्य कस्मैचिद् अध्यापकायार्प्यते। अध्यक्षपदकार्यभारं यः शिक्षकः स्वीकरोति स आंशिकरूपेण शिक्षणकार्यभारात् मुक्तोऽपि क्रियते। छात्रावासव्यवस्थामुन्नेतुं विद्यालयस्यान्यशिक्षकाः छात्रावासाध्यक्षस्य साहाय्यं कर्तुं शक्नुवन्ति। छात्रावासाध्यक्षः छात्रावासव्यवस्थाकार्येण साकमेव विद्यालयीयकार्याण्यपि करोति। अतः तस्य साहाय्यमपि विद्यालयीयै-रन्यशिक्षकैः अवश्यं करणीयम्। सहयोगेनैव छात्रावासाध्यक्षः स्वकीयं दायित्वनिर्वहने समर्थोऽपि भवति। विद्यालयछात्रावासस्य सर्वाः व्यवस्थाः छात्रावासाध्यक्षस्य दृष्टौ स्युः। यतो हि तेनैव सर्वाः व्यवस्थाः नियन्त्र्यन्ते। छात्रावासः गृहरूपं चिकीर्षत्यात्मानं तदा सोऽभिभावको भवेत् छात्राणाम्। मातापितराविव पथप्रदर्शनं, साहाय्यं परामर्शं च लभेत छात्रः छात्रावासे। सुविधाः प्रयच्छेत् याः गृहे छात्राः प्राप्नुवन्ति। सर्वैः प्रयासैः छात्रावासजीवनं पारिवारिकं सम्पादयितुं प्रयत्नोऽपि कर्त्तव्यः छात्रावासाध्यक्षेण।

लोकतन्त्रात्मकवातावरणस्य स्थापनं छात्रावासाध्यक्षस्य महत्त्वपूर्णं कर्त्तव्यमस्ति। एतदर्थं दायित्वविभाजनं करणीयम्। छात्रावासे छात्रसमितयः स्युः दायित्वं च तासु

निक्षिप्य व्यवस्थां सञ्चालयेत् छात्रावासाध्यक्षः। एवं छात्रेषु कर्त्तव्यपरायणता-आत्मनिर्भरता-सहकारितादिगुणाः विकासं प्राप्नुवन्ति। छात्रावासीयछात्राणां भोजन-स्वच्छता-साहित्यिक-सांस्कृतिक-क्रीडादिसमितीः निर्मातुं छात्रावासाध्यक्षः स्वतन्त्रोऽस्ति। एताभिः छात्रसमितिभिः छात्राणां सर्वे क्रियाकलापाः निर्बाधगत्या सम्पत्स्यन्ते। इमाः सङ्घटिताः समितयः स्वकार्यक्षेत्रेऽध्यक्षनिर्देशानुसारं सर्वाणि कार्याणि कर्तुं स्वतन्त्राः स्युः। समये-समये छात्रावासाध्यक्षः संघटितसमितीनां निरीक्षणं सम्पादयेत् कार्याणाञ्च समीक्षणं कुर्यात्। एवं विधया व्यवस्थया छात्राः छात्रावासे निवसन्तोऽपि गृहनिवासमनुभविष्यन्ति। इत्थमनुभवन्तस्ते स्वदायित्वं पूर्णनिष्ठया सम्पादयन्तः छात्रावासप्रतिष्ठामप्युन्नेतुं यतिष्यन्ते। अनेन लोकतान्त्रिकवातावरणेन छात्रेषु सामाजिकतायाः विकासेन सह आज्ञाकारितायाः भावनाप्युदेति। व्यवस्थेयं प्रजातान्त्रिकदेशे अत्यावश्यकी। योग्यनागरिकनिर्मितिरनया व्यवस्थया सारल्येन भवति।

छात्रावासाध्यक्षस्य द्वितीयं महत्त्वपूर्णं कर्त्तव्यं विद्यते छात्रावासे उपयुक्तजीवन-स्तरावस्थास्थापनम्। विषयेऽस्मिन् स पश्येत् यच्छात्रावासे छात्राणां सर्वाङ्गिकविकासाय समुचितव्यवस्था विद्यते न वा? एतदर्थं प्रमुखतया अधोलिखितानि तथ्यान्यवधेयानि -

(1) छात्रावासे प्रतिबालकं समुचितस्थानम् आवश्यकसामग्र्याः च स्युः यथा-उत्पीठिका-आसन्दिका-खट्वाद्याः।

(2) येषु कक्षेषु छात्राः निवसन्ति तेषु प्रकाशस्य शुद्धवायोश्च समुचितप्रबन्धो भवेत्।

(3) निवासकक्षाणां पाकशालायाः शौच-स्नानगृहाणां स्वच्छता व्यवस्था स्यात्।

(4) छात्राणां शारीरकविकासाय क्रीडा-व्यायामादेः व्यवस्था छात्रावासे स्यात्।

(5) सामान्यकक्षस्य वाचनालयस्योचितव्यवस्थापि स्यात्।

(6) बालकेषु सत्प्रवृत्ति-विकासाय समुचितं वातावरणं स्यात् येन तेषु नियमितता-समयनिष्ठता-नियमान् प्रति आज्ञाकारिता-सहयोगभावना सज्जीवन-दृष्टिप्रभृतयो गुणाः स्वतः समुत्पन्नाः भवेयुः।

(7) इदमपि छात्रावासाध्यक्षस्य कर्त्तव्यमस्ति; यत् बालकाः छात्रावासे पुष्टिकरं सन्तुलितञ्च भोजनं लभन्ते न वेति समीक्षेत। तथेदमपि चिन्तनं कुर्यात् यत् भोजनाय छात्रेभ्यो यद्धनं स्वीक्रियते तस्य सदुपयोगो भवति न वा? अध्यक्षः भोजननिरीक्षणं पूर्वसूचनां विनैव यदा कदा कुर्यात्। एवमेव निरीक्षणं पाकशालाया अपि करणीयम्।

(8) विभिन्नपाठ्यक्रमसहगामिक्रियाणां सञ्चालनायोचितव्यवस्था भवेत् चेत्, छात्रावासे तादृश–सुविधा अपि भवेयुः याः प्राप्य छात्राः गृहक्रियाकलापेषु दक्षतां लभेरन्। छात्रेष्वेतदर्थं कक्षमार्जन–कक्षसज्जा–पाकक्रियादीनां दायित्वमपि निक्षेपणीयम्। अनेन लाभप्रदानुभवान् अर्जयिष्यन्ति छात्राः। छात्रावासे छात्राः भोजयन्तु छात्रान्। भोजनपरिवेषणाय छात्रावासे सेवकानां नियुक्तिः न करणीया।

छात्रालयाभिलेखाः –

छात्रालयाध्यक्षेण छात्रावासव्यवस्था–सम्बन्धिनः अभिलेखाः संरक्षणीयाः सन्ति। तेन विभिन्नाभिलेखाः पञ्जिकाश्च सावधानतयावपूरणीयाः। विभिन्नसमिति–पञ्जिकानां निरीक्षणमपि नियमितरूपेण करणीयम्। छात्रावासाभिलेखेषु मुख्याभिलेखाः निम्नलिखिताः सन्ति –

1. सम्पत्ति–पञ्जिका –

इयमपि पञ्जिका विद्यालयसम्पत्तिपञ्जिकेव भवति। अस्यां छात्रावासस्य सर्वाः चलसम्पदः उल्लिखिताः भवेयुः। छात्रावासे उपयोगाय क्रीतवस्तूनामन्यस्मात् स्थानादाप्तवस्तूनाञ्च विवरणं पञ्जिकासु स्यात्। वस्तूनां क्रयतिथिः/अवाप्त–तिथिः, मूल्यादिकं च सर्वमावश्यकं विवरणमपि पञ्जिकायां लेखनीयमस्ति। छात्रावासे, अनुपयुक्त–प्राचीन–जीर्णशीर्णवस्तूनां विक्रयं विनाशं वा प्रधानाध्यापकस्वीकृत्या कर्त्तुं शक्नुमः। जीर्णवस्तु–विक्रयेण प्राप्तं धनं, पञ्जिकायामुल्लेखनीयमस्ति। यदि जीर्णवस्तूनां विनाशः कृतश्चेत् तद्विवरणमपि पञ्जिकायां लेखनीयम्।

2. प्रवेशपञ्जिका –

अस्यां पञ्जिकायां छात्रावासं प्रविविक्षूणां सर्वेषां छात्राणां नामानि, पत्रसंकेताश्च लिख्यन्ते।

3. उपस्थितिपञ्जिका –

छात्रावासे निवसतां छात्राणां प्रतिदिनमुपस्थितिज्ञानमवश्यमेव कर्त्तव्यम्। उभयोः सन्ध्ययोः (प्रातःकाले सायङ्काले च) छात्रोपस्थितिः, छात्रेष्वनुशासनं प्रादुर्भावयति। अतः छात्रावासे छात्रोपस्थितिः (सायङ्कालिकी) रात्रौ नवदशवादने वा भवेच्चेत् उपयुक्तं भवेत्।

4. प्रतिभू–पञ्जिका– (Security Register) –

अस्यां पञ्जिकायां तद्धनं लेख्यं स्यात् यद्धनं, प्रवेशकाले बालकेभ्यः प्रतिभूरिति नाम्ना संस्था गृह्णाति।

5. भोजनालयपञ्जिका –

अस्यां पञ्जिकायां भोजनस्याय-व्यययोः विवरणं लेख्यं भवति। छात्रावासीया-भोजनसमितेः मन्त्री (सैक्रेट्री) अस्याः पंजिकायाः पूर्तिं करोति। भोजनार्थं यद्धनं छात्रेभ्यः समायाति, तस्य, भोजनाय च यद्धनं व्ययीक्रियते तस्यसम्पूर्णं विवरणमस्यां पञ्जिकायां भवेत्।

भोजने यद्धनं व्ययितं तदुचितं न वेति निरीक्षणम्, छात्रेभ्यो यद्धनं भोजननिमित्तकं आगतं तस्योल्लेखः कृतो नवेति, छात्रावासध्यक्षः सूक्ष्मदृष्टया निरीक्षणं कुर्यात् अर्थात् सूक्ष्मेक्षिकयाऽऽयव्यययोः निरीक्षणं छात्रावासाध्यक्षः कुर्यात्।

6. आयव्ययपंजिका (कैशबुक) –

यथा विद्यालये भवति तथैव छात्रावासेऽपि पंजिकेयं स्यात्। अस्यां प्रतिदिनं यः आय-व्ययो भवति, तस्य विवरणं समुल्लिख्यते।

7. विभिन्नसमितिपञ्जिका –

छात्रावासे याः विभिन्नाः समितयो भवन्ति। तासां सर्वासां समितीनां, समितिसदस्यानां च नामानि लिख्यन्तेऽस्यां पञ्जिकायाम्। कदा कस्याः समितेः उपवेशनं सम्पन्नमभूत् उपवेशने किं किं कर्त्तव्यं निर्णीतं सदस्यैरिति सर्वमपि लेखनीयं भवत्यस्यामेव पञ्जिकायाम्।

8. वाचनालयपञ्जिका –

अस्यां पञ्जिकायां वाचनालये समुपलभ्यमानानां समाचार-पत्राणां, पत्रिकाणां, पुस्तकानाञ्च विवरणं लिख्यते।

9. अतिथिपञ्जिका –

छात्रावासीयछात्राणां मित्राणि, अभिभावकाः, सम्बन्धिनो वा तैः मेलितुमायान्ति। अतः एषामतिथीनां विवरणमस्यां पञ्जिकायां भवति। कदा, कः, कस्मात् स्थानादायातः ? कस्य छात्रस्य परिजनः विद्यते ? कस्मिन् कक्षेऽतिथिः स्थास्यति ? कदा च सोऽस्मात् छात्रावासात् गमिष्यतीति सर्वं पञ्जिकायामङ्कितं स्यात्।

छात्रावासाध्यक्षस्य गुणाः –

उपर्युक्तविवेचनेनेदं तु स्पष्टं यत् छात्रावासस्य सर्वभारः छात्रावासाध्यक्षस्कन्धयोः भवति। अतोऽस्मिन् पदे नियुक्तो जनो विशिष्टगुणयुक्तः स्यात्। ये विशिष्टगुणाः छात्रावासाध्यक्षेऽपेक्ष्यन्ते तेषां परिगणनं प्रस्तूयते – प्रशासकीययोग्यता, सामाजिक-ता, मानवीयचिन्तनमुत्तमव्यक्तित्वञ्चेति चत्त्वारो विशिष्टगुणास्तु छात्रावासा-

ध्यक्षेऽवश्यमेव स्युः -

1. प्रशासकीययोग्यता -

छात्रावासे सुव्यवस्थास्थापनायाध्यक्षे कुशलसंघटनकर्तृत्वं कुशलप्रबन्ध-कत्वञ्चापेक्षते।

2. सामाजिकगुणाः -

सहयोग-सहानुभूति-न्यायप्रियतादयो गुणाः सन्ति सामाजिकगुणाः। इमे गुणा अपि छात्रावासाध्यक्षे भवेयुः। यद्यध्यक्षे भवन्तीमे सामाजिकगुणाः तर्हि सहयोगिवातावरणं छात्रावासे निर्मितं भवति। अतः छात्रावासाध्यक्षो भवेत् मृदुभाषी धैर्यवान् निष्पक्षव्यवहारशीलश्च।

3. उत्तमव्यक्तित्त्वम् -

व्यक्तित्त्वस्य मूल्याङ्कनं नेतृत्वक्षमतोत्तमचरित्र-सहनशीलता-स्पष्टचिन्तन-निष्पक्षतादिवैयक्तिकगुणैः भवति। इमे गुणाः व्यक्तित्वं निर्मान्ति। अतः छात्रावासाध्यक्षे इमे गुणाः स्युः। एषां गुणानामभावे, छात्रावासीयजीवनं कथमपि पारिवारिकं नैव सम्पद्यते।

4. मानवीयचिन्तनम् -

मानवप्रकृतेः वैशिष्ट्यस्य परिज्ञानं, मानवीयसम्बन्धानुभवक्षमता च छात्रालयाध्यक्षे भवेत्। उक्तोभयोः गुणयोरभावे न सः छात्रैरभिभावकैः शिक्षकैश्च सह समुचित-सम्बन्धस्थापने सक्षमो भवति। अध्यक्षस्य दृष्टिरुदारापि स्यात्। छात्रस्य योग्यतायां कार्यक्षमतायां च विश्वसेत्। भवेत् सः मनोवैज्ञानिकोऽपि।

बालिकाछात्रावाससम्बन्धीनि कानिचिद् विशिष्टतथ्यानि -

माध्यमिकविद्यालये यदा बालिकाः प्रविशन्ति, तदा ताः द्वादशवर्षदेशीयास्तु भवन्ति। सामान्यतया ताभ्योऽस्मिन् वयसि गृहे गार्हस्थ्यजीवनशिक्षामभिभावकाः यच्छन्ति। अतः छात्रावासेऽपि तासामियं शिक्षा भवेत् इत्येतदर्थं-बालिकाछात्रावासे व्यवस्था स्यात्। गार्हस्थ्यकार्याणां व्यावहारिकं शिक्षणं बालिकाछात्रावासेऽवश्यमेव कर्त्तव्यमस्ति। बालिकाछात्रावासे महत्त्वपूर्णा समस्या तासां सुरक्षायाः विद्यते। अतस्तासां छात्रावासोऽपि सुरक्षितस्थाने भवेत्। छात्रावासः समुन्नताभिः भित्तिभिः परिवृतः स्यात्। छात्रावासस्यैकमेव द्वारं स्यात्। तत्र द्वारे द्वारपालोऽपि नियुक्तः स्यात्। बालिकानां छात्रावासे न कोऽपि जनोऽननुमतः प्रविशेत्।

बालिकाछात्रावासस्य द्वितीया समस्या बालिकासम्बन्धिजनानां भवति। अस्याः

समस्यायाः समाधानाय, बालिकायाः प्रवेशसमय एव पित्रोः सकाशात् ज्ञातव्यमस्ति यद् इयं बालिका केन सम्बन्धिना मिलितुं शक्नोति? अर्थात् के के जना अस्याः सम्बन्धिनः सन्ति? अस्याः स्थानीयसंरक्षकः कोऽस्ति? अवकाशसमये कस्य कस्य सम्बन्धिनो गृहमियं गन्तुं शक्नोति? इति।

छात्रावासीया बालिका अपरिचितेन न मिलेत्। ये जनाः छात्राभिः सह मिलितुमिच्छन्ति तेषां विषये समग्रवृत्तान्तं ज्ञात्वा, आश्वस्तो भूत्वैव मेलनानुज्ञां यच्छेत्। मिलितुमागतस्य जनस्योद्देश्यं किमस्ति, कस्यां तिथौ तस्यागमनं बभूवेत्यादि सर्वमेव पञ्जिकायां लेखनीयम्। आगन्तुकस्यावासव्यवस्था छात्रावासात् पृथक् स्थाने एव कर्त्तव्या। छात्रायाः माता भगिनी वा दूरतो मिलितुमागता यदि तदा तस्या अपि व्यवस्था छात्रावासस्य पृथक् कक्षे करणीया भवति।

आपणं गत्वा क्रयादिकं बालिकाः न कुर्युः। एकाकिनी बालिका क्रयणायापणे न प्रेषणीया। बालिकाभिः सह छात्रावासाध्यक्षा भवेत् अथवा तासां शिक्षिका भवेत्।

ग्रीष्मावकाशं यापयितुं यदि ताः गृहं गच्छन्ति तदा ताः संरक्षिता एव गच्छेयुः अतो दीर्घावकाशात् प्राक् छात्राणां पितरः सूचनीयाः सन्ति। अनेन ते स्वयमागत्याथवा कयापि व्यवस्थया वा ताः गृहं नेष्यन्ति।

बालिकाछात्रावासे, सेवकानामपि समस्या भवति। यथासम्भवं तत्र स्त्रिय एव सेवाकार्याय नियोक्तव्याः सन्ति। क्रयविक्रयादिकार्याय, द्वाररक्षायै वा पुरुषसेवकस्य आवश्यकता भवत्येव। अतः पुरुषस्य नियुक्तिः सेवकत्वेन तत्र सावधानतया कर्त्तव्या।

बालिका छात्रावासेऽपरिहार्याश्चेमे प्रतिबन्धाः, छात्रावासीयजीवनं नीरसं विधातुं पर्याप्ताः सन्ति। तथापि छात्रावासीयाः छात्राः मनोरञ्जनं कर्त्तुं शक्नुयुः इत्येतदर्थं बालिकाछात्रावासे मनोरञ्जन-साधनैः तासां शिक्षणव्यवस्था सम्पादनीया भवति। शिक्षाप्रदचलचित्रप्रदर्शनव्यवस्था, क्रीडाव्यवस्था च बालिका छात्रावासे भवेत्। तथा तत्र समृद्धपाठ्यक्रमसहगामिक्रियाकलापानां रोचक-कार्यक्रमा अपि संचालनीयाः सन्ति। अनेन स्वरुचिपूर्णकार्यक्रमे व्यापृताः छात्राः छात्रावासे सुखमयं जीवनं जीवन्त्यो भावि-जीवनं सुखमयं विधातुं तदनुरूपां शिक्षां प्राप्नुयुः।

पुनरावृत्तिप्रश्नाः

1. छात्रावासस्य का आवश्यकता विद्यते?
2. छात्रावासस्य स्थितिः कीदृशी भवेत्?

3. छात्रावासाकारनिर्धारणे कानि कानि तथ्यानि विचारसरणिमानेतव्यानि सन्ति ?

4. कुटीरपद्धतेः किं वैशिष्ट्यं भवति ?

5. छात्रावासे शयनकक्षेभ्योऽतिरिक्तं कियन्तः कक्षाः भवेयुः ?

6. छात्रावासाध्यक्षस्य कानि कानि कर्त्तव्यानि भवन्ति ?

7. केषामभिलेखानां व्यवस्था छात्रावासेऽवश्यमेव करणीया विद्यते।

8. कुशले छात्रावासाध्यक्षे के गुणाः भवेयुः ?

9. भोजनालयपञ्जिकायाः रक्षणं कस्मात् आवश्यकमस्तीति प्रतिपादनीयम् ?

10. बालिकाछात्रावासव्यवस्थायां किं किं विशेषेण विचारणीयं भवतीति, विवेचनीयम् ?

11. भवन्मते छात्रावासजीवनेन को लाभः भवति ?

लेखार्थप्रश्नः

छात्रावासाध्यक्षस्य ''छात्रावासे निवसत्सु छात्रेषु सामूहिकजीवनं विकासयितुं महत्त्वपूर्णा भूमिका भवति'' इति कथनस्य विवेचनं प्रस्तूयताम्।

10

विद्यालय-कार्यालयः

(School Office)

"It is the ultimate responsibility of the school Headmaster to maintain and preserve the school records properly and as such he should be well conversant with this aspect of school administration. The Headmaster, in no case, can transfer to his clerks or assiatants blame for faulty discharge of what are his own primary responsibilities."

- Dr. Jaswant Singh

विद्यालयकार्यालयस्तत् स्थानं वर्तते यत्र विविधाभिलेखाः, प्रतिवेदनानि, पञ्जिकाश्च सुरक्षिताः भवन्ति। एवञ्च तत्रैव प्रशासकीयनीतीनां विभिन्नविषयाः विविच्यन्ते। एतस्मिन्नेव स्थाने आगन्तुकातिथीनाम् आगमनसमये सत्कारः क्रियते। वस्तुतस्तु विद्यालयीयकार्यालयः प्रधानाध्यापकस्याधारो भवति। कार्यालयोऽयं विद्यालयीयकर्मचारिवर्गाय व्यावसायिककेन्द्रं तथा च सम्पूर्णविद्यालयस्य कृते सेवाकेन्द्रमिव तिष्ठति। अस्य कुशलसङ्घटने प्रबन्धने च सम्पूर्णविद्यालयस्य कुशलप्रशासनमाधारितं करोति।

विद्यालयलिपिका :-

प्रधानाध्यापकस्य सहायतायै विद्यालयकार्यालये आवश्यकतानुसारं लिपिकाः भवन्ति। लिपिकानामभावे प्रधानाध्यापकः कार्यालयस्य बहुमुखिकार्याणि सञ्चालयितुं न शक्नोति, विद्यालयकार्यालये लिपिकस्य प्रमुखकार्याण्यधोऽङ्कितानि सन्ति -

(1) कार्यालयीयकार्याणि, (2) पत्र-व्यवहारः, (3) अभिलेखानां सुरक्षा, (4) टङ्कणप्रतिलिपिकरणञ्च, (5) कोषसम्बन्धिकार्याणि, (6) भाण्डारण व्यवस्थासुरक्षा च, (7) विद्यालयीयभोजनम्, (8) प्राथमिकचिकित्सा।

पत्रावलीपद्धति :-

विद्यालयकार्यालयेषु पद्धतिरियं द्विधा विभक्ता वर्तते यथा -

(अ) क्षैतिजात्मकपत्रावलीपद्धतिः (ब) शीर्षात्मकपत्रावलीपद्धतिः।

(अ) क्षैतिजात्मकपत्रावलीपद्धति :-

अस्याः पद्धत्या अनुसारं काष्ठपेटिकायां विभिन्नोपपेटिकासु सुविधानुसारं

पत्रावल्यः संरक्ष्यन्ते। पेटिकाया एकस्मिन् भागे पत्रावल्याः अभिधानान्यङ्क्यन्ते।

(ब) शीर्षात्मकपत्रावलीपद्धति :-

प्रायः विद्यालयेषु पद्धतिरियं प्रयुज्यते। एतत्पद्धत्यन्तर्गतं विषयसम्बन्धित-पत्रावल्य एकस्मिन्नेव स्थाने स्थाप्यन्ते। एताः पत्रावल्यः वर्णानुक्रमेण व्यवस्थिताः भवन्ति।

विद्यालयाभिलेखाः -

विद्यालयः समाजेन स्थापितैका स्थायिनी संस्था वर्तते। अतस्तस्योत्पत्ति-विकास-दशा-परिस्थित्युद्देश्य-महत्त्वाकाङ्क्षोपलब्धीनां विषयान् ज्ञातुं नियमितलेखाः परमावश्यकतां भजन्ते। एतदतिरिक्तं विद्यालयः स्वस्य कुशलसञ्चालनाय कार्याय च विभिन्ननिकायेभ्यः उत्तरं दातुं स्वोत्तरदायित्वमर्हति। यथा - विद्यालयोऽभिभाव-कानाङ्कृते तेषां बालकानाम् उपयुक्तप्रशिक्षण-निर्देशसर्वाङ्गीणप्रगतिविषये वक्तुमुत्तरदायी भवति। सः शिक्षाविभागं समाजं प्रबन्धसमितिञ्च प्रत्यप्युत्तरदायी भवति। एतानि दायित्वानि निर्वोढुं विद्यालयः बहुपत्रावलीः अभिलेखांश्च व्यवस्थापयति। प्रधानाध्यापकः कार्यनिर्वाहे पञ्जिकानाम् अभिलेखानाञ्च साहाय्यं प्राप्नोति। स एतेषामभिलेखानां माध्यमेनैव शिक्षाधिकारिशिक्षकसमाजादीनां कृतेऽत्युपयुक्तसूचनाःप्रदातुं समर्थो भवति।

विद्यालयाभिलेखानां पञ्जिकानाञ्च निर्माणं संरक्षणञ्च -

(1) विद्यालये यावन्तोऽभिलेखाः पञ्जिकाश्च भवेयुस्तेषामेका सूचिका भवितव्या। तेषां नाम्नां समक्षे तेषाम् अङ्कनं तथा च तस्य विवरणस्य संक्षिप्तलेखो भवेत्। एतदतिरिक्तं तस्य शिक्षकस्य लिपिकस्य वापि नाम भवेत् येन लिपिकेन तदभिलेखः स्थाप्यते।

(2) अभिलेखाः पूर्णाः शुद्धाश्च (Accuracy) भवेयुः किन्तु तेषां शुद्धता एतेषां तत्परतया सह पूर्तिकरणे तथा च नियमितरूपेण निरीक्षणे निर्भरीकरोति। विद्यालयैरन्याधिकारिभिश्च समये-समये तेषां नितरां निरीक्षणं भवितव्यम्।

(3) एतेषामभिलेखानां पञ्जिकानाञ्च निर्माणे स्वच्छता भवेत्। अभिलेख-पूर्तौ यदि काचित् त्रुटिर्भवेत् तदा तत्र तां त्रुटिं कर्तयित्वा निर्माणकर्त्ता निजहस्ताक्षरं कुर्यात्। सर्वे पृष्ठाः सुरक्षिताः भवेयुः।

(4) एतेषामभिलेखानां पञ्जिकानाञ्च स्थापनव्यवस्थैतादृशी भवेत् यदावश्यकतायां सत्यामुपयोगःकर्त्तुं शक्यते। पञ्जिकानां संरक्षणं सुरक्षितविधिना

कर्त्तव्यम्। विभिन्नपत्रावलीनां संरक्षणाय आधुनिकपत्रावल्यावरणस्य (केबिनेट) प्रयोगोऽपि कर्त्तुं शक्यते। आवरणे पत्रावल्यः नामाङ्कनचिटिकान्वितास्स्युः। येनावश्यकतायां सत्यां द्रुतगत्या आवश्यकतथ्यानि अन्वेष्टुं शक्यन्ते। प्राचीनपत्रावल्योऽपि सुरक्षिताः स्युः।

(5) प्रतिवर्षं नवाभिलेखाः पञ्जिकाश्च न भवेयुरपि तु यावन्तः पञ्जिकायाः पृष्ठा रिक्ताः सन्ति तावत्सु एव कार्यं सम्पादनीयम्।

विद्यालयाभिलेखानां पञ्जिकानाञ्चोद्देश्यानि –

(1) शिक्षकेभ्यः बालकानां विषये आवश्यकसूचनाः प्रदाय कक्ष्याशिक्षणे परिष्कारः।

(2) निर्देशने साहाय्यं यथा–बालकानां वर्गीकरणे उन्नतौ व्यवस्थापने च सहयोगकरणम्।

(3) विभिन्नस्तराणां शिक्षाधिकारिणः विद्यालयसम्बन्धिसूचनाः प्रदातुम् आधार–निर्माणम्।

(4) शैक्षिककार्यक्रमस्य मूल्याङ्कने साहाय्यप्रदानम्।

(5) अनुसन्धानकार्येभ्यः सामग्रीप्रदानम्।

विद्यालयाभिलेख–पञ्जिकयोर्मध्ये भेदा :-

विद्यालयाभिलेखाः पञ्जिकाश्चाधोनिर्दिष्टश्रेणिषु विभाजयितुं शक्यन्ते –

(1) सामान्य–वित्तीय–शैक्षिकसज्जा–पत्रव्यवहारसम्बन्धिनः।

सामान्याः एतद्वर्गान्तर्गतमधोलिखिताः लेखाः कार्यपञ्जिकाश्च समायान्ति।

(1) विद्यालयपञ्चाङ्गं, (2) कार्यपञ्जिका, (3) दर्शकाणां विवरणपुस्तिका, (4) सेवापुस्तिका, (5) भवनसम्बन्धि ऋणानां पञ्जिका, (6) शिक्षाधिकारिणा–मादेशसम्बन्धिपञ्जिका, (7) अवकाशपञ्जिका, (8) पाठ्यक्रमसहगामिक्रियानाम् सम्बन्धिपञ्जिकाश्च।

(2) वित्तीया :-

अत्र निम्नलेखा अन्तर्भवन्ति –

(1) आदेशपुस्तिका, (2) आकस्मिकपञ्जिका, (3) शुल्कपञ्जिका, (4) बिलपञ्जिका, (5) दानपञ्जिका, (6) वित्तपुस्तिका, (7) छात्रवृत्तिपञ्जिका, (8) वेतनसम्बद्धपञ्जिका, (9) मासिकयोगस्य वर्गीकृतसारस्य गणनावलिः,

(10) भविष्यनिधिपञ्जिका।

(3) शैक्षिकाः- अत्र वर्गेऽधोनिर्दिष्टपञ्जिकाः समायान्ति -

(1) छात्रोपस्थितिपञ्जिका, (2) शिक्षकोपस्थितपञ्जिका, (3) समय-तालिकासम्बन्धिपत्रावली (कक्षा समयतालिका, शिक्षकसमयतालिका, सामान्यतालिका च), (4) छात्राणां प्रगत्यभिलेखाः, (5) प्रधानाचार्यस्य निरीक्षणपञ्जिका, (6) दण्डसम्बन्धिपञ्जिका, (7) शिक्षण-शुल्कपञ्जिका, (8) प्रवेशपञ्जिका, (9) स्थानान्तरणप्रमाणपत्रपुस्तिका, (10) आन्तरिक-परीक्षासम्बन्धिपत्रावली अंकपञ्जिकाश्च, (11) शिक्षकदैनन्दिनी।

(4) सज्जा-सम्बन्धिन्यः -

(1) विद्यालयसम्पत्तिपञ्जिका, (2) छात्रावाससम्पत्तिपञ्जिका, (3) क्रीडासम्पत्तिपञ्जिका, (4) पुस्तकालयसम्पत्तिपञ्जिका, (5) मूल्यं विना प्राप्तवस्तूनां पञ्जिका, (6) विभिन्नविभागैः (जीव-विज्ञानं, भौतिकशास्त्रं, रसायनशास्त्रम्, इत्यादयः) सम्बद्धसम्पत्तिपञ्जिका।

(5) पत्रव्यवहारसम्बन्धिलेखाः -

(1) पत्रप्राप्तेः पत्रप्रेषणस्य च पञ्जिका, (2) चतुर्थश्रेणी कर्मचारिणां पुस्तिका, (3) शिक्षाविभागेन शिक्षापरिषदा च पत्रव्यवहारसम्बन्धिपत्रावल्यः।

उपर्युक्तपञ्जिकासु प्रमुखपञ्जिकानां संक्षेपतः विवेचनमधः क्रियते। यथा -

(1) विद्यालयीयपञ्चाङ्गम् -

पत्रकमिदं विद्यालयसत्रारम्भात् पूर्वमेव निर्मीयते। पत्रेऽस्मिन् सामान्याः स्थानीयावकाशाश्च, मासिक-सत्रीयार्द्धवार्षिक-वार्षिकसूचनानां प्रस्तुतीकरणस्य तिथयः, बाह्यान्तरिकपरीक्षाणां तिथयः, बाह्यपरीक्षाभ्यः प्रार्थना-पत्रप्रेषणतिथिः, विद्यालयसमितीनां शिक्षकाभिभावकसमुदायानां तथा चान्यसमुदायानां सम्मेलन-तिथयः, विद्यालयीयक्रीडाभ्रमणयोस्तिथयः सामाजिकपरीक्षाणां तिथयश्च भवन्ति।

(2) कार्यपञ्जिका -

विभिन्नघटनानां लेखोऽयं वर्तते। अनेन विद्यालयेतिहासाय सामग्री प्रदीयते। अस्मिन् विशेषघटनानां नवीनपाठ्यपुस्तकानां, यन्त्राणां प्रस्तावना, निरीक्षणाधिकारि-भिस्तथा चान्यजनैः विद्यालयनिरीक्षणं, विद्यालयकार्यस्य होराणां विद्यालयस्य विशेषपरिस्थितीनाञ्च विवरणं प्रस्तूयते। वस्तुत इयं विद्यालयस्य दैनन्दिनी (दैनिकी) वर्तते। अस्यां केवलं तथ्यस्य विवरणं भवति न तु कार्यसम्बन्धे सम्मतीनामभिव्यक्तिः।

(3) प्रवेशपञ्जिका –

पञ्जिकैषा विद्यालयलेखेषु महत्त्वपूर्णोऽभिलेखो वर्तते। अस्मिन्नभिलेखे या कापि प्रविष्टिः क्रियते तस्याः कृते प्रधानाध्यापकः व्यक्तिगतरूपेणोत्तरदायी भवति। अस्मिन् विद्यालयस्य बालकस्य सम्पूर्णविवरणं तद्दिने लेखबद्धः क्रियते यस्मिन् दिने छात्रः प्रविशति विद्यालयम्। शिक्षाविभागीयनियमानुसारं प्रवेशपञ्जिका स्थायिरूपेण स्थाप्यते।

(4) छात्रोपस्थितिपञ्जिका –

प्रतिकक्ष्यं एकोपस्थितिपञ्जिका भवति। यस्यां विद्यालयप्रारम्भसमये तथा चावकाशात् पश्चात् छात्राणां दैनिकोपस्थितिमङ्कयत्यध्यापकः। प्रतिदिनं उपस्थितिसंख्या अन्ते लेखनीया।

(5) शिक्षकोपस्थितिपञ्जिका –

इयं पञ्जिकापि विद्यालयस्य महत्त्वपूर्णाभिलेखो वर्तते। एषा पञ्जिका प्रधानाचार्यस्य कक्षे संस्थापनीया। शिक्षकाः विद्यालयमागत्य सर्वप्रथममस्यां निजहस्ताक्षराणि कुर्युः, हस्ताक्षरकरणस्य समयोऽपि तत्र लेखनीयः। प्रधानाध्यापकः प्रतिदिनं पञ्जिकामिमां निरीक्षेत यदि कश्चिदध्यापको विद्यालयं नायाति तदा पश्येत् यत् तस्याध्यापकस्य अवकाशप्रार्थनापत्रमागतं न वा। अध्यापकाय यादृशोऽवकाशो दद्यात् तादृश एव संकेतस्तत्र तस्य नामाग्रे कुर्यात्।

(6) वित्तपुस्तिका –

वित्तपुस्तिका विद्यालयस्य महत्त्वपूर्णः अभिलेखो भवति। अभिलेखेऽस्मिन् विद्यालयस्य प्रतिदिनसमग्रवित्तीयादान-प्रदानानां प्रविष्टिः क्रियते। अस्मिन् बालकैः सर्वकारेणान्यस्त्रोतोभिश्च प्राप्तधनस्य विवरणम्भवति।

अत्रास्माभिः प्रारूपमेकं प्रस्तूयते –

1	2	3	4	5	6	7	8
तिथिः	विवरणम् (Particulars)	प्राप्तधनराशिः (Amount received)	प्राप्तिचिट्टिकायाः अङ्कः (Receipt No.)	लेखापञ्जिकायाः पत्रम्	प्रदत्तधनराशिः (Amount Paid)	वाउचर क्रमाङ्कः (Voucher No.)	लेखापञ्जिकायाः पत्रम्

(7) सेवापुस्तिका –

अयं प्रत्येकाधिकारिणः शिक्षकस्य निम्नकर्मचारिणश्च सेवाभिलेखो वर्तते। अस्य प्रत्येकप्रविष्टिं प्रधानाध्यापकः प्रमाणीकरोति। एतेषां सतर्कतया स्थापनं कुर्यात्। प्रधानाचार्योऽस्य कृते उत्तरदायी भवति। प्रधानाध्यापकः प्रतिवर्षं तेषां प्रविष्टीः शुद्धतया निष्पक्षतया च पूरयेत्।

सेवापुस्तिकायाः स्थापनेऽधस्तनाः वार्ताः ध्यातव्याः –

(1) प्रविष्टीनाम् अन्याभिलेखानां प्रविष्ट्या सह साम्यं भवेत्।

(2) अस्मिन् नियुक्तितिथिः वेतनवृद्धिः स्थायीकरणम् (Confirmation) आचरणं कार्यस्य गुणात्मकता च इति सर्वं लेखनीयम्।

(3) अस्मिन् दण्डोन्नत्यवनतीत्यादिसर्वेषां विषयाणां पूर्णविवरणं भवितव्यम्।

(4) अस्मिन् स्थानान्तरणस्यापि विवरणं भवेत्।

(8) सम्पत्तिपञ्जिका –

विद्यालयस्य समस्तचलसम्पत्तेरभिलेखोऽयं वर्तते। प्रधानाचार्यः विद्यालयस्य समस्तसज्जायाः संरक्षकोऽस्ति। अतस्तस्येदं परमं कर्त्तव्यमस्ति यत् स विद्यालये भाण्डारणपञ्जिकायाः निर्माणं कारयेत्। यस्यां पञ्जिकायां परिबर्हाणां शिक्षण-यन्त्राणां तथा चान्यसामग्रीणां विवरणम्भवेत्। एतदतिरिक्तं कापि सामग्री विद्यालयस्य कृते क्रीता भवति तस्या अप्युल्लेखस्तत्रभवितव्यः। पुस्तकालयस्य सम्पत्तेरप्येका पृथक् पञ्जिका भवितव्या।

अन्ते वक्तुमिदं शक्यते यत् समस्ताभिलेखानां दायित्वं प्रधानाचार्यस्योपर्येव भवति परन्तु स एतद्दायित्वनिर्वाहे स्वात्मनः सहयोगिभिः साहाय्यं प्राप्तुं समर्थो भवति। छात्रोपस्थितिपञ्जिका, शुल्कपञ्जिका, पाठ्यक्रमसहगामिक्रियासम्बद्ध-पञ्जिकाप्रगत्यभिलेखाश्च शिक्षकैः सम्यग्रीत्या स्थापयितुं शक्यन्ते।

पुनरावृत्ति-प्रश्नाः

1. विद्यालयाभिलेखानां पञ्जिकानाञ्च स्थापना किमर्थं क्रियते?
2. विद्यालयाभिलेखानां महत्त्वं किम्? एतेषां कुशलस्थापनाय भवन्तः कान् प्रयत्नान् करिष्यन्ति?
3. विद्यालयाभिलेखानां पञ्जिकानाञ्च कानि-कान्युद्देश्यानि सन्ति?
4. विद्यालये केषां केषामाभिलेखानां पञ्जिकानां च स्थापना क्रियते।

5. विद्यालय-पञ्चाङ्गं (विद्यालय कैलेण्डर) कदा कथञ्च सज्जीक्रियते।
6. विद्यालये कार्य-पुस्तकस्य स्थापना किमर्थमावश्यकमस्ति?
7. प्रवेशपञ्जिकायाः स्थापने के के बिन्दवः ध्यातव्याः?
8. छात्रोपस्थितिपञ्जिकायाः पूर्त्तये कान् बिन्दून् प्रति ध्यानं देयम्?
9. शिक्षकोपस्थितिपञ्जिकायां केषां बिन्दूनामुल्लेखो भवति?
10. वित्तपुस्तिकायाः पूर्त्तये केषां केषां बिन्दूनां प्रविष्टयः क्रियन्ते?
11. सेवापुस्तिकायाः स्थापने कान् बिन्दून् प्रत्यवधानं दातव्यम्?
12. सम्पत्तिपञ्जिकायां केषां वस्तूनां विवरणं भवति?

लेखार्थप्रश्नाः

भवन्तः प्रधानाध्यापकरूपेण कान् कान् अभिलेखान् पञ्जिकाश्च प्रति ध्यानं दास्यन्ति? किमर्थञ्च? तर्केण स्पष्टयन्तु।

11

विद्यालयस्य आन्तरिककार्याणि तेषां सङ्घटनञ्च

(Organization on the internal functions & Programmes of the School)

"There is a unique responsibility of Secondary School Principals in the development of a good internal programme." **—Faunce**

विद्यालयस्याऽऽन्तरिकसङ्घटनं मुख्यतो विद्यालयस्याऽऽकारे प्रकारे च निर्भरी भवति। यदि काचित् संस्था बहूद्देशीया भवेत्तर्हि तस्यां शालायां विभिन्नविभागाः पृथक्–पृथगध्यक्षाधीना भविष्यन्ति। तेऽध्यक्षाः निजविभागसञ्चालने स्वतन्त्रोत्तर–दायिनश्च भवन्ति। यदि कोऽपि विद्यालयो वृहदाकारो वर्तते तर्हि संस्थाप्रधानो निजकार्यभारं शिक्षकेभ्यो विभज्य समर्पयेत्। दायित्वं द्विविधं भवतः – (1) एकमीदृशं दायित्वं भवति यस्य पूर्तिः केनाप्येकेनैव शिक्षकेण साध्या भवति। (2) अपर–दायित्वमेकाधिकपुरुषैरेव सम्पूरणीयत्वाल्लघुसमित्या पूर्यते।

यद्यपि प्रधानाध्यापकस्समग्रविद्यालयीयकार्यक्रमाणां संघटनार्थं सञ्चाल–नार्थञ्चोत्तरदायी भवति तथापि सुव्यवस्थितरूपेण कार्यसञ्चालनायाध्यापका–नाञ्छात्राणाङ्कर्मचारिणाञ्च सहयोगोऽप्यपेक्षितो वर्तते। विद्यालयस्याऽऽन्तरिककार्य संघटने निम्नलिखितबिन्दवः ध्यातव्याः यथा –

(अ) पाठ्यक्रमसम्बन्धिक्रियाणां सङ्घटनम् –

एतासां क्रियाणां सङ्घटनं सञ्चालनञ्चाध्यापका एव कुर्युः। अस्मिन् सङ्घटने मुख्यतो निर्देशात्मककार्यक्रमेण सम्बद्धाः क्रियाः समाहिता भवन्ति। एतासां क्रियाणां सञ्चालनाय लघुसमितीनां सङ्घटनं क्रियते तासां विवरणमेव प्रस्तूयते –

पाठ्यक्रमसमितिः – समित्यामस्यां विभागाध्यक्षा एव सदस्याः भवेयुः। एषा समितिरेव विभिन्नविषयाणां पाठ्यक्रमरूपरेखां शिक्षणविधीन् च निर्धारयति।

समयतालिकासमितिः – समितिरेषा मुख्यरूपेण विद्यालयीय– समयतालिकां निर्धारयति।

पाठ्यपुस्तकसमितिः – समितिरियं माध्यमिकशिक्षापरिषदा शिक्षाविभागेन च प्रस्तावितपाठ्यपुस्तकेषु निजविद्यालयाय पाठ्यपुस्तकानि चिनोति।

परीक्षासमितिः – इयं समितिः बालकेभ्यः पन्थानं प्रदर्शयति। एवञ्च

बालकेभ्य: शैक्षिकविषयचयने व्यावसायिकविषयचयने च निर्देशान् दास्यति। बालकानां प्रवेशादिदायित्वमपि वोढुं शक्नोति। समितेरस्या: प्रमुखं कार्यं परीक्षासञ्चालनं छात्राणाम्मूल्यांकनञ्च वर्तते। छात्राणां प्रगतिपत्राण्यपीयं समितिरेव निर्माति। एतदतिरिक्तमियमुन्नत्तिनियमानपि निर्धारयति।

(ब) शिक्षणकार्यम् –

शिक्षणकार्यं रोचकं प्रभावकञ्च भवेद् एतदर्थं विभिन्नसाधनानां प्रयोग: कर्त्तुं शक्यते। एतेषां साधनानां व्यवस्थापनायैक: शिक्षकोऽथवा एका लघुसमितिर्भवेत् – उदाहरणार्थम् –

श्रव्य-दृश्य-समिति: – शिक्षणस्य विभिन्नोपयुक्तोपकरणानि व्यवस्थापयति।

पुस्तकालय-समिति: – सामान्यपुस्तकालयाय, कक्ष्यापुस्तकालयाय, विषयपुस्तकालयाय च इयं समिति: पुस्तकानि क्रेष्यति। किन्तु पुस्तकानामुपयोगित्वं छात्राध्यापकानां दृष्ट्या एव निर्धार्यते। एवञ्च समितिरियं बालकानां रुचिं ज्ञातुं यतते। समितौ अस्यां बालकप्रतिनिधीनामपि स्थानं भवेत्।

(स) विशेषशैक्षिककार्यक्रमा: –

प्रधानाध्यापक: प्रतिभाशालिनां मन्दानां च छात्राणाङ्कृतेऽपि विशेषशैक्षिक-कार्यक्रमान् आयोज्येत्। प्राय इत्यनुमीयते यत् विद्यालये पञ्चादशत: विंशति प्रतिशतछात्रा: प्रतिभाशालिनो भवन्ति। अत एतेषाङ्कृते विशेषशैक्षिककार्यक्रमस्य व्यवस्था भवेत्।

(1) प्रमुखविषयेषून्नतपाठ्यक्रमाणां प्रावधानम्।

(2) पाठ्यक्रमेऽनुसन्धानस्यापि स्थानं भवेत्।

(3) विशेषशिक्षणकार्यक्रमाणाम् आयोजनम्।

मन्दमतिछात्राणाङ्कृतेऽपि विशेषशिक्षणकार्यक्रमाणां व्यवस्था करणीया भवति। सर्वप्रथमं मन्दमतिछात्राणाम्मन्दताया: कारणमन्विष्य तेभ्यश्छात्रेभ्यो विशेष-योग्यताधारिशिक्षकाणाम् उपयुक्तशिक्षणविधीनां विशेषशिक्षणसामग्रीणाञ्च व्यवस्थापि करणीया।

(द) पाठ्यक्रमसहगामिक्रियाणां सङ्घटनम् –

एतासां क्रियाणां संघटनं सञ्चालनञ्च विद्यालयपरिषदा भवेत्। यस्मिन् छात्रशिक्षका: सम्मिलिता: भवेयु:। विभिन्नक्रिया: पृथक् पृथक् समित्याधीना: भवितव्या:। यथा – क्रीडासमिति:, साहित्यिकसमिति:, सांस्कृतिकसमिति:,

सामाजिकसमितिः, स्वास्थ्यसमितिरिति।

(य) गृहसमाजाभ्यां सह सम्पर्कस्थापनव्यवस्था –

सम्प्रतिगृहविद्यालययोर्मध्ये समाजविद्यालययोर्मध्ये च घनिष्ठसम्बन्धस्थापनं परमावश्यकं वर्तते। अस्य कृते प्रत्येकस्मिन् विद्यालये शिक्षक-अभिभावकसमुदायः स्थाप्यते। समुदायोऽयं निजकार्यकर्तृ-परिषदा कार्यं सम्पादयति यस्मिन् शिक्षकाणाम् अभिभावकानाञ्च प्रतिनिधयः भवन्ति। विद्यालयः सामुदायिककेन्द्रमिव भवेत् एवं भूते समाजविद्यालययोर्मध्ये सुदृढसम्बन्धो भविष्यति। एतदतिरिक्तं विद्यालयः समाजाय प्रसारसेवाः दद्यात्। एतासां सञ्चालनं समाज-शिक्षक-छात्राणां प्रतिनिधिभिः करणीयम्।

(र) सम्पादकमण्डलम् –

मण्डलमिदं विद्यालयीयहस्तपुस्तिकां (हैण्डबुक), विद्यालयीयनियमावलीं, विद्यालयीयपत्रिकाञ्च प्रकाशयति।

(ल) विद्यालयस्य सज्जीकरणम् –

विद्यालयस्य सज्जीकरणाय कश्चिदध्यापकः कर्मचारी उत्तरदायी भवेत्। एवञ्च सज्जीकरणस्याऽऽय-व्यय-विवरणमपि दद्यात्।

विद्यालयसत्रस्य प्रारम्भिककार्यक्रमाः –

उपर्युक्तकार्याणां सङ्घटनसञ्चालनयोः विस्तृतविवेचनम् अग्रिमाध्यायेषु प्रस्तोष्यामः। परन्तु विद्यालयस्य कुशलता सम्भवतः, सत्रारम्भात् प्राक् विहितकार्यक्रमनिर्धारणे भवति। कार्यक्रमस्य निर्धारणं विगतवर्षाणामनुभवाधारेण भवेत्। यथा –

(1) विद्यालयीयदैनन्दिन्याः (कलैण्डर) निर्धारणं यस्मिन् पाठ्यक्रम-पाठ्यसहगामिक्रियादीनां विवरणम्भवेत्।

(2) शिक्षकाणां लिपिकानाम् अन्यकर्मचारिणाञ्च नियुक्तिः।

(3) शिक्षण-प्रशासकीयकार्याणां विवरणम्।

(4) समयतालिका।

(5) आवश्यकशिक्षणसज्जा सामग्र्यश्च यथा – पुस्तकानां, श्यामपट्टानाम्, आसन्दिकानां, विभिन्नवैज्ञानिकयन्त्राणाञ्च क्रयः।

(6) सम्भावितप्रवेशानां पूर्तिः।

(7) बालकानां वर्गीकरणं विधाय कक्ष्यानिर्धारणम्।

(8) शिक्षकाणां सौविध्याय प्रशासकीयसूचनापत्रनिर्माणम्। यस्मिन् विभिन्न-शिक्षकाणां कार्यविवरणं भवेत्, विद्यालयस्य कार्यविधि:, समयचक्रम्, अवकाशावधि:, पाठ्यसहगामिक्रियाणां दायित्वविवरणम्, अवकाश-सूचिका, शुल्कप्राप्तिविधे: विवरणम्, अवकाशग्रहणविधीनां विवरणं, विद्यालयस्य विभिन्न-समितीनां विवरणं, शिक्षकवर्गस्य सम्मेलनानां तिथि-निर्देशनम्।

(9) साप्ताहिक-मासिक-त्रैमासिकार्द्धवार्षिक-वार्षिक-परीक्षाणां, सङ्घटन-सञ्चालनक्रियाणां, सञ्चिताभिलेखपत्रस्य रूपरेखायाश्च निर्धारणम्।

(10) बालकानां स्वास्थ्यपरीक्षणस्य व्यवस्था।

(11) बालकानां पथप्रदर्शनाय निर्देशनकार्यक्रमाणां सङ्घटनसञ्चालनयो: व्यवस्था।

(12) बालकानां प्रगतिविषयेऽभिभावकान् सूचयितुं विधिनिर्धारणम्।

(13) बालकेभ्योऽग्रिमसत्रस्य विभिन्नविषयाणां पाठ्यपुस्तकविषये सूचना प्रदानम्।

पुनरावृत्तिप्रश्ना:

(1) पाठ्यक्रमसम्बन्धिक्रियाणां संघटनाय प्रधानाध्यापक: कान् कान् प्रयासान् कुर्यात्, कथञ्च?

(2) पाठ्यक्रमसम्बन्धिक्रियाणां संघटनाय सञ्चालनाय च विद्यालये कासां-कासां समितीनां निर्माणम् आवश्यकमस्ति?

(3) प्रधानाध्यापकस्य रूपेण भवन्त: विद्यालये पाठ्यक्रमसहगामिक्रियाणां संघटनं कथं करिष्यन्ति?

(4) गृहसमाजयो: मध्ये परस्परसम्बन्धस्थापनस्य आवश्यकता विद्यालयस्य कृते किमर्थमावश्यकमस्ति?

(5) भवन्त: प्रधानाध्यापकस्य रूपेण गृहसमाजाभ्यां च कथं सम्बन्धं स्थापयिष्यन्ति?

(6) विद्यालयसज्जीकरणाय भवन्त: कान् कान् प्रयत्नान् करिष्यन्ति?

(7) विद्यालयस्य प्रारम्भिककार्यक्रमनिर्माणे के के बिन्दव: ध्यातव्या:?

लेखार्थप्रश्न:

भवन्त: उच्चतरमाध्यमिकविद्यालयस्य प्राचार्या: सन्ति यस्मिन् विद्यालये अष्टशतं छात्रा: पर्यायद्वये शिक्षां गृह्णन्ति इति मत्वा, एतादृगविद्यालयस्य कृते आन्तरिककार्याणां संघटनाय कान् कान् प्रयत्नान् करिष्यन्ति भवन्त:? संक्षेपेण वर्णयन्तु।

12

पाठ्यक्रमनिर्माणस्य सिद्धान्ताः तेषां प्रकाराश्च

(Principles of Curriculum Construction and its Types)

"The course of study is the mimeographed or printed outline or syllabus which is furnished to teachers to help them to guide the learning experiences of their pupils. The sum total of the learning experiences is the curriculum."

—Logsdon

''विभिन्नाध्ययन सङ्घटितक्रिया–पाठ्यक्रम–पाठ्यक्रमेतरक्रिया–विद्यालयीय–सामाजिकजीवन–विद्यालयीयवातावरणादीनि सर्वाणि पाठ्यक्रमे स्वस्वस्थानं लभन्ते। शिक्षायाः चरमलक्ष्यमावाप्तये भवत्येषां योगदानमतः सङ्घटयन्त इमे सर्वे क्रियाकलापाः।''[1] इति कथनेन स्पष्टं भवति यत् पाठ्यक्रमसम्बन्धिक्रियाः शिक्षालक्ष्यप्राप्तये योगदानं यच्छन्ति। एतादृशोऽभिप्रायः उक्तपरिभाषाशब्दैरपि स्पष्टो भवति। 'Curriculum' (पाठ्यक्रम) शब्दस्योत्पत्तिः लैटिनभाषायाः क्यूररे (Currere) शब्दाज्जाता। अस्यार्थः 'धावनक्षेत्रमिति' (Race Course) वस्तुत इदमेकं धावनक्षेत्रमेवास्ति। यस्मिन् जनः स्वलक्ष्यमधिगन्तुं धावति। आधुनिके समये पाठ्यक्रम–परिभाषासु मौलिकं परिवर्तनमभूत्। प्राचीनधारणायां पाठ्यक्रमस्यार्थः– ''पाठ्यवस्तूनां सूचीबद्धता'' इत्यस्ति। प्रायः पाठ्यवस्तु अध्ययन विषयनाम्ना–भिधीयते। पाठ्यवस्तु विद्यालयेषु सीमितं कृतमासीत्। साधारणतया छात्रः कक्ष्यायाः बहिःयाननुभवान् अधिकरोति स्म न ते पाठ्याङ्गत्वेन स्वीक्रियन्ते स्म। प्राचीन–समये छात्रावश्यकतापेक्षातोऽधिकं महत्त्वं विषयस्यैव प्रतिपादयन्ति स्म विद्यालयाः। परन्तु आधुनिक–काले पाठ्ह्यक्रमपरिभाषाः व्यापकतां गताः। इमाः परिभाषा आत्मनि केवलविद्यालयीयविषयानेव न वस्तुतः छात्रस्य समस्ताः क्रियाः अनुभवान् चापि संगृह्य तिष्ठन्ति। अधुना पाठ्यक्रमक्षेत्रे ताः समस्ताः क्रिया अपि संगृहीताः भवन्ति याः पाठ्यक्रमेतरक्रियेति नाम्ना प्रसिद्धा आसन्। वस्तुतः पाठ्यक्रमे छात्रस्य ताः समस्ताः क्रिया अनुभवाश्चापि परिगणिताः भवन्ति यान् अनुभवान् यत्र कुत्रापि

1. "The various studies, organized activities, both curricular and extra-curricular activities and the entire social life and atmosphere of the school, find their respective place in the curriculum. Each is designed to make its contribution towards the attainment of the ultimate goals of education." - **Heary J. Otto**

वर्तमानः छात्रः संगृह्णाति। एवमाधुनिके समये पाठ्यक्रमस्य स्वरूपं बहुव्यापकं स्वीकृतमस्ति। अस्योक्तस्य दृष्टिकोणस्य (पाठ्यक्रमसम्बन्धिनः) पुष्टिः निम्न परिभाषाभिरपि क्रियते –

''शिक्षार्थिनस्ते सर्वेऽनुभवाः पाठ्यक्रमे निहिताः सन्ति, यान् स विद्यालयाद् बहिः विद्यालये वा प्राप्नोति। सर्वे चैतेऽनुभवाः एकस्मिन् कार्यक्रमे निधीयन्ते चेत् तस्य शारीरक-मानसिक-संवेगात्मक नैतिक-सामाजिकाध्यात्मिकविकासे च ते साहाय्यं कुर्वन्ति।''[1] **– क्रो, क्रो महोदयौ**

''पाठ्यक्रमे ते सर्वेऽनुभवाः सम्मिलिताः सन्ति यान् छात्रो विद्यालयनिर्देशने प्राप्नोति। अस्मिन् कक्ष्या-क्रियाः तद्बहिर्भवानि कार्याणि क्रीडादीनि सम्मिलितानि सन्ति।''[2] **– वाल्टर सी.**

''विद्यालयनियन्त्रणे स्थितस्य शिक्षार्थिनः समस्तानुभवाः पाठ्यक्रमान्तर्गताः भवन्ति। पाठ्यपुस्तक-पाठ्यवस्तुनोरेव न, अपित्वध्ययनविषयतोऽप्यधिको भवति। अयं तासां समग्रावस्थानां याः शिक्षकाय विद्यालयप्रशासकाय चोपलब्धाः सन्ति समूहो विद्यते। अनेन विद्यालयद्वारगतानां बालानां यूनाञ्चाचरणं परिवर्त्यते।''[3]

– ब्रू बेकरः

''पाठ्यक्रमेण केवलं तेषां शास्त्रीयविषयाणामेव ग्रहणं न भवति येषां परम्परया विद्यालये पाठनं भवति। वस्तुतः पाठ्यक्रमेऽस्मिन्ननुभवानां समग्रता निहितास्ति। यान् अनुभवान् बालो बहुविध-क्रियाभिः प्राप्नोति, याः (क्रियाः) विद्यालये कक्ष्यायां, पुस्तकालये, प्रयोगशालायां, कार्यशालायां, क्रीडाक्षेत्रे, छात्र-शिक्षकयोरनौपचारिक सम्पर्केषु सम्पद्यमानाः सन्ति। अनेन समग्रं विद्यालयीयजीवनं पाठ्यक्रमो भवति,

---

1. "Curriculum includes all learner's experience in or outside school that are included in a programme which has been devised to help him to develop mentally." **- Crow & Crow**
2. "The curriculum may be defined as all the experiences that pupils have while under the direction of the school, it includes both class-room and extra-activities, work as well as play. **- Walter C.**
3. "Curriculum consists all the experiences of the learner under the control of school. It is more than the text-book, more than subject matter, more even than a course of study. It is the total situation or group of situations available to the teacher and school administrator through which to make behavior changes in the endless stream of children and youth who pass

यो बालकानां जीवनस्य सर्वपक्षान् स्पृशति सन्तुलितव्यक्तित्त्वविकासे च साहाय्यं करोति।''[1] – **माध्यमिकशिक्षाऽऽयोगः**

पाठ्यक्रमोद्देश्यानि –

1. चरित्रम् –

बालकेषु समृद्धोपयोगिनैतिकजीवनायाधारस्थापनं, येन ते समाजकल्याण-कार्याणि कुर्युः। अतः पाठ्यक्रमस्य प्रथममुद्देश्यं चरित्रनिर्माणमस्ति।

2. राष्ट्रियो न्यासः –

बालकाः स्व राष्ट्रियन्यासं (विरासत) जानीयुः तथा तत्र निष्ठावन्तो भवेयुः सहैव व्यक्तिप्रतिष्ठार्थं भावप्रवणता तेषूत्पन्ना स्यात्। अतो राष्ट्रियन्यासपरिज्ञानं द्वितीयमुद्देश्यमस्ति पाठ्यक्रमस्य।

3. स्वास्थ्यम् –

शारीरकदृष्ट्या मानसिकदृष्ट्या च बालकाः पोषं प्राप्नुयुः इत्यपि पाठ्यक्रम-स्योद्देश्यमस्ति। स्वास्थ्यहीनः सर्वत्र हीनतां प्राप्नोति।

4. स्पष्टचिन्तनं पर्यवेक्षणञ्च –

बालकानां चिन्तने स्पष्टता स्यात् तेषु च पर्यवेक्षणक्षमता विकसिता भवेत्। सत्यासत्य-विवेकोऽनेन जायते। बालकेष्वन्वेषणप्रवृत्तेः, योग्यतायाः विकासोऽपि साध्योऽस्ति।

5. ज्ञानं कुशलता च –

पाठ्यक्रमस्येदमप्युद्देश्यं भवेत् यत्तेषु योग्यतानुसारं ज्ञानं, विविधाः कुशलताश्च विकासं प्राप्नुयुः।

6. सौन्दर्यानुभूतिरभिव्यक्तिश्च –

बालकेषु सौन्दर्यानुभूतिस्तेषां सामाजिकजीवनं सरलं विधातुमपेक्षते, सर्जनात्मिकाभिव्यक्तिरपि तेषु स्फुरेत् इत्यपि पाठ्यक्रमस्योद्देश्यमस्ति।

---

through the doors of the school." - **Brubacher**

1. "Curriculum does not mean only academic subject traditionally taught in the school, but it includes the totality of experiences that pupil receives through the manifold activities that go on in the school, in the class-room, library, workshop, playgrounds and in the numerous informal contact between teachers and pupils. In this sense, the whole life of the school becomes the curriculum, which can touch the life of students at all points and help in the evolution of a balanced personality."

- Secondary Education Commision

7. सामाजिकसम्बन्धा आर्थिकसम्बन्धाश्च –

पाठ्यक्रमस्यैकमुद्देश्यमिदमप्यस्ति यद् बालकेषु सामाजिकदृष्टेः सम्बन्धानाञ्च विकासो भवेत्, येन सः विद्यालये परिवारे समाजे वसन् स्वजीवनं समुचितरूपेण यापयितुं समर्थो भवेत्। बालकेषु व्यावसायिककुशलतायाः विकासेन सह समाजे ये आर्थिकसम्बन्धाः भवन्ति तेषां ज्ञानोद्भावनमप्युद्देश्यमस्ति पाठ्यक्रमस्य।

8. नागरिकता –

पाठ्यक्रमस्येदमप्युद्देश्यं भवति, यद् अस्माकं बालकाः अस्माकीनां लोकतान्त्रिकनिष्ठां जानीयुः। तेऽपि प्रजातन्त्रे स्वनिष्ठां रक्षन्तः सन्नागरिकाः भवेयुः नागरिकाधिकारैः बालकान् पाठ्यक्रमः परिचाययति। आराष्ट्रमेव नागरिकता न भवति सन्नागरिकतायाः क्षेत्रम् अन्ताराष्ट्रियं भवति, अर्थादनयान्ताराष्ट्रिया सद्भावना विकासमायाति।

पाठ्यक्रमस्याधाराः (Bases of Curriculum) –

पाठ्यक्रमस्य मुख्यतया चत्वारः आधाराः भवन्ति–

1. दार्शनिकाधारः (Philosophical Base) –

दर्शनं पाठ्यक्रमस्य मुख्य आधारः। पाठ्यक्रमः शिक्षोद्देश्यान्यधिगन्तुं निर्मीयते। शिक्षोद्देश्यानि दर्शनात् भवन्ति। अतः पाठ्यक्रमस्य समस्या दार्शनिकी समस्या विद्यते विभिन्नदार्शनिकविचाराननुसृत्य पाठ्यक्रमोऽपि विभिन्नरूपैः निर्धार्यते।

(1) आदर्शवादः –

दार्शनिकेष्वादर्शवादः मुख्यो विचारोऽस्ति। अयमेव पाठ्यक्रमस्य मुख्या आधाराः अस्मिन् मानवीयवैचारिकादर्शाः स्वीक्रियन्तेऽतएवादर्शमूलकं साहित्यं कला–संगीतेतिहासभाषाज्ञानादिकं पाठ्यक्रमे प्रमुखतया निवेश्यते।

(2) प्रकृतिवादः –

अस्यां विचारधारायां छात्राणां वैयक्तिकस्वातन्त्र्यविकास एव शिक्षायाः लक्ष्यं स्वीकृतमस्ति। अत एव प्रकृतिवादिनः बालकस्यात्मप्रकाशने स्वातन्त्र्यमिच्छन्ति। पाठ्यक्रमे तासां क्रियाणां समावेशं च आकाङ्क्षन्ते याभिः बालकस्य स्वाभाविकप्रवृत्तयो विकासं प्राप्नुयुः। अतः पाठ्यक्रमे प्रकृतिवादानुरोधेन व्यायाम–क्रीडा–जलसंतरण–भूगोल–प्रकृतिविज्ञानादिविषयाः महत्त्वं प्राप्नुवन्ति।

(3) प्रयोगवादः –

पाठ्यक्रमाधाराङ्गभूतोऽयं विचारः शिक्षायाः केन्द्रं बालकं स्वीकृत्य प्रचलितः। बालकस्य जीवनोपयोगिनी शिक्षा भवेत् इति विचार्यैव प्रायोगिक–पाठ्यक्रमस्य

निर्माणं प्रयोगवादिनः कुर्वन्ति। अतः शिक्षायाः प्रयोजनं बालकस्य भाविजीवनं सुखमयं स्यादिति निश्चित्य पाठ्यक्रमे कला-भाषा-गणित-वाणिज्य-विज्ञानादि-विषयान् निवेशयन्ति। तथा च सामाजिकक्रियाणां, काष्ठकलानां, व्यवसायिक-विषयाणाञ्च स्थानं पाठ्यक्रमे स्यात् इति स्वीक्रियन्ते।

(4) यथार्थवादः -

जीवनप्रक्रिया व्यावहारिकी विद्यते। अतः यादृशो व्यवहारः समाजे प्रचलति, जीवनप्रक्रियापि तादृशी भविष्यति। सामाजिकव्यवहारानुगामिन्याः जीवनप्रक्रियायाः परिचयं विना न हि छात्रः जीवनं सुखमयं विधातुं समर्थो भवति। अतः यथार्थता जीवनस्य येन ज्ञायते तत्सर्वं पाठ्यक्रमे स्यादिति यथार्थवादिनो वदन्ति। तेषामिदं चिन्तनं पाठ्यक्रमे महत्त्वपूर्णमस्ति। अस्तु पाठ्यक्रमस्य महत्त्वपूर्णाधारोऽयं यथार्थवादः इति सुनिश्चितम्।

2. सामाजिकाधारः (Sociological Base) -

पाठ्यक्रमे द्वितीयोऽस्ति सामाजिकाधारः। अस्मिन् ते विषयाः ताश्च क्रियाः स्थानं लभन्ते यैः छात्रेषु सामाजिकभावनायाः विकासो भवितुं शक्नोति। अनेनैव पाठ्यक्रमे भाषा-साहित्य-इतिहास-समाजशास्त्र-भूगोल-नीतिशास्त्रादीनां पाठ्यवस्तुत्वेन समावेशो भवति।

3. मनोवैज्ञानिकाधारः (Psychological Base) -

पाठ्यक्रमस्यायमस्ति तृतीय आधारः। अनेन पाठ्यक्रमनिर्धारणावसरे बालकानां स्वाभाविकरुचि-प्रवृति-क्षमताऽऽवश्यकतादिकं सर्वं विचार्य पाठ्यक्रमस्य निर्धारणं विधीयते अर्थात् पाठ्यक्रमस्यायं सिद्धान्तः बालकान् केन्द्रीकृत्य प्रवर्तते।

4. वैज्ञानिकाधारः (Scientific Base) -

विज्ञानस्य चतुर्मुखी प्रगतिः, पाठ्यक्रमस्य निर्माणे नवीनमिममाधारं ददाति। अस्मादेव पाठ्यक्रमे वैज्ञानिकविषयाणां महत्त्वं वृद्धिङ्गतम् अर्थात् पाठ्यक्रमस्येयं वैज्ञानिकप्रगतिः शिक्षां विज्ञानकेन्द्रां कृतवती।

पाठ्यक्रमे समागताः दोषाः -

माध्यमिकशिक्षाऽऽयोगः प्रचलितेऽस्मिन् पाठ्यक्रमेऽधोलिखितान् दोषान् विलोकयति-

1. वर्तमान-पाठ्यक्रमः संकुचितदृष्टिकोणवानस्ति। मुख्यतया शिक्षणसंस्थानेषु पाठनस्यावश्यकतामेव पूरयति। समये समयेऽस्य दोषपरिहारप्रयासा अपि कृताः

किञ्चाद्यापि सैव प्राथमिकी स्थितिः दृश्यते।

2. आधुनिकपाठ्यक्रमः पुस्तकीयं ज्ञानमेव प्रयच्छति। शिक्षायाः सर्वेषु स्तरेषु पाठ्यविषयवस्तु प्रायः शास्त्रीयं सैद्धान्तिकमेवास्ति तथा च सूक्ष्मविचारैः साधारणीकरणै र्हि सम्बन्धितं विद्यते।

3. प्रतिविषयपाठ्यवस्तूनि विस्तृत–सूक्ष्मविचारवन्ति भवेयुरिति प्रवृत्तिः प्रचलिता वर्तते। प्रायः पाठ्यत्वेनेमानि स्वीकृततथ्यानि न बहुमहत्त्ववन्ति सन्ति किञ्च स्मरणशक्तेरपव्ययाय कल्पन्त एव।

4. अस्माकं पाठ्यक्रमनिर्मातारः 'अध्येता विशेषज्ञो भवेदिति' दृष्टिमधिकृत्य पाठ्यक्रमनिर्माणे प्रवृत्ता अभूवन्। अस्याः दृष्टेः प्रभावात् पाठ्यक्रमे पाठ्यग्रन्थेषु चाधिकविषयवस्तुनः संग्रहो विहितः। किञ्च तैरिदन्नैव चिन्तितं यत् छात्रस्य काऽऽवश्यकता कीदृशी तस्य रुचिः प्रवृतिर्वा विद्यते। एतत्सर्वं लक्ष्यीकृत्यैव पाठ्यक्रमस्य निर्माणे कर्त्तव्यमासीत्। किञ्चैतदपेक्षया तैः विषयाणां तर्कसङ्गत–वैज्ञानिकतथ्यान्येवाधिकं पाठ्यक्रमे निवेशितानि।

5. आधुनिकोऽयं पाठ्यक्रमः व्यक्तिगतभिन्नताभिः तादात्म्यम् (एकरूपतां) न प्राप्नोति। कैशोरे तु छात्रेषु विभिन्नाः वैयक्तिकरुचयः प्रवृत्तयः च भवन्ति। तेषु विशेषाभिवृत्तयो दृष्टयश्च विकसन्ति। परन्तु वर्तमानपाठ्यक्रमे सर्वमेतदुपेक्षितमिव वर्तते।

6. वर्तमानपाठ्यक्रमोऽधिकृतोऽस्ति परीक्षाभिः। अयं दैनन्दिनानुभव–विषयोऽस्ति। कीदृशः स्यात् पाठ्यक्रम इति विषये शिक्षकाभिभावकछात्राणामनुभव एव प्रमाणं भवति। एते हि तद्भारेण बाधिताः भवन्ति।

7. वर्तमानपाठ्यक्रमे प्रविधिविषयाणां व्यावसायिकविषयाणां चाभावः वर्तते।

8. निष्कर्षरूपेणेदं ब्रूमः – नायं वर्तमानपाठ्यक्रमः जीवनेन सम्बद्धोऽस्ति। अत एव जीवनशक्तिप्रदाने बालकेभ्योऽयमसमर्थोऽप्यस्ति। न चायं बालकेभ्यो बाह्यजगतो ज्ञानमेव वितरणे सक्षमोऽस्ति अर्थात् बालकानां भाविजीवनदृष्ट्याऽयं पाठ्यक्रमोऽसफल एव विद्यते।

पाठ्यक्रमनिर्माणाय निश्चिताः सिद्धान्ताः –

पाठ्यक्रमस्यास्य दृष्टदोषान् दूरीकर्तुं माध्यमिकशिक्षायोगो निम्नलिखितान् सिद्धान्तान् प्रतिपादयामास। इमान् बुद्धौ कृत्वैव पाठ्यक्रमो निर्मितः स्यात् –

1. पाठ्यक्रमस्य पुनर्घटने प्रथमो बिन्दुः सः स्यात् यः विद्यालयीयविषयाणां जीवननिर्मातृक्रियाणां मध्यगतं गर्तं पूरयेत्।

2. पाठ्यक्रमस्याधारो विद्यालयीयं समग्रं जीवनं भवेत्। माध्यमिक-शिक्षायोगशब्देषु – ''इदं सुस्पष्टमवगन्तव्यं यत् सर्वाधुनिकशैक्षिकविचारधारानुसारेण पाठ्यक्रमस्य केवलं शास्त्रीयविषयान् विद्यालयेषु परम्परया पाठनम् इयानेवार्थः न गृह्यते, वस्तुतोऽस्मिन्ननुभवानां सम्पूर्णता निहिता विद्यते या च बालकैः बहुमुखक्रियाभिरर्ज्यते। ताः क्रियाः सर्वत्रैव विद्यालय-कक्ष्यापुस्तकालय-प्रयोगशाला-कार्यशाला-क्रीडाङ्गनादिषु स्थानेषु शिक्षक-शिक्षार्थिमध्येऽनौपचारिक- संपर्कैः प्रवर्तमानाः सन्ति। दृष्ट्यानया विद्यालयस्य समग्रं जीवनमेव पाठ्यक्रमो भवति यश्च बालकानां सर्वान् जीवनपक्षान् स्पृशन् संतुलितव्यक्तित्वविकासं करोति।''

3. पाठयक्रमे पर्याप्त-विविधता स्यात् यया वैयक्तिकभिन्नरुचीनामावश्यकतानां च सम्पूर्तिं कर्तुं शक्नुमः।

4. पाठ्यक्रमः सामुदायिकजीवनेन सह सम्बद्धो भवेत्, येन सः बालो-पयोगिमुख्यवैशिष्ट्यं स्फोरयेत् तथा बालकं जीवनोपयुक्तमहत्त्वपूर्णक्रियाभिः सह योजयेत्।

5. स्थानीयावश्यकतानां पूर्तौ सहायको भवेत् पाठ्यक्रमः।

6. पाठ्यक्रम ईदृशः स्यात् येन छात्राः कार्यार्थमवकाशार्थञ्च प्रशिक्षिताः भवेयुः। एतदर्थं विद्यालये विविधक्रियाणां सामाजिकक्रीडासौन्दर्यात्मककार्याणाञ्चायोजनं पाठ्यक्रमाङ्गत्वेन कर्त्तव्यमस्ति।

7. पाठ्यक्रमम् असम्बद्धविषयेषु विभज्य तस्य शैक्षणिकं महत्त्वं न समापनीयम्। वस्तुतः पाठ्यवस्तुनः जीवनेन सह समन्वयः पाठ्यक्रमे स्थापनीयोऽस्ति।

आधुनिकशैक्षिकविचारधारानुसारेण वयं बालकानां क्षमतां रुचि-मावश्यकतादिकं पाठ्यक्रमस्याऽऽधारं कुर्मः। किञ्चात्र सामाजिकाधारस्यावहेलनापि न कर्त्तव्या। अतः पाठ्यक्रमस्य निर्धारणं, बालक-समाजयोरुभयोः दृष्ट्या कर्त्तव्यमस्ति। अद्यास्माकं देशस्य सम्मुखे राष्ट्रैकतायाः समस्या विद्यते। अतः पाठ्यक्रमनिर्धारणेऽवधेयमिदं विद्यते यत् कया रीत्या राष्ट्रस्य महत्त्वाकाङ्क्षापूर्णतां यायात्। अतः पाठ्यक्रमनिर्माणे व्यक्तेः, समाजस्य राष्ट्रस्य च स्थितिमाकाङ्क्षाञ्च विलोक्य प्रवर्तितव्यम्। एण्डरसन् एवं ग्रून इत्ति द्वौ विद्वाँसौ पाठ्यक्रम-सङ्घटनेऽधस्तनान् विचारान् प्रकटितवन्तौ –

1. एवं विधः पाठ्यक्रमः स्यात् येन विद्यालयीयविषयप्रवृत्तिसम्बन्ध्यनुभव-सम्बन्धं ते छात्राः सारल्येनावगच्छेयुः।

2. पाठ्यक्रमो व्यक्तिगतावश्यकतासम्पूर्तये प्रयोगात्मको वैविध्यपूर्णश्च स्यात्।

3. पाठ्यक्रमस्य संघटनं समस्याः नीत्वा कर्त्तव्यम्। येन छात्राणामभिवृत्तयः कुशलताश्च

विकसिताः स्युः। सदैव ते छात्राः लोकतन्त्रीयं समाजमवगन्तुं समर्था अपि स्युः।

4. पाठ्यक्रम एवं संघटितः स्यात् येन विभिन्नस्तरीयेषु शिक्षणानुभवेषु संतुलनं भवेत्।

पाठ्यक्रमस्य प्रकाराः -

1. विषयकेन्द्रितपाठ्यक्रमः (Subject-Centred Curriculum)-

विषयमधिकृत्य पाठ्यक्रमो निर्मितश्चेत् तदा सः पाठ्यक्रमः विषयकेन्द्रित-पाठ्यक्रमो भवति। अस्योद्भवः प्राचीनग्रीक्विद्यालयेभ्यः रोम्विद्यालयेभ्योऽभूत्। सुनिश्चितबौद्धिकविशेषतानां सूची विद्यतेऽयं पाठ्यक्रमः। अस्य योगः यथार्थतायाः प्रारूप प्रस्तावे स्वात्मदृढतां प्रकटयति। अस्मिन् पाठ्यक्रमे निर्धारितविषयवस्तुनि बलं प्रदीयते।

2. बालकेन्द्रितपाठ्यक्रमः (Child- Centred Curriculum) -

आधुनिकयुगे सर्वाधिकमहत्त्वपूर्णं कार्यमिदं शिक्षासंसारे बभूव यत् पाठ्यक्रमः विषयाध्ययनात् निर्वृत्य बालकेन्द्रितोऽभूत्। अर्थात् विषयकेन्द्रितशिक्षायाः स्थाने बालकेन्द्रिता शिक्षा संवृता। अधुना पाठ्यक्रमः बालकान् लक्ष्यीकृत्य निर्मीयते। अयं पाठ्यक्रमः प्रयोगवादि-विचारधारायाः पृष्ठभूमौ तिष्ठति। अस्याः विचारधारायाः प्रवर्तकेषु फ्लॉमः स्वमतमेवं प्रस्तौति - ''यथा व्यक्तेः वातावरणमस्थिरं तद्वदनुभवा अपि सनातनाः न भवन्ति। अतः पाठ्यक्रमनिर्माणे भूतपूर्वे पाठ्यक्रम आधारत्वेन न हि स्वीकर्त्तव्यः। तत्र तु छात्राणां रुचयः आवश्यकताश्चैव। पृष्ठभूमित्वं प्राप्नुवन्ति बालकेन्द्रित पाठ्यक्रमस्याऽऽधारभूमयः छात्राणां परिवर्तितावश्यकताः अभिप्रायाः संवेगाश्च भवन्तीत्याशयः। शिक्षा संसारः एतादृशपाठ्यक्रमाय जॉनड्यूवीमहोदयेन संस्थापित 'लेबोरेटरी' विद्यालयस्याधमर्णतां धारयति। अयं पाठ्यक्रमो गत्यात्मको भवति। अनेन साभिप्राया अनुभवाः प्रदीयन्ते। अनुभवाधिगमदायित्वं छात्राणां भवति।

3. क्रियाप्रधानः पाठ्यक्रमः (Activity-Centred Curriculum) -

अस्य पाठ्यक्रमस्य आधारस्तु कार्यं क्रिया वा भवति। अस्य कृतेऽपि शिक्षाजगत् डॉ. जॉन् ड्यूवी महोदयस्य ऋणि भवति। ड्यूवी ज्ञानं क्रियायाः परिणामं स्वीकरोति। तस्य मतेऽनुभवो, ज्ञानं, अधिगमक्रियापरिणामोऽस्ति। अस्मादेव तेनायं पाठ्यक्रमः अनुभव प्रधानोऽस्तीत्युक्तम्।

4. कोर-पाठ्यक्रमः (Core Curriculum) -

अस्य पाठ्यक्रमस्य विकासः विषयकेन्द्रित-बालकेन्द्रितपाठ्यक्रमयोः विरोधि-

प्रतिक्रियातोऽभूत्। अस्य अमेरिकादेशस्थविद्यालयेषु प्रचलनं बाहुल्येन विद्यते। अस्य प्रमुखं कारणमाधुनिकयुगस्य सामाजिकव्यवस्था वर्तते। अस्मिन् पाठ्यक्रमे विद्यालयाः सामाजिकं दायित्वमधिकादधिकं वहन्तु कुशलसामाजिकान् च निर्माय कौशलं प्रदर्शयन्त्विति तथ्यं निहितं विद्यते। अयं पाठ्यक्रमः छात्राणां सामान्यविकासे प्रवर्तते, छात्राणां वैयक्तिकसमस्यासु सामाजिकसमस्यासु चायं निहितोऽस्ति।

शिक्षायोगस्य विद्यालयपाठ्यक्रमसम्बन्धिविचाराः -

आयोगस्य विचारोऽस्ति यत् सम्पूर्णे विश्वे विद्यालयपाठ्यक्रमः परिवर्तनीयतां भजेत। विकसितदेशेष्वपि तस्यालोचना क्रियते। सामान्यतयास्य विपक्षे जनाः वदन्ति यत् - ''विद्यालयपाठ्यक्रमोऽनुपयुक्तः प्रचलित-परिस्थिति-विपरीतश्च विद्यते। आधुनिकयुगस्य आवश्यकतापूर्तौ सक्षमोऽपि नास्ति। संयुक्तराज्ये-ऽमेरिकादेशे, यदस्ति शैक्षिकरूपेण विकसितो देशः तस्मिन् परम्परागतपाठ्यक्रमे प्रगतिशीलशिक्षाप्रभावात् परिवर्तनं कृतम्। तथापि, अद्य पुनः बहवो विद्वांसः विश्वविद्यालयीयाः प्रतिभावन्तः शिक्षकाः विद्यालयशिक्षापाठ्यक्रमपरिष्काराय आन्दोलनं प्रारब्धवन्तः। पाठ्यक्रमसम्बन्धितस्यास्यासंतोषस्य बहूनि कारणानि सन्ति तेषु प्रमुखाणि प्रस्तूयन्तेऽत्र -

1. आधुनिके समये ज्ञानविकासात् भौतिक-जैविक-सामाजिकविज्ञानानां मूलभूतधारणानां पुनर्निर्माणकारणात् च प्रचलितपाठ्यक्रमो दोषबहुलः सम्वृत्तः, अतः पाठ्यक्रमे परिवर्तनमपेक्षते।

2. शिक्षाजगति विविधानां नूतनविचारधाराणामुदयात् सामान्यतो माध्यमिक-विद्यालयेषु शिक्षा प्रदानस्यावधिः वर्धापनीयोऽस्ति। तथा च तस्याः (शिक्षायाः) प्रकृतिरावश्यकतानुरूपा निष्पादनीया विद्यते।

3. विगतकतिपयवर्षेभ्यः अतिभारितपाठ्यक्रमे पुनः किमपि किमपि महत्त्वपूर्णानि तथ्यान्तराणि संयोजयितुं प्रवृत्तिः दृश्यते। अनया प्रवृत्त्या पाठ्यक्रमः इतोऽपि अधिकभारवान् समपद्यत। अतः पाठ्यक्रमात् अयं हि निरर्थकभारः निष्कासितः स्यात्, तत्स्थाने गतिमन्प्रेरणावत्तथ्यानि भवेयुः।अतो विचार्य विद्यालय-पाठ्यक्रमे परिष्कार अवश्यमेव कर्त्तव्यः।

कोठारी-आयोगेन प्रस्तावितपाठ्यक्रमः -

(अ) निम्नप्राथमिकस्तरस्य (कक्ष्या 1 तः 4 पर्यन्तस्य) पाठ्यक्रमः -

शिक्षायोगः प्रथमकक्ष्यातः चतुर्थीं यावत् चतसृणां कक्ष्याणां पाठ्य-विषयान्

अधस्तनरूपान् वदति –

1. एका भाषा पाठ्यविषयः स्यात्, सा मातृभाषा क्षेत्रीया भाषा वा भवेत्।

2. गणितं पाठ्यविषयत्वेनोक्तचतसृषु कक्ष्यासु पाठनीयं भवेत्।

3. वातावरणस्याध्ययनम् (Study of the Environment) – तृतीय–चतुर्थकक्ष्ययोः छात्रान् विज्ञानं सामाजिकज्ञानञ्चेति विषया अपि पाठनीयौ।

4. सर्जनात्मिकाः क्रियाः पाठ्यक्रमे भवेयुः।

5. कार्यानुभवः (Work Experience) समाजसेवा चेति द्वावपि पाठ्यविषयौ भवेताम्।

6. स्वास्थ्य–शिक्षापि पाठ्यविषयत्वेन भवेत्।

(ब) उच्चतरप्राथमिकस्तरस्य पाठ्यक्रमः

(पञ्चमीतः सप्तमीं यावत्)

1. भाषाद्वयं पाठ्यक्रमे स्यात्। तयोरेका तु मातृभाषा प्रादेशिकभाषा वा भवेत्; द्वितीया हिन्दी भाषा पाठनीयाऽथवाऽऽङ्ग्लभाषा पाठनीया स्यात्।

अवधेयम् – अत्रैका तृतीया भाषापि वैकल्पिकरूपेण अध्येतव्या भवितुं शक्नोति। अर्थात् उच्चप्राथमिकस्तरे तिस्रः भाषाः पाठनीयाः सन्ति।, 2. गणितम्, 3. विज्ञानम्, 4. कला 5. कार्यानुभवः, समाजसेवा च, 6. सामाजिकाध्ययनम् अत्रापि (इतिहासः, भूगोलः, नागरिकशास्त्रम्) इति त्रयो विषया अपि पाठनीयाः। 7. शारीरकशिक्षा, 8. नैतिकाध्यात्मिकशिक्षा पाठ्यक्रमे निवेशनीया।

(स) निम्नमाध्यमिकस्तरस्य पाठ्यक्रमः (कक्षा 8 तः 10 पर्यन्तम्)

1. पाठ्यक्रमे काः तिस्रो भाषाः भवेयुरित्याशङ्कायामुच्यते यत् – येषु क्षेत्रेषु हिन्दीभाषायाः प्रयोगो न क्रियते जनैः तेषु क्षेत्रेषु भवेयुरधस्तनाः तिस्रः पाठनीयाः भाषाः –

(1) मातृभाषा प्रादेशिकभाषा वा, (2) उच्चस्तरीया निम्नस्तरीया वा हिन्दी, (3) ईदृशी एवाङ्ग्लभाषा। हिन्दीभाषि–प्रदेशेषु तु सामान्यतो निम्नलिखिताः भाषाः पाठ्यक्रमे भवेयुः –

(1) मातृभाषा प्रादेशिकी वा, (2) आङ्ग्ल भाषा (अथवा हिन्दी, आङ्ग्लभाषा मातृभाषात्वेन संगृहीता चेत्), (3) हिन्दीतरासु आधुनिकभारतीयभाषासु काप्येका भाषा हिन्दीतोऽतिरिक्ता अध्ययनविषयत्वेन ग्राह्या।

ध्यातव्यम् -

(1) शास्त्रीयभाषाया अध्ययनं, वैकल्पिकाधारेण प्रागुक्त (उपर्युक्त) भाषा-भिः सह पृथग् रूपेण कर्तुं शक्यते। अर्थात् शास्त्रीयभाषाणामध्ययनावकाशोऽपि पाठ्यक्रमे भवेत्।, (2) गणितम्, (3) विज्ञानम्, (4) इतिहास-भूगोल-नागरिकशास्त्रादयः, (5) कला, (6) कार्यानुभवः, समाजसेवाः, (7) शारीरकशिक्षा, (8) नैतिकाध्यात्मिकसिद्धान्तशिक्षेत्येते सर्वे हि विषयाः पाठ्यक्रमस्य भवन्ति।

उच्चतरमाध्यमिकस्तरस्य पाठ्यक्रमः -

(कक्ष्या 11 तः कक्ष्या 12 यावत्)

आयोगस्य विचारोऽस्ति यत्, उच्चतरमाध्यमिकस्तरीयेषु छात्रेषु 50 प्रतिशतं छात्रेभ्यो व्यावसायिकपाठ्यक्रमस्य व्यवस्था स्यात्। सामान्यशिक्षायाः व्यवस्था भवेत्। आयोगेन सामान्यशिक्षापाठ्यक्रमे अधोलिखितविषयाः संनिवेशिताः -

1. भारतीयासु काप्याधुनिकभारतीयभाषा, वैदेशिकभाषासु काप्येका वैदेशिकभाषा तथा चैका शास्त्रीया भाषा पाठ्यक्रमे सम्मिलिता स्यात्।, 2. अधस्तन विषयाणां केऽपि त्रयो विषयाः चयनीयाः - (1) एकातिरिक्ता भाषा, (2) इतिहासः, (3) भूगोलः, (4) अर्थशास्त्रम्, (5) तर्कशास्त्रम्, (6) मनोविज्ञानम्, (7) समाजशास्त्रम्, (8) कला, (9) भौतिकविज्ञानम्, (10) रसायनशास्त्रम्, (11) गणितम्, (12) जीवविज्ञानम्, (13) भूगर्भशास्त्रम्, (14) गृहविज्ञानम्; इति पाठ्यक्रमेऽनुशंसिताः विषयाः सन्ति।, 3. कार्यानुभवः समाजसेवा च, 4. शारीरकशिक्षा, 5. कला हस्तकलाश्च, 6. नैतिकाध्यात्मिकसिद्धान्तशिक्षा च।

कार्यानुभवः -

शिक्षायोगनिर्धारितपाठ्यक्रमस्य सर्वाधिकमहत्त्वपूर्णवैशिष्ट्यं कार्यानुभवस्य प्रस्ताव एवास्ति। प्रथमकक्ष्यातः आदशमीं (कक्ष्यां) अस्य कार्यानुभवस्य प्रस्तावः आयोगेन कृतः। 11-12 (एकादश-द्वादशकक्ष्याभ्यां तु व्यावसायिकविषयैः सह कार्यानुभव-प्रस्तावः प्रस्तावितो विद्यते। किञ्चात्र, प्रश्नः समुत्तिष्ठते यत् कोऽयं कार्यानुभव इति। अस्य प्रश्नस्य समाधानायैव शिक्षायोगः कार्यानुभवं स्पष्टीकुर्वन् लिखति - ''विद्यालय-गृह-कार्यशाला-कृषिकर्म-यन्त्रशालाद्युत्पादकस्थलेषु उत्पादान-कार्येषु सहभागिता-निर्वहनमेव कार्यानुभवः कथ्यते।''

कार्यानुभवस्योद्देश्यानि -

केन्द्रीयशिक्षामन्त्रालयद्वारा ''(10 + 2 + 3) इति विद्यालयीयशिक्षायां

विशिष्टं परिवर्तनम्'' इत्याख्यया, प्रकाशिते पत्रिकायां कार्यानुभवस्योद्देश्यान्यधोलिखितानि निश्चितानि –

1. छात्राः कार्यक्षेत्रैः परिचिताः स्युः, परिचितास्ते स्वरुचेः सामर्थ्यस्य योग्यतायाश्चाकलनं कुर्युः तथा च, शिक्षकाः परिचितकार्यक्षेत्राणां छात्राणां रुचि-सामर्थ्य-योग्यतानामाकलने समर्थाः स्युरिति।

2. उत्पादनकार्याणां प्रशिक्षणेन छात्राणामुत्पादक-संहतीनां (इकाइयाँ) निर्माणम्।

3. स्वस्य गृहकार्यं विद्यालयस्य समुदायस्य आवश्यककार्याणि सम्पादयन् आर्थिकमितव्ययतायोजनाभिः परिचयं लभेत।

4. गृहे, कृषिक्षेत्रे, यन्त्रशालायां विभिन्ना उत्पादिकाः क्रियाः कुर्वन् वैज्ञानिकदृष्टेः प्रविधिदृष्टेश्च विकासं प्राप्नुयात्।

5. मानवस्वातन्त्र्ये तेषां समानत्वे च छात्राः स्वसामाजिकदायित्वं निर्वोढुं तत्पराश्च स्युः।

6. कस्मिन्नपि संघटितोत्पादनकार्ये सन्निहितमानवीयसम्बन्धानां भौतिक-सम्बन्धानाञ्च छात्रेभ्यः ज्ञानप्रदानम्।

7. कार्यसम्पादने छात्रेषु सहयोग-मनोवृत्तिविकासो भवेत्।

8. विद्यालयानां जनसमुदायस्य च परस्परं घनिष्ठसम्बन्धः भवेत्।

विद्यालयस्य विभिन्नस्तरेषु कार्यानुभवः –

विभिन्नाध्ययनस्तरेभ्यः कार्यानुभव-कार्यक्रम-चयनसमये देशस्यार्थिक-सामाजिक-स्थितिं विचिन्त्य तदनुरूपाः दैनिकावश्यकताः लोककलाः राष्ट्रिय-संस्कृत्यादीनि मनसि धारयेत्। शिक्षामन्त्रालयेन प्रकाशितायामुक्तपत्रिकायां कार्यानुभवानां या सूची प्रकाशिता वर्तते तस्यामेकोनपञ्चाशत् (49) कार्याणि लब्धस्थानानि सन्ति। परन्तु भारतीयविद्यालयानां स्थितिमुपयुक्तताञ्च विलोक्य विभिन्नशिक्षास्तरेभ्यः विभिन्नकार्याणामायोजनं प्रदर्शिततालिकानुसारेण कर्तुं शक्यते।

1977 तमे ख्रिस्ताब्दे पुनरीक्षणसमित्या निर्धारितः पाठ्यक्रमः –

1964-66 ई. वर्षे शिक्षायोगस्य या संस्तुतिः जाता तदनुसारेण; 1968 तमे ख्रिस्ताब्दे वर्षे राष्ट्रियशिक्षानीतेः सम्बन्धितः यः प्रस्तावः समागतस्तदनुसारेण, अर्थात् शिक्षायोगसंस्तुतिं राष्ट्रियशिक्षानीतिसम्बन्धिप्रस्तावमनुसरत् केन्द्रीयशिक्षापरामर्शदातृ मण्डलम् 1974 तमे वर्षे नवम्बरमासे – 10 + 2 + 3 वर्षीयां शैक्षिकसंरचनां पञ्चम्यां पञ्चाब्दीययोजनायां प्रारब्धुं निर्णयं कृतवत्। राष्ट्रियशैक्षिकानुसंधानप्रशिक्षण-

विभिन्नस्तरेभ्यः कार्यानुभवः

विद्यालयस्यस्तरः कक्ष्याश्च	उद्योगाश्रितकार्यानुभवः	कृष्याश्रितकार्यानुभवः	विज्ञानाश्रितकार्यानुभवः
प्राथमिकस्तरः (कक्ष्या 1 तः 5 पर्यन्ता)	पत्र-पत्रफलककार्यं मृण्-नम्यकार्यं च	--	मश्युत्पादनं, श्लक्ष्णलेपोत्पादनं (कक्ष्या-5), फेनकोत्पादनं (कक्ष्या-5), मार्जनाम्लः (कक्ष्या-5)
निम्नमाध्यमिकस्तरः (कक्ष्या 6 तः 8 पर्यन्ता)	चर्मकार्यं, मुद्रणं, पुस्तका-वरणं, प्रतिकृतिनिर्माणं, सीवनं, शिल्पं, आन्तरप्रसाधनं, वर्णरञ्जनं, वाटिकाकार्यं, सिक्थवर्तिकानिर्माणं, वैदलम् इत्यादीनि	पुष्प-बीजयोरुत्पादनम्, औपवनिकं, कृषिकर्म, कुक्कुट-अजाविपालनम् इत्यादीनि।	वर्णक-कुक्कुभयोः उत्पादनं, फेनकोत्पादनं, केशरागोत्पादनं, कान्तिवर्धकोत्पादनं, मार्जनाम्लोत्पादनं, दर्पणविलेपनम्।
उच्चमाध्यमिकस्तरः (कक्ष्या 9 तः 12 पर्यन्ता)	मुद्रणं, चर्मकार्यं, नम्यकार्यं, आलोक-लेख्यं, प्रतिकृतिनिर्माणं, मार्त्तिकं, कार्पासवानं, सीवनं, व्यापारचित्रणं (लोहस्य), समी-करणशीकरौ, रञ्जनं, तान्तवमुद्रणं च, वाटिकाकार्यं, वेत्रवानं, क्रीडाकूर्दनसामग्रीनाणामुत्पादनं, घटी-परिष्कारः, वादित्रपरिष्कारः इत्यादीनि।	पशुपालनं, पशुखाद्योत्पादनं, शाक-फलसंरक्षणं, बीजोत्पादनं, क्षीरजोत्पादनं, मधुमक्षिकारक्षणं, मत्स्यपालनं इत्यादीनि।	कान्तिवर्धकं, केशरागोत्पादनं, सुधोत्पादनं, शुद्धरासायनिकद्रव्योत्पादनं, विद्युत्कोशिकायाः परिष्कारः परिरक्षणं च, विद्युल्लोहाङ्कनम्, आकाशवाण्याः परिष्कारः, परिरक्षणं च।

परिषद् 10 + 2 वर्षीयविद्यालयीयशिक्षायै शिक्षायोगप्रस्तावित–रूपरेखामाधारीकृत्य पाठ्यक्रमः पाठ्यपुस्तकानि च निर्मितानि। ख्रिस्तवर्षस्य 1976–77 तमस्यावसाने 10 + 2 + 3 वर्षीया शैक्षिकसंरचना, पूर्वोक्त–परिषदः पाठ्यक्रमेण सहैकोनविंश–राज्येषु संघीयक्षेत्रेषु च क्रियान्विता बभूव। शिक्षासंरचनाविषये पाठ्यक्रमविषये चोभयविध–प्रतिक्रियाः अपि बभूव। जनता सर्वकारस्य केन्द्रीयशिक्षामन्त्रिणः समीपे प्रतिक्रियापत्राणि विदुषां समागतानि। तान् संवीक्ष्य 1977 ख्रिस्त्राब्दे जुलाई मासे पुनरीक्षणाय समितिः सङ्घटिता नियोजिता च सर्वकारेण। अस्याः समितेः अध्यक्षः डॉ. ईश्वर भाई पटेलः, (कुलपतिः, गुर्जर (गुजरात) प्रदेश विश्वविद्यालयस्य, अहमदाबाद नगरस्थस्य) आसीत्। अस्यै समित्यै; राष्ट्रिशैक्षिकानुसंधानप्रशिक्षण–परिषन्निर्मिते द्वादशवर्षीयविद्यालयशिक्षापाठ्यक्रमे पुनरीक्षणकार्यं समर्पितम्। समितिश्च विभिन्नक्षेत्रेषु विशेषज्ञताधिकृतैः विशिष्टविद्वद्भिः विचारविमर्शं विधाय 1977 तमे वर्षे नवम्बरमासे स्वाभिमतं भारतसर्वकारस्य सम्मुखे प्रस्तुतवती। समितिसंस्तुतयो निम्नलिखिताः प्रमुखाः सन्ति –

1. महात्मनः श्रीगान्धिमहोदयस्याऽऽधारभूतशिक्षासिद्धान्तान् स्वीकृत्य शिक्षायाः वर्तमानां पद्धतिं तदनुकूलं विधानं, कार्यशिक्षा शिक्षापद्धत्तेः केन्द्रबिन्दुः भवेत्।

2. विद्यालयशिक्षायाः घटकतत्त्वानि साहित्यिक (मानव शास्त्र) वैज्ञानिकादिक–कार्याणि भवेयुः। एषामेव तत्त्वानामाधारेण पाठ्यक्रमो निर्मितः स्यात्। एतान्येव तत्त्वान्याधारीकृत्य समितिरपि विद्यालयपाठ्यक्रमस्य रूपरेखां निम्नप्रकारेण प्रस्तौति स्म।

प्राथमिक (कक्ष्या 1–4) शिक्षायाः पाठ्यक्रमः –

अस्मिन् पाठ्यक्रमे – 1. भाषा 2. गणितम् 3. वातावरणाध्ययनम् (अस्मिन् सामाजिक–प्राकृतिकाध्ययनं स्वास्थ्यशिक्षान्तर्हितास्ति), 4. समाजोप–योग्युत्पादनकार्याणि, 5. क्रीडा सर्जनात्मिकाः क्रियाश्च। समाजोपयोग्युत्पादनकार्याणि सोद्देश्यकानि सार्थकानि च शारीरककार्याणि सन्ति। येनोत्पादनं वस्तूनां अथवा समुदायस्य सेवा साध्यते तदुत्पादनकार्यं पञ्चमी कक्ष्यातोऽष्टमी पर्यन्तासु कक्ष्यासु पाठ्यक्रमः – एवंभूतः स्यात् – 1. भाषाः, 2. गणितम्, 3. विज्ञानस्यैकीकृतः पाठ्यक्रमः, 4. इतिहासः, नागरिकशास्त्रम्, भूगोलज्ञानम्, 5. कलाः (कलासु–नृत्य–संगीत–चित्राङ्कनादिकम्), 6. समाजोपयोग्युत्पादनकार्याणि समुदायसेवा च, 7. क्रीडाः, शारीरकशिक्षाः, निरीक्षिताध्ययनञ्चेति।

नवम्यां दशम्याञ्च पाठ्यक्रमः –

1. भाषाः, 2. गणितं वैकल्पिको विषयो वा, 3. विज्ञानं वैकल्पिको वा विषयः, 4. इतिहासनागरिकशास्त्रभूगोलानां समन्वितः पाठ्यक्रमः, 5. अधस्तनेषु चैको विषयः– (1) गृहविज्ञानम्, (2) नृत्यसंगीतचित्रकलादिकम्, (3) कृषिः, (वाणिज्यं), (5) अर्थशास्त्रं, (6) सामाजिकं पुनर्निर्माणम्। 6. समाजोपयोग्युत्पादनकार्याणि सामुदायिकसेवा च, 7. क्रीडाः, शारीरकशिक्षा, निरीक्षिताध्ययनञ्च।

राष्ट्रियपुनरीक्षणसमिति – (10 + 2) द्वारा निर्धारितः पाठ्यक्रमः –

1977 तमे वर्षे अक्टुम्बर मासे केन्द्रशिक्षामन्त्री डा.पी.सी चुन्दरः ''राष्ट्रिय-पुनरीक्षणसमितिं'' संघटयामास मद्रास विश्वविद्यालयस्य कुलपतेः डॉ. मालकॉम एस. आदिशेषय्या महोदयस्याध्यक्षतायाम्। इयञ्च समितिः 10 + 2 + 3 शैक्षिकसंरचनायां 10 + 2 विद्यालयीयशिक्षायाः पाठ्यक्रमस्य पुनरीक्षणायाधिकृता। अस्मादेवास्याः समितेः ''दश 10 + 2 समितिः'' इति संज्ञापि जाता। इयं समितिः स्वकार्यं ''शिक्षायाः व्यवसायिकरणसन्दर्भे कृतवती। समितिः स्वप्रतिवेदनं केन्द्र-शिक्षामन्त्रिसम्मुखे फरवरी मासे 28 दिनाङ्के 1978 तमे वर्षे प्रस्तुतवती। समितेरभिमतं- "Learning to do - Towards A learning and working society" इति नाम्नाऽभिहितमभूत्। समितिः (10 + 2) उच्चतरमाध्यमिकशिक्षायाः द्विधा विभाजनं चकार यथा –

1. सामान्यशिक्षा, 2. व्यावसायिकशिक्षा।

(1) सामान्यशिक्षा पाठ्यक्रमस्य रूपरेखा –

1. भाषा 2. समाजोपयोग्युत्पादककार्यम्, 3. निम्नलिखितविषयेषु केऽपि त्रयो विषयाः – (1) भाषाः (अनिवार्यभाषातोऽतिरिक्ता अन्याः भाषाः), (2) गणितम्, (3) अर्थशास्त्रम्, (4) रसायनशास्त्रम्, (5) राजनीतिशास्त्रम्, (6) जीवविज्ञानम्, (7) भूगोलः, (8) भौतिकशास्त्रम्, (9) समाजशास्त्रम्, (10) मनोविज्ञानम्, (11) दर्शनम्, (12) गृहविज्ञानम्, (13) इतिहासः (14) वाणिज्यं गणकशास्त्रञ्च, (15) ललितकलाः, (16) शारीरकशिक्षा।

(2) व्यावसायिकशिक्षा पाठ्यक्रमस्य रूपरेखा –

(1) भाषा, सामान्याधारभूतः पाठ्यक्रमः (Course); द्विवर्षीयोऽयं पाठ्यक्रमो भवेत्। साप्ताहिकः अध्ययनकालोऽपि 4–5 होरात्मको भवेत्। अयं पाठ्यक्रमोऽपि द्विधा विभक्तः; यथा –

(1) अस्मिन् भागे यः पाठ्यक्रमः सः सर्वव्यवसायानाङ्कृते समानतां भजते। अत एव समितिः इच्छति यदस्मिन् –

(1) गान्धिवादशिक्षावधारणाः (Gandhian Concept of Education)

(2) ग्रामीणविकासः

(3) अस्वच्छनगरवसतीनां समस्याः (Problems of Urban Slums)

(4) स्वास्थ्यं स्वास्थ्यविज्ञानं स्वच्छता च

(5) राष्ट्रियार्थव्यवस्थाया कृषिः इत्येते विषयाः पाठनीयाः।

(2) नवखण्डात्मकोऽयं भागः। छात्रः स्वव्यवसायसम्बन्धिखण्डमेकं चिनोति। निर्दिश्यन्तेऽधः नव खण्डाः –

(1) लघुपरिमाण–कुटीरोद्योगाः

(2) उद्यमिता(3) सहकारिता ऋणसम्बन्धिसुविधाः

(4) पण्यविद्या

(5) विक्रयप्रोन्नतिः

(6) निरुद्योगः अन्नरुद्योगः, भारते मानवशक्तेरुपयोगश्च

(7) मानवीयसम्बन्धाः

(8) विश्वपरिवर्तनप्रवृत्तिविषये सामान्यपरिचयः

(9) पर्यावरणस्य विकासः सुरक्षा च।

(3) (अ) कृषिः तत्सम्बन्धिव्यवसायश्च –

(1) कृषिः

(2) भू–जलसंरक्षणं

(3) कृषिक्षेत्रेयन्त्राणां परिष्करणं, सन्धारणं च

(4) कृष्याश्रितोद्योगः

(5) कार्षरसायनानि

(6) ग्रामीणपुनर्निर्माणप्रविधिः इत्यादीनि।

(ब) व्यापारः कार्यालयव्यवस्था च –

(1) वित्तागारलेखाः

(2) कार्यालयव्यवस्था साचिव्यचर्या च

(3) आशुलिपिः, टङ्कणं च

(4) कार्यालययन्त्रचालकः

(5) लेखा, लेखापरीक्षणं च

(6) दूरटङ्कन–दूरभाषाचालकः इत्यादीनि।

(स) अनुवैद्यकम् –

(1) बहूद्देशीयस्वास्थ्यकार्यकर्त्ता

(2) प्रयोगशालाप्रविधिकः

(3) नेत्रप्रविधिकः

(4) अस्थिप्रविधिकः

(5) X किरणप्रविधिकः

(6) विकरणप्रविधिकः

(7) दन्तप्रविधिकः

(8) प्रमसितष्कविद्युदारेखप्रविधिकः (EEG Technician) हृदयविद्युदारेखप्रविधिकः (ECG Technician) च

(9) स्वास्थ्यप्रसारकः इत्यादीनि।

(4) शैक्षिकसेवाः –

(1) श्रव्यदृश्यप्रविधिकः

(2) शिक्षासम्बन्धिक्रीडनकनिर्माता

(3) प्राथमिकबालवाटिकाशिक्षकः

(4) नृत्यसङ्गीतशिक्षकः

(5) पुस्तकालयकर्मचारी संग्रहालयकार्मचारी च इत्यादीनि।

(5) स्थानीयनिकायाः / अन्याः सेवाः –

(1) ग्रामविकासकार्यकर्ता (2) विकासकार्यकर्ता (3) प्रसारकार्यकर्ता (4) उपमण्डल (ब्लाक) प्रसारशिक्षकः (5) परिबर्ह (फर्नीचर) निर्माणम्। (6) सम्पादकीयकार्यम् (7) समाचारपत्रप्रतिवेदनम् (रिपोर्टिंग)।

(6) गृहविज्ञानसम्बन्धितव्यवसायाः –

(1) तान्तवप्रतिमानम् (2) वस्त्रप्रक्षालनकार्यम् (3) आन्तरिकप्रसाधनम्

(4) खाद्यपरिष्कारप्रक्रियाशृंखला (Processing) संरक्षणञ्च।

(7) अन्याः सामान्यसेवाः –

(1) व्यावसायिक–कला (कॉमर्शियल आर्ट) (2) आलोकलेख्यम् (प्रतिच्छायाचित्राङ्कनम्) (3) मार्तिकम् (4) कौलालम् (5) मुद्रणं (प्रिंटिंग) तथा अश्मलेखनं प्रभृत्यः।

8+4+3 वर्षीयशैक्षिकसंरचनायाः पाठ्यक्रमस्य रूपरेखा –

राष्ट्रियशिक्षासम्मेलनेन 8+4+3 वर्षीयशैक्षिकसंरचनायाः संस्तुतिर्विहिता, सहैव च 8+4 वर्षीयशिक्षायाः पाठ्यक्रमस्य रूपरेखा–प्रस्तावोऽपि कृतः। सा च रूपरेखा निम्नप्रकारेण ज्ञातुं शक्यते।

(अ) प्रारम्भिकशिक्षा पाठ्यक्रमस्य रूपरेखा –

प्रारम्भिकशिक्ष्यायां प्रथमकक्ष्यातोऽष्टमीकक्ष्यान्ताशिक्षा परिगणिता भवति। अस्याः शिक्ष्यायाः पाठ्यक्रमः भागद्वये विभक्तः, यथा – **(1) प्राथमिककक्ष्याणां (1–5) पाठ्यक्रमः –**

(1) एका भाषा (2) गणितम् (3) वातावरणाध्ययनम्

(4) समाजोपयोग्युत्पादनकार्याणि (5) क्रीडा, सृजनात्मिकाः क्रियाश्च।

2. द्वितीये 6–8 कक्ष्याणां पाठ्यक्रमः –

(1) भाषाः (2) गणितम् (3) विज्ञानस्यैकीकृतपाठ्यक्रमः (4) सामाजिक–विज्ञानं (इतिहासः भूगोलनागरिकशास्त्रञ्च) (5) समाजोपयोग्युत्पादनकार्याणि (अत्र पाठ्यक्रमे सहचराः क्रिया अपि सम्मेलनीयाः) (6) क्रीडा, शारीरकशिक्षा च (7) निरीक्षितमध्ययनम् (8) पुस्तकालये वाचनालये पठनकार्यम्।

(ब) उच्चतरमाध्यमिकशिक्षायाः 8 + 4 वर्षीयायाः पाठ्यक्रमस्य रूपरेखा –

पाठ्यक्रमप्रस्तावनादृष्ट्यास्य स्तरस्य कक्ष्याः भागद्वये विभक्ताः सन्ति। प्रथमभागे नवमी दशमी च गण्यते द्वितीये भागे 11–12 कक्ष्ये गण्येते, आसां पाठ्यक्रमस्य रूपरेखां पृथग् पृथग् रूपेणाधोलिखाम :–

1. 'नवमी–दशमी' कक्ष्याभ्यां (पाठ्यक्रमः) –

(क) अत्र अनिवार्यतयाध्येतव्याः विषया :– (1) भाषाः (2) सामाजिक–पुनर्निर्माणम् (अयं विषयस्तेभ्यः छात्रेभ्योऽस्ति, ये छात्राः, इतिहासं, भूगोलं,

राजनीतिशास्त्रं वा न स्वीकरिष्यन्ति) विकल्पे तु सामाजिकपुनर्निर्माणस्थाने "सामान्य विज्ञानम्" अस्ति (इममपि विषयं ते छात्रा ये विज्ञानस्य छात्राः नैव सन्ति, ग्रहीतुं शक्नुवन्ति) (3) समाजोपयोग्युत्पादनकार्याणि। सामुदायिकसेवा च (4) क्रीडा/ शारीरक शिक्षा च (5) निरीक्षितमध्ययनम्। पुस्तकालये वाचनालये च पठन-कार्यम्। (ख) निम्नाङ्कितेष्वपि त्रीन् विषयान् स्वेच्छया छात्रोऽध्ययनाय चेतुं शक्नोति-

(1) भौतिकशास्त्रम् (2) रसायनशास्त्रम् (3) जीवविज्ञानम् (4) गणितविद्या (5) रेखागणितसम्बन्धि-चित्राङ्कनम्/यान्त्रिकरेखाचित्राणि (6) गृहविज्ञानम् (7) वाणिज्यम् (8) कृषिः (9) इतिहासः (10) भूगोलः (11) अर्थशास्त्रम् (12) राजनीतिशास्त्रम् (13) शारीरकशिक्षा (14) शास्त्रीयाभाषा (15) संगीतम् (16) नृत्यम् (17) चित्रकला।

2. एकादश-द्वादशकक्ष्याभ्यां (पाठ्यक्रमः) -

(1) भाषाः (2) निरीक्षिताध्ययनं/पुस्तकालये वाचनालये वा पठनवार्यम् (3) क्रीडाः/शारीरकशिक्षा/पाठ्यक्रमसहचराः क्रियाश्च (4) अधस्तनव्यवसायेष्वेको व्यवसाय :- (1) कृषिः, तत्सम्बन्धि-व्यवसायश्च (2) वाणिज्यम् कार्यालय व्यवस्था च (3) स्वास्थ्यशिक्षा, कार्यालयव्यवस्था च (4) शिक्षासेवाः (5) गृहविज्ञान-सम्बन्धिव्यवसायः (6) अभियांत्रिकी, तकनीक-व्यवसायः (7) विविधव्यवसायाः।

राष्ट्रिय-पाठ्यक्रमस्य रूपरेखा -

1986 तमे ख्रिस्ताब्दे, राष्ट्रियशिक्षानीतौ, राष्ट्रियपाठ्यक्रमप्रारूपे (संरचनायां) ऐच्छिक सहैव नमनीयतत्त्वेषु आधारितराष्ट्रियशिक्षाप्रणाल्याः परिकल्पना कृता। राष्ट्रियशिक्षानीतौ कार्ययोजनायां शिक्षार्थं बालकेन्द्रित-दृष्टिकोणस्वीकारस्य परिकल्पनापि कृता। अस्यां परिप्रेक्षायां बालानां नामाङ्कनवर्धापनं, पञ्जीकृतछात्रान् आचतुर्दशहायनान् शालायामवरुध्य शिक्षा-परिष्कारविषये पूर्णप्रयासाः विधेयाः। अस्तु 1992 तमे ख्रिस्तवर्षे कार्ययोजनायां निम्नलिखितकार्याणि प्राथम्येन करणीयानि - 1. 'पाठ्यक्रमभागो लघुतां प्राप्नुयात्' इत्येतदर्थं सर्वथा प्रयतितव्यम् 2. पाठ्यक्रमे संशोधनं विधाय, क्रमबद्धरूपेण शालाप्रणाल्यां पाठ्यपुस्तकानि विकसितानि स्युरित्येतदर्थं प्रयतितव्यम् 3. न्यूनतमशिक्षणस्तरो निश्चितो भवेत्। एतदर्थं निम्नलिखिताः निर्देशाः पालनीयाः सन्ति -

(1) न्यूनतमशिक्षणस्तरकार्यनीतौ मुख्यतयाऽध्यापनप्रशिक्षणयोरुपरि दृष्टिः रक्षणीया।

(2) वर्तमानशिक्षास्तरपरिज्ञानाय शिक्षणोपलब्धीनां प्रारम्भिकं मूल्याङ्कनं

करणीयम्।

(3) आवश्यकतायां सत्यां स्थानीयोपलब्ध्यानुकूल्याय न्यूनतमशिक्षणस्तराः परिशोधनीयाः।

(4) क्षमता-मूलक-शिक्षणाय शिक्षकाणां प्रारम्भे, मध्ये मध्ये च विवेकपरीक्षणं करणीयम्।

(5) न्यूनतमशिक्षणस्तरमूलक-शिक्षणाय शिक्षकप्रशिक्षणपुस्तिकानां निर्माणं करणीयम्।

(6) छात्राणां कीदृशी बोधशक्तिरस्तीति समये समये ज्ञातव्यमस्ति। एतदर्थं मूल्याङ्कनं प्रारभेत। मूल्याङ्कनेन प्राप्तपरिणामानुसारी प्रयोगाः करणीयाः।

(7) एकक -(यूनिट) परीक्षाः भवेयुः, मूल्याङ्कनसामग्र्यश्च संगृहीताः करणीयाः।

(8) शैक्षणिकप्रक्रिया क्रियान्विता रुचिकरा च स्यादित्येतदर्थं क्षमता-मूलकाध्यापनस्य शिक्षणस्य सामग्र्यः संनिहिताः भवेयुः।

माध्यमिकशिक्षास्तरोऽपि भागद्वये विभक्तः कृतः। माध्यमिकशिक्षायां दशम्यन्ता शिक्षा सामान्याशिक्षास्तरे तिष्ठति। उच्चरतरमाध्यमिकशिक्षायां, एकादशतः द्वादश-कक्ष्यापर्यन्ता शिक्षा परिगणिता, इयम् आत्मनो वैशिष्ट्यात् वैविध्याच्च पृथग् एवास्ति। राष्ट्रियशिक्षाप्रणाल्यां; यथा राष्ट्रियशिक्षानीतावुल्लेखः कृतः। एकस्य राष्ट्रियपाठ्यक्रम-प्रारूपस्यावश्यकतास्ति। माध्यमिकशिक्षायाः प्रारूपस्तु पूर्वमेव निर्मितोऽभूत्। मन्ये, अस्य क्रियान्वितिरसमानैवास्ति। माध्यमिकस्तरशिक्षायै पाठ्यक्रमस्य संशोधनकार्यं प्रायः सर्वेषु राज्येषु प्रारब्धम्। राष्ट्रियशैक्षिकाऽनुसन्धानाख्येन संस्थानेन, प्रशिक्षण-परिषदा च, शालाशिक्षायाः सर्वेषां स्तराणां कृते पथप्रदर्शिकाः रूपरेखाः, पाठ्यक्रमाः निर्मिताः, पुस्तकान्यपि निर्माय समर्पितानि। तथापि, उच्चतरमाध्यमिक स्तर-पाठ्यक्रमप्रारूपमऽधुनाप्यधिकृतं नैवाभूत्। राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषदा च 1988 तमे वर्षे त्वेकः प्रारूप-हस्तलेखो लिखितः; किञ्च प्रकाशमागतानां नूतनतथ्यानामनुपेक्षणीयत्वात् शिक्षाक्षेत्रे, तस्य पुनरीक्षणमप्यावश्यकमभूत्। अतः परम् 1992 तमे वर्षे, कार्ययोजनायां प्रस्तावितताभूत् यत् -

1. अष्टम्यां योजनायां, निखिले देशे, शालाशिक्षायाः 10 (5 + 3 + 2) + 2 अर्थात् 10 + 2 शिक्षायाः समान-शैक्षिक-प्रारूपं सर्वत्र स्वीकृतं स्यात्, इत्येतदर्थं निम्नपरिकल्पनाः कृता :-

(1) यानि राज्यानि प्रदेशा वा शालाशिक्षायाः, राष्ट्रियैकरूपतावत् शैक्षिक-

प्रारूपमद्यापि नैवोररीकुर्वन्ति, ते सर्वेऽनुरोधनीयाः सन्ति यत् ते नवोद्धरितेषु विद्यालयेषु तं प्रारूपं प्रभावान्वितं कुर्वन्तु। यानि च राज्यानि पूर्वमेव तत् प्रारूपं स्वीकृतवन्ति सन्ति, तानि प्रयासान् तीव्रान् विधातुं यतेरन्।

(2) समप्रारूपस्य स्वीकारे समागतसमस्यानां परिहाराय, राज्यानां संघशासित-प्रदेशानां शैक्षिकप्राधिकरणैः सह परामर्शं विधाय कार्यदलस्य घटनं कर्त्तव्यमस्ति।

1988 तमे वर्षे, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा च, राष्ट्रियशिक्षानीतेः पाठ्यक्रम-मुख्यक्षेत्रैः सह पाठ्यक्रमस्य प्रमुखलक्ष्याणि तदनुशंसाश्च लक्ष्यीकृत्य, ''प्रारम्भिक-माध्यमिक-शिक्षाभ्यां राष्ट्रियपाठ्यक्रमस्यैकं प्रारूपम्'' इत्यस्य संशोधितं संस्करणं प्रचारितम्। अस्मिन् संस्करणे शिक्षाविषयवस्तूनां प्रक्रिया घटकानां समग्ररूपेण, तथा च माध्यमिकस्तरस्य विभिन्नविषयक्षेत्राणामुल्लेखः कृतः। इदं प्रारूपं, ''एन.सी.ई.आर.टी.'' द्वारा निर्मितविभिन्नविषयाणां पथप्रदर्शिकाः रूपरेखाः सन्ति, ताः पाठ्यक्रमाणां पाठ्यपुस्तकानामन्यासां शैक्षिकसामग्रीणामाधारभूमिरस्ति। अनेन प्रारूपेण माध्यमिकशिक्षायाः विषयवस्तु, पाठ्यक्रमस्य निम्नलिखितक्षेत्राणि लक्ष्यीकृत्य निर्मितं भविष्यति - 1. भाषा (मातृभाषा/हिन्दी/आङ्ग्ल) 2. गणितम् 3. विज्ञानम् 4. सामाजिकविज्ञानम् (इतिहासः/भूगोलः/नागरिकशास्त्रम्/अर्थशास्त्रम्) 5. कार्यानुभवः 6. कलाशिक्षा 7. स्वास्थ्यं शारीरकशिक्षा च 8. मूल्यपरकशिक्षा 9. जनसंख्याशिक्षा।

उच्चतरमाध्यमिकस्तरः (10 + 2) शालाशिक्षायाः महत्त्वपूर्णं पदमस्ति। यतो हि छात्रः इमामधिगत्यैव भाविनि काले कोऽपि अभियान्त्रिकः (इन्जिनीयर) प्रविधिविशेषज्ञः, चिकित्सकः (डॉक्टर), शिक्षको वा भवितुं, व्यावसायिक-पाठ्यक्रमे प्रतिभागित्वमधिकर्तुमथवा स्वशैक्षिकक्रियाकलापान् सततमभिवर्धयितुं पात्रतां गृह्णाति। माध्यमिकीं शिक्षामासाद्य केचित्तु कार्यजगता सम्बद्धाः भवन्ति। अतः माध्यमिकस्तरे हि छात्राः -भौतिकी-रसायनशास्त्र जीवविज्ञान-भू-विज्ञान-गणित-इतिहास-भूगोल-राजनीतिशास्त्र-अर्थशास्त्र- समाजशास्त्र-दर्शन-मनोविज्ञान-भाषा-कलादि विषयाणां मौलिकं ज्ञानमधिगच्छेयुः।

प्रतिविषयं विषयवस्तुनि तत्तद्विषयकाद्यतनविकासस्य तावती मात्रा हि स्याद् यावती 10 + 2 स्तरे अपेक्षिता वर्तते। पुनश्च प्रति विषयमावश्यकतां महत्त्वञ्चापि छात्रा अवगच्छेयुः अर्थात् आधारभूतज्ञानमवगच्छेयुः, येन विषयसम्बन्धिविभिन्न-व्यावसायिकपाठ्यक्रमाः तथा तेषां भाविशिक्षाक्षेत्राणामावश्यकता पूर्णा स्यात्।

उच्चतरमाध्यमिकशिक्षायाः राष्ट्रियपाठ्यक्रमस्य प्रारूपसंरचना सत्त्वरमेव चरमोत्कर्षं यास्यति। एन. सी. ई. आर. टी. द्वारा कार्यमिदम् अचिरादेव सम्पादयिष्यते। पूर्णतां यास्यति च। अस्यपरिष्कृतप्रारूपस्यैका महत्त्वपूर्णा विशेषता, उच्चतरमाध्यमिकशिक्षायां अर्द्धवार्षिकपद्धतिः भविष्यति। विभिन्नविषयाणां क्षेत्रेषु ज्ञानाधारस्य वर्धमानां महत्तां तथा सर्वविषयदक्षतां प्रारूपमिदमभिधास्यति। पाठ्यक्रमप्रारूपं लक्ष्यीकृत्य प्रवृत्ता एन. सी. आर. टी. संस्था क्रमशः मार्गदर्शिकां रूपरेखां पाठ्यचर्यां शैक्षिकोपहारं विकासयिष्यति। अष्टम्याः योजनायाः समाप्तिकालात् प्रागेव नवप्रारूपस्य कार्यान्वयनाय राज्यानां संघशासितप्रदेशानाञ्च प्राधिकरणेभ्यः परामर्शं दास्यति।

पुनरावृत्ति-प्रश्नाः

1. पाठ्यक्रमेण किमवगम्यन्ते भवता ? स्पष्टीक्रियताम्।
2. ''पाठ्यक्रमेऽनुभवानां पूर्णता निहिता विद्यते'' इत्यस्य कथनस्य विवेचना विधेया ?
3. पाठ्यक्रमस्योद्देश्यानि कानि-कानि भवितव्यानि ?
4. पाठ्यक्रमे के के दोषाः माध्यमिकशिक्षायोगेन प्रकटीकृताः ?
5. पाठ्यक्रमनिर्माणे के सिद्धान्ताः सन्त्यवधेयाः ?
6. विद्यालयपाठ्यक्रमस्य के के दोषाः शिक्षायोगेन निर्दिष्टाः ?
7. पाठ्यक्रमस्य के प्रमुखाः आधाराः सन्ति ?
8. पाठ्यक्रमप्रकाराः संक्षेपतो वर्णनीयाः ?
9. शिक्षायोगेन प्रस्ताविते पाठ्यक्रमे कानि कानि नवतथ्यानि समाविष्टानि ?
10. दशवर्षीय-विद्यालयशिक्षा-पाठ्यक्रमे कानि कानि नवीनतथ्यानि समावेशितानि पुनरीक्षणसमित्येति विवेचनीयम् ?
11. 10 + 2 विद्यालयशिक्षापाठ्यक्रमो हि कतिधा विभक्तः ? व्यावसायिक-शिक्षायाः पाठ्यक्रमे च केषां महत्त्वपूर्णव्यवसायानां शिक्षायाः व्यवस्था कृता राष्ट्रिय-पुनरीक्षणसमित्येति सम्यग् निरूपणीयम् ?
12. राष्ट्रियशिक्षासम्मेलनेन 8 + 4 वर्षीयशैक्षिकसंरचनापाठ्यक्रमस्य कीदृशी रूपरेखा प्रस्तुतेति स्पष्टीक्रियताम् ?
13. 1992 तमे वर्षे समायोजिता कार्ययोजना 10 + 2 द्वादशवर्षीयस्य पाठ्यक्रम-प्रारूपस्य विषये कान्-कान् विचारान् प्रस्तुतवती, इति संक्षेपतो लिख्यताम् ?

लेखार्थप्रश्नः

प्रधानाध्यापकस्य शिक्षाकाणां च पाठ्यक्रमसम्बन्धीनि कानि कर्त्तव्यानि भवन्तीति विस्तरेण स्वाभिमतप्रदर्शनपूर्वकं लिख्यताम् ?

13

समय-तालिकायाः महत्त्वं, निर्माणकसिद्धान्ताश्च

(Importance of Time-Table & its Principles of Construction)

"It is now generally recognised that the making of a satisfactory schedule is one of first test of the competence of a principal."

— Jacobson.

विद्यालये छात्राणां वर्गीकरणानन्तरं पाठ्यक्रमे च निर्धारिते सतीदं परमावश्यकं वर्तते यत् विद्यालये निर्धारितसमयस्य समुचितविभाजनं कर्त्तव्यं, येन विद्यालयीय-समस्तक्रियाः अनुभवाश्च सुव्यवस्थिताः स्युः। एवञ्च पाठ्यक्रमस्य विभिन्नविषयेभ्यस्तेषां सापेक्षिकमहत्त्वानुसारं समयनिर्धारणं भवेत् तथा बालकानां सर्वतोमुखी विकासश्च भवेत्। विद्यालयस्य यया योजनया समयतालिकया वा प्रतिदिनं समयं विभज्य क्रियाः सञ्चाल्यन्ते सैव समयतालिका भवति।

समय-तालिकाया आवश्यकता महत्त्वञ्च –

विद्यालयस्य कार्यं कुशलतापूर्वकं सञ्चालयितुं विद्यालयीयसम्पूर्णकार्य-क्रमाणामेका विस्तृतयोजना भवितव्या। यस्यां योजनायां विद्यालयस्य प्रतिदिनं निर्धारितसमयस्य विभिन्नविषयेभ्यः क्रियाभ्यश्च विभाजनं भवेत्। एतादृशी समयतालिका विद्यालयस्यान्तरिकव्यवस्थायै अत्यावश्यकं तत्त्वमस्ति। अस्याः अभावे विद्यालयीयकार्येषु अव्यवस्था भवितुं शक्नोति। समयतालिका ध्यानपूर्वकं निर्मितव्या विद्यालयीयाधिकारिभिः, यतो ह्युत्तमसमयतालिकया विद्यालयप्रशासनं कुशलतया सञ्चालयितुं शक्यते। उत्तमसमयतालिका शक्तेः, समयस्य धनस्य च दुरुपयोगं वारयति बालकेभ्यो व्यक्तित्वविकासावसरं ददाति च। अतः विद्यालयोद्देश्यानां प्राप्त्यर्थं समयतालिका परमावश्यकी वर्तते। समयतालिकायाः निर्माणं बालकशिक्षकयोर्दृष्टिकोणत्वादावश्यकमस्ति।

विद्यालये समयतालिका महत्त्वपूर्णं स्थानं भजते। यतो ह्येतद् तद्दर्पणो वर्तते यस्मिन् विद्यालयस्य सर्वशैक्षिककार्यक्रमः प्रतिबिम्बितो भवति। समयतालिका शिक्षककार्याणि व्यवस्थापयति। अनया विद्यालयीयकार्यक्रमान् सुव्यवस्थितं कृत्वा समयस्य सदुपयोगः क्रियते। यदि विद्यालये समय-तालिकायाः निर्माणं समुचितप्रकारेण न जातं तदा शक्तिसमययोर्दुरुपयोगः स्वाभाविक एव वर्तते।

समयतालिकायाः नैतिकदृष्ट्यापि बहुमहत्त्वं वरीवर्तते। अनया कार्यकरणत्वाद् बालकेषु सत्प्रवृत्तिगुणाश्च विकसन्ति, यथा – समयमहत्त्वस्य विचारशक्तिः, नियमितता, सुदृष्टिः, कर्त्तव्यपरायणतेति। अस्याः शिक्षकाणां कृतेऽपि महत्त्वं वर्तते, यतो हि समयतालिका शिक्षकेष्वपि सम्यक् दृष्टिकोणमुत्पादयति।

समय–तालिकायाः मनोवैज्ञानिकदृष्ट्या अपि महत्त्वं वर्तते। यतो ह्यस्याः निर्माणमावश्यकतानुसारं रुच्यनुसारञ्च क्रियते। उत्तमसमयतालिकायाम् अधिगमप्रक्रियायां बहुप्रभावो द्रष्टुं शक्यते। एषा तालिकाधिगमं सरलीकरोति। अस्यां विभिन्नक्रियाणां नियोजनाय समुचितसमयो दीयते, यथा – बालकानां रुचिः, जलपान–व्यवस्था, भोजनव्यवस्थेति।

अनुशासनं स्थापयितुं समयतालिकैकमुत्तमं साधनं विद्यते। अनयैव विद्यालयीयसम्पूर्णक्रियाः व्यवस्थितरूपेण प्रचलन्ति। समयतालिकयैव विद्यालयः कुशलतां निश्चिततताञ्च याति।

समयतालिकायाः निर्माणस्य मूलभूततथ्यानि –

समयतालिका विद्यालयस्य घटीयन्त्रमित्युच्यते। इयं विद्यालयसमयस्य पूर्णं विवरणं प्रस्तौति। कस्मिन् समये कालांशे च किं कार्यं भविष्यति, कश्च सम्पादयिष्यत्येवं निर्णयोऽपि तालिकेयमेव करोति। समयतालिका यदि श्रेष्ठा वर्तते तर्हि विद्यालयः नूनमुत्तरोत्तरं वृद्धिं यास्यति। अतः प्रत्येकविद्यालये प्रधानाध्यापकस्य मुख्यकर्त्तव्यमस्ति यत् स उत्तमतालिकायाः निर्माणं कुर्यात् कारयेत् वा। यद्यप्युत्तमतालिकानिर्माणाय न कोऽपि निश्चितो नियमस्तथापि निम्नलिखित – तथ्यानामाधारेण सन्तोषप्रदसमयतालिकायाः निर्माणं कर्तुं शक्यते –

(1) बालकानां हितसम्बन्धितथ्यानि –

विद्यालयस्य महत्त्वपूर्णमुद्देश्यं बालकानां व्यक्तित्वविकासो भवति। समयतालिकायाः निर्माणमपि बालकानां रुचि–योग्यतावश्यकताश्च ध्यात्वा कुर्यात्, यथा –

1. बालकाः स्वरुच्यनुसारं विषयचयनावसरं लभन्ताम्।

2. बालकानां वैयक्तिकावश्यकतापूर्त्यर्थमवसरो दातव्यः।

3. कालांशावधेः निर्धारणं बालकानां वयोऽनुसारं भवितव्यम्। मनो–वैज्ञानिकान्वेषणैरिदं साधितं यत् षड्हायनतः आ नवमहायनो बालकः कस्यचिद् अपि विषयस्य 10 तः 15 निमेषपर्यन्तमेव दत्तचित्तो भूत्वाध्ययनं कर्तुं शक्नोति।

नवतो द्वादशवर्षीयस्तथा च द्वादशतः चतुर्दशवर्षीयबालकश्च क्रमशः 20-25, 30-35 निमेषपर्यन्तञ्चैकाग्रचित्तो भवितुं शक्नोति।

4. कालांशस्य क्रमोऽप्यवधेयः। समयचक्रे प्रथमः कालांशोऽन्तिमकालांशश्च कार्यदृष्ट्या नोत्तमो भवति। यतो हि प्रथमे कालांशे बालको गृहाद् विद्यालयं समायात्यतः क्लान्तिः स्वाभाविक्येव वर्तते। अन्तिमे कालांशे स कार्यं कुर्वन् क्लान्तिमनुभवति। अनयोः कालांशयोः सरलाः रुचिकराश्च विषयाः पाठनीयाः।

5. विषयक्रमोऽपि ध्यातव्यः। द्वौ कठिनविषयौ निरन्तरं न पाठनीयौ यतो हि सततं कठिनविषयाध्ययनेन बालकाः सत्वरमेव क्लान्तो भविष्यन्ति। अतः कठिन विषयानन्तरं सरलविषयः सैद्धान्तिक विषयानन्तरं प्रायोगिकविषयश्च पाठनीयः।

6. बालकानां खेदमपसारयितुं समयविभागचक्रे द्वौ अवकाशौ भवितव्यौ। एकः तृतीये कालांशेऽतीते द्वितीयश्च पञ्चमकालांशान्ते भवेत्।

सन्दर्भेऽस्मिन् ऋतोरपि ध्यानं दद्यात्। मनुष्यस्य कार्यक्षमतायाम् ऋतुप्रभावो भवत्येव, अत इदमावश्यकमस्ति यदृत्वनुकूलं समयतालिका भवितव्या यथा - पर्वतीयप्रदेशेषु ग्रीष्मऋतौ, क्षेत्रीयप्रदेशेषु शीतर्तौ चाधिकं कार्यं कर्तुं शक्नोति मानवः। अस्माकं देशे प्रायः ग्रीष्मसमये प्रातःकाले एव विद्यालयेषु अध्यापनं भवति विशेषतः ग्रीष्मे वर्धिते कार्यक्षमता ह्रासो भवति।

7. बालकानां व्यक्तित्वविकासायान्यपक्षपोषणाय समयतालिकायां स्थानं भवेत्- यथा - शारीरक-मानसिक-नैतिक-सामाजिकपक्षान् विकासयितुं क्रीडा-व्यायाम-प्रार्थना-पाठ्यक्रमसहगामिक्रियाणामायोजनं भवितव्यम् अर्थात् समयतालिकायां-विद्यालयस्य समस्तक्रियाभ्यः समुचितावसरो भवितव्यः।

8. दिनानांक्रमोऽपि ध्येयः, एकस्मिन् सप्ताहे कार्यकरणाय षड्दिवसाः भवन्ति। एषु दिवसेषु सोमवासरः शनिवासरश्च नाधिक उपयुक्तो भवति। यतो ह्यनयोरेकस्त्वकाशात्पूर्वम् अपरञ्चावकाशात् अनन्तरं भवति। अत एतयोर्द्वयोः दिवसयोः क्लिष्टः विषयो न पाठनीयः। यतो ह्यवकाशवशाच्छात्रस्य मानसिकमेकाग्र्यं न भवति।

(2) शिक्षकाणां हितसम्बन्धितथ्यानि -

समयतालिकायाः निर्माणसमयेऽध्यापकानाम् आवश्यकतापि विचारणीया। अस्याः निर्माणमपि इत्थं करणीयं यदध्यापकः खेदं नानुभवेत्, अतः सम्बन्धेऽस्मिन् निम्नलिखितबिन्दवः स्मरणीयाः -

1. शिक्षकाय तत्कार्यमेव दातव्यं यस्मिन् तस्य रुचिर्योग्यता च भवेत्। अनेन

शिक्षकः मानसिकरूपेण स्तुलितः स्थास्यति।

2. सर्वेषां शिक्षकाणां कार्यभारः समानः भवेत्।

3. शिक्षकाणां मर्यादायाः मनोवृत्तीनां च संरक्षणं भवेत्।

(3) विद्यालयीयसामग्रीसम्बन्धितथ्यानि – समयतालिकायाः निर्माणसमये विद्यालये समुपलब्धानां साधनानामपि ध्यानम् आवश्यकम्, यथा – शिक्षकाणां संख्या, विशिष्टकक्ष्याणां सामान्यकक्ष्याणाञ्च व्यवस्था, पुस्तकालयः, क्रीडाङ्गणम्, पाठ्यक्रमसहगामिक्रियाणां सञ्चालनयोग्यसामग्री, शैक्षिकसामग्रीति।

(4) शिक्षाविभागीयनियमाः – सामान्यतः शिक्षाविभागेन विद्यालयसत्रस्य विद्यालयदिवसस्य चावधेः प्रतिविषयं कालांशसंख्या च निर्धार्यते, अत आवश्यकमिदमस्ति यत् शिक्षाविभागीयनिर्देशपालनपूर्वकं समयतालिकायाः निर्माणं भवेत्।

(5) अन्यावधेयबिन्दवः – समयतालिकानिर्माणसमय इदमपि ध्यातव्यं यदनया छात्रशिक्षकयोर्मध्येऽधिकाधिकसम्पर्को भवेत्। येन विद्यालयशिक्षणस्तरस्य बालकानाञ्चारित्रिकभावनायाश्चोन्नयनम्भवेत्। शिक्षकोऽधिकसम्पर्केण बालकं व्यक्तिगतरूपेण ज्ञातुं समर्थो भवति तथा च तस्य निर्देशने लाभप्रदः सिद्ध्यति। 'मैनले' महाभागानुसारं माध्यमिकविद्यालयस्य समयतालिकायां बालकान् निर्देष्टुमपि समयनिर्धारणमत्यावश्यकं वर्तते। तालिकायां समन्वितशिक्षायायपि व्यवस्था भवितव्या।

उपर्युक्ततथ्यानि ध्यात्वा फिण्डले महोदयानुसारं निम्नलिखितसमयतालिका भवितुं शक्नोति –

9.00	वादनतः	–	9.30	पर्यन्तम् उपस्थितिः, प्रार्थनासभा, धार्मिकशिक्षा च
9.30	वादनतः	–	10.15	गणितं विज्ञानं वा
10.15	वादनतः	–	11.00	भाषा
11.00	वादनतः	–	11.15	अवकाशः
11.15	वादनतः	–	11.30	संगीतम्मनोरञ्जनं वा
2.00	वादनतः	–	3.00	इतिहासः, भूगोलः, साहित्यं वा
3.00	वादनतः	–	3.15	मनोरञ्जनं, शारीरकव्यायामो वा
3.15	वादनतः	–	4.30	हस्तकार्यं, कृषिशिक्षा, सीवनशिक्षा गृहकला वा

समयतालिकायाः निर्माणे व्यवहारगतकाठिन्यानि –

समयतालिकायाः निर्माणेऽधस्तनं काठिन्यमनुभूयते –

(1) शिक्षकाणामभावात् उपर्युक्तसिद्धान्तानुसरणं काठिन्यमस्ति। तस्मात्कारणादेव छात्राः निजेच्छानुसारं विषयान् चेतुं न शक्नुवन्ति। शिक्षका अपि स्वेच्छानुसारं विषयान् पाठयितुं न शक्नुवन्ति। प्रायः दृश्यते यत् शिक्षकास्तान् विषयानध्यापयन्ति येषु विषयेषु तेषां पूर्णयोग्यता न भवति। अत एव शिक्षकेषु मानसिकोद्वेग उत्पद्यते, तेन कार्यक्षमता सततं ही यते च।

(2) सामान्यकक्षाकक्षाणाम्, अध्ययनोपयोगिकाष्ठसम्भाराणां शैक्षिकसामग्रीणाञ्चाभावे समयतालिकायाः निर्माणकार्यं कठिनं भवति अर्थात् एषामभावे समयतालिकानिर्माणे काठिन्यमनुभूयते।

(3) अंशकालिकशिक्षकाणां नियुक्तिकारणादपि समयतालिकानिर्माणे काठिन्यमनुभूयते। यतो हि ते विद्यालयाय निजसौविध्येन समयं ददति। अपित्वेकां श्रेष्ठां समयतालिकां निर्मातुमेव प्रयत्नः करणीयः। प्रशासकस्य प्रावीण्यमस्मिन्नेवतथ्ये निहितं वर्तते, यत् तत्समीपे यानि कान्यपि साधनानि सन्ति तेषामेव साधनानां प्रयोगः सर्वोत्तमरूपेण सः कुर्यात्। प्रधानाध्यापक एव समयतालिकायाः निर्माणेऽधिकृतो भवति परं सोऽप्येकाकीदं कार्यं कर्तुं न शक्नोति। अतः समयतालिकायाः निर्माणकार्यं सहयोगेन निष्पादनीयम्। अतः सदैव निजसुहृदामस्मिन् कार्ये सहाय्यं स्वीकुर्यात्।

पुनरावृत्तिप्रश्नाः

1. विद्यालयसमयतालिकायाः किन्तात्पर्यम्?
2. विद्यालयसमयतालिकाया आवश्यकता स्फोरणीया?
3. विद्यालये समयतालिकायाः किम्महत्त्वम्? उदाहरणेन स्पष्टीक्रियताम्?
4. समयतालिकानिर्माणे किङ्किमवधेयं भवति भवता?
5. समयतालिकानिर्माणे यदि छात्रहितस्याऽवधारणा न भवेत् तदा का हानिः?
6. शिक्षकहितोपेक्षणेन समयतालिकायां का हानिर्भवति?
7. व्यावहारिककठिनताः काः काः समयतालिकानिर्माणे समुपस्थिताः भवन्ति?
8. व्यावहारिककठिनतानां परिहारः केन प्रकारेण कर्त्तुं शक्यते?

लेखार्थप्रश्नः

1. विद्यालय उत्तमा समयतालिका सम्यक्प्रचलितस्य कार्यस्य वास्तविकं प्रतिबिम्बम्भवतीत्यस्य क आशयः साधु विविच्यताम्।

14

गृहकार्यम्

(Home Work)

"Under normal conditions, a reasonable day's work for a child has been at the close of the afternoon session and home-work as it is generally organised does more harm than good as a rule in this country, except, perhaps from the point of view of examination success."

— Bray

यत्कार्यं छात्राः गेहे सम्पादयन्ति तत्कार्यं गृहकार्यमित्युच्यते। प्रायोऽस्माकं देशे गृहकार्यस्योपर्युक्तोऽर्थ एव स्वीक्रियते। किन्त्वेषोऽर्थो गृहकार्यस्य संकुचितोऽर्थो वर्तते। वास्तविकरूपेण शब्दोऽयं तेभ्यः सर्वेभ्यः कार्येभ्यः प्रयुज्यते यानि कार्याणि विद्यालयीयविषयसम्बद्धानि सन्ति।

गृहकार्यस्य महत्त्वम् –

प्रायः विद्यालयेषु गृहकार्यं शिक्षकैः निर्धार्यते। यद्यध्यापक इच्छेत् तर्हि तु दद्यात् नान्यथेति। अध्यापक एव गृहकार्यस्य मात्रां प्रकारञ्च निर्धारयति। गृहकार्यनिर्धारणविषयेऽपि विद्यालयेषु विभिन्नताऽवलोक्यते। केषुचित् विद्यालयेषु गृहकार्यं दीयते केषुचिन्नेति। प्रायः लिखितं हि गृहकार्यं प्रदीयते। निर्धारितकार्यमिदं समुचितरूपेण च न निरीक्ष्यते। प्रायः शिक्षकाः पृष्ठेषु चिन्हांकनङ्कृत्वाऽन्तिमे पृष्ठे हस्ताक्षराणि कुर्वन्ति। अतः छात्राणामवधानमशुद्धीः प्रति न याति। अन्ततः विद्यालयेषु गृहकार्यस्य महत्त्वं बालकेषु तस्य प्रभावश्च शैथिल्यं प्रयाति। तथापि गृहकार्यस्य महत्त्वं शिक्षाशास्त्रिणः स्वीकुर्वन्ति। इंग्लैण्डदेशे 'बोर्ड ऑफ एज्यूकेशन (Board of Education)' इति संस्थया विद्यालयनिरीक्षकैः सन्दर्भेऽस्मिन् पर्यवेक्षणं कृतम्। तेन परीक्षणेन निःसृतमिदं तथ्यं यत् गृहकार्यं माध्यमिकशिक्षाया एकमावश्यकमङ्गं वरीवर्तते। एवञ्च पाठ्यक्रमस्य यदङ्गं विद्यालयेऽपूर्णं तिष्ठति तद् गृहे पूर्णं भवेत्। परन्तु गृहकार्यस्य महत्त्वं केवलं पाठ्यक्रमस्य पूर्तिरूपमेव नापितु अस्यान्तर्गतं बालकेभ्यः स्वतन्त्रतापूर्वकं निजकार्यकरणाय अवसराः प्रदीयन्ते। अनेन बालकेषु नैतिक–बौद्धिकात्मनिर्देशनेत्यादीनां गुणानां विकासोऽपि भवति।

गृहकार्यस्य महत्त्वं विस्तरेणैवमवधेयम् –

(1) गृहकार्यं छात्रान् पुस्तकालयस्याधिकाधिकप्रयोगाय प्रोत्साहयति।

(2) अनेन छात्रेषु स्वाध्यायप्रवृतिरुदेति।

(3) गृहकार्येण छात्रेषु व्यवस्थितरूपेण कार्यकरणस्य क्षमता समुदेति।

(4) अनेन गृहविद्यालययोर्मध्ये सम्पर्कं स्थाप्यते।

(5) अनेन छात्रेषु स्वतन्त्रचिन्तनं तर्कशक्तिः निर्णायकबुद्धिश्च वर्धते।

(6) गृहकार्येण सामूहिकशिक्षणदोषं परिहर्तुमवसरः समुपलभ्यते छात्रैः यतो ह्यनेन बालको निजयोग्यताया अधिकाधिकप्रयोगं कर्तुं शक्नोति।

(7) अनेन बालकेषु आत्मविश्वासः उत्पद्यते तथा च बालकाः स्वावलम्बिनो भवन्ति।

उपर्युक्तविवेचनाधारेण वक्तुं शक्यते यत् गृहकार्यं बौद्धिकनैतिक दृष्ट्या महत्त्वपूर्णं वर्तते। किन्तु अस्य महत्त्वं तदैव सिद्ध्यति यदा गृहकार्यं विचार्य दीयते। अव्यवस्थितगृहकार्यं लाभापेक्षया हानिप्रदमेव भवति। अतः शिक्षकैः गृहकार्यनिर्धारणे केचित् विशेषबिन्दवोऽवधेयास्सन्ति।

गृहकार्यसम्बन्धिन्यः समस्याः –

सामान्यतः वक्तुमित्थं शक्यते यत् छात्राः गृहकार्यं न कुर्वन्ति। गृहकार्यसम्बन्धिन्य एतादृशसमस्याः शिक्षकाणां समक्षे समायान्त्येव। पाश्चात्त्यदेशेष्वेतादृशसमस्यानां विषयेऽनुसन्धानकार्याणि सम्पन्नान्यासन्। एतैरनुसन्धानैर्ज्ञायते यत् गृहकार्यं प्रति छात्राणामरुचिमूलमधस्तनं वर्तते–

1. यः पाठश्छात्रैः नाधिगम्यते तस्य पाठस्य गृहकार्यकरणे छात्राः स्वाभाविकरूपेण निरुत्साहिताः भवन्ति।

2. गृहकार्याय दत्ताः प्रश्नाः प्रेरकाः न भवन्ति। तस्मात् कारणात् छात्राः विषयवस्तुनः पुनरावृत्तिमेव कुर्वन्ति। तत्र तेषां रुचिरपि न भवति।

3. छात्राः यं शिक्षकं वाञ्छन्ति तेनाध्यापकेन दत्तं गृहकार्यं तु दत्तचित्तो भूत्वा कुर्वन्ति यमध्यापकञ्च नेच्छन्ति तस्य कार्यमपि न कुर्वन्ति।

4. परिवारे गृहकार्यं सम्पादयितुमुचितवातावरणमपि छात्रैः नोपलभ्यते। केषुचित् परिवारेषु शान्तवातावरणस्याभावो दृश्यते। केषुचित् परिवारेषु शान्तवातावरणेऽप्यभिभावकाः छात्राणां गृहकार्यं प्रति जागरूकाः न भवन्ति।

5. शारीरकदृष्ट्या निर्बलबालका अपि गृहकार्यात् बिभ्यति। अतिशारीरकश्रमवशात् अपि कतिपयाः छात्राः गृहकार्यं नैव कुर्वन्ति।

6. पाठ्यक्रमसहगामिक्रियासु सक्रियरूपेण संलग्नाः छात्रा अपि समयाभावात् गृहकार्यं कर्तुमसमर्थाः भवन्ति।

7. विभिन्नशिक्षकाः स्व-स्वविषयकगृहकार्यायाऽऽदिशन्ति। तस्मात् छात्रस्य समीपे गृहकार्यस्य बाहुल्यं भवति। अतश्छात्रो गृहकार्यात् बिभेति।

गृहकार्यप्रदाने ध्यातव्याः बिन्दवः -

(1) गृहकार्यं परीक्षायै न भवेदपि तु आत्मशिक्षणाय अध्ययनप्रवृत्ति-सम्पादनाय भवितव्यम्।

(2) गृहकार्यप्रदानसमये शिक्षकः बालकस्य वयः मानसिकस्वास्थ्यं च ध्यायेत्।

(3) सर्वेषां छात्राणां कृते समानं गृहकार्यं न भवेत्। यतो हि छात्रेषु वैयक्तिक-वैभिन्न्यं भवति - यथा कस्यचिद् बालकस्य रुचिः व्यवहारिककार्येषु वर्तते तर्हि तस्मै व्यवहारिकं कार्यं दद्यात्।

(4) गृहकार्यप्रदानसमये छात्रस्य पारिवारिकस्थितिरपि द्रष्टव्या, केचिच्छात्रा एतादृशा भवन्ति ये गृहे पितृभ्यां सह जीविकोपार्जने निजसमयं यापयन्ति। अस्माकं देशे बहवः परिवारा एतादृशा अपि वर्तन्ते येषु विद्युद् व्यवस्था, सम्यगुपवेशन-व्यवस्था, समुचितशयनव्यवस्थापि न प्राप्यते। एतत्सर्वमध्यापकेन विचार्यैव गृहकार्यं दात्तव्यम्।

(5) गृहकार्येषु विभिन्नताऽपि भवेत् यथा - कक्ष्यायां पठितपाठविस्तारपरं मूल्याङ्कनपरं वा गृहकार्यं, व्याख्यापरं गृहकार्यं लिखितकार्यं, हस्तकार्यमध्ययन-कार्यं-कण्ठस्थीकरणं-रचनात्मकं कार्यमिति।

(6) गृहकार्यं मौलिकं स्यात् येन छात्रेषु मौलिकरचनायाः विकासो भवेत्। गृहकार्यस्य मौलिकता बुद्धिवैशद्यं जनयति छात्रेषु।

(7) गृहकार्यमेतादृशं भवेत् येन छात्रः स्वस्य शक्तेः पूर्णोपयोगं कर्तुं शक्नुयात्।

(8) शिक्षकः गृहकार्यप्रदानसमये कार्यसफलतायै समुचितं पन्थानमपि प्रदर्शयेत्। अर्थात् गृहकार्यस्य समाधानसम्बन्धोचितमार्गनिर्देशनं कुर्यात्। यतो हि विना मार्गनिर्देशनं छात्राः सम्यक्तया कार्यं कर्तुं न शक्नुवन्ति। मार्गनिर्देशनाभावे छात्राः गृहकार्यात् विद्यालयाच्च पलायन्ते।

केवलमुपर्युक्तानां नियमानामाधारेणैव गृहकार्यप्रदानं नोचितम्। अपित्विद-मप्यावश्यकमस्ति यत् शिक्षकः गृहकार्यस्य समुचितं निरीक्षणमपि कुर्यात्। यदि

गृहकार्यं सम्यक्तया न निरीक्ष्यते तदा तत्कार्यस्य न कोऽपि लाभः। गृहकार्यस्य निरीक्षणं सावधानतया कर्त्तव्यम्। गृहकार्यस्य पूर्त्यर्थम् अभिभावकानां सहयोगोप्यपेक्षितो वर्तते।

गृहकार्यसम्बन्धे सर्वैः शिक्षकैरेका योजना निर्मेया यस्यां साप्ताहिक गृहकार्यस्योपयुक्तविभाजनं भवेत्। अनया योजनया बहवो लाभाः सन्ति यथा – बालकान् गृहकार्यभारः न बाधते, विभिन्नविषयाणां समन्विताध्ययनं सम्भवति, गृहकार्यस्य निर्धारणे सञ्चालने च सौविध्यं भवति।

अन्ते तु अस्माकं विचारे गृहकार्यस्य बाहुल्यात् तस्य गुणवत्त्वमेव छात्रोपकाराय भवति। छात्रस्य सर्वाङ्गिकविकासायैव शिक्षकैः प्रयतितव्यम्।

पुनरावृत्तिप्रश्नाः

1. गृहकार्यस्य अभिप्रायः कः ? सोदाहरणं स्पष्टयत।

2. छात्राणां दृष्ट्या गृहकार्यस्य महत्त्वं प्रतिपादयत।

3. गृहकार्यप्रदाने काः काः समस्याः समागच्छन्ति ? सोदाहरणं वर्णयत।

4. उच्चप्राथमिक–माध्यमिकस्तरयोश्च छात्राणाङ्कृते गृहकार्यप्रदानकाले के सिद्धान्ताः अनुसरणीयाः ? विस्तरेण लिखत।

5. गृहकार्यस्य सम्बन्धे शिक्षकैः काः नीतयः अनुसरणीयाः ?

लेखार्थप्रश्नः

''यदि विद्यालये शिक्षणकार्यं प्रभावशालिरीत्या अभवत् तदा बालकानाङ्कृते गृहकार्यप्रदानं समयस्य अपव्ययोऽस्ति'' अस्य कथनस्य विवेचनां कुरुत।

15

पाठ्यक्रमसहगामिक्रियाः
(Co-Curricular Activities)

"The participation in co-curricular activities was more likely to produce wholesome and attractive personalities than routine class work." **- J. R. Shannon**

प्रायः पूर्वकाले क्रीडा–वादविवाद–नाटक–संगीतप्रभृतयः गतिविधयः पाठ्यक्रमक्षेत्रात् बहिः सन्तीति मान्यता आसीत्। उक्तक्रियाभ्यः अतिरिक्ताः पाठ्यक्रमक्रियानाम्ना बोध्यन्ते स्म। प्राक्तने समये विद्यालयाधिकारिणः क्रीडादिक्रियासु अरुचिं प्रदर्शयन्ति स्म। कदाचित् ते शक्तेः समयस्य च अपव्ययम् एव स्वीकुर्वन्ति। क्रीडादिक्रियाणां विषये विद्यालये विवादोऽपि अभूत्, किन्तु अधुना क्रीडादिक्रियाणां शिक्षाक्षेत्रे सामाजिकक्षेत्रे शिक्षणप्रक्रियायाञ्च योगदानं विलोक्य विवादः समाप्तिं गतः।[1]

एच.सी मैकोनः महोदयेन – ''पाठ्येत्तरक्रियाणां विकासः त्रिधा विभक्तः– प्रथमस्तरे तु शिक्षकैः प्रशासकैश्चोक्तक्रियाणामवहेलना कृता। द्वितीयं सार्वजनिक–विरोधः क्रियते स्म। तृतीयस्तरे आधुनिकयुगस्य शैक्षिकोद्देश्यानां प्राप्त्यर्थम् उक्तपाठ्येत्तरक्रियाणामुपयोगः आवश्यकः इति अवमन्यते।''

आधुनिककाले शिक्षाशास्त्रिणः अत्र सम्मताः सन्ति यत् आसां क्रियाणामुपयोगार्थं समुचितं पथप्रदर्शनं स्यात् तर्हि आसां शैक्षिकमहत्त्वं वर्धिष्यते। पाठ्येतरक्रियाः अद्य पाठ्यक्रमसहगामिक्रियाः इति नाम्ना वदन्ति। तथा इमाः पाठ्यक्रमस्य अभिन्नाङ्गत्वेन स्वीकृताः सन्ति। ये अनुभवाः क्रियाः वा शैक्षिकमहत्त्वशालिनः ते पाठ्यक्रमस्य अङ्गत्वं प्राप्नुवन्ति। अतः एताः क्रियाः वस्तुतः पाठ्यक्रमसहगामि–क्रियाः सन्ति इति अवधेयम्।

पाठ्यक्रमसहगामिक्रियाणां लक्ष्याणि –

लोकतन्त्रीयसमाजस्य इयं प्रबला अपेक्षास्ति यत् सामाजिकानुभवानां प्रयोगशालां

---

1. "The controversy that has flickered for years as to the proper place of the student activity programme has been resolved rather effectively through the justification of student activities on the basis of educational, social and personal contributions to student learning."

-Stanley, W. Williams.

युवानः प्राप्नुयुः, येन ते अध्यापितसिद्धान्तान् प्रयोक्तुं समर्थाः भवेयुः। अतः सामूहिक-क्रियाकलापेषु शिक्षक-छात्रसम्पर्कावसरेषु तथा तासु क्रियासु अवधानं दातव्यं येन बालकाः लोकतन्त्रात्मकमनुभवम् अधिगच्छेयुः।

एतादृशक्रियाकलापानां निम्नलिखितान्युद्देश्यानि सन्ति -

1. विद्यालयस्य सम्पूर्णशैक्षिककार्यक्रमाणां चारित्रिकभावनाञ्चोन्नतिः।

2. छात्रेभ्यः स्वानुशासनं (Self-Government) लोकतन्त्रीयप्रक्रिया प्रयोगानुभव-प्रदानम्, येन ते सुनागरिकतां प्राप्तुं समर्थाः भवेयुः।

3. विभिन्नवातावरणेभ्यः समागतबालकेषु सहयोगस्य सहास्तित्वस्य भावनायाः विकासः भावात्मकैकत्वञ्च स्यात् येन राष्ट्रियैक्यमार्गः प्रशस्तः स्यादिति।

4. विद्यालयेन सह सामाजिकानां पारस्परिकः सम्बन्धः उन्नतो भवेत् तथा सामाजिकाः विद्यालयकार्यक्रमेषु रुचिं प्रदर्शयेयुः इत्येतदर्थं तेभ्यः प्रोत्साहनं भवेत्।

5. बालकानां सर्वाङ्गीणविकासाय योगदानम्।

6. बालकानां स्वावकाशस्य सदुपयोगाय सज्जीकरणम्।

पाठ्यक्रमसहगामिक्रियाणां महत्त्वम् -

विद्यालयानामिमाः क्रियाः तेषां जीवनशक्तयस्सन्ति। आसां बालकानां जीवने बहुमहत्त्वमस्ति, यतो हि तेषां सर्वाङ्गिक व्यक्तित्वस्य विकासः ताः कुर्वन्ति। आसां महत्त्वस्य विषये माध्यमिकशिक्षायोगस्य विचारोऽस्ति यत् इमाः क्रियाः बालकेभ्यः स्ववैयक्तिकगुणान्, क्षमताः आत्मविश्वासञ्च विकासयितुमवसरं प्रददति तथा च अनुशासन-नेतृत्वयोश्च सहयोगिगुणेषु बालकेभ्यः प्रशिक्षणं ददति। आसां क्रियाणां-महत्त्वमधोलिखितमस्ति -

(1) वैयक्तिकावश्यकतानां पूर्त्तौ सहायकक्रियाः -

प्रतिजनम् अपरैः अभिस्वीकरणस्य एका मूलभूतावश्यकता भवति। तथा च सः सुरक्षामपि वाञ्छति। सुरक्षायाः भावना इयमपेक्षां करोति यत्समाजेन तस्मै आश्वासनं प्राप्नुयात्। छात्रक्रियाणां कार्यक्रमः आसां मूलभूतावश्यकतानां पूर्तौ सहायको भवति तथा च आत्माभिव्यक्ति-आत्मप्रत्यभिज्ञानस्य योग्यता-स्वरुचीनां विस्तारस्ययोग्यता, आत्मकार्याणां नियन्त्रणस्य शक्तिः, नूतनपरिस्थितिषु समञ्जनस्य शक्तिः इत्यादीनामावश्यकतानां पूर्तिरपि भवति।

(2) सामाजिकावश्यकतानां पूर्तौ सहायकक्रिया :-

सामाजिकावश्यकताः वैयक्तिकावश्यकताभिः घनिष्ठरूपेण सम्बन्धितास्सन्ति।

'सामाजिकः' इत्यस्य शब्दस्य प्रयोगः अपरैः सह सुसम्बन्धविकासस्य भावनया कृतः। प्रतिव्यक्ति इतरैः सह कार्यकरण-सम्बन्धस्थापनक्षमताविकाससम्बन्धिनीम् आवश्यकतां तीव्रमनुभवति। एषा आवश्यकता तस्मै किञ्चित् आचार-विचारः अपरैः सह सद्व्यवहारकरणस्य स्वीकृतरीतीः अधिगमनाय बाध्यते। छात्रक्रियाः सामाजिकनियमानां सदाचरणस्य च स्वीकृताङ्गानामधिगमे अधिगमे बहुसहायतां प्रददति। आभिः क्रियाभिः बालकाः व्यवहाररूपेण ज्ञानं विन्दन्ति। इमाः क्रियाः व्यक्तौ नेतृत्वम् अनुशासनं च स्थातुं शक्तिम्, विभिन्नसामाजिकसंघर्षान् अपाकरणाय योग्यताम् अपि प्रददति।

(3) नागरिकप्रशिक्षणम् -

छात्रक्रियाणां कार्यक्रमः बालकेभ्यः वास्तविकस्थितीनामामुखीकरणस्य, समुदायसेवायाः, स्वतन्त्रनिर्णयस्य च अवसरं प्रददति। व्यवहारिकरूपेण नागरिकतायाः प्रशिक्षणं, नेतृत्वं, उत्तरदायित्वनिर्वहनयोग्यता, पराधिकाराणां रक्षा, सामाजिकप्रगतिः, उत्साहः, कार्यक्षमता, परेषां कल्याणस्य भावना इत्यादीनां विकासे सहयोगिन्यः भवन्ति इमाः क्रियाः।

(4) किशोरावस्थाया आवश्यकतानां पूर्त्तिः -

अवस्थेयं सुकोमला भवति। अस्यामवस्थायां बालके अतिरिक्तशक्तेराधिक्यं लभ्यते। एताभिः क्रियाभिः तेषामतिरिक्तशक्तिं मूलप्रवृत्तीः च विभिन्नोपयोगिनीसु धारासु प्रवाहयते। एवञ्च किशोरबालकानां नैसर्गिकप्रवृत्तीः तेषां सामाजिक-व्यक्तित्वस्य विकासाय समृद्धये च विभिन्नकार्येषु संलग्नाः क्रियन्ते। विद्यालयेषु मनोरञ्जनसमूहानां (Clubs) सङ्घटनानाञ्च माध्यमेन किशोरावस्थायाः बौद्धिक-संवेगात्मकावश्यकतानां पूर्त्तिं कृत्वा तेषां सामाजिक-नैतिकविकासश्च क्रियते।

(5) शारीरकविकासः -

विविधशारीरकक्रियाभिः बालकाः सक्रियाः शक्तिशालिनश्च भवन्ति। क्रीडा-व्यायामशारीरकाभ्यासैश्च शरीरं स्वस्थं भवति।

(6) नैतिकगुणानां विकासः -

आसु क्रियासु भागग्रहणेन बालकेषु सत्यता-सरलता-आत्मविश्वास-न्यायप्रियता-धैर्य-दृढता-विनम्रता-आज्ञाकारितादीनां गुणानां विकासो भवति यैः सच्चरित्रस्य निर्माणं भवति। बालकः आसु क्रियासु भागं गृहीत्वा स्वार्थं परेषां हिताय त्यक्तुं प्रयत्नशीलो भवति।

(7) विशिष्टरुचीनां विकासः –

विभिन्नाः क्रियाः बालकेषु विशिष्टरुचीनामुत्पादने सहायतां कुर्वन्ति। विद्यालयेषु सङ्घटित बहुद्देशीयाः समितयः क्रियाश्च बालकेषु सम्भाव्यगुणानां, व्यावसायिक-कुशलतानां, साहित्यिकरुच्यादीनाञ्च विकासं कुर्वन्ति। एताः विविधरुचयः कुशलताश्च बालकस्य भाविजीवनस्य समृद्धये सफलीकरणाय च अतीव सहयोगिन्यः भवन्ति। आभिः क्रियाभिः बालकानां प्रियव्यापाराणां (Hobbies) विकासाय विभिन्नावसराः प्रदीयन्ते। एते प्रियव्यापाराः बालकानां स्वावकाशस्य सदुपयोगाय सहायकाः भवन्ति।

(8) अनुशासनस्थापने सहायिकाः –

छात्रक्रियाभिः विद्यालये अनुशासनस्थापने सारल्यं भवति, यतो हि बालकानां वैयक्तिकविभिन्नतानां गुणानाञ्च अभिस्वीकृतिः विद्यालयानुशासनस्य समस्यायाः महत्त्वपूर्णं समाधानमस्ति। कार्यसंलग्नता तान् विविधकुप्रवृतिभ्यः कुचक्रेभ्यश्च अपाकरोति। किञ्च वैयक्तिकगुणानां क्षमतानाम् आत्मविश्वासस्य विकासाय च अवसरः कल्पितः भवति।

पाठ्यक्रमसहगामिक्रियाणां सङ्घटनप्रशासननिरीक्षणानाञ्च सिद्धान्ताः–

अत्र सङ्घटन-प्रशासन-निरीक्षणसम्बन्धिनः च मुख्याः बिन्दवः प्रस्तूयन्ते येषामनुसरणेन उपर्युक्तोद्देश्यानि सारल्येन अधिगन्तुं शक्यन्ते यथा –

1. विद्यालये यस्याः क्रियायाः सङ्घटनं क्रियते सा विद्यालयोद्देश्यानां पूर्त्तौ सहायकी भवेत्। न तु केवलमानन्दप्रदायिनी।

2. विद्यालये कस्या अपि क्रियायाः सञ्चालनात्पूर्वं तस्याः योजना निर्मेया। अस्याः योजनायाः निर्माणं छात्रशिक्षकाणाञ्च सहयोगेन स्यात्। योजनानिर्माणसमये विद्यालये उपलब्धसाधनानि प्रति अवधानं देयम्।

3. योजनायाः क्रियान्वयनात् पूर्वं प्रधानाध्यापकस्य स्वीकृतिं प्राप्नुयात्। सम्बन्धेऽस्मिन् तैः प्रदत्तानां विचाराणाङ्कृते योजनायां स्थानं प्रदानीयम्। प्रधानाध्यापकः स्वविद्यालयस्य प्रशासनाय उत्तरदायी भवति। प्रशासकत्वेन क्रियायाः सङ्घटनस्य च प्रस्तावे विशेषाधिकारप्रयोगे सः अधिकृतः भवति।

4. आसां क्रियाणां प्रशासनस्य छात्रेभ्यः अधिकाधिकदायित्वं प्रदानीयम् तथा च समये समये शिक्षकाः तेषां पथप्रदर्शनाय प्रयत्नशीलाः स्युः। किन्तु छात्राणां

कार्येषु ते अनावश्यरूपेण हस्तक्षेपं विना तेषाम् उत्साहवर्धनमेव कुर्वन्तु।

5. प्रशासनप्रक्रियाया: सरलीकरणाय, विभिन्नानां संघर्षाणाम् अपाकरणाय च, विद्यालयस्य समयतालिकायां पाठ्यक्रमसहगामिक्रियाणां स्थानं भवेत्। अनेन छात्रा: शिक्षकाश्चापि एतासां क्रियाणां महत्त्वम् अवगच्छन्ति।

6. आसां क्रियाणां सम्बन्धे बालकेभ्य: उचितनिर्देशनं प्रदानीयम् यथा पाठ्यक्रमसम्बन्धिक्रियाणां विषये प्रदीयते।

7. कस्या अपि क्रियाया: सङ्घटनं सफलतापूर्वकं सञ्चालनाय तस्या: समये-समये निरीक्षणमपि स्यात्। परञ्च ध्यानं देयं यत् निरीक्षणेन ता: अधिकृता: न स्यु: यतो हि अधिकृतानन्तरं तासां स्वाभाविकताया: विनाशो भवति। बालकानां नेतृत्वविकासाय, उत्साहसंवर्धनाय अनुगमनशक्तेर्विकासाय च असामर्थ्यं भविष्यति।

8. आसां क्रियाणाम् आय-व्ययविवरणस्य निरीक्षणमपि शिक्षकाणां सहयोगेन स्यात्।

पाठ्यक्रमसहगामिक्रियाणां कार्यक्रमस्य प्रशासने शिक्षकाणां स्थानम् -

छात्रक्रियाणां कार्यक्रमसङ्घटनात्पूर्वं प्रधानाध्यापक: स्वशिक्षकाणां योग्यतानां क्षमतानाञ्च विषये ज्ञानं प्राप्नुयात् अस्य कार्यक्रमस्य सफलता विफलता वा अधिकांशत: शिक्षकवर्गस्य दृष्टिकोणे उत्साहे च निर्भरास्ति। छात्रा: शिक्षकै: न केवलं सहायतां परामर्शं च प्राप्नुवन्ति अपि तु तेभ्य: प्रेरणां प्राप्य सम्भाव्यगुणानां विकासं कुर्वन्ति। अत्र छात्रक्रियाणां प्रशासकीयसङ्घटनस्य रेखाचित्रं प्रस्तूयते -

प्रधानाचार्य:

↓

पाठ्यक्रमसहगामिक्रियाणां संचालक : (शिक्षकवर्गत:)

↓

योजनासमिति : (शिक्षकछात्रयोश्च प्रतिनिधिसदस्या:)

↓

छात्र-परिषद्

विभिन्नक्रियाणां संघटनकर्त्तार: (छात्राणां सदस्या:) एतासां विभिन्नक्रियाणां संघटने अधोलिखिता: अधिकारिणोऽपि भवन्ति -

1. परामर्शदाता (शिक्षकवर्गत:)

2. अधिकारी (छात्रै: निर्वाचिताधिकारी) प्रधान-उप-प्रधानसचिवादयश्च।

3. सदस्या:।

पाठ्यक्रमसहगामिक्रियाणां भेदः –

माध्यमिकविद्यालयेषु विविधाः छात्रक्रियाः प्रचलिताः सन्ति। एडगर जी. जॉन्सटन–रालैंड सी. फॉन्स–महोदयाभ्यां एतासां क्रियाणां विभाजनं एकादशवर्गेषु कृतम् –

(1) **विद्यालयस्य सङ्घटन–प्रबन्ध–नियन्त्रणैः सह सम्बद्धाः क्रिया :–** वर्गेऽस्मिन् छात्र–परिषद्, छात्रसमुदायः, शिष्टपरिषद्, कार्यकारिणीसमितयश्च आगच्छन्ति।

(2) **सामुदायिकक्रियाः** – शिक्षासप्ताह–स्वास्थ्यसप्ताह–साक्षरतासप्ताह–कनिष्ठनागरिकानुरञ्जनसमूह–सम्बद्धाः क्रियाः अस्मिन् वर्गे आगच्छन्ति।

(3) **धार्मिकसामाजिककल्याणसमूहः** – धार्मिकशिक्षासम्बन्धिसङ्घटनं, बालचरसंघः, सामाजिकसेवासमूहः, कनिष्ठ–रेडक्रॉस, प्राथमिकचिकित्सा–समूहादयः।

(4) **सामाजिकक्रियाः** – शैक्षिकभ्रमणं, नृत्यं, स्वागतसमितिः, विविध–समारोहाणामायोजनमित्यादयः।

(5) **शारीरकप्रशिक्षणसम्बद्धक्रियाः** – सामूहिकक्रीडाः, बाह्यान्तरिक क्रीडाः, व्यायामः।

(6) **विद्यालयप्रकाशनम्** – विद्यालयसमाचारपत्रं, विद्यालयपत्रिकाः, विद्यालयवार्षिकप्रतिवेदनानि च।

(7) **नाट्यभाषणसम्बद्धक्रियाः** – नाट्यं, एकाङ्कीनाट्यं, वादविवाद–प्रतियोगितादयः।

(8) **सङ्गीतसम्बद्धक्रियाः** – सङ्गीत–वाद्य–आर्केस्ट्रा इत्यादयः।

(9) **विषयगतसम्बद्धक्रिया :–** गणित–विज्ञान–सामाजिकविज्ञान–वाणिज्यादीनां विषयाणां समुदायः।

(10) **विविधानुरञ्जनसमूहाः** – यथा आकाशवाणी–छायाचित्र–संग्रहसम्बद्धाः।

(11) **सभा :–** प्रधानाचार्य–शिक्षक–छात्र–समाजनेतर्णिां भाषणानि, चलचित्र–प्रदर्शनम् इत्यादयः।

(12) ई.के. फ्रेटवैल महोदयाः माध्यमिकविद्यालये प्रचलितक्रियाः निम्नाङ्कितश्रेणिष्वेवं स्थापितवन्त :-

(1) छात्रपरिषद् समाजसेवा सङ्घटनञ्च (2) विभागीयविशिष्टरुचिसम्बद्धानि मनोरञ्जनकेन्द्राणि (3) प्रकाशनसम्बद्धसङ्घटनम् (4) भाषण-नाट्य-सम्बद्ध-सङ्घटनम् (5) सङ्गीतसम्बद्धसङ्घटनम् (6) क्रीडासम्बद्धसङ्घटनञ्च।

उपर्युक्तविद्वद्भिः यानि वर्गीकरणानि प्रस्तुतानि तानि अमरीकाराष्ट्रस्य माध्यमिक-विद्यालयेषु प्रचलितक्रियाणाङ्कृते वर्तन्ते। अस्माकं राष्ट्रस्य माध्यमिक- विद्यालयेष्वपि बहवः छात्रक्रियाः भवितुमर्हन्ति यथा छात्र-परिषद्, नाट्यवाद-विवादप्रतियोगिताः। सामाजिकक्रियाः यथा-श्रमदानम्, बालचरसंघः, कनिष्ठ- प्राथमिकचिकित्सा (रेडक्रॉस) सामाजिकसेवासंघटनम्। संगीतसम्बद्धक्रियाः यथा- लोकगीतानां नृत्यानाञ्चायोजनम्, संगीत-समूहः, विद्यालयप्रकाशनम्, मेलनस्थलम् (क्लब) विषयगतसमुदायः क्रीडाश्च।

वयमेतासां क्रियाणामध्ययनम् अधोनिर्दिष्टशीर्षकान्तर्गतं करिष्यामः -

(1) छात्रस्वशासनसम्बद्धसङ्घटनम् -

गुडमहोदयस्य शिक्षाशब्दकोषानुगुणं ''छात्रस्वशासनं समग्रविद्यार्थिसमाजे तत्तन्निर्वाचितप्रतिनिधिभिः विद्यालये प्रयुक्तव्यवस्थाचरणसम्बद्धविषयाणां विनियमनमस्ति''

प्रश्नो भवति यत् स्वशासनं सम्भवम् उत न? तत्रोक्तं **हेरी सी मैकाउन महोदयैः** यत् न, यतो हि छात्रेषु निर्णयाभावोऽपरिपक्वत्वञ्च भवतः। साकमेव प्रधानाध्यापको वैधानिकत्वेन विद्यालयं तत्सामग्रीं छात्रकल्याणं च प्रति स्वोत्तरदायित्वं भजते। अतः छात्राणामुपरि पूर्णतः उत्तरदायित्वं स्थापयितुं न शक्यते। परं छात्रस्वशासनं शिक्षकाणां निरीक्षणे एव पूर्णत्वमभिप्राप्नोति। शिक्षकाः अपि छात्रकृतत्रुटीनामुपरि स्वावधानं दद्युः। किञ्च छात्रा अपि शिक्षकाणां परामर्शं स्वीकुर्युः। शिक्षकाणां पथ-प्रदर्शनेन जायमानेन स्वशासनेनाधोनिर्दिष्टोद्देश्यानां प्राप्तिः भवितुमर्हति -

(1) विद्यालयस्य सामान्यचारित्रिकभावनायाः विकासः।

(2) लोकतन्त्रे बालकेषु स्वजीवने सक्रियत्वसम्पादनं योग्यनेतर्णिां चयने च प्रशिक्षणप्रदानम्।

(3) बालकेषु समधिकमात्मनिर्देशनत्वसम्पादनम्।

(4) शक्तिं प्रति आदरभावनायै सज्जीकरणम्।

(5) बालकेषु विविधिविषयकव्यवस्थाविषयकभावानां जाग्रतिः।

(6) बालकेषु तत्तद्विशिष्टगुणानां योग्यतानाञ्च विकासनम्।

(7) सामाजिकसहयोगाय शिक्षणम्, अन्योन्यस्य विचारान् प्रति सहिष्णुतायै तत्परतायाः विकासः।

(8) बालकेषु स्वोत्तरदायित्वबोधभावानां जाग्रतिसम्पादनम्।

(9) बालकानाङ्कृते स्वविचाराभिव्यक्तीकरणस्यावसरप्रदानम्।

(10) विद्यालयप्रशासनस्य सौविध्यपूर्वकसञ्चालने साहाय्यप्रदानम्।

विद्यालय-सभा-सङ्घटनम् -

छात्रस्वशासनेन सम्बद्धं सङ्घटनं विविधविद्यालयेषु विविधनामभिः सम्बोध्यते। यथा छात्रपरिषद्, संसद्, छात्रसंघः इत्यादि। 1955 तमे वर्षे 'केन्द्रीयशिक्षासंस्थाने छात्रस्वशासनस्योपरि एका संगोष्ठी समायोजिताऽभवत्। तत्र निर्णीतं यत् विद्यालये एका 'विद्यालयसभा' स्यात् यस्या निर्माणं छात्रनिर्वाचितप्रतिनिधीनां विनियुक्त-सदस्यानाञ्च माध्यमेन स्यात्। एते विनियुक्ताः सदस्याः शिक्षकैर्निर्वाचितास्स्युः। किञ्च सभान्तर्गतानि पञ्च मण्डलानि स्युः येषां सदस्यानां निर्वाचनं सभायाः निर्वाचितसदस्यानां माध्यमेन स्यात्। एतानि निम्नलिखितविषयसम्बद्धानि स्युः -

(1) अनुशासनम्।

(2) स्वास्थ्यं, स्वच्छता भोजनञ्च।

(3) क्रीडाः।

(4) पाठ्यसहगामिक्रियाः, प्रियव्यवहारः, शैक्षिकभ्रमणञ्च।

(5) सामाजिककल्याणसम्बद्धक्रियाः यथा साक्षरताभियानम्, अति-वृष्टिपीडितानां साहाय्यं, अकालग्रस्तक्षेत्रीयजनानां साहाय्यम्।

प्रत्येकस्मिन् मण्डले परामर्शं दातुं शिक्षकस्य नियुक्तिः स्यात्। शिक्षकः यस्य मण्डलस्य परामर्शदाता स्यात् तस्मिन् भागं गृहितुमधिकारी भवेत् परं सः मतं दातुमधिकारी न स्यात्। एकैकस्य खलु मण्डलस्य अध्यक्षपदमेको मन्त्री अलङ्कुर्यात् यो हि मण्डलस्य सदस्योऽपि स्यात्। इत्थं पञ्चानां खलु मण्डलानां पञ्च मन्त्रिणः भवन्ति ये विधानसभायाः कार्यकारिण्याः निर्माणं करिष्यन्ति। किञ्च कार्यकारिणी सा 'पंचायतम्' इत्यभिधेयेन प्रसिद्धा स्यात्। प्रत्येकमण्डलाधीनं विभिन्नोपसमितयः स्युः यासां सदस्यानां नियुक्तिः मन्त्रिणः परामर्शदातुःपरामर्शेन कुर्युः।

सम्मेलने सर्वसम्मत्या एतदपि निर्णीतं यत् सामान्यतः मन्त्रीणां संख्या पञ्चैव स्यात्। परं एतेषां संख्यासु न्यूनत्वमभिवृद्धिर्वा विद्यालयस्य स्थितेरुपरि निर्भरा भवति। किञ्च विद्यालये एतादृशी काचिद् दलीयराजनीतिर्न स्यात्। यस्याः आधारेण विद्यालयसदस्याः निर्वाचितास्स्युः। अस्याः सभायाः अवधिः विद्यालयीयसत्रमेकवर्षं वा स्यात्।

विद्यालयनियन्त्रणे छात्रसहयोगस्य लाभाः –

छात्रसहयोगेन छात्राः विद्यालयश्च लाभान्विताः भवन्ति। एते लाभा एवं वक्तुं शक्यन्ते–

(1) छात्रसहयोगेन पाठ्यक्रमसहगामिक्रियाणामुत्तमोत्तमं सङ्घटनं सञ्चालनञ्च भवति।

(2) शिक्षकाः स्वछात्राणां विशिष्टयोग्यतामभिज्ञातुमुपयुक्तावसरं प्राप्नुवन्ति। इत्थमेव शिक्षक–छात्राणां मध्ये सुष्ठु सम्बन्धाः जायन्ते।

(3) छात्र–स्वशासनेन बालकेषु सुनागरिकताया गुणानां विकासो जायते। अनेन बालकाः आत्मनिर्देशनशक्तिमन्तो भवन्ति। एवञ्च ते प्रतिविषयम् अहमहमिकया प्रयोगस्वातन्त्र्येण निर्णेतुं च प्रभवन्ति। साकमेव तेषु नेतृत्वस्य, नेतर्निं प्रत्यादरभावनायाः, अनुगमनस्य, स्वदायित्वावबोधनशक्तीनाञ्च विकासो जायते। एतदतिरिक्तं तेषु सहयोगस्य सामाजिकत्वभावानाञ्च विकासो भवति। एते सर्वेऽपि गुणाः नागरिकस्य निर्माणे आवश्यकाः भवन्ति। अतः छात्रस्वशासनेन कुशललोकतन्त्रीयनागरिकतायाः विकासो जायते।

(4) अनेन बालकेषु विभिन्नानां नैतिकगुणानां यथा धैर्यस्य, निष्ठायाः, सहनशीलत्वस्य, न्यायप्रियतायाः, सद्भावनायाः, सहानुभूतेः निष्पक्षतायाः, कर्त्तव्यपरायणतायाः, सामान्यहिताय कार्यकरणस्य भावनादीनाञ्च विकासो जायते। एते गुणाः नैतिकचरित्रविकासे सहायकाः भवन्ति। इत्थमेतादृशगुणान्विताः छात्राः विद्यालयस्य सामान्यचारित्रिकभावनायाः विकासे बहुसाहाय्यं कुर्वन्ति।

(5) स्वशासनेन बालकाः आत्मनियन्त्रणशक्तिमधिकारिणश्च प्रति विवेकान्वितादरभावञ्च शिक्षन्ते। आत्मनियन्त्रणं स्वानुशासनस्य कृते परममावश्यकं भवति। इत्थं छात्रसहयोगः बालकेषु आत्मानुशासनं संस्थाप्य विद्यालयस्यानुशासनं वर्धयति।

(6) स्वशासनेन बालकेषु सङ्घटनकलायाः विकासोऽपि भवति। अनेन तेषु सङ्घटनकर्तृत्वगुणानां विकासो भवति।

इत्थम् उपर्युक्तलाभाः प्राप्तव्याश्चेद् छात्रस्वशासनमेवं सङ्घटितं स्यात् यस्मिन् बालकाः सक्रियत्वेन भागं गृहीत्वा विद्यालयस्य नियन्त्रणे सम्यग्रीत्या कार्यं कर्तुं समर्थास्स्युः। अस्य कृतेऽधोनिर्दिष्टाः बिन्दवोऽवधेयास्सन्ति –

(1) विद्यालयेन छात्राणां सहयोगस्यावश्यकताया अनुभवो स्यात् तथा चावश्यकतानां सम्पूर्त्तिरपि स्यात्। यदि छात्रसहयोगः विद्यालयस्योपर्येवारोप्यते चेद् वाञ्छितलाभानां प्राप्तिः भवितुं नार्हति।

(2) छात्रस्वशासनस्य कृते क्रियमाणाः प्रयासाः शनैः शनैः स्युः। यतो हि प्रगतौ दृढत्वं दीर्घत्वञ्चावश्यकम्।

(3) छात्रस्वशासनस्य स्वरूपं विद्यालयविशेषस्यावश्यकतानां स्थितीनां चानुसारं निर्धारितं स्यात्।

(4) विद्यालयसभायाः छात्रपरिषदो वाऽऽकारे समधिकं दीर्घत्वं अतिन्यून-त्वञ्चापि न स्याद्। किञ्च कक्ष्याविशेषस्य वर्गविशेषस्य प्रातिनिध्यमपि न स्याद्। अस्य दायित्वानि कर्त्तव्याणि च विशेषतः पारिभाषितानि स्युः येन छात्राधिकारिषु दायित्वानां विषये संघर्षो न स्यात्। किञ्च सुलिखितं संविधानञ्चेद् तर्हि वरं, यतो हि तत्र कार्याणां अधिकारक्षेत्राणाञ्च दायित्वं स्पष्टयितुं शक्यते। छात्रसंविधाननिर्माणे छात्रसहयोगः अपि नितान्तमावश्यकतां भजते।

(5) विद्यालयसभायाः सदस्यतायां जाति-धर्म-लिङ्गादीनामाधारेण प्रभेदो न स्यात्। एतदतिरिक्तं प्रतिसदस्यं किञ्चिद् उत्तरदायित्वमवश्यं भवेत्।

(6) विद्यालयसभायै आवश्यकसौविध्यानि सामग्र्यश्च प्रदातव्याः येन सा स्वदायित्वानि साफल्येन निर्वहणे सामर्थ्यं प्राप्नुयात्।

(7) अस्याः सभायाः वित्तीयनीतिरपि सुव्यवस्थिता स्यात् तासाञ्च उपयुक्तोपायेन निरीक्षणमपि स्यादिति।

(8) विद्यालयाधिकारिणः छात्राणां समुचितं पथप्रदर्शनं कुर्युः। अस्मिन् सन्दर्भे ते न खलु पूर्णतः स्वतन्त्राः च पूर्णाधिकारिणः स्युः। किञ्चात्रावधेयं यत् एतत्साफल्यमवाप्तुं बालकानां योग्यतायां क्षमतायाञ्च विश्वासः आवश्यकः। अनेन साकमेव "नियते समये निरीक्षणेन सम्यक् निर्देशेण च छात्राः कुपथगामिनः न भवन्ति" इति संभाव्यते।

2. समाजकल्याणसम्बद्धक्रिया :-

याः क्रियाः बालकेषु सामाजिकतायाः सहयोगभावनायाश्च विकासे सहायिकाः

भवन्ति याभिश्च सामाजिककल्याणस्य कृते कार्यं क्रियते ताः अधोनिर्दिश्यन्ते –

(1) समाजसेवासंस्थाः। (2) सहकारिक्रियाः।

(3) श्रमदानम्। (4) बालचरसंघः।

(5) कनिष्ठ–रेडक्रास् प्राथमिकचिकित्सासमूहश्च

(1) समाजसेवासंस्था :-

बहुषु विद्यालयेषु समाजसेवासंस्थानां सङ्घटनं क्रियते। एतासां प्रमुखमुद्देश्यं 'जनसेवा' वर्तते। एताः संस्थाः आवश्यकतायां सत्यां जनसेवायां समर्पिताः भवन्ति। यथा – प्रौढानां साक्षरता, विविधसामुदायिककार्येषु साहाय्यं अतिवृष्ट्या पीडितानां रक्षणाय धनस्यैकत्रीकरणम्, भोजनस्य वस्त्राणाञ्च व्यवस्थासम्पादनम्, संक्रामक–रोगाणां प्रसारणे सति, कस्याप्युत्सवस्य मेलायाः वाऽऽयोजनावसरे, इतरकार्येषु च यत्रानुशासनेन सह कार्यकरणस्यावश्यकता स्यादिति। एतैः बालकाः समाजस्य वास्तविकपरिस्थितिमवबोद्धुं समर्थाः भवन्ति। किञ्च तेषु सहयोगस्य, सहानुभूतेः, प्रेम्णः, दयाभावनायाः सहनशीलत्वादिगुणानां च विकासो भवति ये गुणाः तेषां सामाजिकव्यक्तित्वस्य निर्माणे सहायकाः भवन्ति।

किञ्चैताः संस्थाः पुस्तकानि छात्रवृत्तीश्च दत्वापि विद्यालयस्य निर्धनानामभाव–ग्रस्तछात्राणाञ्च साहाय्यं कुर्वन्ति। प्रत्येकस्मिन् विद्यालये एतादृशसमूहानां सङ्घटनमवश्यं स्यादिति।

(2) सहकारिसंस्था :-

विद्यालयस्य प्रमुखं कर्त्तव्यं बालकानाङ्कृते सहयोगभावनायाः शिक्षणं वर्तते। अस्योद्देश्यस्य प्राप्त्यर्थं विद्यालये विविधसहयोगिक्रियाणां सङ्घटनं क्रियते। सहयोगपाठशिक्षणार्थं विद्यालये सहकारिसमितीनां सङ्घटनं विधीयते। एतासां समितीनां महदुद्देश्यं बालकेषु परस्परं सहयोगभावनायाः विकासः वर्तते। बालकाः स्वसहयोगेन कार्यभागस्य साहाय्येन च विद्यालये सहकार्यापणानि, कोषागारादीनि, जलपानगृहाणि च स्थापयितुं शक्नुवन्ति। अनेनार्जितं लाभं छात्राः परस्परं विभज्य गृह्णन्ति ये तासां सञ्चालने स्वयोगदानं दत्तवन्तः। एतादृग्योजनानां सङ्घटनं छात्राणां सहकारिसमितय एव कुर्वन्ति। आसां समितीनां सञ्चालनस्य पूर्णं दायित्वं छात्राणामुपर्येव स्यात्। परं पथप्रदर्शनाय शिक्षकाः सन्नियोज्यास्स्युः। बालकानां सहकारि–आपणेषु दैनन्दिनप्रयुक्तानां यथा कर्गदम्, अभ्यासपुस्तिका, सुधाखण्ड इत्यादीनां व्यवस्था स्यात्। किञ्चैकस्याः लघुसमितेर्निर्माणमपि स्यात् या आयव्ययस्य

विवरणं स्वपार्श्वे स्थापयेत् वस्तूनां मूल्यञ्च निर्धारयेत्। प्रधानाध्यापकस्यापि सन्दर्भेऽस्मिन् महद्दायित्वं वर्तते यत् सः सहकारिसमित्या सञ्चालितापण–वित्तागार–जलपानगृहादीनां निरीक्षणं कुर्यात् यत् बालकेभ्यः समुचितमूल्ये वस्तून्युपलभ्यन्ते न वेति। अनेन ते छात्राः सहयोगपूर्णं कार्यं सम्पादयन्तो व्यापारसम्बन्धितान् विविध–विषयानपि ज्ञातुं प्रभवन्ति ये तेषां भाविजीवने सहयोगिनः लाभकारकाश्च भवन्ति।

(3) श्रमदानम् :-

सामाजिकदृष्ट्या अस्याः क्रियायाः अपि समधिकं महत्त्वं दरीदृश्यते। यतो हि अनया बालकेषु शारीरकश्रमस्य महत्त्वावबोधनशक्तेर्विकासो जायते। प्रत्येकस्मिन् विद्यालयेऽस्याः क्रियायाः आयोजनमनिवार्यत्वेन स्यात्। आङ्ग्लकालीनया शिक्षया भारतीयानां हृदयेषु शारीरकश्रमकर्तर्निं प्रति घृणायाः भावनोत्पादिता। परं साम्प्रतं परिस्थितयः परिवर्तनं गताः। अतः परिस्थित्यनुगुणमेव घृणाभावनामपाकर्तुं श्रमदाने बलं दातव्यम्। बालकः श्रमम् आदरभावनया पश्येत् तदर्थं विद्यालयद्वारा विभिन्नकार्याणि समायोज्यन्ते। यथा – ग्रामेषु राजमार्गाणां निर्माणम्, मार्गाणां स्वच्छता, भूमेरूर्वरकतां वर्धयितुं गर्तानामुत्खननं, विद्यालयस्य स्वच्छतादीनि। एतेषां कार्याणां समायोजनेन समुदायविद्यालययोर्मध्ये सु सम्पर्कः स्थापितः भविष्यति। किञ्च, श्रमजीविबुद्धिजीविनां मध्ये परस्परमैक्यभावनायाः विकासो भविष्यति। एवमेव बालकानां शारीरकविकासोऽपि भविष्यति।

(4) बालचरसंघ :-

अस्य सङ्घटनस्यापि शैक्षिकमहत्त्वं दरीदृश्यते। अनेन बालकाः प्रकृत्या सहानुरागिणो भवन्ति। एवञ्च तेभ्यः शारीरकं नैतिकञ्च प्रशिक्षणमपि प्रदीयते।

परमत्र विशेषतो दरीदृश्यते यत् अनुत्तरदायी स्वकेन्द्रितोऽपि बालकः विश्वसनीयनागरिकत्वगुणालङ्कृतो भवति। अनया संस्थया बालिकानां कृतेऽपि क्रीडाक्षेत्रे सर्वविधप्रशिक्षणं प्रदीयते। माध्यमिकशिक्षाऽऽयोगः अस्य महत्त्वमेवमुक्तवान् –

''बालचरसंघः चारित्रिकप्रशिक्षणस्य कृते सुनागरिकगुणानां विकासाय च महत्तममेकं साधनं वर्तते। अस्मिन् बहवो गुणाः सन्निहितास्सन्ति यतो ह्यनेन विविधवयस्काः बालकाः समाकृष्टाः भवन्ति। तथा च तेषु बहुमुखीशक्तयः विकसिताः जायन्ते। अस्य संघटनस्य विविधक्रीडाभिः, क्रियाभिः, प्राविधिक–कुशलताभिश्च समाजसेवाया आदर्शानां, सदाचरणस्य, नेतर्निं प्रति सम्मानस्य, राज्यं प्रति भक्तेः तथा च सर्वविधस्थितेरवबोधनशक्तेराधारशिला स्थापयितुं

शक्यते।''[1]

सर वैडेन पावेल महोदयाः अस्य जन्मदातारः आसन्। तैः अस्याः संस्थायाः निर्माणं शत्रुपक्षस्य सूचनाः प्राप्तुं कृतमासीत्। किञ्चित्कालात्परं संस्थेयं प्रत्येकस्मिन् देशे स्वमहत्त्वं स्थापितवती। भारतवर्षे एषा 1911 तमे वर्षे संस्थापिताऽभवत्। अस्याः सङ्घटनं वयसः आधारेण क्रियते। अस्य रूपरेखां एवं वक्तुं शक्यते –

1. बालकानां बालचरसङ्घटनम् (स्काउट) –

1. सप्तवर्षतः एकादशवर्षपर्यन्ताः बालकाः 'सिंहशिशवः' (Cub) इत्यभिधीयन्ते।

2. एकादशवर्षतः सप्तदशवर्षापन्नाः बालकाः स्काउट (Scout) इत्यभिधीयन्ते।

3. सप्तदशवर्षतोऽधिकवयस्काः बालकाः रोवर (Rover) इत्याख्यैः प्रसिद्धाः भवन्ति।

बालिकानां बालचरसङ्घटनम् (गाइड) –

(1) एकादशवर्षतः न्यूनवयस्कबालिकाः 'नीलपक्षी (बुलबुल)' इति नाम्नाऽभिधीयन्ते।

(2) एकादशवर्षतः षोडशवर्षपर्यन्ताः बालिकाः 'गाइडसमूहः' इत्यभिप्रायेण प्रसिद्धाः भवन्ति।

(3) षोडशवर्षतोऽधिकायुर्वर्गीयाश्च छात्राः 'रेंजर समूहः' इति नाम्ना प्रसिद्धा भवन्ति।

इतः कतिपयवर्षाणां प्राक् अस्माकमधिकांशविद्यालयेषु अस्य सङ्घटनस्य कृते स्थानं प्राप्तमासीत्। परं साम्प्रतं कालप्रभावेन, ए.सी.सी., एन.सी.सी. इत्यादीनां संस्थापनेन चास्योपरि स्वल्पावधानं दीयते। परमस्य शैक्षिकं – नैतिकं–चारित्रिकञ्च महत्त्वमवलम्ब्य स्पष्टतया प्रतीयते यत् अस्य कृते प्रत्येकस्मिन् विद्यालये स्थानं स्यात्। वस्तुतः संघोऽयं राष्ट्रियात्मकमन्ताराष्ट्रियात्मकञ्च वर्तते अतोऽनेन

---

1. "Scouting is one of the most effective means for the training of character and the qualities necessary for good citizenship. It has the great merit that appeals to pupils of all ages and taps their manifold energies. Through the various games, activities and technical skills, it is possible to lay the foundation of the ideals of social service, good behaviour, respect for leaders, loyalty to the state and preparedness to meet any situation."

- Report of the Secondary Education Commission, p. 127

राष्ट्रियचरित्रनिर्माणेऽन्ताराष्ट्रियचरित्रनिर्माणे च साहाय्यं मिलति।

(5) कनिष्ठ-रेडक्रास् प्राथमिकचिकित्सासमूहश्च :-

एते संघाः अपि विशिष्टमहत्त्वशालिनः यतो ह्येतेषां प्रभावेण बालकाः सामाजिकशिक्षां प्राप्नुवन्ति। किञ्च तेषां वैयक्तिकसामाजिकगुणानां विकासो जायते।

माध्यमिकशिक्षाऽऽयोगस्य विचारोऽस्ति यत् सर्वः बालकः कनिष्ठ-रेडक्रासकार्ये प्राथमिकचिकित्साकार्ये च प्रशिक्षितः स्यात्। यतो हि शिक्षणमेतद् बालकसमाजयोः कृते लाभकारकं भवति। प्रत्येकस्मिन् विद्यालये एतादृशसङ्घटनानामायोजनं स्यात्। साम्प्रतम् अल्पविद्यालयेष्वेवास्य व्यवस्था दरीदृश्यते। कनिष्ठ-रेडक्रास सङ्घटनमेतद् अन्ताराष्ट्रियस्तरीयमस्ति। अस्य प्रमुखान्युद्देश्यानि सेवा, स्वास्थ्ये वृद्धिः भ्रातृत्वभावनायाश्च विकासः वर्तन्ते। संस्थेयं सदस्येभ्यः धनसहयोगं प्राप्य बालकैः निर्मितविभिन्नवस्तूनि विक्रीय स्वव्ययभारं वहति। प्राथमिकशिक्षासङ्घटनस्योद्देश्यं वा आहतव्यक्तीनां स्वास्थ्यस्य उन्नतये शिक्षणप्रदानं वर्तते। विद्यालयेऽस्य सङ्घटनं बालचरसंघाध्यापकस्य स्वास्थ्यशिक्षकस्य वाऽऽध्यक्ष्ये सम्पाद्यते।

3. सांस्कृतिकक्रिया :-

आसु क्रियासु पाठ्यक्रिया-लोकगीत-लोकनृत्य-संकीर्तन-भजन-संगीत-सम्बन्धिकार्यक्रमाः समागच्छन्ति। आसां क्रियाणां अवकाशसदुपयोगे विशिष्टं महत्त्वमस्ति। संगीतसम्बन्धिक्रियाः बालकेषु व्यावसायिक-कौशलानां संगीत-सांस्कृतिकमूल्याङ्कनस्य च क्षमताम् उत्पादयन्ति। आभिः क्रियाभिः बालकाः स्वसांस्कृतिकमूल्यानां ज्ञानप्राप्तये समर्थाः भवन्ति। एतदतिरिच्य बालकानाङ्कृते आत्माभिव्यक्तेरवसरोऽपि क्रियाभिः प्रदीयते तथा च बालकेभ्यः मनोरञ्जनेन सह सौन्दर्यानुभूतयेऽवसराः दीयन्ते। नाटकानाञ्चयनसमये तेषां सांस्कृतिकशैक्षिकमहत्त्वं प्रत्यपि बलं प्रदीयते।

एतासां क्रियाणां सञ्चालनाय विद्यालये एका पृथक्सांस्कृतिकसमितिर्भवेत्। तस्याः समितेः पथप्रदर्शनं एकः शिक्षकः कुर्यात्, तस्य एतासु क्रियासु रुचिः स्यात्। तथा च सः क्रियाणां सङ्घटनसञ्चालनयोश्च प्रक्रियाभि; परिचितः स्यात्।

(4) साहित्यिकक्रियाः -

वादविवाद-काव्यगोष्ठी-कवितापाठ-भाषण-निबन्ध-कथाकथन-अन्त्याक्षरीविचारगोष्ठ्यादयः आसु क्रियासु समागच्छन्ति। इमाः क्रियाः शैक्षिक-दृष्ट्या अतीवमहत्त्वपूर्णास्सन्ति। आभिः क्रियाभिः बालकानां विभिन्नमानसिकशक्तिः

यथा– स्पष्ट चिन्तन–स्मरण–तर्क–विश्लेषण–निर्णयादिः संवर्ध्यते। आत्मप्रदर्शन–स्यावसरोऽपि बालकानाङ्कृते प्रदीयते। बालकः स्वविचारान् तर्कान् च समुचितशैल्यां प्रकटयितुं समर्थो भवति। साहित्यिकक्रियाभिः बालकानां लज्जाशीलप्रवृत्याः निवारणं भवति। तथा च नेतृत्वस्य गुणानां विकासो भवति। बालकेषु साहित्यं प्रति रुचिः स्नेहश्च जागरितौ भवतः सौन्दर्यानुभूतिक्षमतायाः विकासोऽपि भवति।

आसां क्रियाणां सङ्घटनसञ्चालनेभ्यश्च पृथक् समितये उत्तरदायित्वं प्रदानीयं, तथा च एकः शिक्षकः परामर्शदातृरूपेण नियुक्तः स्यात्। विविधप्रतियोगितागोष्ठीभ्यश्च छात्राणां मानसिकस्तरानुसारं विभिन्नविषयाणाञ्चयनं भवेत्। किञ्च विषयाणां कृते समुचितरूपेण पथप्रदर्शनमपि स्यात्।

(5) प्रकाशनसम्बन्धिक्रिया :-

विद्यालयप्रकाशनम् अधिकांशतः विद्यालयानां जीवनस्य एकं महत्त्वपूर्णमङ्ग–मस्ति। विद्यालय–पत्रिका–समाचारपत्रादिभिश्च बालकानां कृते सर्जनात्मकलेखनस्य महत्त्वपूर्णाऽवसराः प्रदीयन्ते। पाठ्यपुस्तेकभ्यः व्यतिरिक्तम् अन्यानि पुस्तकानि पठितुं प्रोत्साहनं लभ्यते। विद्यालयप्रकाशनैः विद्यालयस्य प्रगतेः, कार्यस्य, सामान्यचारित्रिकभावनादीनाञ्च परिचयः समाजाल्लभ्यते।

स्पीयर्स–लॉशे–महोदयाभ्यां विद्यालयप्रकाशनस्य निम्नलिखितानि कार्याणि प्रतिपादितानि –

(1) विद्यालयकार्याणां समाजाय परिचयः।

(2) विद्यालयस्य घटनानां सूचनानाञ्च प्रकाशनम्।

(3) विद्यालयसम्पत्तेः विवरणप्रदानम्।

(4) विद्यालयादर्शानां तेषां चारित्रिकभावनानां च प्रकटीकरणम्।

(5) अन्तःविद्यालयेषु उत्तमसम्बन्धानां विकासनम्।

(6) अभिभावकविद्यालययोर्मध्ये सहयोगस्थापनम्।

(7) सदाचरणस्य स्तरोन्नयनाय सहयोगप्रदानम्।

(8) उपयुक्तक्रियाः प्रति प्रोत्साहनम्।

विद्यालयप्रकाशनस्य सञ्चालनाय सम्पादकमण्डलस्य स्थापना स्यात्। मण्डलेऽस्मिन् छात्रप्रतिनिधयस्स्युः, किन्तु तेषामुचितपथप्रदर्शनं शिक्षकवर्गेण स्यात्। पत्रिकायाः कृते लेख–निबन्ध–कथा–कवितादीनाञ्च लेखनाय छात्राः प्रोत्साहनीयाः।

विभिन्नरचनादीनां सम्पादनं छात्रशिक्षकाश्च सम्भूय कुर्युः। विद्यालयस्य प्रधानाध्यापकस्य क्षेत्रेऽस्मिन् महत्त्वपूर्णं दायित्वमस्ति। सः छात्राणां रचनानामवलोकनमपि कुर्यात्। येन पत्रिका समाजविद्यालययोर्मध्ये मधुरसम्पर्कस्थापने सहायिका भवेत्। न तु विद्यालयप्रकाशनं एकमात्रं प्रचारस्य साधनरूपेण स्यात्।

(6) शारीरकक्रिया :-

सङ्घटितक्रीडा-शारीरकाभ्यासः-व्यायामादयश्च क्रियाः शारीरकगतिविधिषु समागच्छन्ति। बालकस्य शारीरक-मनौवैज्ञानिक-सामाजिक-बौद्धिक-नैतिकविकासानां दृष्ट्यापि शारीरकक्रियाणां महत्त्वं विद्यालयेऽस्ति।

मनोवैज्ञानिकमहत्त्वम् -

मनोवैज्ञानिकान्वेषणैः इदं सिद्धमभवत् यत् बालके अतिशयशक्तिर्भवति। शक्तिरियं मुख्यतः किशोरावस्थायां समधिकत्वेन दरीदृश्यते। यदि शक्तिरियं समुचितधारासु प्रवाहिता न स्यात्तर्हि सा कुमार्गे प्रवाहिता भविष्यति। येनानुपयुक्त-व्यक्तित्वविकासो वरीवर्धते। क्रीडाभिः शक्तिरियं वाञ्छितमार्गमभिगन्तुं शक्नोति यतोह्यनेन स्वास्थ्यवृद्ध्या सह कामवासना-विधायकता-सामूहिकतायुयुत्सादि-गुणेष्वपि परिमार्जनं भवति।

सामाजिकमहत्त्वम् -

सामाजिकदृष्ट्या क्रीडानां बहुमहत्त्वं वर्तते। यतो हि बालकाः समूहे न्याय-सहयोग-सहिष्णुता-नेतृत्व-संयमादिगुणान् व्यावहारिकरूपेण अवगच्छन्ति तथा च ते सामाजिकव्यक्तित्वस्य निर्माण्पि कुर्वन्ति।

बौद्धिकमहत्त्वम् -

बौद्धिकदृष्ट्याऽपि क्रीडानां विशिष्टं महत्त्वमस्ति। यतो हि आभिः क्रियाभिः बालकेषु निर्णयशक्तिः, कल्पनाशक्तिः, तर्कशक्तिः, मस्तिष्कस्य तत्परता इत्यादीनां बौद्धिकक्षमतानां विकासो भवति मानसिकस्फूर्तिश्च आयाति।

नैतिकमहत्त्वम् -

साहस-धैर्य-आत्मविश्वास-आत्मनिर्भरता-सत्यता-न्यायप्रियता-निष्पक्षतादीनां सहगुणानां विकासोऽपि एताभिः क्रियाभिर्भवति। माध्यमिकशिक्षायोगेनापि कथितम् यत् शारीरकविकासानुरञ्जनप्रदानाभ्यां सहैव छात्राणां चरित्रस्य निर्माणमपि इमाः क्रियाः कुर्वन्ति।

अनुशासनात्मकमहत्त्वम् –

क्रीडानां विद्यालयेऽनुशासनस्थापनायापि बहुमहत्त्वं वर्तते। एताभिः क्रियाभिः बालकाः आत्मनियन्त्रणमवगच्छन्ति। तथा च तेषु आत्मत्यागस्य भावनायाः विकासो भवति। विद्यालयानुशासनम् अतिरिच्य क्रीडाः विद्यालयस्य सामूहिकजीवनस्य निर्माणेऽपि बहुधा उपयोगिन्यः भवन्ति। यतो हि इमाः बालकानां परस्परसम्बन्धान् शिक्षकाणां छात्राणाञ्चोचितसम्पर्कान् च सुदृढी कुर्वन्ति।

नागरिकमहत्त्वम् –

क्रीडादयः बालकेभ्यः नागरिकप्रशिक्षणमपि प्रददति। क्रीडाक्षेत्रेषु बालकाः परेषामधिकाराणामादरं कुर्वन्ति। तेषु नेतृत्वस्य क्षमतायाः, नियमानामनुसरणस्य योग्यतायाः कार्यकरणस्य भावनानाञ्च विकासो भवति। नियमितता–कर्त्तव्यपरायणता–परस्परविश्वास–धैर्य–दलभावनादीनां गुणानां विकासः भवति। इत्थं क्रीडाभिः बालकाः व्यावहारिकरूपेण नागरिकप्रशिक्षणं प्राप्नुवन्ति।

उपर्युक्तविवेचनेन स्पष्टं भवति यत् बालकस्य सर्वाङ्गिकविकासे क्रीडानां विशिष्टं योगदानमस्ति। यदि वयं क्रीडाभिः लाभान् प्राप्तुमिच्छामः तदा तासां सङ्घटनं विधिवत् करणीयम्। उपयुक्तसङ्घटनस्य कृते अधोलिखिताः बिन्दवः ध्यातव्याः–

(1) विद्यालयसमाजयोश्च स्वस्थ्यविकासाय क्रीडाक्षेत्रस्याधिकाधिकप्रयोगः बालकैः करणीयः। क्रीडाकार्यक्रमेषु विविधता व्यापकता च स्याताम् याभ्यां विद्यालयस्य समस्तछात्राः स्वास्थ्यरुचेरनुसारं क्रीडासु भागं गृह्णीयुः तासां महत्त्वं प्राप्तुं समर्थास्स्युः।

(2) सामूहिकक्रीडायाः आयोजनाय शिक्षकः अध्यक्षः स्यात्। अध्यक्ष–चयनसमये शिक्षकस्य योग्यताः रुचीः च प्रति ध्यानं देयम्। यदि शिक्षकाणां रुचिं विस्मृत्य कार्यं दीयते तदा ते बालकानां मार्गनिर्देशने असमर्थाः भविष्यन्ति।

(3) बालकानाङ्कृते विविधक्रीडासम्बन्धिनियमानां परिचयः।

(4) प्रतिदिनं निर्धारितसमये बालकाः क्रीडाक्षेत्रे उपस्थिताः स्युः इत्यादेशं दद्यात्। क्रीडाक्षेत्रे उपस्थितिरनिवार्या स्यात्।

(5) विभिन्नानां क्रीडानां कृते चयनसमये क्रीडादले समान्ययोग्यताधारिणां छात्राणां चयनं करणीयम्।

(6) क्रीडायाः पृथक् समयतालिकायाः निर्माणं कुर्यात् यया सम्पूर्णकार्यक्रमः व्यवस्थितरूपेण सञ्चालितः स्यात्।

(7) अन्तर-विद्यालयप्रतियोगितानामपि आयोजनं कुर्यात्। किन्तु एतासां प्रतियोगितानां ध्येयं मात्र-व्यावसायिकक्रीडकानामुत्पादनं न स्यात् अपितु एतद् विपरीतं विभिन्नविद्यालयानां मध्ये सद्भावना-स्नेहसहानुभूतिपूर्णसम्पर्कस्थापनमपि भवेत्।

(8) क्रीडानां स्तरोन्नयनाय विद्यालये विभिन्नकक्ष्याणां विभिन्नदलानां मध्ये प्रतियोगिताः आयोजनीयाः।

(9) क्रीडानां संचालनं निरीक्षणञ्च सम्यग्रूपेण स्यात् तदर्थं क्रीडास्थलस्यापि नियोजनं कर्त्तव्यम्। छात्राणां सहयोगप्राप्तये कस्याश्चित् क्रीडासमितेर्निर्माणमपि स्यात्। खेलसम्बद्धसामग्रीणां व्यवस्थायै, क्रयस्य कृते क्रीडास्थलस्य स्वच्छतायै च समितेः सहयोगः साहाय्यञ्चपेक्ष्यते।

(7) विषयगतसमुदाय :-

एते समुदायाः विद्यालये पठनविषयसम्बद्धाः भवन्ति यथा-इतिहाससमुदायः, भूगोलसमुदायः, विज्ञानवाणिज्यकृषिगणितसमुदायाश्च। एतेषां समुदायानां निर्माणस्य महान् लाभोऽस्ति यत् एषां समुदायानां क्रियाभिः बालकानां स्वविषयं प्रति रुचिर्वरीवर्धते। किञ्चैतेषां सङ्घटनेन सञ्चालनेन च विभिन्नगुणानां विकासोऽपि जायते। एतादृक्समुदायनिर्माणप्रथा महाविद्यालयस्तरेष्वेव दरीदृश्यते। परमेते विद्यालयस्तरीयबालकानां कृतेऽप्युपयोक्तुमर्हन्ति। एतैः समुदायैः विषयसम्बद्ध-काठिन्यानि अप्यापाकर्तुं शक्यन्ते। किञ्च तेषां विषयाणां जीवने किं महत्त्वमस्तीति स्पष्टयितुं शक्यते। एतदतिरिक्तमेतैः विभिन्नशैक्षिकभ्रमणादीनामप्यायोजनं कर्तुं शक्यते। यथा इतिहाससमुदायः स्थानीयैतिहासिकस्मारकाणां दर्शनाय भ्रमणस्यायोजनं कर्तुं शक्नोति। एतदतिरिक्तमन्यत्रापि ऐतिहासिकस्मारकदर्शनाय बालकान् नेतुं शक्नोति। इत्थं विभिन्नसमुदायैः स्वविषयसम्बद्धवस्तुनां निरीक्षणार्थं भ्रमणादीनामायोजनं क्रियते। एतादृक्समुदायानां निर्माणं छात्रैः निर्वाचितसदस्यानामधिकारिणाञ्च माध्यमेन करिष्यते। अस्य पथप्रदर्शनाय विषयस्य प्रमुखः शिक्षकः वरिष्ठाध्यक्षत्वेन संनियुक्तः स्यात्।

(8) विविधाः क्रिया :-

अस्यान्तर्गतं ताः क्रियाः समागच्छन्ति याः शैक्षिकमहत्त्वातिरिक्तं मनोरञ्जकाः अपि भवन्ति। यथा-प्रियव्यापारः, शैक्षिकभ्रमणं, विद्यालयदिवसः सभा इत्यादयः। विद्यालये विभिन्नप्रकारकप्रियव्यापारस्य व्यवस्था भवितुमर्हति। यथा - उद्याननिर्माणं,

छायाचित्रणं, मुद्रासंग्रहणं, नाणकसंग्रहणञ्च। अनेन बालकेषु विभिन्नरुचीनां–जागृतिर्भवति। किञ्चेताः क्रियाः मनोरञ्जका अपि भवन्ति। अवकाशसमय–सदुपयोगेऽप्येतासां बहुमहत्त्वमस्ति। शैक्षिकभ्रमणमपि बालकस्य जीवने बहुमहत्त्वं भवति। यतो हि अनेन बालकानां दृष्टिकोणः विस्तारमभिप्राप्नोति। ते निरीक्षणपद्धत्या तत्तद्वस्तुनां स्थानानाञ्च विषये सूक्ष्मातिसूक्ष्मं ज्ञानमवाप्तुं समर्थास्सन्ति येषां दर्शनार्थं गतवन्तः।

किञ्च विद्यालयदिवसानामपि बहुमहत्त्वं दरीदृश्यते। एतन्महत्त्वं तदैवाङ्गीकर्तुं शक्यते यदा एषामायोजने सङ्घटने च छात्राणां समधिकसहयोगो भवेत्। अनेन बालकेषु सहयोगः नेतृत्वं सांस्कृतिकरुचयश्च विकसिताः भवन्ति। विद्यालयेषु प्रायः विभिन्नाः दिवसाः समायोज्यन्ते। यथा – वार्षिकोत्सवः, छात्रसंघदिवसः पुरातनछात्र–सम्मेलनं, राष्ट्रियपर्वाणामायोजनम्, अभिभावकदिवसश्च।

एवमेव शैक्षिकदृष्ट्या दैनिकसभाऽपि स्वमहत्त्वमवधारयति। सभायां बालकानां ज्ञानस्य विस्ताराय, तदभिन्नरुचिवर्धने, अवकाशसमयसदुपयोगाय चावसराः प्रदीयन्ते। एतदतिरिच्य सभामाध्यमेन सामूहिकशिक्षणस्यावसरा अपि प्राप्यन्ते। कार्यक्रमेऽस्मिन् सामूहिकप्रार्थनायै, दैनिकसंघोषणाभ्यः, प्रधानाध्यापकशिक्षकातिथीनाञ्च भाषणायापि स्थानं दीयते।

यदि कार्यक्रमस्यास्य सञ्चालनं शिक्षकाणां छात्राणाञ्च मिथः सहयोगेन स्यात्तर्हि वरम्। कार्यक्रमस्यायोजनकाले शैक्षिकमहत्त्वावलम्बिन्यः क्रियाः अवश्यं ध्यातव्याः। किञ्च याः क्रियाः छात्रनेतृत्वाय, अहमहमिकायै च अवसरप्रदात्र्यः भवन्ति ताः अपि द्रष्टव्याः।

आधुनिकविचारेषु यद्यपि छात्रक्रियाः पाठ्यक्रमस्याभिन्नाङ्गत्वेन स्वीकृताः, परं शिक्षकाणामभिभावकानाञ्च दृष्टिकोणे इदानीं यावत् परिवर्तनं नाभवत्। यतो हि केचन शिक्षकाः अभिभावकाश्च छात्रक्रियाणां विषये मन्यन्ते यत् आभिः केवलं समयस्य, धनस्य शक्तेश्चापव्ययः एव भवतीति। इत्थं धनाभावादपि बह्व्यः उपयोगिक्रियाः विद्यालयेषु स्वस्थानं नावाप्तवत्यः। एतदतिरिक्तं संसाधनानामभावेन परीक्षाप्राधान्येनापि एतासां प्रगतिरवरुद्धा। एतासां बाधानामपाकरणाय विद्यालयाधिकारिणः भागं गृहीतुं शक्नुवन्ति। यतो हि एतेषां दूरदर्शिता–चिन्तन–अनुमोदनात्मकदृष्टिकोणैरेताः अपाकर्तुं शक्यन्ते। किञ्चेतासां साफल्यमपि नूनं सम्पादयितुं शक्यते।

पुनरावृत्तिप्रश्नाः

1. पाठ्यक्रमसहगामिक्रियाणां विषये आधुनिकी धारणा का अस्ति? संक्षेपेण वदतु।

2. मैकॉनमहोदयेन पाठ्येतरक्रियाणां विकासाय के के स्तराः उल्लिखिताः?

3. पाठ्यक्रमसहगामिक्रियाणां लक्ष्याणि संक्षेपेण प्रतिपादयन्तु।

4. उच्चतर-माध्यमिकविद्यालयस्य प्रधानाचार्यरूपेण भवन्तः विद्यालये पाठ्यक्रमसहगामिक्रियाणां कार्यक्रमनिर्माणे कान् कान् बिन्दून् प्रति ध्यानं दास्यन्ति?

5. पाठ्यक्रमसहगामिक्रियाणां प्रशासने निरीक्षणे च अवधेयाः बिन्दवः के के सन्ति?

6. पाठ्यक्रमसहगामिक्रियाणां कार्यक्रमस्य प्रशासने शिक्षकाणां स्थानं सोदाहरणं स्पष्टयत।

7. भारतीयविद्यालयेषु काः काः पाठ्यक्रमसहगामिक्रियाः प्रचलन्ति?

8. 'छात्र-स्वशासनं विद्यालयस्य बहूनां समस्यानां समाधानं करोति' कथनमिदं सोदाहरणं स्पष्टयत।

9. विद्यालयनियन्त्रणे छात्रसहयोगस्य के के लाभाः सन्ति? प्रतिपादयन्तु।

10. छात्र-स्वशासनघटनसमये भवन्तः कान् कान् बिन्दून् प्रति ध्यानं दास्यन्ति?

11. विद्यालये सामाजिकक्रियाणां सङ्घटनस्य के के लाभाः सन्ति?

12. बालचरसंघश्रमदानयोश्च शैक्षिकमहत्त्वं स्पष्टयत।

13. साहित्यिकक्रियाभिः छात्राः कान् कान् लाभान् प्राप्नुवन्ति? संक्षेपेण स्पष्टयत।

14. ''क्रीडाङ्गणं प्रजातन्त्रस्यानुकरणमस्ति'' कथनमिदं सोदाहरणं स्पष्टयन्तु।

15. सङ्घटितक्रीडानां महत्त्वं स्पष्टयन्तु।

16. क्रीडानां सुसङ्घटनाय भवन्तः कान् कान् सिद्धान्तान् प्रति ध्यानं दास्यन्ति?

17. विषयगत-समुदायानां शैक्षिकमहत्त्वं स्पष्टयत।

18. विद्यालयसभायाः कार्याणि तस्याः शैक्षिकमहत्त्वं च संक्षेपेण प्रतिपादयन्तु।

लेखार्थप्रश्नाः

भवन्तः स्वकीयविद्यालयस्य वार्षिकसमारोहं कथम् आयोजयिष्यन्ति? विस्तरेण स्पष्टयन्तु।

16

मूल्याङ्कनम्

(Evaluation)

"The question that confronts the educational administrator, therefore, is whether or not there will be appraisals. It is rather, whether or not the appraisals will be reasonably valid or only judgements made on the basis of inadeqate data or even with merely rumour as the foundation."

- Morpher & Others

अस्या: शताब्द्या: आदौ यावत् विद्यालयशिक्षाया: प्रमुखकार्यं विभिन्नविषयाणां ज्ञाने कौशले च प्रावीण्यमासीत्। अत: छात्राणां प्रगतेर्मापनं प्राय: तासां परीक्षाणां सम्पादनं यावदेव सीमितमासीत्। या: 'छात्र: कियत् पर्यन्तं पाठ्यवस्तु ज्ञातवान्' इत्येतदनुसंधातुं भवन्ति स्म। एता: परीक्षा: रटनपद्धतौ बलं दत्तवत्य:। आभि: शिक्षणसम्बद्धसाफल्यातिरिक्तमितरविषयेषु यथा व्यक्तित्वादिष्ववधानं न दीयते स्म। मापनस्य दोषमिममपाकर्तुमेव शिक्षायां मूल्याङ्कनस्यावधारणाया: निर्माणमभवत्।

पारिभाषिकमूल्याङ्कनस्यार्थ: – जे.डब्ल्यू. राइट्सटोन महाभागानुसारेण– ''मूल्याङ्कनं सापेक्षिकरूपेण नवीनपदमस्ति, यस्य प्रयोगोमापनधारणाया: परम्परागतनिरीक्षणानां परीक्षणानाञ्चापेक्षयाधिकव्यापकरूपेण कृत:। मूल्याङ्कने व्यक्तित्वसम्बन्धिपरिवर्तनेभ्य: शैक्षिककार्यक्रमस्य मुख्योद्देश्येभ्यश्च बलं प्रदीयते। मूल्याङ्कने केवलं पाठ्यवस्तुनो निष्पत्तिरेव न निहिताऽपितु वृत्तय:, रुचय:, आदर्शा:, चिन्तनदृष्टय:, कार्यव्यसनम् वैयक्तिक–सामाजिकानुकूलता: अपि च निहिता: विद्यन्ते।'' **जेम्स.एम. ब्रेडफील्डमहाभागेनोक्तम्** – ''मूल्याङ्कनस्य कार्यं घटनाभ्य: प्रतीकनिर्धारणमस्ति, तेन च विभिन्नघटनानामुपयोगिताया: अथवा महत्त्वस्य लाक्षणिकं रूपमुत्पाद्यते। प्राय: कार्यमिदं विशिष्टसामाजिक–सांस्कृतिक–वैज्ञानिकस्तरान् मापयितुं क्रियते।''[1] **क्लिलन्–हन्ना** चेति द्वयो: महाभागयोरनुसारं – ''विद्यालयप्रगतौ बालकानां यद्व्यावहारिकपरिवर्तनम्भवति तद्विषयिणीं सूचनां सञ्चित्य तासां व्याख्यानप्रक्रियैव

---

1. "Evaluation is the assignment of symbols to phenomena in order to characterise the worth of value of a phenomenon usually with reference to some social, cultural or scientific standard."

- James M. Bradfield : Measurment and Evaluation in Education.

मूल्याङ्कनमस्ति।''[1] **'डेप्सी' इति संस्थानुसारेण** – ''मूल्याङ्कने न केवलं मापनं व्याख्यायते वस्तुतः विस्तृतार्थबोधमूल्याङ्कनपदेन क्रियते। मापनमिति पदं निर्देशपरिणामानां संख्यात्मके परीक्षणे रूढं किन्तु मूल्याङ्कने तु छात्राणां प्रगतिपरीक्षार्थं व्यापकं विस्तृतं सर्वकालिकमध्ययनम्भवति। दृष्टिकोणेनानेन मूल्याङ्कनं शिक्षायाः समग्रकार्येण सह सम्बद्धमस्ति तथा चास्य मुख्याभिप्रायः केवलं निर्देशस्य निष्पत्तिपरीक्षणमेव नास्त्यपितु निर्देशनपरिमार्जनमप्यस्ति।''[2] उपर्युक्तपरिभाषाभिर्ज्ञायते यत्–

(1) मूल्याङ्कनमेकं व्यापकपदं वर्तते, यस्मिन् मापनं निरीक्षणञ्चेति द्वे कार्ये निहिते स्तः।

(2) मूल्याङ्कनस्य क्षेत्रं व्यापकम्भवति। यस्यान्तर्गतं बालकस्य शारीरक-मानसिक-नैतिकेत्यादयः सर्वे पक्षाः समायान्ति।

(3) मूल्याङ्कनमेका सततप्रक्रिया वर्तते। अनया बालकानां व्यावहारिक-परिवर्तनानि परीक्ष्यन्ते।

(4) अस्य मूल्याङ्कनस्योद्देश्यं निर्देशस्याध्ययनस्य वा निष्पत्तेः मापनमात्रमेव नास्त्यपितु तत्रानेन परिष्कारोऽपि क्रियते।

मूल्याङ्कनमापनयोर्मध्ये भेदः –

केचिज्जनाः मूल्याङ्कनं मापनञ्चेति द्वे पदे पर्यायरूपेण स्वीकुर्वन्ति। किन्त्वेवं नास्ति, यतो हि मापनं मूल्याङ्कनस्य सः भागः भवति, यश्च प्रतिशतेन, मात्रया, अङ्कैः, मध्यमानेन, सामान्येन च अभिव्यज्यते। मापने व्यक्तित्वस्य कस्मिंश्चिद् एकस्मिन् पक्षे बलं दीयते।

---

1. "Evaluation is the process of gathering and interpreting evidence on-changes in the behaviour of the student as they progress through school."

- Quillen & Hanna : Education for Social Competence, p. 343

2. "Evaluation is a term which has overtones that distinguish it from mere measurement. The latter implies only a precise quantitative assessment of outcome of instruction, whereas evaluation signifies a wider, more comprehensive and sustained process of assessing student progress according to this approach, evaluation is integrated with the whole task of education and its purpose is to improve instruction and not merely to measure its achievement."

- The Concept of Evaluation in Education (DEPSE).

राइटस्टोनमहोदयो ब्रवीति यत् – मापने पाठ्यवस्तुनः विशेषकौशलानां योग्यतानाञ्चोपलब्धीनामेकाकिपक्षेषु बलं दीयते। परं मूल्याङ्कने व्यक्तित्वसम्बद्ध-परिवर्तनानां शैक्षिककार्यक्रमाणाञ्च व्यापकोद्देश्यानामुपरि बलं प्रदीयते। अतोऽनेन स्पष्टं भवति यत् मापनं विद्यार्थिनः प्रगतिमवबोद्धुमेकं कारकमस्ति यस्य माध्यमेन तस्य प्रगतिः संख्यासु अंकेषु वा स्पष्टयितुं शक्यते। किन्तु मूल्याङ्कने मापनं निरीक्षणञ्च उभावपि संनिहितौ भवतः। अत्र प्रश्नोऽयं समुत्पद्यते यत् निरीक्षणमिति शब्दः कस्य प्रकारस्याङ्कनाय प्रयुज्यते? परीक्षणेन व्यक्तित्वस्य त एव पक्षाः परीक्ष्यन्ते येषाम् अङ्कनं मापनेन प्रायोऽसम्भवमेव। प्रायः व्यक्तेः रुचीः, वृत्तीः, आदर्शान्, चारित्रिकविशेषताः, चिन्तनं, वैयक्तिक-सामाजिकानुकूलनञ्च मापयितुं निरीक्षण-मिति शब्दस्य प्रयोगः क्रियते। प्रायः मापनार्थं निरीक्षणस्य, व्याख्यायाः, वैयक्तिकनिर्णयानाञ्च प्रयोगः क्रियते। आंशिकरूपेण निर्धारणमानस्य रुचिवृत्तयोः मापकस्य व्यक्तित्वमापकादीनां प्रयोगः क्रियते। **ई.वी. विजले**महाभागस्य मतानुसारं- ''मूल्याङ्कनमेका समावेशिता धारणा वर्तते या वाञ्छितपरिणामेषु गुणं महत्त्वं प्रभावशीलताञ्च निर्णेतुं समग्रप्रकारस्य प्रयासान् साधनानि प्रति संकेतयति। इदं वस्तुगतप्रमाणाऽऽत्मगतनिरीक्षणयोः सम्मिश्रणम्। इदमेव सम्पूर्णम् अन्तिमञ्चानु-मानमस्ति। मूल्याङ्कनं नीतीनां रूपं परिवर्तयितुं भाविकार्याय च महत्त्वपूर्णमावश्यक-पथ-प्रदर्शनमस्ति।''

मूल्याङ्कनस्य प्रयोजनानि –

(अ) मूल्याङ्कनस्य मुख्यप्रयोजनमस्ति यत् बालकेषु अवबोध-वृत्ति-रुचि-कुशलता-गुण-योग्यतानां कियान् विकासो जात इति परीक्षणम्।

(ब) अनेन छात्राणां दोषाः गुणाश्च ज्ञातुं शक्यन्ते।

(स) मूल्याङ्कनेन बालकानां वर्गीकरणोन्नतिभ्याम् आवश्यकज्ञानं प्रदीयते।

(द) मूल्याङ्कनेन छात्रेभ्यः समुचितशैक्षिक-व्यावसायिकनिर्देशनमपि प्रदीयते।

(य) मूल्याङ्कनेन शैक्षिककार्यक्रमाणां शिक्षणविधीनाञ्चोपयोगित्वमपि परीक्ष्यते। तथा च पाठ्यक्रमपरिवर्तनाय उपयुक्तसम्मतयः प्रदीयन्ते।

(र) शिक्षकाणां कौशलस्य सफलतायाश्च मापनमपि मूल्याङ्कनस्यैकमन्यत् प्रयोजनम्।

संक्षेपतो वक्तुं शक्यते यत् – मूल्याङ्कनस्य महत्त्वपूर्णं प्रयोजनं बालकानां सर्वाङ्गिकविकासाभिवर्धनमेवास्ति।

मूल्याङ्कनस्य प्रविधयः (Evaluation Techniques) –

मूल्याङ्कने प्रायोऽधस्तनप्रविधीनां प्रयोगः क्रियते –

(1) निरीक्षणप्रविधिः (Observation Technique) :-

विधिनानेन छात्र–व्यवहार–क्रियाः, संवेगात्मकबौद्धिकपरिपक्वताः, सामाजिक–व्यवस्थापनानि च निरीक्ष्यन्ते। प्रविधिरयं व्यसनानां कौशलानाञ्च विकास–निरीक्षणार्थमपि उपयोक्तुं शक्यन्ते सतर्कतया नियमितरूपेण च कृतं निरीक्षणमुपयुक्ते निर्णये क्रमशः बहुसहायकम्भवति।

(2) साक्षात्कारः (Interview) :-

साक्षात्कारेण रुचिविकासे दृष्टिकोणेषु च जायमानपरिवर्तनानां विषये पर्याप्तरूपेण ज्ञातुं शक्यते। एषो विधिः बालकानां विभिन्नवैयक्तिकगुणान् ज्ञातुमपि सहायको वर्तते।

(3) प्रश्नावलीविधिः (Questionnaire) –

छात्राणां विषये विभिन्नसूचनाप्राप्त्यर्थमयं विधिः बहूपयोगी मन्यते।

(4) छात्रैः निर्मितवस्तूनि :-

विधावस्मिन् छात्रैर्निर्मितवस्तूनि व्यवहारसम्बद्धसूचनाः अभिप्राप्तुं बहु–महत्त्वशीलानि साधनानि सन्ति। विधावस्मिन् छात्रेभ्यः प्रायोजनारूपेण कानिचित् कार्याणि दीयन्ते। यथा–चित्रकलाकृतयः, काष्ठकलाकृतयः, कर्गदकलाकृतयः, मृत्तिकाकलाकृतयश्च। अनेन विधिना छात्राणां रुचिकुशलता–व्यवहारादीनां विषये ज्ञातुं शक्यते।

(5) अभिलेखः (Records):-

छात्रदैनन्दिनी, शिक्षकनिर्मितघटनानां विवरणपत्रं सञ्चिताभिलेखश्च मूल्याङ्कनस्य प्रमुखप्रविधयो भवन्ति। छात्रदैनन्दिन्यः छात्रस्य रुचिम् अभिवृत्तिं दृष्टिकोणं व्यक्तिगत–सामाजिकसमस्याञ्च प्रकाशयन्ति। शिक्षकनिर्मितेन घटनापत्रेण छात्रस्यान्यान् प्रति दृष्टिकोणस्य व्यक्तित्वस्य चान्यपक्षाणां विषये ज्ञानं प्राप्यते। सञ्चिताभिलेखो मूल्याङ्कनस्य तत्प्रविधिरस्ति येन छात्राणां विभिन्नस्तरेषु जायमानायाः प्रगतेः विषये ज्ञानं प्राप्यते।

परीक्षा–प्रविधिः (Examination Technique) –

अस्य प्रविधेरधोलिखितानि रूपाणि सन्ति –

(अ) मौखिकपरीक्षा – अस्य प्रविधेः प्रयोगः पठनयोग्यता–सूचना–निरीक्षणोच्चारण– लिखितपरीक्षादीनां सम्पूर्त्तये क्रियते। अस्मिन् प्रविधौ मौखिक–प्रश्नाः, वाद–विवादाः, विचारविमर्शा इति विषयाः समायान्ति। अनेन विधिना बालकानां व्यक्तिगतगुणः अवगुणश्च ज्ञातुं शक्यते।

(ब) प्रायोगिकपरीक्षा – एषो विधिर्विज्ञान–कृषि–हस्तकला–चित्रकलेत्यादिषु प्रायोगिकविषयेषु प्रयुज्यते। अस्मिन् छात्रो निजकार्यांशं परीक्षकसमक्षं प्रस्तौति। अनेन विधिना प्रायोगिक–हस्तकौशलयोः निरीक्षणं क्रियते।

(स) लिखितपरीक्षा – सामान्यविद्यालयेष्वेषो विधिः प्रयुज्यते। अस्मिन् विधौ कार्यसमर्पणं (Assignment), प्रतिवेदनं, लेखनं, पत्राङ्किनीपरीक्षाश्च (Paper & Pencil Test)समायान्ति। पत्राङ्किनीपरोक्षयाऽऽलोचनात्मकव्याख्यानस्य योग्यता, पाठ्यवस्तुसङ्घटनयोग्यता च परीक्ष्येते। परीक्षेयं रूपद्वयात्मिका वर्तते तत्र प्रथमं रूपं निबन्धात्मकम् अपरञ्च वस्तुनिष्ठात्मकम्।

निबन्धात्मकपरीक्षा –

साम्प्रतमस्य विधेः प्रयोगबाहुल्यं दरीदृश्यते। अस्यान्तर्गतं बालकानाङ्कृते केचित् प्रश्नाः दीयन्ते तेषामुत्तराणि निश्चितसमयसीम्नि लिखन्ति बालाः। एतादृक्प्रश्नानां संरचना एतादृशी भवति यया तदुत्तराणि निबन्धरूपमवधारयन्ति, अत एव परीक्षेयं निबन्धात्मकपरीक्षेति नाम्ना ज्ञायते। अस्मिन् विधौ बालकानामभिव्यक्तिः, सुलेखः, लेखनशैली च परीक्ष्यन्ते। अस्यां परीक्षाप्रणाल्यां परीक्षकस्य स्वभावदृष्टिकोणयोः प्राधन्यम्भवति। प्रणाल्यामस्यामात्मगततत्त्वं प्राधान्यं भजते। साम्प्रतं परीक्षाप्रणाल्याः या कट्वालोचना भवति साऽऽलोचना एतत्तत्त्वस्यैव वर्तते। आलोचनायां सत्यामपि विधिमिमं त्यक्तुं न समर्थाः वयं, यतो ह्येषो विधिः बालकं क्रमबद्धरूपेण प्रकाशयति। एतान् प्रश्नान् उत्तरयितुं बालकाः भाषाशैल्यौ प्रयुञ्जते। **डीवीमहोदयानुसारेण** – ''बालकेषु विचारविनिमये नैसर्गिकरुचिर्भवति। तां रुचिं तोषितं भाषाज्ञानमत्यावश्यकम्। परीक्षेयं बालकस्य नैसर्गिकरुचिं तोषितुं सहायिका वर्तते। अनेन बालानां तर्क–व्याख्या–निर्णयादीनां विकासो जायते।''

वस्तुनिष्ठपरीक्षा –

यदा निबन्धात्मकपरीक्षायाः कट्वालोचना जाता तदा वस्तुनिष्ठपरीक्षायां महद्बलं दत्तम्। अनुसंधानैर्ज्ञायते यत् निबन्धात्मकपरीक्षा अविश्वसनीया अवैधा च वर्तते। विदेशेष्वपि वस्तुनिष्ठपरीक्षाणामुपरि बलं प्रदीयते। अस्माकं देशेऽपि सन्दर्भेऽस्मिन्

महत्त्वपूर्णप्रयासाः कृताः सन्ति। वस्तुनिष्ठपरीक्षा बालकस्य विषयज्ञाननिष्पत्तेः, बुद्धेश्च मापनाय समायोज्यते। एतत्प्रणाल्यन्तर्गतं बालकः स्वल्पमेवलिखति तथा च व्यक्तिगततत्त्वं नाधिकम्भवति। वस्तुनिष्ठतायाः प्राधान्यञ्च दरीदृश्यते। परीक्षैषा निबन्धात्मकपरीक्षापेक्षया अत्यधिकविश्वसनीया, वैधा, व्यापिका, व्यावहारिकी, वस्तुनिष्ठा, समयदृष्ट्या मितव्ययी च भवति। विधावस्मिन्नङ्कनसौविध्यमपि भवति। इयं परीक्षा प्रमाणीकृता शिक्षकैर्निर्मिता वा भवति। शिक्षकनिर्मितं निरीक्षणं प्रमाणीकृतनिरीक्षणात् विषयेऽस्मिन् श्रेष्ठं भवति यत् इदं कक्ष्याकक्षस्य वास्तविकपरिस्थितीः शिक्षणोद्देश्यानि च अवधाने संस्थाप्य तेषां परिणाममापनार्थं निर्मीयते। अस्यां परीक्षायां प्रश्नानां रूपद्वयं भवति। (अ) अभिस्वीकारात्मक-प्रश्नाः (ब) प्रत्यास्मरणप्रश्नाः।

(अ) प्रत्यभिज्ञानप्रश्नाः (Recognition Type) –

एतैः प्रश्नैः छात्राणामभिज्ञानशक्तेर्निरीक्षणं भवति। प्रश्नानां निम्नलिखितोपभेदाः सन्ति। यथा –

(1) अन्यतरप्रत्युत्तरप्रकारः (Alternate Response Type) –

द्वयोः विकल्पयोरेकं विकल्पं चेतुमादिश्यते। उदाहरणार्थम् – यत्

निम्नलिखितकथनं सत्यञ्चेत् (√) असत्यञ्चेत् (×) इति चिन्हांकनं कुर्वन्तु। प्रथमकथनमुदाहरणरूपेण रेखाङ्कितमस्ति।

(1) सम्प्रति राजस्थानप्रान्ते मुख्यमन्त्रिपदं श्रीमती वसुन्धराराजे अलङ्करोति। (आम् / न हि)

(2) डॉ. शंकरदयालः भारतस्य राष्ट्रपतिरस्ति। (आम् / न हि)

(3) डॉ. मनमोहनसिंहः भारतस्य प्रधानमन्त्री वर्तते। (आम् / न हि)

(2) बहुविकल्पप्रकारः (Multiple Choice Type):–

एतेषां प्रश्नानामुत्तरे बहवः विकल्पाः दीयन्ते। परीक्षार्थी एषु विकल्पेषु साधूत्तरं चिनोति। उदाहरणार्थम् –

(1) राजस्थानस्य राजधानी वर्तते।

(क) जोधपुरम् (ख) जयपुरम् (ग) अजयमेरुः (घ) उदयपुरम्

(3) संयोजनप्रकारः (Matching Type):–

एषु प्रश्नेषु द्वयोः सूचिकयोः सम्बन्धं स्थापयितुमुच्यते। एतासु सूचिकासु विषयाः क्रमबद्धाः न भवन्ति। परीक्षार्थी प्रश्नसूच्याः क्रमं निर्धारयति। उदाहरणार्थम्–

(1) पानीपतस्य प्रथमं युद्धम् 1757

(2) प्रथमभारतीयस्वतन्त्रतासंग्रामः 1992

(3) क्रिकेट–स्पर्धायां भारतविश्वविजयः 1857

(4) द्वितीयविश्वयुद्धम् 1983

(4) वर्गीकरणप्रकारः (Classification Type):–

एषु प्रश्नेषु बालकानां समक्षे केषाञ्चित् शब्दानां समूहः प्रस्तूयते। प्रस्तुतशब्द–समूहे एकः शब्दोऽसंगतो भवति। तमसंगतं शब्दं छात्रोऽन्विष्यति। उदाहरणार्थम् –

(1) डॉ. ए. पी. जे. अब्दुल कलामः, इन्दिरा गाँधी, राजीव गाँधी, पी.वी. नरसिंहरावः, लालबहादुर शास्त्री।

(ब) प्रत्यास्मरणप्रकारः (Recall Type):–

एषु प्रश्नेषु छात्रस्य स्मरणाशक्तिः परीक्ष्यते। एतेषां प्रश्नानां निम्नाङ्कितो–पभेदास्सन्ति– एतादृक्प्रश्नैः बालकानां प्रत्यास्मरणशक्तिर्निरीक्षिता भवति।

(1) साधारणप्रत्यास्मरणप्रकारः –

(1) श्रीलालबहादुरशास्त्रिणः मृत्युः कदा जाता? ( )

(2) हल्दीघाटी युद्धं कदा बभूव? ( )

(3) साम्प्रतं भारतस्य गृहमन्त्री कोऽस्ति? ( )

(4) इदानीं योजनायोगस्योपाध्यक्षः कोऽस्ति? ( )

(2) रिक्तस्थानपूरकप्रकारः –

एतादृशप्रश्नाः अपूर्णवाक्यरूपेण भवन्ति। छात्रः निजप्रत्यास्मरणशक्तिना अपूर्णवाक्यानि पूरयति।

(1) भारतस्य संविधानं .... प्रभावी जातः?

(2) पानीपतस्य द्वितीयं युद्धं .... एवं ....मध्येऽभवत्।

परीक्षा–प्रविधेरुपर्युक्तभेदातिरिक्तं द्वौ अन्यभेदावपि क्रियेते। किन्त्विमौ भेदौ सङ्घटनप्रशासनदृष्ट्या क्रियेते। अत्र भेदानां विवरणमधः प्रस्तूयते –

(अ) आन्तरिकी परीक्षा – याः परीक्षाः विद्यालयीयशिक्षकैः समये–समये समायोज्यन्ते। ताः आन्तरिकी परीक्षा इत्युच्यन्ते। परीक्षाभ्यः शिक्षकाः स्वयं प्रश्न–पत्राणि निर्मान्ति। एवञ्च शिक्षका एवोत्तरपुस्तकं निरीक्षन्ते। परीक्षा सम्बन्धिनियमानपि शिक्षका एव निर्धारयन्ति। विद्यालयेष्वान्तरिकपरीक्षाः बहुधा समायोज्यन्ते।

उदाहरणार्थम् – प्रवेशपरीक्षा, साप्ताहिकी परीक्षा, मासिकपरीक्षा, त्रैमासिकपरीक्षा, अर्द्धवार्षिकपरीक्षा, वार्षिकपरीक्षाश्च। कक्ष्योन्नतये वार्षिकपरीक्षैवाऽऽधारो भवति।

(ब) बाह्यपरीक्षा – या परीक्षा विद्यालयीयशिक्षकातिरिक्तान्यैरधिकारिभिः मण्डलमाध्यमेन विश्वविद्यालयेन काभिश्चिदपि शैक्षिकसंस्थाभिः समायोज्यते सा बाह्यपरीक्षेति नाम्ना ज्ञायते।

माध्यमिकशिक्षायोगानुसारम् – बाह्यपरीक्षायाः प्रयोजनं भिन्नं वर्तते। प्रथमं–चयनात्मकम् (Selective), द्वितीयञ्च योग्यताप्रदायी (Qualifying)। एतासु परीक्षासु माध्यमिकपरीक्षा, उच्चमाध्यमिकपरीक्षा, उच्चतरमाध्यमिकपरीक्षा च भवन्ति। मूल्याङ्कनप्रविधिविषये **क्रो एण्ड क्रो** तथा च **रिची** महाभागा ऊचुः यत् मूल्याङ्कन–प्रविधिः द्विधा विभाजयितुं शक्यते। अनौपचारिकरूपेण औपचारिकरूपेण च।

अनौपचारिकप्रविधेरन्तर्गतं निरीक्षणं, जीवनचर्यासम्बन्धिसूचना, मौखिकपाठः, प्रश्नाः, व्यक्तिगतसामूहिकपरियोजना, अध्यापकेन आयोज्यमानपरीक्षा, विद्यालयेन निर्मितव्यक्तित्वमापनी, मूल्याङ्कनपत्रञ्च परिगण्यन्ते।

औपचारिकप्रविधौ – बौद्धिकपरीक्षा, रुचिमापकसूची, व्यक्तित्वमापकं, अभिरुचिपरीक्षणं, विद्यालयीयपरीक्षा, व्यावहारिकपरिवर्तनानामितिहासः साक्षात्कारश्च सम्मिलिताः सन्ति।

वर्तमानपरीक्षाप्रणाल्याः दोषाः –

विंशतिशताब्दीत एव परम्परागतपरीक्षाप्रणाल्याः कट्वालोचना जाता। यद्यपि विंशतिशताब्द्याः पूर्वमपि कैश्चित् समाजोद्धारकैरस्याः पद्धत्या आलोचना कृता, किन्तु साम्प्रतमस्या आलोचना सामान्यजनस्य चर्चाया विषयो जातोऽस्ति। मुख्यतः आलोचनाविषयः बाह्यपरीक्षाः वर्तन्ते। परमान्तरिकपरीक्षा अप्यालोचनीयाः भवन्ति। यतो हि ताः अपि बाह्यपरीक्षाणां प्रारूपमनुसृत्यैव प्रचलन्ति। डॉ. जाकिरहुसैन–महोदयोऽब्रवीत्– अस्माकं देशे प्रचलिता शिक्षाप्रणाली अभिशाप इव प्रतीयते। परीक्षाणाङ्कृते बहुमहत्त्वं दत्तम्, अतोऽस्माकं दोषपूर्णा परीक्षाप्रणाली निम्नतरा जाता।[1] विश्वविद्यालयायोगानुसारम् – साम्प्रतिकी शिक्षाप्रणाली भारतीयशिक्षायाः अनुपयुक्तं लक्षणं वर्तते। वर्तमानशिक्षाप्रणाल्यां बहवः दोषाः समाहिताः सन्ति। तेषु

1. "The system of examination prevailing in our country has proved a curse to education. A bad system of education has been made more worse by awarding to exmination a place out of proportion to their utility."

—Dr. Zakir Hussain Committee Report of 1938.

दोषेषु केचिदिह प्रस्तूयन्ते।

(1) विद्यालयकार्येषु हानिप्रदकारकम्

परीक्षाप्रणाल्या न केवलं विद्यालयीयशिक्षणकार्यमपि तु पाठ्यक्रमः शिक्षण-विधिश्चाऽधिकृतोऽस्ति। माध्यमिकशिक्षायोगस्य मतमस्ति यत् ''परीक्षा विद्यालयीय-जीवनस्य सम्पूर्णवातावरणे एवं परिव्याप्ता जाता यत् सा बालकशिक्षकयोः समस्त-प्रयासाय प्रेरणादातृमुख्यशक्तिः जाताऽस्ति। इदानीं परीक्षा पाठ्यक्रमानुगमनापेक्षया तमधिकरोति। आभिः प्रयोगस्य प्रतिकारः क्रियते। एवञ्च विषयस्योपयुक्त-प्रस्तुतीकरणं शिक्षणविधिश्चाऽवरुद्ध्यते। मौलिकतायाः स्थाने मृषैवैकरूपतायाः प्रसारः क्रियते। एषा परीक्षाप्रणाली सामान्य बुद्धिबालकं ज्ञानस्य सङ्कुचितक्षेत्रे दृढतापूर्वकम् एकाग्रमनसं भवितुं प्रोत्साहयति। तथा च शिक्षायाम् अशुद्धमूल्यानां विकासनाय बालकस्य साहाय्यङ्करोति।''[2] एतादृशो विचार एव सन् 1904 ई. वर्षस्य शिक्षानीतौ भारतसर्वकारेण प्रस्तावितः। प्रस्तावानुसारम्-''सम्प्रतिकाले इयं पद्धतिः अनियन्त्रितायामेषु प्रवृद्धाऽस्ति, यस्याश्च प्रभावः भारते समग्रशिक्षाव्यवस्थाम् अधिकर्तुमपि अनुमता वर्तते। परिणामतः अनुदेशनं पाठ्यक्रमस्य औपचारिकप्रारूपेण सीमितं दृश्यते, सर्वविधप्रशिक्षणस्य लिखितपरीक्षाभिरपरीक्ष्यणस्य उपेक्षा क्रियते।''[2]

(2) बालकेषु हानिप्रदप्रभावः -

परीक्षाभिः बालकानां नैतिकस्तरोऽपि निम्नतरः जातः। इदानीं बालाः केवलं परीक्षोत्तीर्णतायैधीयते। शिक्षका अपि परीक्षोत्तीर्णतायै पाठयन्ति। अतः परीक्षोत्तीर्णतैव

---

1. "They (Examinations) have so pervaded the entire atmosphere of school life that they have become the main motivating force for all efforts on the part of pupil as well as teacher.... the examinations today dictate the curriculum instead of following it,, prevent any experimentation, hamper the proper treatment of subjects and sound methods of teaching foster a dull uniformity rather than originality, encourage the average pupil to concentrate too rigidly upon too narrow a field and thus help him to develop wrong values in education."

—Report of the Secondary Education Commission (1952), pp. 145-47.

2. "In recent years they have grown to extravagant dimensions and their influence has been allowed to dominate the whole system of education in India, with the result that instruction is confined within the rigid framework of prescribed course, that all forms of training which do not admit of begin tested by written examinations are liable to be neglected."

—Gove. of India Resolution of Education Policy (1904.)

साध्यं जातम्। यस्य दुष्परिणामं सर्व एव विदन्ति। छात्राः परीक्षोत्तीर्णतायै अनुचितसाधनानि प्रयुञ्जते। एताभिः परीक्षाभिः न केवलं नैतिकस्तरः क्षीणो जातोऽपितु स्वास्थ्यं, मानसिकविकासः, संवेगात्मकविकासश्चापि क्षीणो जातः। परीक्षावसरे छात्राः भोजनं, भ्रमणं, क्रीडनमित्यादिक्रियाः परित्यजन्ति। केवलं परीक्षामेव स्मरन्ति। तस्माच्छात्राणां मानसिकशारीरकस्वास्थ्यं प्रतिकूलत्व-मधिगच्छति। परीक्षा तेषां मानसिकविकासमवरुणद्धि। छात्राः परीक्षादृष्ट्या कांश्चित् प्रश्नान् एव रटन्ति तस्मात् विषयज्ञानं स्वल्पमेव भवति। एवञ्च तेषां तर्कशक्तेः चिन्तनशक्तेः, निर्णयशक्तेश्च विकासोऽप्यवरुद्धो भवति। केवलं रटनशक्तेरेव विकासो जायते। परीक्षाभिरेव बालकस्य मानसिकस्वास्थ्येऽपि प्रतिकूलप्रभावः भवति यथा – अल्पनिद्रा, अनिद्रा, मानसिकसंघर्षः, नैराश्यं, द्वेषः इत्यादि। परीक्षायाम् असफलता कदाचिद् आत्महत्यायै गृहात् पलायनाय च प्रोत्साहयति।

(3) शिक्षकेषु प्रतिकूलप्रभावः –

अनया परीक्षापद्धत्या न केवलं छात्रा एव प्रभाविताः सन्त्यपितु शिक्षका अपि प्रभाविताः जा॰न्ते। शिक्षकाणां सफलता केवलं छात्राणां परिणामाधारेणाङ्क्यते। बहुधा श्रूयते यत् शिक्षकोऽयं साधुः यतो हि तस्य छात्राणां परीक्षापरिणामः सदैव श्रेष्ठो भवति। प्रधानाचार्योऽपि शिक्षकाणां विषये यदा निजसम्मतिं ददाति तदा तस्य परीक्षापरिणामं स्मरति। शिक्षकाणां वार्षिकवृद्धिरपि परीक्षापरिणामस्योपरि निर्भरीकरोति। अस्यां स्थितौ शिक्षकाः अनैतिकाः भवितुमर्हन्ति।

(4) अभिभावकेषु प्रभावः –

अभिभावका अपि परीक्षापद्धत्या प्रभाविताः भवन्ति। यतो हि परीक्षोत्तीर्णाद् व्यवसायो मिलति। अतः प्रायोऽभिभावका एवमेव चिन्तयन्ति यदस्माकं बालो येन केन प्रकारेण परीक्षायामुच्चांकैः सफलो भवेत्। तेऽभिभावकाः पाठ्यक्रम-सहगामिक्रियासु रुचिं न प्रदर्शयन्ति। यतो हि पाठ्यक्रमसहगामिक्रियाभिः प्रत्यक्षलाभो न दृश्यते। अतोऽभिभावका उच्चांकैरुत्तीर्णपरीक्षामेव श्रेष्ठशिक्षां स्वीकुर्वन्ति।

(5) अवैधता –

वर्तमानपरीक्षाप्रणाली वैधा न वर्तते। यतो ह्येताभिः परीक्षाभिरुचितशक्तेः योग्यतायाश्च वास्तविकं मापनं न भवति। अनया केवलं रटनशक्तेरेव विकासो जायते। सम्प्रति परीक्षाभिः बुद्धि-रुचि-प्रवृत्ति-कुशलताः न परीक्ष्यन्ते, अपितु लेखनशक्ति-भाषयेव निरीक्ष्यते। वस्तुतस्तु परीक्षायाः मुख्योद्देश्यं बालकस्य

सर्वाङ्गिकविकासस्य परीक्षणमेव भवेत्।

(6) विश्वसनीयता (Reliability) :-

विश्वसनीयतायाः तात्पर्यमिदं वर्तते यत् परीक्षाभिः प्राप्तपरिणामः प्रायः संगतः (Consistent) स्यात्। वर्तमानपरीक्षाप्रणाल्यामस्याऽभावः प्राप्यते। साम्प्रतिकीपरीक्षाः विश्वसनीयाः न सन्ति। यतो हि आसु परीक्षासु छात्रैः प्राप्ताङ्केषु बहुविचलनं (Variation) भवति।

(7) उत्तरपुस्तिकाङ्कने वैविध्यम् (Variability in Marking) :-

वर्तमानपरीक्षाप्रणाल्यामेको महान् दोषो वर्तते यदुत्तरपुस्तिकाङ्कने वैविध्यं प्राप्यते। सम्बन्धेऽस्मिन् विभिन्नपरीक्षणानि जातानि। उदाहरणार्थम् - स्टार्चमहोदया-नुसारं-ज्यामिति, विषयस्योत्तरपुस्तिकाः 144 संख्याकैरनुभविशिक्षकैः परीक्षिताः। तेषु शिक्षकेषु द्वौ शिक्षकौ शताङ्केषु नवतिरङ्काः प्रदत्ताः एवञ्चाष्टादशशिक्षकैर-शीत्यधिकाङ्काः प्रदत्ताश्चतुस्सप्ततिशिक्षकैः षष्ठयधिका अङ्काः प्रदत्ताः, विंशतिशिक्षकाः षष्ठीतः न्यूनाङ्कान् प्रदत्तवन्तः। तथाचैकः शिक्षकः दशतः न्यूनाङ्कान् एव दत्तवान्।

वर्तमानपरीक्षाप्रणाल्यां परिष्काराय परामर्शाः -

माध्यमिकशिक्षायोगेन परीक्षाप्रणाल्यां परिष्कारायाधोलिखिताः परामर्शाः प्रदत्ताः।

(1) बाह्यपरीक्षाः स्वल्पाः भवितव्याः, निबन्धात्मकपरीक्षापेक्षया वस्तुनिष्ठ-परीक्षणं भवेत्। प्रश्नानां रूपेऽपि परिवर्तनं भवितव्यम्।

(2) बालकस्य सर्वाङ्गिकप्रगतिं परीक्षितुं तथा च छात्रस्य भविष्यं निर्णेतुं विद्यालयीयाभिलेखानामुपयुक्तपद्धत्या स्थापनं भवेत्। एतेष्वभिलेखेषु समये-समये बालकैः कृतस्य कार्यस्य तथा च विभिन्नक्षेत्रेषु प्राप्तोपलब्धीनामुल्लेखः भवितव्यः।

(3) छात्राणाम् अन्तिमनिर्धारणे मूल्यांकने वा तेषाम् आन्तरिकपरीक्षणाय विद्यालयीयाभिलेखाय च पर्याप्तमहत्त्वं दद्यात्।

(4) बाह्यान्तरिकपरीक्षणानां विद्यालयीयाभिलेखानाञ्च स्थाने बालकानां कार्यमूल्याङ्कने संख्यात्मकाङ्कनापेक्षया लाक्षणिकाङ्कनपद्धतिरेव पालनीया।

(5) माध्यमिकविद्यालयस्तरान्ते केवलमेकैव बाह्यपरीक्षा भवेत्।

(6) अन्तिमबाह्यपरीक्षायै परिपूरक- (कम्पार्टमेन्टल) परीक्षा-पद्धतिरायोजनीया।

(7) बाह्यपरीक्षाधारेण यानि प्रमाणपत्राणि प्रदीयन्ते तेषु प्रमाणपत्रेषु बाह्यपरीक्षा-परिणामातिरिक्तं बालकस्याऽऽन्तरिकपरीक्षणस्य विद्यालयीयाभिलेखानाञ्चाप्युल्लेखः भवेत्।

सन् 1956 ई. तमे वर्षे भोपालेऽखिलभारतीयमाध्यमिकशिक्षापरिषदा एकस्य सम्मेलनस्यायोजनङ्कृतम्। सम्मेलनेऽस्मिन् परीक्षापद्धतौ परिष्कारायाधस्तनाः परामर्शाः दत्ताः।

(1) व्यक्तिनिष्ठतत्त्वस्य न्यूनीकरणाय तथा च बालकानां ज्ञानं मूलप्रतिक्रियाञ्च परीक्षितुं बाह्यान्तरिकपरीक्षाणां प्रश्नपत्रेषु प्रश्नाः त्रिधा विभाजनीयाः। एतेषामनुपातनिर्धारणं प्रयोगेणैव स्यात्। (अ) निबन्धात्मकप्रश्नाः, (ब) लघू-त्तरात्मकप्रश्नाः, (स) शुद्धरूपवस्तुनिष्ठप्रश्नाः।

(1) यस्मिन् विषये द्वे प्रश्न-पत्रे निर्धार्येते। तत्रैकं प्रश्नपत्रं वस्तुनिष्ठात्मकं भवेत्। तथा च यस्मिन् विषये केवलमेकमेव प्रश्नपत्रं वर्तते, तत् पत्रं खण्डद्वये विभज्य खण्डमेकं वस्तुनिष्ठात्मकमेव भवितव्यम्।

(2) बाह्यपरीक्षासु मूल्गङ्कनस्य व्यक्तिनिष्ठतायाः न्यूनीकरणायाधोलिखिताः उपायाः स्युः।

(अ) विभिन्नविषयेषु प्रधानाचार्येणाऽनुभविशिक्षकैश्च समुपयुक्तप्रश्नानामेका प्रारम्भिकसूचिका निर्मातव्या।

(ब) परीक्षाधिकारिणः विषय-विशेषज्ञानाञ्च एकं मण्डलं रचयेयुः। यस्मिन् त्रयः सदस्याः भवेयुः। इमे, माध्यमिकविद्यालयानां विश्वविद्यालयस्य अन्योपयुक्त-शिक्षासंस्थानां प्रतिनिधित्वं कुर्युः। इदं सङ्घटनं शिक्षकैर्निर्मितायाः प्रश्नसूच्याः अवलोकनं कुर्यात् ततश्च प्रश्नपत्रस्य निर्माणं कुर्यात्।

(स) उत्तरपुस्तिकानां परीक्षणात् पूर्वं प्रधानोपप्रधानपरीक्षकसम्मेलनं भवेत्। सम्मेलने चाङ्कनाय निर्देशनिर्धारणं करणीयम्। निर्धारितनिर्देशानुसारमेवोत्तरपुस्तिकानां मूल्याङ्कनं करणीयम्।

3. येषां विषयाणां व्यावहारिकपरीक्षाऽऽवश्यकी तेषाङ्कृतेऽधस्तन-निर्देशाः सन्ति-

(1) सत्रीयकार्यस्य महत्त्वं स्यात् सत्रीयकार्याय सम्पूर्णाङ्कानां पञ्चाशत्प्रतिशतं निर्धारणीयम्। अस्य कार्यस्य अभिलेखः, विद्यालयाधिकारिभिः संरक्षणीयः बाह्यपरीक्षकस्य सम्मुखे प्रस्तुत्यर्थम्।

(2) अवसरस्य तत्त्वं परिहर्तुं व्यावहारिकस्य प्रायोगिककार्यस्य चयन-स्वीकृतिः द्वयोर्मध्ये बहुषु वा देया।

(3) विद्यालयाभिलेखेन सह बाह्यपरीक्षकस्य निर्णयः पर्याप्तरूपेणासमानतां भजते चेत् वादोऽयं परीक्षाधिकारिणां समक्षं प्रस्तोतव्यः।

4. प्रश्नपत्रस्य समाधानावधिरपि सार्धद्विहोरात्मक एव कार्यः। उपर्युक्ताः सर्वे निर्देशाः महत्त्वपूर्णाः सन्ति। बोधनानां क्रियान्वितौ महत्त्वपूर्णपदानि निधीयन्ते। परंतु परीक्षापद्धत्तिमुपयुक्तां विधातुं; अभीष्टलक्ष्यसिद्धये च मानसिकपरीक्षणप्रयोगः, परीक्षकाणां समुचितचयनञ्चेत्युभयोरावश्यकतास्ति।

शिक्षायोगस्य मूल्याङ्कनसम्बन्धिविचाराः –

भारते परीक्षाप्रणाल्याः दोषान् सर्वे जनाः सम्यक्तया जानन्ति। शिक्षायाः सर्वेषु स्तरेषु विशेषतः माध्यमिकशिक्षास्तरेऽस्याः प्रणाल्याः हानिकरप्रभावानां विवेचनानेकसमितीनाम् आयोगानां प्रतिवेदनपत्रेषु विहिता। एतत्सर्वमवलोक्य, माध्यमिक-शिक्षाऽऽयोगेन विद्यालयमूल्याङ्कनपद्धतीनां बाह्यपरीक्षाणां परिष्काराय, बहवः प्रबलनिर्देशाः दत्ताः। एषां निर्देशानां फलस्वरूपेणैकं परीक्षापरिष्काराऽऽन्दोलनं प्रचलितम्। सन् 1958 वर्षे प्रशिक्षिताधिकारिणां केन्द्रीय-परीक्षैककः अर्थात् Central Examination Unit संस्थापितो भारतसर्वकारेण एतेन आन्दोलनं बलवद् अभूत्। आधुनिकमूल्याङ्कनधारणायाः महत्ताप्रकाशनं नवीनस्यास्य परिष्कारान्दोलनस्य प्रमुखविशेषता विद्यते। मूल्याङ्कनस्यावधारणां स्पष्टयन्नायोगो लिखितवान्- मूल्याङ्कनं प्रवहमाना प्रक्रिया विद्यते या शिक्षाप्रणाल्या अभिन्नाङ्गमस्ति। मूल्याङ्कनेन छात्राणामध्ययनप्रवृत्तिः, अध्यापकानामध्यापनपद्धत्तिश्च प्रभाविते भवतः। मूल्याङ्कनप्रविधयः, अपेक्षितछात्रविकाससम्बन्धि-प्रमाणसंग्रह-साधनं सन्ति। अत इमे प्रविधयः प्रामाणिकाः, विश्वसनीयाः, वस्तुनिष्ठाः, व्यावहारिकाश्च भवेयुः।

भारते मूल्याङ्कने लिखितपरीक्षायाः महत्त्वं विद्यते। किञ्च दोषबहुलेयं पद्धतिरस्ति। अतोऽस्याः परिशोधनं मूल्याङ्कनकार्यक्रमं व्यापकं च विधातुं निम्नाङ्कित-निर्देशा आयोगेन दत्ताः –

(1) मूल्याङ्कनस्य नवदृशा लिखितपरीक्षापरिष्कारप्रयासः कर्त्तव्यः। येन शैक्षिकोपलब्धिमापने ते प्रयासाः विश्वसनीयाः भवेयुः।

(2) छात्रविकासस्य तान् मुख्यपक्षान् मातुं विभिन्नप्रविधीनामन्वेषणं कर्त्तव्यम्, येषां मापनं लिखितपरीक्षाभिर्न भवितुं शक्नोति।

(3) प्राथमिकस्तरे, मूल्याङ्कनेन मूलभूतकौशलेषु छात्राणामुपलब्धिपरिष्करणाय, तेषामुचितप्रवृत्तिविकासाय, समुचितदृष्टिविकासाय च सहायता कर्त्तव्या।

(4) उच्चतरप्राथमिकस्तरे, छात्रोपलब्धिपरीक्षणाय त्रिविधपरीक्षायाः (लिखित-मौखिक-निदानेति त्रिविधपरीक्षायाः) प्रयोगः करणीयः। सञ्चिताभिलेखपत्राणामपि व्यवस्था कर्त्तव्या।

(5) वर्त्तमानबाह्यपरीक्षाप्रणाल्यां याः न्यूनताः सन्ति ताः सर्वाः परीक्षार्थं निर्मितप्रश्नानां प्रश्नपत्राणां कारणाद् च भवन्ति। अतोऽस्मिन् विषयेऽनुपदमेवोल्लिखित तथ्यानि विचारसरणिमानेतव्यानि यथा -

(1) राज्यमण्डलायोजित-गहनप्रशिक्षणकार्यक्रमैः प्रश्नपत्रनिर्मातर्णिां प्राविधिकयोग्यताः वर्धापनीयाः।

(2) प्रश्नपत्राणामुद्देश्यं ज्ञानार्जनपरीक्षाणामपेक्षया ज्ञानप्रयोगयोग्यतायाः समस्या-समाधानयोग्यतायाः च विकासपरीक्षेति स्वीकरणीयम्।

(3) प्रश्नपत्राणां स्वरूपं परिष्कृतं स्यात्।

6. आन्तरिकपरीक्षणं व्यापकं भवेत्। अनेन बालकस्य सर्वपक्षाणां मूल्याङ्कनं करणीयमस्ति।

7. आन्तरिकपरीक्षणस्य, बाह्यपरीक्षणस्य चेत्युभयोर्व्यवहारे एकत्वं नास्ति। अतः नहि तयोः परिणामयोः मिश्रणं स्यात्। उभयविध-मूल्याङ्कनस्य भिन्नोद्देश्यानि प्रविधयोऽपि भिन्नाः भवन्ति। अतः उक्तयोः मूल्याङ्कनयोः परिणामौ पाठ्यक्रमसमाप्तौ यत्प्रमाणपत्रं प्रदास्यामः तस्मिन् उल्लेखनीयौ स्तः।

8. आन्तरिकमूल्याङ्कनस्य विभिन्नप्रविधीनाम् - निरीक्षण (Observation)-शिक्षिकनिर्मितपरीक्षण-मौखिकपरीक्षा-प्रयोगात्मकपरीक्षा-मनोवृत्ति-रुचि-योग्यतादीनां परीक्षणाय विभिन्नप्रकारकाणां मानकपरीक्षणानां प्रयोगो विधेयः।

9. केषाञ्चित् प्रयोगात्मकविद्यालयानां स्थापना कर्त्तव्या। इमे विद्यालयाः स्वपाठ्यक्रमनिर्माणे, पाठ्यपुस्तकनिर्धारणे, मूल्याङ्कनप्रविधिप्रयोगे स्वतन्त्राः स्युः। इमे विद्यालयाः दशमकक्ष्यायाः अध्ययनसमाप्तौ स्वतन्त्रतया परीक्षामायोजयन्तु। (अर्थात् अध्ययनपरिसमाप्तौ परीक्षायोजनेऽधिकृताः स्युरिमे विद्यालयाः) किञ्च, राज्यविद्यालयशिक्षामण्डलम् एषां विद्यालयानामनुशंसायां छात्रेभ्यः सफलताप्रमाण-पत्राणि वितरेत्।

10. व्यापकमूल्याङ्कनकार्यक्रमक्रियान्वयनाय राज्यस्तरे राज्यविद्यालय-शिक्षामण्डलस्य, केन्द्रे च राष्ट्रियविद्यालयशिक्षामण्डलस्य स्थापना भवेत्। मण्डलाभ्यां कार्याणि अधिकाराश्चापि समर्पणीयाः।

11. केन्द्रीयस्तरे राज्यस्तरे च "केन्द्रीयपरीक्षणसङ्घटनस्य" "राज्यमूल्याङ्कन-

सङ्घटनस्य'' च स्थापना करणीया। सङ्घटने चेमे कार्याणि पूर्वोक्त-मण्डलयोः सहयोगेन कुरुतः तथा सहैवेमे सङ्घटने मूल्याङ्कनस्य नवपद्धतीनां विकासव्यवस्था-मध्यापकानां प्रशिक्षणस्य व्यवस्थां, मूल्याङ्कनसामग्रीनिर्माणं च कुरुतः।

राष्ट्रियशिक्षानीतिकार्ययोजना (1986) -

अस्यां कार्ययोजनायां परीक्षाप्रणाल्याः परिमार्जनं तथा तस्याः विश्वसनीय-तासंस्थापनमिति द्वयमेव विशेषेण करणीयमुक्तम्। उक्तद्वयस्य सिद्ध्यर्थं निम्नाङ्कित-तथ्यानि बलात् स्वीकर्तव्यानि सन्ति।

1. परीक्षापद्धतेः विश्वसनीयतायै परीक्षकाणां कर्त्तव्यनिष्ठा महत्त्वपूर्णा वर्तते। परीक्षापद्धतेः विश्वसनीयता परीक्षाणामनावृत्तस्वरूपेण स्थापिता भवितुं शक्नोति। इदमपि तथ्यमस्ति यत् छात्राणामयमधिकारोऽस्ति यत्ते स्वात्मतुष्टये स्वोत्तरपुस्तिकानां मूल्याङ्कनस्य तात्त्विकं परीक्षणं कर्तुं शक्नुवन्ति। अन्येषां छात्राणामुत्तरपुस्तिकाभिः सह स्वस्योत्तरपुस्तिकायाः तोलनं च कृत्वा छात्रः मूल्याङ्कनं तत्त्वतः परीक्ष्यात्मतोष-मिच्छति चेत् अयमपि तस्याधिकारः स्वीकर्त्तव्यः।

2. प्रथमादिश्रेणीषु परिणामघोषणप्रथायाः समीक्षा करणीया विद्यते। वस्तुतः प्रतिविषयं लब्धाङ्कानुसारेण 'अ-ब' श्रेणीं दत्त्वा परिणामस्य घोषणा आरम्भणीया वर्तते।

3. छात्राः श्रेणीपरिष्कारायानुवर्तिनीषु परीक्षास्वसरं प्राप्नुयुः।

4. श्रेणीनिर्धारणाय, असमानानां विभिन्नविषयाणाम् अङ्काः निर्धारणीयाः।

5. प्रश्नपत्रनिर्मातर्णां सघनप्रशिक्षणकार्यक्रमः समायोजनीयः स्यात्।

6. प्रश्नपत्रनिर्मातर्णां सौविध्याय प्रश्नकोषोऽपि निर्मातव्याः।

7. शिक्षकाणां प्रशिक्षणस्य योग्यतानिष्पादनस्य वा कार्यक्रमेषु नवीनमूल्याङ्कन पद्धत्ति-प्रश्नपत्रनिर्माण-कार्यनिष्पादनमापनादीनां विषये विशेषावधानं स्यात्।

8. सतत गतिशीलं संस्थागतं मूल्याङ्कनकार्यं सौविध्यपूर्णं विधातुं छात्रसम्बन्ध्य-भिलेखसंरक्षणसुविधा शालासु महाविद्यालयेषु भवेत्।

सञ्चिताभिलेखाः -

'सञ्चिताभिलेख' इति पदं शैक्षिकशब्दमालायामाधुनिके समये संयोजितमस्ति। नूतनप्रकारकाभिलेखानभिहितुमस्य पदस्य प्रयोगः क्रियते। नूतनप्रकारकाभिलेखाः वस्तुनिष्ठ-मापनं व्यक्तित्वसम्बन्धितथ्यान्येव बलाद्वदन्ति। तथा च इदं पदं पुनः व्यक्तिसम्बन्धि-सर्वप्रकारकाभिलेखानाङ्कृतेऽपि प्रयुज्यते। कस्यचिद्विदुषः मतमस्ति

यत् – ''सञ्चिताभिलेखे, छात्रसम्बन्धिनीनां विभिन्नप्रकारैः समये समये संगृहीतानां महत्त्वपूर्णसूचनानां संक्षिप्तीकरणं विधाय ताः लेखबद्धाः क्रियन्ते।''

भारते त्वस्य प्रस्तावः नूतनतमोऽस्ति। भारतस्य सार्वजनिकविद्यालयेषु पाश्चात्त्यदेशानामनुकरणरूपेणास्य प्रयोगोऽवश्यमेव भवति। माध्यमिकशिक्षायोगः छात्रप्रगतिमूल्याङ्कनसम्बन्धिसमस्यां विचारयन् संचिताभिलेखावश्यकतामेभिः शब्दैः कथयति –

बाह्याभ्यन्तरपरीक्षाभ्यामपि छात्रस्य सर्वाङ्गिकप्रगतेः विशुद्धं सम्पूर्णञ्च चित्रं नैव प्रकटीभवति। छात्रस्य प्रगतिविषयकं ज्ञानमावश्यकं विद्यते। अनेन ज्ञानेन तस्य भविष्यत्कालः सम्बद्धो भवति। भाविनि कालेऽध्ययनविषयाणां व्यवसायानां वा विषयेऽनेन ज्ञानेन निर्णयो भवितुं शक्नोति। इदमुद्देश्यं लब्धुं प्रतिबालकं विद्यालयाभिलेखानामुपयुक्ता पद्धतिः स्थापिता भवेत्। अनया प्रतिबालकस्याह्निक-मासिक-वार्षिककार्याणामुल्लेखः कृतो भवेत्। एतादृशो विद्यालयाभिलेखो बालकस्य विभिन्नबौद्धिककार्योपलब्धीनां स्पष्टं चित्रं प्रस्तोष्यति। अतः परं तस्य रुचीनां वृत्तीनां गुणानां सामाजिक-व्यावहारिकक्रियाणां विकासविवरणमप्यभिलेखेन प्राप्स्यते अर्थात् सोऽभिलेखः तस्य समग्रं विद्यालयीयजीवनं प्रस्तोष्यति।

माध्यमिकशिक्षायोगः संचिताभिलेखस्यावश्यकतां तस्य महत्त्वं स्पष्टयन्नेव निर्देशानयच्छत् यत् प्रतिविद्यालयास्य व्यवस्था स्यात्। स्वनिर्देशानुरोधेन आयोगः स्वप्रतिवेदने संचिताभिलेखस्य प्रारूपमपि (नमूनाः) प्रस्तुतवान्। प्रतिवेदने त्विदमपि स्पष्टं कृतमायोगेन यत् प्रारूपे स्वावश्यकतानुसारं विद्यालयाः परिवर्तनमपि कर्तुं शक्नुवन्ति।

हैदराबादनगरे सम्पन्नेऽध्यापकसम्मेलनेऽयं निर्णयोऽभूत् यत् संचिताभिलेखः सावधानतया स्थापितः स्यात् चेत् अधस्तनोद्देश्यानां पूर्तिः भवितुं शक्नोति –

1. संचिताभिलेखः छात्रविकासनिदर्शने लाभप्रदो भवति।
2. छात्रगुणपरिचयेऽयमभिलेखः सहायकः भवति।
3. वैयक्तिकसमस्यानां समाधाने साहाय्यमाचरति।
4. अनेन ते बालकाः दृष्टिगताः भवन्ति ये समूहे सम्मिलितुमसमर्थाः भवन्ति।
5. शैक्षिक-व्यावसायिकयोजनानिर्माणाय साहाय्यं यच्छति।
6. छात्रसमस्यासु विचारविमर्शं कर्तुं समायोजिते शिक्षकाभिभावकसम्मेलनेऽनेन लाभप्रदसूचनाः दीयन्ते।

7. शिक्षकोऽनेन छात्रस्य सर्वं वृत्तान्तं ज्ञातुं समर्थो भवति तथाऽभिभावकसन्निधौ छात्रस्य सत्यवृत्तप्रेषणेऽपि शिक्षकोऽनेनैव समर्थो भवति।

8. अयं व्यवस्थापनकार्ये साहयतां प्रयच्छति।

9. अयं विद्यालयकार्यक्रमाणां मूल्याङ्कने सौविध्यमुत्पादयति।

संचिताभिलेखस्य स्थापनम् –

माध्यमिकशिक्षायोगस्य विचारो वर्तते यदस्यभिलेखस्य स्थापनां कक्ष्याध्यापकः कुर्यात्। बालकसम्बन्धिनः कक्षाध्यापकस्य निर्णयाः एवास्याधारोऽस्ति परन्तु यदावश्यकता भवेत्, कक्षाध्यापककृतनिर्णयानां प्रामाणिकक्ष्यापरीक्षायाः तदा वस्तुपरक प्रामाणिकविश्वसनीयपरीक्षाभिः अन्यशिक्षकनिर्णयैश्च प्रामाणिकतां विज्ञायाभिलेखः पूरणीयः।[1]

सञ्चिताभिलेखस्य प्रारूपम्

माध्यमिकशिक्षा–आयोगेन सञ्चिताभिलेखस्य अधोलिखितं प्रारूपं प्रस्तुतम् –

सामान्यप्रदत्तः (General Data)

1. छात्राभिधानम् ....
2. जन्म–तिथिः ....
3. पित्रोः नामनी ....
4. पित्रोः अभिभावकस्य वा गृहसङ्केतः ....

---

1. "Neither the external examination nor the internal examination, singly or together, can give a correct and complete picture of pupils all round progress at particular stage of his education, yet it is important for us to assess this in order to determine his future course of study or his future vocation. For the purpose a proper system of school records should be maintained for every pupil indicating the work done by him in the school from day to day, month to month, term to term and year to year. Such a school record will present a clear and continuous statement to the attainment of the child in different intellectual pursuits throughout the successive stage of his education. It will also contain a progressive evaluation of development in other directions of no less importance, such as the growth of his interests, attitudes and personality traits, his social adjustment, the practical and social activities in which he takes part. In other words, it will give a complete career."

—Report of the Secondary Education Commission, 1953, pp. 148-49.

5. पित्रोः अभिभावकस्य वा व्यवसायः ....

6. मातुः शिक्षा ....

7. विद्यालयस्येतिहासः –

विद्यालयस्य नाम	**वर्ष**	**परिवर्तनस्य कारणम्**
1.	....	....
2.	....	....
3.	....	....

8. पारिवारिकेतिहासः –

(1) परिवारे बालकस्य स्थितिः ....

(2) पारिवारिकानुशासनम् ....

(3) पारिवारिकस्थितिः (आर्थिक-सामाजिक-धार्मिकादयः)

(4) व्यवसायस्य सम्बन्धे पित्रोः विचाराः ....

9. छात्रस्याकाङ्क्षाः ....

10. पित्रोराकाङ्क्षाः ....

पाठ्य-विषयाः Subjects	श्रेणी Grade	200- विवरणम्	श्रेणी Grade	200- विवरणम्	श्रेणी Grade	200- विवरणम्
1. प्रथमभाषा						
2. द्वितीयभाषा						
3. आङ्ग्लभाषा						
4. गणितम्						
5. विज्ञानम्						
6. सामाजिक-विज्ञानम्						
7. वैकल्पिक-विषयाः						
1.						
2.						
3.						

(अ) ज्ञानोपलब्धयः (Scholastic Attainment)

(ब) व्यावहारिकक्रियाः

पाठ्य-विषयाः	श्रेणी	200- विवरणम्	श्रेणी	200- विवरणम्	श्रेणी	200 विवरणम्
हस्तकला (Craft) (अ) कार्यपूर्त्तिः Turn over (ब) कार्य- कौशलम् (Craftman) (स) उद्यमः (Application) **श्रेणीयोगः** (Total Grading) 2. सामाजिक- नागरिकक्रियाश्च (Social & Citizenship activities) (अ) संग्रहाः (Collections) (ब) अभिव्यक्तिः (स) सेवा (द) दक्षता- पदकम् (Proficiency Badges) (य) दलभावना						

श्रेणीयोगः

3. शारीरकशिक्षा (Physical Ed.) (अ) शारीरक–स्फूर्त्तिः (ब) क्रीडासु सम्भागिता **श्रेणीयोगः** 4. रेखाङ्कनं चित्रकला च (Drawing & Painting) (अ) प्रविधिः (ब) अभिव्यक्तिः (स) मौलिकता **श्रेणीयोगः** 5. संगीतम् 6. नृत्यम्						

(स) स्वास्थ्यविवरणम् (Health Report)

	200–	200–	200–	200–
(1) उच्छ्रायः – (2) भारः – (3) वक्षः – (अ) सामान्यम् – (ब) प्रसारितम् – (4) दृष्टिः – (5) श्रवणेन्द्रियादयः – चिकित्सकस्य सम्मतिः –				

(द) व्यक्तित्वविशेषकाः (Personality Traits)

विशेषकाः	**श्रेणी**
(1) अहमहमिका	
(2) चारित्रिकदृढता	
(3) अध्यवसायः	
(4) नेतृत्वम्	
(5) आत्मविश्वासः	
(6) संवेगात्मकनियन्त्रणम्	
(7) सामाजिकदृष्टिकोणम्	

टिप्पणी :-

यथासम्भवं प्रत्येकलक्षणसम्बद्धपूर्त्तयः निम्नप्रकारेण कर्तुं शक्यन्ते –

यथा – नेतृत्वम्

(1) क्रीडा	श्रेणी
(2) सामाजिकक्रियाः	,,
(3) बौद्धिकक्रियाः	,,

(या) सामान्यविवरणम् (General Remarks)

(1) उत्तरदायित्वग्रहणे बालकस्य स्थितिः। 200–

(2) विशिष्टविवरणम्।

(3) कक्ष्याध्यापकहस्ताक्षरम्

(4) प्रधानाध्यापकस्य हस्ताक्षरम्

कक्ष्याध्यापकः अस्याभिलेखस्य सम्पूर्त्तिं वर्षान्तेऽन्यशिक्षकाणां सहयोगं प्राप्य कुर्यात्। सः एतादृशशिक्षकाणां सम्मतिम् अवश्यं प्राप्नुयात् येषां सम्पर्के बालकाः निवसन्ति। मूल्याङ्कनं पञ्चश्रेणीवर्गक्रममनुसृत्य स्यात्। अनेन साकमेव आवश्यकतानुगुणं स्थाने–स्थाने शाब्दिकविवरणमपि दातव्यम्।

1962 तमे वर्षे **डेप्सी** संस्था प्रचलित – संचिताभिलेखानामध्ययनार्थं कांश्चन विशेषज्ञान् समाहूतवती ये प्रयुक्तसंचिताभिलेखेषु बहुवैविध्यं प्राप्तवन्तः। एतदतिरिक्तमत्र बालकानां निष्पत्ति विकासानुगुणञ्च तथ्यानां लेखनप्रारूपेऽपि वैविध्यं दृष्टवन्तः।

विशेषज्ञैः अनुभूतं यत् सञ्चिताभिलेखस्य स्थाने द्वयोः प्रमुखकाठिन्ययोः सम्मुखीकरणं भवति। प्रथमतः प्रचलिताभिलेखं सुविस्तृतमस्ति येन शिक्षकाणां कार्ये समधिकवृद्धिः समायाति। द्वितीयतः अधिकांशशिक्षकाणां कृते एतादृशाभिलेखसंस्थापनार्थमावश्यक–प्रशिक्षणमपि न मिलति। एतानि काठिन्यानि अभिलक्ष्य विशेषज्ञा एकं सरलं संक्षिप्तञ्चाभिलेखस्य प्रारूपं प्रस्तुतवन्तः। तस्य संस्थापनार्थञ्चावश्यकपरामर्शाः अपि दत्तवन्तः। अस्य प्रारूपं चतुर्थे परिशिष्टे द्रष्टव्यम्।

पुनरावृत्तिप्रश्नाः

1. मूल्याङ्कनस्य कोऽभिप्रायः ? स्पष्टयन्तु।
2. मूल्याङ्कनमापनयोश्च मध्ये अन्तरं सोदाहरणं स्पष्टयन्तु।
3. मूल्याङ्कनस्य कानि कानि प्रयोजनानि सन्ति ?
4. मूल्याङ्कनस्य के के प्रविधयः सन्ति ? सोदाहरणं स्पष्टयत।
5. निबन्धात्मकपरीक्षा काऽस्ति ? उदाहरणेन प्रतिपादयन्तु।
6. वस्तुनिष्ठपरीक्षणस्य कोऽभिप्रायः ? अस्य काः काः प्रमुखाः विशेषताः सन्ति ?
7. वस्तुनिष्ठप्रश्नानां भेदाः सोदाहरणं प्रतिपादनीयाः ?
8. वर्तमानपरीक्षापद्धतेर्दोषः कैरुपायैरपाकर्तुं शक्यते ?
9. सञ्चिताभिलेखस्य भवन्मते कोऽभिप्रायः ? स्पष्टयत।
10. सञ्चिताभिलेखस्य कानि–कान्युद्देश्यानि सन्ति ?
11. माध्यमिकशिक्षा–आयोगेन सञ्चिताभिलेखस्य का रूपरेखा प्रस्ताविता ?
12. भवन्तः छात्राणां सञ्चिताभिलेखस्य पक्षे कान् कान् तर्कान् प्रस्तोतुं शक्नुवन्ति ? संक्षेपतः विवेचनीयम्।

लेखार्थप्रश्नाः

'मूल्याङ्कनं शिक्षणप्रक्रियाया अभिन्नाङ्गमस्ति' साधयत।

चतुर्थः खण्डः

विद्यालय-नियन्त्रणं नियोजनञ्च

(SCHOOL CONTROL AND PLANNING)

- विद्यालय-निरीक्षणं परिनिरीक्षणञ्च
- विद्यालयानुशासनम्
- विद्यालय-संकुलम्
- संस्थागतनियोजनम्

परिनिरीक्षणम् उत्तमशिक्षणाधिगमपरिस्थितिविकासे सहायकं भवति।

— किम्बल

17

विद्यालयनिरीक्षणं परिनिरीक्षणञ्च

(School Inspection and Supervision)

"When the inspectors are on circuit, they establish contact with educational and other interested authroities and take part in educational meetings to make themselves conversant with the educational problems of the district."

UNESCO, School Inspection, P.126

भारते निरीक्षणपद्धतेः उद्गमस्य केन्द्रबिन्दुः ब्रिटिशशिक्षाप्रणाली वर्तते। भारते वुडघोषणापत्रस्य (1954) संस्तुत्याधारेण निरीक्षणपद्धतिः स्थापिता। अनेन घोषणापत्रेण घोषितं यत् ''एका उपयुक्ता निरीक्षणपद्धतिः भाविकालस्य कृतेऽस्माकं शिक्षापद्धतेः आवश्यकमङ्गं भविष्यति, अस्माकमिच्छापि वर्तते यत् समुचितमात्रायां योग्यनिरीक्षकाणां नियुक्तिः भवेत्, यत् समयानुसारं सर्वकारेण साक्षात् अनुदानेन च सञ्चालितानां विद्यालयानां महाविद्यालयानाञ्च प्रचलितस्थितिविषये प्रतिवेदनं भवेत्। ते तासां संस्थानां छात्राणां परीक्षायाः सञ्चालनं सहायतां वा प्रदास्यन्ति।''[1] घोषणायाः तदर्थं निरीक्षकैः विद्यालयानां वर्तमानस्थितिविषये प्रतिवेदनं दातुं, छात्राणां परीक्षां सम्पादयितुं तदर्थं सहायतां दातुञ्च कथितम्। इयं पद्धतिः प्रायः एकशताब्दिं यावत्

---

1. An adequate system of inspection will also, for the future, become an essential part of our educational system, and we desire that a sufficient number of qualified inspectors be appointed who will periodically report on the state of the colleges and schools which are managed by Government …… They will conduct or assist at the examination of the scholars of these institutions."

Wood's Despatch

प्रचलनमाना आसीत्। अनन्तरञ्चास्याः पद्धतेः परिष्कारार्थं ब्रिटिशसर्वकारेण एकः महत्त्वपूर्णः प्रयासः कृतः, यस्य परिणामस्वरूपेण ऐबट–वुडमहोदयाभ्यां भारते 1936 तमे वर्षे शिक्षायाः पर्यवेक्षणं कारितमासीत्। आभ्यां विद्वद्भ्यां भारतीय–निरीक्षकाणां ब्रिटेननिरीक्षकाणाञ्च कार्येषु महान् भेदो दृष्टः। उभाभ्यामुक्तं यत् ''निरीक्षकस्य मुख्यकार्यं विद्यालयस्य निरीक्षणमस्ति। तदिदं कार्यं सहानुभूतिपूर्वकेण चातुर्येण च कुर्यात्, स्वज्ञानानुभवयोश्च आधारेण परामर्शः दद्यात्।'' अस्य प्रस्तावानुसारेण निरीक्षकेषु परामर्शस्य प्रोत्साहनस्य च कार्यमपि समर्पितम्। परन्तु अद्यापि व्यवहारे पूर्ववदेव स्थितिः वर्तते।

उपर्युक्तप्रस्तावः इंग्लैण्डदेशस्य निरीक्षणपद्धत्यनुसारेण दत्त आसीत् यत्र निरीक्षणावधारणायां व्यवहारे च शनैः शनैः महान्ति अनेकानि परिवर्तनानि कृतान्यासन्। तत्र यावच्छक्यं जनतन्त्ररीत्या एव विद्यालयेषु निर्देशनकार्यस्य परिष्कारविषये सहायताप्रदानं प्रारब्धमासीत्, परन्तु भारते निरीक्षणस्य धारणां व्यवहारञ्च परिवर्तयितुं कोऽपि महत्त्वपूर्णप्रयासः न कृतः। अधुनाऽपि भारते निरीक्षणस्य स एवार्थः मन्यते, यः ब्रिटिश–कालीनभारते प्रचलिता आसीत्।

शब्दकोशानुसारेण निरीक्षणस्य अर्थः –'परीक्षणम्' भवति। इदं च सरलतापूर्वकम् आलोचनात्मकञ्च भवति। शिक्षाक्षेत्रेऽपि निरीक्षणशब्देन विद्यालयस्य शिक्षा–सम्बन्धिक्रियाभिः एवम् अवस्थाभिः एतादृशप्रकारस्य परीक्षणस्येवाभासः भवति। सर्वकारेण नियुक्तः विद्यालयनिरीक्षकः यथासमयं विभिन्नेषु विद्यालयेषु गच्छति। स तत्र कासाञ्चन कक्षाणां, प्रयोगशालानां, क्रीडाक्षेत्राणाञ्च परीक्षणं करोति। पुनश्च निरीक्षकः कार्यालयसम्बन्धि–पञ्जिका वित्तीयविषयाणां समालोचनात्मकदृष्ट्या निरीक्षणं कृत्वा प्रधानाध्यापकैः शिक्षकैश्च प्रश्नमाध्यमेन अन्याः सूचनाः प्राप्नोति। अनेन प्रकारेण सूचनायाः स्वकीयस्यावलोकनस्य चाधारेण निरीक्षकः स्वप्रतिवेदनं निर्माय उच्चाधिकारिणां समक्षं प्रस्तौति। इदं प्रतिवेदनं विभिन्नाधिकारिणां पार्श्वे गच्छति, तत्परमस्योपरि सर्वे अधिकारिणः स्वकीयां टिप्पणीं ददति। परमस्योपरि टीकाः अनेकाः भवन्ति। परिणामतः यदा इदं प्रधानाध्यापकस्य समीपे आगच्छति तावत् यस्य प्रतिवेदने आलोचना कृता सा स्थितिः बहुधा परिवर्तिता भवति। अतः निरीक्षणस्य परिणामः प्रायः निरर्थकः एव भवति।

निरीक्षणपद्धतेः दोषाः

ब्रिटिशकालीनभारते आविष्कृतस्य निरीक्षणस्य मूलाधारः परम्परागत-निरीक्षणम्[1], आदेशात्मकनिरीक्षणम्[2] वा इति वक्तुं शक्यते। यतो हि अस्मिन् निरीक्षणं निरंकुशतापूर्णं भवति। यदा सः निरीक्षकः विद्यालयभवने प्रविशति तदा विद्यालयस्य सम्पूर्णवातावरणे विचित्रा काचन स्थितिः उत्पन्ना भवति। एच.एस.एस.-लारेन्समहोदयेन प्रचलितविद्यालयनिरीक्षणपद्धतेः निम्नलिखितेषु शब्देषु सुस्पष्टतया चित्रणं कृतं वर्तते।

''प्रायः विद्यालयनिरीक्षणमनवधानं सहानुभूतिरहितं द्रुततरं च क्रियते इत्यालोचना वर्तते। निरीक्षणदिवसः विद्यालयाधिकारिणां भयोत्पादकः मन्यते। निरीक्षकेण केवलं आय-व्यय-विवरणमेव प्रमुखतया दृश्यते। तेन शिक्षासम्बन्धिविषयेषु न्यूनं ध्यानं दीयते। निरीक्षकाः केवलं संख्यात्मक-गणनां, परीक्षापरिणामानां प्रतिशतम्, काष्ठसामग्रीः, प्रतिदिवसम् उपस्थितिञ्च निरीक्षितुं तत्पराः दृश्यन्ते। सकारात्मकपक्षस्यापेक्षया नकारात्मकपक्षस्यैव अभिव्यक्तिः क्रियते। ध्वंसात्मकपक्षस्यालोचना प्रस्तूयते। निरीक्षकोऽन्वेषकः भवति, यः विद्यालयस्य दोषान् वक्तुं प्रयत्नशीलः भवति, किन्तु प्रधानाचार्याः शिक्षकगणाश्च समस्तैः प्रकारैः निरीक्षकान् प्रसादयितुं प्रयासं कुर्वन्ति। अतः एवमुच्यते यत् निरीक्षणं केवलं शिक्षकेषु नैराश्यम् असन्तोषञ्च उत्पादयतीति।[3]

माध्यमिकशिक्षा-आयोगः तथैवान्ये विद्वांसः वर्तमाननिरीक्षणपद्धतेः निम्नलिखितदोषान् सूचयन्ति—

---

(1) Traditional Inspection.

(2) Authoritative Inspection.

(3) "School inspection is often criticised as being hasty, perfunctory and unsympathetic. Inspection days are often looked upon with some degree of apprehension and even dread. The academic side is not stressed but only the account side ……… Inspectors are interested only in statistics, passes in examination, furniture and daily attendence. The negative side is accentuated rather than the positive. Criticism of the destructive side only is offered. The inspector is detective, trying to detect a few mistakes in the school, while the headmaster and the teachers try to please him in all sort of ways. Inspection is thus frequently said to produce only frustration and dissatisfaction in teachers" **-H. S. S. Lawrence.**

(अ) वर्तमाननिरीक्षणपद्धत्या निरीक्षणस्य स्थितिः नायकरूपेण न भूत्वाधिनायकवत् भवति। सः शिक्षकेभ्यः शिक्षासम्बन्धिसमस्याविषये कथनस्यावसरं ददाति, न च तेषाम् एतद्विषयकमौलिककल्पनायाः प्रस्तुतीकरणस्यावसरं प्रददाति। प्रायः तैः सह सहानुभूतिरहितः व्यवहारः क्रियते। सः परं मित्रं, दार्शनिकः, मार्गदर्शकश्च न भवति, निरंकुशशासकः भवति। अनेन तैः कृतं विद्यालयनिरीक्षणं क्रोधस्य कारणं न भवति चेदपि किञ्चिन्मात्रया भयोत्पादनस्य विषयः अवश्यमेव भवति। निरीक्षणस्थितिविषये रायबर्न-महोदयः कथयति यत्-"तस्य पदमत्यधिक-निरंकुशपूर्णं भवति, अत्र तस्य इच्छा साक्षात् विधिर्न भवति चेदपि न्यूनाधिकं तन्तुल्यैव यत् समस्तव्यावहारिकोद्देश्यानाम् अभिप्रायाणां च दृष्ट्या प्रधानाध्यापकः शिक्षकश्च तां नियमस्वरूपेनैव गृह्णन्ति।"[1] डी. आई. लालमहोदयः लिखति यत्-"तस्य प्रमुखं कार्यं लेख्यसञ्चिकानाम् आदेशप्रदानं तथा विद्यालयेऽऽत्मप्रदर्शनञ्च भवति, यत्र निरीक्षकः विलासितापूर्णस्वागतमनुभवति। तस्मात् सुप्रतिवेदनप्राप्तये प्रधानाध्यापकः सर्वेण प्रकारेण सम्मानं प्रददाति।"

(ब) निरीक्षणपद्धतेः दोषोऽयं यत् विद्यालयनिरीक्षणं केवलं कृत्रिमं भवति ते निरीक्षणकार्यं प्रायः अनवधानतया कुर्वन्ति। निरीक्षकाः स्वनिरीक्षणस्य तिथिविषये विद्यालयाधिकारिणं पूर्वमेव सूचयन्ति येन विद्यालयाधिकारी सर्वथा निरीक्षणं सम्मुखीकर्तुं सन्नद्धः भवति। तेषां निरीक्षणमपि प्रहारसदृशं भवति। ते प्रायः प्रशासनवित्तीयविषयाणां निरीक्षणं कृत्वा गच्छन्ति। शिक्षासम्बन्धिविषयेषु ध्यानं न दीयते, यः निरीक्षणस्य मुख्यं महत्त्वपूर्णञ्चाङ्गमस्ति। ते न तु अध्यापकैः तेषां शैक्षिकसमस्याविषये पृच्छन्ति, न च तेषां केनापि प्रकारेण मार्गप्रदर्शनं कुर्वन्ति। प्रायः शिक्षकनिरीक्षकयोः मध्ये कस्यापि प्रकारस्य परिचयोऽपि न भवति। **माध्यमिकशिक्षा-आयोगस्य चिन्तनं वर्तते यत्—**"निरीक्षणं कृत्रिमं भवति। निरीक्षकद्वारा विद्यालयनिरीक्षणार्थं यः समयः दीयते, सः पर्याप्तः नास्ति। अस्य समयस्य प्रयोगः प्रायः प्रशासकीयकार्यस्य कृते भवति। उदाहरणार्थम्—विद्यालयस्य

---

(1) "He holds extremely autocratic position, where, if his will is not exactly law, it is so near to it, that for all practical intents and purposes, the teacher and headmaster regard it as such."

-Ryburn : The Organization of Schools, P. 160

आयव्ययविवरणं पत्रव्यवहारश्च चेत्यादिकम्। शैक्षिककार्यनिरीक्षणार्थं न्यूनातिन्यूनं समयः दीयते, तथा च शिक्षकनिरीक्षकाणां सम्पर्काः न्यूनमेव भवन्ति।''

(स) निरीक्षणपद्धतेः इयमपि एका न्यूनता वर्तते यत् निरीक्षकाणां दृष्टिकोणः रचनात्मकः न भवति, अपि तु ध्वंसात्मकः भवति। तेषां निरीक्षणमालोचनात्मकं परीक्षात्मकञ्च भवति। तैः निरीक्षणानन्तरं दोषाणां एका दीर्घा सूचिः निर्मीयते। अनेन कारणेन निरीक्षणं हर्षोत्पादकं न भवति, अपि तु भयोत्पादकं भवति।

(द) शिक्षायाः प्रचारेण विद्यालयानां संख्यासु पर्याप्तमात्रायां वृद्धिः जाता, परन्तु निरीक्षकाणां संख्यायामनुपातानुसारं वृद्धिः न सञ्जाता, येन ते स्वकार्यं सम्यग्रीत्या कर्तुमसमर्थाः भवन्ति, यतः तेषामुपरि कार्यभारः अत्यधिकः वर्तते। **माध्यमिकशिक्षा-आयोगानुसारेण—**''निरीक्षकस्य निरीक्षणे ये विद्यालयाः निर्धारिताः सन्ति, तेषां संख्याधिका वर्तते। अनेन कारणेन स्वयमपि स्ववास्तविककार्यं शैक्षिककार्यक्रमस्य विकासेन परिचियमपि न कर्तुं प्रभवति। अपि च स्वसमस्यामूल्याङ्कनेऽप्यसमर्थो भवति।''

(य) वर्तमाननिरीक्षणपद्धतौ विषयगतनिरीक्षकाणामभावः इति दोषः वर्तते। एकेन निरीक्षकेण अपेक्ष्यते यत् सः प्रति विषयाध्यापकं कार्यस्य निरीक्षणं कुर्यात्। अस्मिन् विषये निरीक्षकस्य रुचिं प्रति योग्यतां प्रति च ध्यानं न दीयते। एतादृशी रीतिः दोषपूर्णा हानियुक्ता च वर्तते। यतो हि सः केवलमेकस्य विषयस्यैव विशेषज्ञः भवितुमर्हति तथा तस्य विषयस्य शिक्षकस्य उचितरूपेण मार्गदर्शनं कर्तुं शक्नोति।

परिनिरीक्षणस्य धारणा[1]

आधुनिकयुगे शिक्षाक्षेत्रे नवीनप्रवृत्तीनां क्रान्तीनां विचाराधाराणाञ्च उत्पत्तिः जाता। येन शिक्षायाः प्रकृतिः, उद्देश्यं, पाठ्यक्रमः, शिक्षणविधिश्च इत्यादिषु क्रान्तिकारीणि परिवर्तनानि जातानि। परिवर्तनैः सह निरीक्षणस्य धारणायामपि परिवर्तनमभवत्। शिक्षाशास्त्रिणः निरीक्षणसम्बन्धिनीं नवीनां धारणाम् अभिव्यञ्जयितुम् एकस्य नवीनपदस्य प्रयोगं कुर्वन्ति, यः 'परिनिरीक्षणम्' (Supervision) इति नाम्ना प्रसिद्धः। केवलं शब्दानां परिवर्तनं नास्ति, अपि तु अस्मिन् उद्देश्य-क्षेत्र-विधि-दृष्टिकोणस्यापि भेदः वर्तते। परिनिरीक्षणमिति शब्दः अनेकैः विद्वद्भिः अनेकैः प्रकारैः परिभाषितः—

(1) Concept of Supervision.

''अधुना परिनिरीक्षणं न केवलं शिक्षकच्छात्रविकासे एव बलं ददाति, अपि तु स्वयं परिनिरीक्षकवर्गाणाम् अभिभावकानाम् अन्यसामान्यजनानां च विकासे ध्यानं ददाति। यत्र छात्रसमुदायस्य संकायस्य प्रति सदस्यं शारीरकसामाजिककुशलताः विकासेन न प्रत्यक्षरूपेण सम्बद्धाः सन्ति। इदं तैः तत्त्वैः अपि सम्बन्धिताः ये तेषां विकासेऽप्रत्यक्षरूपेण सहायकाः भवन्ति।''[1] **—विलियम टी. मैलचौरः।**

''परिनिरीक्षणं सेवाकार्यं वर्तते, यः मुख्यतः निर्देशनेन तस्य विकासेन च सम्बद्धं वर्तते। इदं प्रत्यक्षरूपेण शिक्षणेन, अधिगमप्रक्रियया तत्तत्त्वैश्च सम्बद्धं वर्तते, ये आसु प्रक्रियासु निहिताः सम्बन्धिताश्च वर्तन्ते। इमानि तत्त्वानि शिक्षक–छात्र–पाठ्यक्रम–निर्देशनसामग्री–स्थितेः सामाजिकं भौतिकञ्च वातावरणम् इत्यादीनि सन्ति।''[2] **—एच. पी. एडम्स तथा एफ. जी. डिस्की।**

''परिनिरीक्षणम् एका विशेषप्राविधिकसेवा वर्तते, या मुख्यतः तत्तद्दशानां तासां स्थितीनामध्ययनेन परिष्कारेण च सम्बन्धिता याश्च छात्राणां विकासम् अधिगमस्य प्रक्रियां चाच्छादयन्ति। विद्यालयपद्धतौ प्रति–वस्तु–विकासस्य अधिगमप्रक्रियायाश्च प्रोत्साहनप्रयोजनेन प्रयुज्यते। परिनिरीक्षणं मुख्यरूपेण किमुत साक्षाद्रूपेण अधिगम–विकासाभ्यां सम्बद्धान् विषयान् विचारयति।''[3]

—बारर् वर्टन एण्ड ब्रूकनेरः।

---

(1) " Currently, supervision aims at the growth of not only pupil and teacher but also of the supervisory staff itself as well as parents and other laymen. Supervision is concerned with everything that directly concerns the further development of every member of faculty and student body toward physical and social competence is also concerned with (but not so directly responsible for) those factors that are but indirectly related to their growth." **—William T. Melchoir.**

(2) "Supervision is a service particularly concerned with instruction and its improvement. It is directly concerned with teaching and learning and with the factors included in and related to these processes the teacher, the pupil, the curriculum, the materials of instruction, the socio-physical environment of the situation." **-H.P. Adams & F.G. Dickey.**

(3) ''Supervision is in general, what has been in modern times an expert technical service primarily concerned with studying and improving the conditions that surround learning and pupil growth. Everything in a school system in designed of course, for the ultimate purpose of stimulating learning and growth. Supervison deals with those items which primarily and rather directly connected with learning and growth."

- Barr, Burton and Brueckner.

''परिनिरीक्षणम् उत्तमशिक्षणाधिगमपरिस्थितिविकासे सहायतां ददाति।''[1]

—किम्बल, विल्स।

''परिनिरीक्षणं शिक्षकविकासस्य, बालकाभिवृद्धेः, शिक्षणाधिगमप्रक्रियायाश्च सुवर्धनेन च सम्बद्धं वर्तते।''[2] **—बारट्के, जॉन ए।**

''परिनिरीक्षणे शैक्षिककार्यक्रमस्य समस्यानां समाधानं निहितं वर्तते। शैक्षिककार्यक्रमे अध्ययनकार्यक्रमाणां संङ्घटनं, पाठ्यक्रमस्य संशोधनम्, शिक्षणप्रक्रियाः, छात्र–क्रिया–कार्यक्रमाः, शिक्षकाणामशैक्षणिकक्रियाः सम्मिलिताः सन्ति।''[3] **—ओकलाहोम स्टेट डिपार्टमेन्ट ऑफ एज्यूकेशन।**

वस्तुतः परिनिरीक्षणमेतादृशी–विशिष्टसेवा वर्तते, यस्य मुख्यप्रयोजनं कस्यापि संस्थानस्य कर्मचारिणां समूहस्य वा सदस्यानां कार्याणां कार्यप्रणालीनाञ्च विकासार्थमावश्यकतानुसारं सहायता–प्रदानं वर्तते। यदि विभिन्नेषु, अवसरेषु, विभिन्नसमस्यानां प्रादुर्भावेन कार्यकर्तॄणां कार्यसामर्थ्ये न्यूनतागच्छति, तर्हि तासां जटिलानां समस्यानां निवारणाय परिनिरीक्षकः (Supervisor) अविलम्बेन सहायता–प्रदानं करोति, येन कार्यकर्तारः निराशाः न स्युः तथा च समयस्य शक्तेश्च अपव्ययोऽपि न भवेत्। नैतावदेव, अपि तु सः समये–समये उत्तमकार्यविधीन् उक्त्वा तानधिकोत्कृष्टकार्यसिद्धये प्रेरयेत्। परन्तु एतत्तदैव सम्भवम्, यदा परिनिरीक्षकः क्रमिकरूपेण निरन्तरसहायतां प्रेरणां च प्रदद्यात्। एतदर्थं तस्य कार्यकतृभिः निरन्तरसम्पर्को भवेत्। सर्वकारनिरीक्षकः यः नियतकालिकपरीक्षणं करोति, स एतादृश–सेवाप्रदाने असमर्थो भवति। तथा सः अत्यल्पे निरीक्षणकाले यान् आदेशान् ददाति, तेऽपि प्रायः निष्फलाः भवन्ति। अतः परिनिरीक्षणे प्रधानाध्यापकाय वरिष्ठशिक्षकाणां सहयोगप्राप्तिः आवश्यकी।

---

(1) "Supervision is assistance in the development of a better teaching-learning situation." **- Kimbal, Wiles.**

(2) "Supervision is always concerned with the development of teacher, the growth of the pupil, and improvement of the teaching learning process," **-Bartky, john A.**

(3) "Supervision includes the improvement of every phase of the educational programme, such as the organization of programme of studies, the revision of curricular the instructional procedures the pupil activity programmes and the non-instructional activities of staff members." **- Oklahoma State Department of Education.**

प्रायः विद्यालयनिरीक्षकः लेखापरीक्षकरूपेण कार्यं करोति। सर्वकार-लेखापरीक्षः[2] वर्षे द्विचतुर्दिवसानां कृते आगच्छति। तत्काले यावत् विद्यालयीयव्यवस्था द्रष्टुं शक्यते तस्यैवाशुद्धीः स्वप्रतिवेदने लिखित्वा उच्चाधिकारिणं प्रति प्रेषयति। परिणामतः प्रतिवेदनस्य किञ्चिन् मासानन्तरं विद्यालयस्य प्रधानाध्यापकानशुद्धीः संशोधयितुमादेशः मिलति। परन्तु ये दोषाः समयाभावेन लेखापरीक्षकेण न दृष्टाः ते तथैव तिष्ठन्ति। न केवलमेतत्, यदि आयव्ययविवरणे कुत्रापि त्रुटिः भवेत् तर्हि तेन कारणेन बहवः त्रुटयोऽग्रेऽपि सम्भवन्ति, येषां संशोधनं कठिनं भवति। समयाभावेन सः न तु वित्तीयविषयाणां निरीक्षणं कर्तुं समर्थः, न हि त्रुटीनां संशोधनार्थं कोशाध्यक्षमुपदेष्टुम्। आडिटर—समानमेव निरीक्षकः स्वल्पकालीननिरीक्षणे विद्यालयस्य समस्ताङ्गानां तत्त्वानाञ्च परीक्षणं नैव कर्तुं शक्नोति न च विद्यालयस्य कार्यकर्तॄर्न् किमपि सुवर्धनात्मकेन रचनात्मकेन च प्रस्तावेन सहयोगं कर्तुं शक्नोति।

कतिपयाः औद्योगिकसंस्थाः स्वकार्यालये लेखाधिकारिणां नियुक्तिं कुर्वन्ति, येन सः लेखासम्बद्धविषयस्य सदैव संरक्षरणं कुर्यात्, तथा अभिलेखाः सर्वदा अभिनवाः भवेयुः। आवश्यकतानुसारञ्च कोशाध्यक्षपरामर्शेन साहाय्यं दातुं शक्नोति।

शिक्षाक्षेत्रे नियतकालिकविद्यालयनिरीक्षणं वार्षिकलेखापरीक्षणरीत्या विद्यालयस्य दैनिक-संवर्धनात्मक-विकाससम्बन्धिनीनाम् आवश्यकतानां पूर्तयेऽसमर्थः वर्तते।

अतोऽयं परामर्शः दीयते यत् लेखाधिकारिण इव विद्यालयस्य दिनकार्यस्य निरीक्षणार्थं कार्यकर्तॄणाञ्च विकासार्थम् अतिरिक्तपरिनिरीक्षणपद्धतेः नियमितरूपेण व्यवस्थां कुर्यात्। अनेन शैक्षिकस्तरविकासे सहायता मेलिष्यति। भवन्तः अनेकाः योजनाः निर्माय कोटिसंख्यकधनराशिं व्ययं कुर्युः, भव्यविद्यालयानां भवनानि निर्मापयेयुः परन्तु समुचितपरिनिरीक्षणाभावे समयस्य, शक्तेः, धनस्य, मानवसंसाधनस्य च अपव्ययावरोधने सर्वे प्रयासाः निष्फलाः भविष्यन्ति।

प्राधानाध्यापकः यः स्वपदकारणेन स्वविद्यालयस्योपयोगितां वर्धयितुमुत्तरदायी वर्तते, सर्वकारपरिनिरीक्षकाणां सीमितपरिनिरीक्षणस्य न्यूनतां किञ्चित् सीमापर्यन्तं पूरयितुं शक्यते। विभागाध्यक्षाणां शिक्षकाणाञ्च दैनिककार्यक्रमेण पूर्णतः परिचितो भूत्वा क्रमिकरूपेण उचितपरामर्शप्रोत्साहनञ्च दातुं शक्यते। स्वकीयेन शिष्टेन सहानुभूतिपूर्णेन च व्यवहारेणापि सः स्वाध्यापकानां कार्यक्षमतां वर्धयितुं शक्नोति।

---

(1) आडिटर

सः परिनिरीक्षणकार्ये विभिन्नविभागाध्यक्षाणां शिक्षकाणाञ्चापि सहयोगं प्राप्तुं शक्नोति, विभिन्नविभागाध्यक्षाः स्वविभागस्याध्यापकानां कार्यनिरीक्षणमेव न कुर्वन्ति, अपि तु स्व–उत्तरदायित्वं निर्वोढुं विभागस्य व्यवस्थां शिक्षणं च परिवर्धयितुं प्रयासमपि कुर्वन्ति।

एतादृशाः शिक्षकाः अपि स्व–स्व क्षेत्रे परिनिरीक्षणस्य कार्यं कुर्वन्ति। ते बालक–सम्बन्धिकार्याणां केवलं परीक्षणमेव न कुर्वन्ति, अपि तु तेषामध्ययनविकास–सम्बन्धिनीषु क्रियासु सहायतां प्रोत्साहनञ्चापि सम्पादयन्ति। सामाजिकपरीक्षाभिः बालकानां तावान् लाभः न भवति यावान् शिक्षकस्य प्रतिदिनं साहाय्येन प्रेरणया च भवति।

विद्यालये लिपिकः, भृत्यः इत्यादयः विविधश्रेणीकर्मचारिणः अपि भवन्ति। विद्यालयसञ्चालने तादृशकर्मचारिणां कार्यपर्यवेक्षणं न न्यूनं महत्त्वं भजते। स्वस्मात् उच्चपदाधिकारिभिः क्रियमाणा स्वकार्यप्रशंसा नितराम् उत्साहवर्धिका भवति। तेन सह क्रियमाणेन व्यक्तिगतसम्पर्केण तदीयम् अनवधानं शैथिल्यं च दूरीकृतं भवति। तादृशनियमान्तर्गत–सर्वकारपरिनिरीक्षकाः प्रबन्धकाः अपि प्रधानाध्यापकस्य शिक्षकाणाञ्च कार्याणां प्रशंसां कृत्वा तेषामुत्साहवर्धनं कुर्युः उचितपरामर्शं सहायतां च दद्युः। अनेन सः विद्यालयीयकर्मचारिणां सहयोगं प्राप्तुं शक्नोति, यैः विद्यालयस्य दैनिककार्यस्य सदैव योगक्षेमं कर्तुं शक्यते। याश्च समस्याः सामर्थ्यात् बहिः भविष्यन्ति तेषु ते सर्वकारेण नियुक्तपरिनिरीक्षकस्य सहायतां प्राप्तुं शक्नुवन्ति। स्मरणीयं वर्तते यत् परिनिरीक्षणस्यास्यां सहयोगिप्रक्रियायां विद्यालयप्रबन्धकानां प्रयासाः पूर्णरूपेण सम्मिलिताः सन्ति। तेषामपि कर्त्तव्यमस्ति यत् ते विद्यालयसञ्चालनस्य समस्यानां निराकरणाय विद्यालयस्य च प्रगतये विकासाय च पूर्णरूपेण सहयोगं दद्युः। ते तादृशरीत्या विद्यालयपरिनिरीक्षणे उचितं सहयोगं दातुं शक्नुवन्ति।

एतादृशपरिनिरीक्षणद्वारा प्रचलितनिरीक्षणपद्धतेः न्यूनता, विद्यालयीयानां चावश्यकतानां पूर्तिः भवितुमर्हति। बालकेभ्यः सर्वोत्तमशिक्षादानाय प्राकृतिकसंसाधनानाम् अधिकतमविकासार्थं अनया योजनया सर्वकारनिरीक्षकः, प्रबन्धकः, प्रधानाध्यापकः, विभिन्नविभागाध्यक्षः, शिक्षकश्च सर्वे मिलित्वा स्व–स्वक्षेत्रेषु परिनिरीक्षणेन प्रयत्नं कुर्वन्ति।

परम्परागतनिरीक्षणे आधुनिकपरिनिरीक्षणे च भेदः

(1) परम्परागतनिरीक्षणं विद्यालये प्रचलितस्थितीनां परीक्षणस्य विद्यालयव्यवस्थायाश्च दोषकथनपर्यन्तं सीमितं वर्तते तानपाकर्तुमुत्तरदायी नास्ति। आधुनिक–परिनिरीक्षणे सम्पूर्णविद्यालयव्यवस्था, तेषां सञ्चालनम्, प्रतिदिनम् उत्पत्स्यमानानां समस्यानां समाधानं च अन्तर्गतं वर्तते।

(2) परम्परागतनिरीक्षणम् अल्पकालिकः भवति, परिनिरीक्षणं दैनिककार्याणां निरीक्षणेन सम्बद्धजनानां कुशलताविकासेन च सम्बन्धितं वर्तते, अस्मिन् सर्वेभ्यः शैक्षिकपरामर्शः प्रेरणां च प्राप्तुं व्यवस्था भवति।

(3) प्रचलितनिरीक्षणविधिः आधिकारिकः वर्तते, परिनिरीक्षणं लोकतन्त्रीयसहयोगेन, प्रेमभावनया च पूर्णं भवति। अस्मिन् सर्वकारेण नियुक्तपरिनिरीक्षकः विद्यालयप्रबन्धकः प्रधानाध्यापकः, शिक्षकः, अन्यजनश्च परस्पर–सहयोगेन विद्यालयहितार्थं कार्यं करोति तथा ते परस्परं व्यक्तित्त्वस्य सम्मानमपि कुर्वन्ति।

(4) परम्परागतनिरीक्षणे निरीक्षकः स्वाधीनकर्मचारिभ्यः साहाय्यप्रदानापेक्षया, तद्दोषनिर्देशने, स्वादेशपालने च तत्परो भवति। परन्तु आधुनिकनिरीक्षणे परिनिरीक्षः यदा यदा स्वपरामर्शप्रेरणयोः आवश्यकता भवति तदा तदा सहर्षं सहानुभूत्या च स्वसहयोगिनं साहाय्यं करोति। वस्तुतः सः स्थितेः परिष्करणे आत्मानम् उतरदायिनं मन्यते।

(5) परम्परागतनिरीक्षणे नेतृत्वाभावः वर्तते। अस्मिन् निरीक्षकः स्वाधीनकर्मकरान् कार्यं कर्तुं न प्रेरयति अपि तु कार्यं कर्तुं बाध्यं करोति। परिनिरीक्षणं सर्जनात्मकनेतृत्वाधारितं वर्तते। अस्मिन् निरीक्षकः स्वाधीनकर्मकरान् कार्यं कर्तुं प्रेरणां पथप्रदर्शनञ्च प्रदाय अग्रे सारयति।

(6) परम्परागतनिरीक्षणे प्रायः एकस्योपरि विद्यालयस्य व्यवस्थायाः दायित्वं भवति, परन्तु परिनिरीक्षणं एका सहयोगात्मिका प्रक्रिया वर्तते, यस्यां बहवः जनाः प्रधानाध्यापकाः वरिष्ठशिक्षकाः, अन्यशिक्षकाः, प्रबन्धकाः, सर्वकारद्वारा नियुक्तपरिनिरीक्षकाः इति सर्वे सम्मिलिताः भवन्ति।

(7) प्रचलितनिरीक्षणम् औपचारिकमस्वाभाविकञ्च भवति। इदं बलात् क्रियमाणं (Forced) भवति। परिनिरीक्षणं तु अनौपचारिकं स्वाभाविकं च भवति। इदं वास्तविकपरिस्थितिभिः उत्पन्नं भवति।

प्रचलितनिरीक्षणप्रणाल्यां परिष्कारः

प्रश्नोऽयम् उदेति यत् किं प्रचलितादेशात्मकनिरीक्षणपद्धतेः दोषनिवारणं सहयोगिपरामर्शदायिपरिनिरीक्षणस्य नवीनधारणया भवितुमर्हति? अस्मिन् विषये यदि परिवर्तनं क्रियते तर्हि न केवलं वर्तमाननिरीक्षणपद्धतेः अनेकदोषनिवारणमेव अपि तु तस्य उपयोगितापि वर्धिष्यते। सर्वकारनिरीक्षकः प्रायः विद्यालयाभिलेखानां, सर्वकारानुदानस्योचितप्रयोगं, वित्तीयविषयाणां व्यवस्थां सर्वकारस्य निर्देशानां पालनमित्यादिभ्यः अतिरिक्तं यावत् शक्यं शैक्षिककार्यक्रमाणामपि परीक्षणं करोति। एतदर्थं निरीक्षकस्य सर्वेषु विषयेषु ज्ञानं, तत्तद्विषयकाणां सर्वेषां शिक्षणविधीनां वा ज्ञानं नैव संभवति। इदं कार्यं तु विभिन्नविषयाणां विशेषज्ञाः एव सम्यग्रूपेण सम्पादयितुं शक्नुवन्ति। एवं यदि राज्यशिक्षाविभागः विह्निन्नक्षेत्रेभ्यः विशेषज्ञपरामर्शदातर्णिां नियुक्तिं कुर्यात् तर्हि उचितं भविष्यति। एते राज्यस्य विभिन्नविद्यालयेषु दीर्घकालं यावत् स्वविषयेषु शिक्षकाणां सामर्थ्यविकासे सहायतां प्रदातुं शक्नुवन्ति। विद्यालयस्य सामान्यनिरीक्षणाय प्रचलितपद्धतौ निरीक्षकाणां संख्या न्यूनीकर्तुं शक्यते, येन व्ययेऽतिवृद्धिः न भवेत्। सामान्यप्रशासनेन सम्बद्धाः निरीक्षकाः विद्यालय-सञ्चालनकार्याणां निरीक्षणं कुर्युः, विशेषपरामर्शदातारः च शैक्षिककार्यविकासाय स्वसेवार्पणं कुर्युः, तर्हि शिक्षायाः स्तरस्य विकासः अवश्यमेव भविष्यति।

अनया व्यवस्थया शिक्षकान् विशिष्टविषयेषु सङ्गीतकलादिषु विशिष्टविषयेषु अपि समर्थान् विधातुं शक्येत। विद्यालये विशेषज्ञानां निरीक्षकाणां परामर्शदातर्णिां वा शिक्षकाणां च निकटतरसम्पर्केण शिक्षकेषु स्वस्वविषयेषु उत्साहो वर्धिष्यते। ते च स्वशिक्षणयोग्यतां संवर्धयितुमधिकां रुचिं प्रदर्शयेयुः।

उक्तपरामर्शातिरिक्तविद्यालयपरिनिरीक्षणस्य कार्यमान्तरिकस्तरेऽपि भवेत्। प्रथमं बाह्यं परिनिरीक्षणं सर्वकारपरिनिरीक्षकैः भवेत्। प्रशासनसम्बन्धिप्रकरणानां शैक्षिकव्यवस्थानाञ्च निरीक्षणाय पृथक्-पृथक् परिनिरीक्षकः भवेत्। शैक्षिक-व्यवस्थान्तर्गतविभिन्नविषयाणां शिक्षणविकासार्थं विशेषज्ञपरिनिरीक्षकाः परामर्शदातारः वा नियुक्ताः भवेयुः। आन्तरिकनिरीक्षणाय प्रधानाध्यापकाः विभिन्नविभागाध्यक्षाः

च उत्तरदायिनः भवेयुः। दैनिकसमस्यानां निवारणं तु विद्यालये प्रधानाध्यापकः सहयोगिनां सहयोगेन परामर्शेन च करिष्यति। याः समस्याः प्रधानाध्यापकस्य सामर्थ्यात् बहिः सन्ति, तासां निवारणं सर्वकारपरिनिरीक्षकाः करिष्यन्ति। अनेन प्रकारेण सर्वकारपरिनिरीक्षकाणां विद्यालयाधिकारिणाञ्च सम्मिलित-प्रयासैः विद्यालये विकासोन्मुखी नवजागृतिः भविष्यति, शिक्षाक्षेत्रे च यस्य धनराशेः, समयस्य शक्तेश्च हानिः इदानीं दृश्यते, तेषां सदुपयोगः भविष्यति। इदानीं मानवसंसाधनानां (Human Resources) सर्वाधिका हानिः दृश्यते, यस्यावरोधनमत्यावश्यकं वर्तते, येन भाविनागरिकाः स्वदेशस्य संरक्षणाय योग्याः भवितुं शक्नुवन्ति। स्वजीवनं च सार्थकं विधातुं समर्थाः भवेयुः।

माध्यमिक-शिक्षा-आयोगेनापि विशेषज्ञनिरीक्षकाणां नियुक्तौ प्रशासनकार्याणां शैक्षिककार्याणां च निरीक्षणार्थं पृथक्-पृथक्-अधिकारिणां नियुक्तौ च बलं दत्तम्। शिक्षा-आयोगानुसारं जनपद-स्तरे प्रशासनकार्याणि 'जनपदविद्यालयपरिषदः' अधिकारे भवेयुः, शैक्षिककार्याणि च जनपद-शिक्षाधिकारिमहोदयस्य कृते भवेयुः। एतादृशेन प्रकारेण आयोगः निरीक्षणस्य कार्यं द्वयोः भागयोः विभज्य तदुत्तमं दक्षं च कर्तुं परामर्शः दत्तः।

प्रति-जनपदं शिक्षाधिकारी समस्तविषयाणां विशेषज्ञः नैव भवितुं शक्नोति, यदि वयं जनपदानुसारं सर्वेषां विषयाणां विशेषज्ञान् नियोजयामः तर्हि अधिकव्ययकारणेन व्यावहारिकं न भविष्यति। अतः उचितोऽयमनुभवः यत् शिक्षाविभागः विभिन्नक्षेत्रेभ्यः (Regions) पृथक्-पृथक् विभिन्नविषयाणां विशेषज्ञान् नियुञ्जीत येन शैक्षिककार्यम् उन्नतं प्रगतिशीलञ्च भवितुमर्हति। प्रशासनकार्यं 'जनपदविद्यालयपरिषदः' अधीने स्यात् इति शिक्षा-आयोगस्य परामर्शस्य अवश्यमेव व्यावहारिक-स्वरूपं दातुं प्रभवेत्।

परिनिरीक्षणस्य प्रविधयः

(Techniques of Supervision)

अमेरिकादेशस्य प्रोफेसर वेबर (Weber) महोदयेन अस्मिन् विषये विशेषाध्ययनं कृतं वर्तते। तेन स्वाध्ययनाधारेण परिनिरीक्षणस्य प्रविधीनामेका सूचिः निर्मिता। एते प्रविधयः शिक्षकाणां सम्मत्या ननु स्वीकृताः वर्तन्ते। **वेबरमहोदयः** अधोलिखितान् प्रविधीन् तालिकारूपेण प्रदर्शयति—

1. समस्याध्ययनाय शिक्षकाणां विभिन्नसमितिषु सङ्घटनम्।
2. विशेषप्रकरणानामध्ययनार्थं शिक्षकवर्गस्य उपवेशनस्यायोजनम्।
3. विचारगोष्ठीनामायोजनं, यस्मिन् अभिभावकाः छात्राः, शिक्षकाः, प्रबन्धकाश्च सम्मिलिताः भवेयुः।
4. शिक्षकस्य ग्रीष्मकालिकसंस्थानेषु (Summer Institutes) भागग्रहणम्।
5. एकस्य विद्यालयस्य शिक्षकाणाम् अपर-विद्यालय-सन्दर्शनम्।
6. व्यावसायिक-पुस्तकालयस्य व्यवस्थापनम्।

विकसिन्-हरवार्ड,-मिनेसोटा इत्यादीनां विश्वविद्यालयानां प्रोफेसर बार-बर्टन-ब्रेकसर-महोदयाः स्वतालिकायां विद्यालयशिक्षकाणां सम्मत्याधारेण अधोलिखितप्रविधीन् अङ्गीकुर्वन्ति।

1. प्रधानाचार्यद्वारा कक्षायाः परिदर्शनम् (Visitation)।
2. प्रधानाचार्यद्वारा विभिन्नप्रकरणेषु व्याख्यानम्।
3. कक्षा-कक्षस्य नवीनप्रक्रियासम्बन्धे प्रयोगः।
4. छात्राणां समस्याः सम्यक् ज्ञातुं पर्यवेक्षणम्।
5. शिक्षकवर्गस्य अनौपचारिकसभायाः आह्वानम्।
6. निर्देशन (Guidance) सम्बन्धिसम्मेलनानामायोजनं तेषु च भागं वोढुं शिक्षकेभ्यः प्रोत्साहनम्।

उपर्युक्तवर्गीकरणेन स्पष्टं भवति यत् परिनिरीक्षणस्य प्रविधीनां वर्गीकरणं विभिन्नप्रकारेण कर्तुं शक्यते। परन्तु सौकर्यं सरलतां च पश्यन् द्विधा विभक्तुं शक्यते—

1. सामूहिकप्रविधयः (Group Techniques)
2. वैयक्तिकप्रविधयः (Individual Techniques)

सामूहिकान् वैयक्तिकान् च प्रविधीन् उपवर्गेषु विभक्तुं शक्यते।

एते मुख्यवर्गाः सोदाहरणं निम्नतालिकामाध्यमेन स्पष्टीक्रियन्ते—

	सामूहिकप्रविधयः	**वैयक्तिकप्रविधयः**
(अ) क्रियात्मकप्रविधयः	कार्यशालाः, समितयः	शिक्षणकार्ये सक्रियभाग-ग्रहणम् वैयक्तिकरूपेण समस्यासमाधानम्
(ब) मौखिकप्रविधयः	शिक्षकवर्गस्य सभा, सामूहिकमन्त्रणा (Group counselling), निर्देशिताध्ययनम् (Directed Reading)	वैयक्तिकसम्मेलनम् (Individual-confernces) व्यवस्थासम्बन्धिमन्त्रणा, (Adjustment-counselling) साक्षात्कारः।
(स) निरीक्षणात्मकप्रविधयः	निर्दिष्टनिरीक्षणं भ्रमणञ्च।	निर्देशित-निरीक्षणं आन्तरिकपरिदर्शनञ्च। (Inter visitation)।

वैयक्तिकप्रविधिषु साक्षात्कारः, कक्षापरिदर्शनस्यापेक्षा च अत्युपयुक्तः प्रविधिः वर्तते, यतो हि एतेन परिनिरीक्षकः शिक्षकाणां छात्राणाञ्च काठिन्यं, सामर्थ्यं, रुचीः च सुगमतया ज्ञातुं शक्नोति, अनेन च सः तेषामुचितरीत्या पथप्रदर्शनं कर्तुं शक्नोति। परन्तु अस्य प्रविधेः पूर्णोपयोगितार्थम् अनौपचारिकं, मित्रतापूर्णञ्च वातावरणमवश्यं भवेत्।

परिनिरीक्षणस्य कार्यक्षेत्रम्

विद्यालयपरिनिरीक्षणस्य क्षेत्रम् अतिव्यापकं वर्तते, दैनिकानां समस्तकार्याणां सम्यक् सञ्चालनार्थं प्रधानाचार्यः तस्य वरिष्ठसहयोगिनः च विभिन्नकार्याणां निरीक्षणं परीक्षणञ्च कुर्वन्ति एव, परन्तु तस्मादतिरिक्तं यथापूर्वं प्रस्तावितं, यत् शिक्षाविभागेन नियुक्तविशेषज्ञपरिनिरीक्षकः विभिन्नविषयाणां शिक्षणव्यवस्थायाः दायित्वं निर्वहेत् प्रशासनकार्यार्थं च 'जनपद-विद्यालय-परिषदे उत्तरदायित्वं प्रदीयेत, तर्हि द्वयोः निरीक्षणप्रबन्धोऽधिकं प्रभावकारी भवेत्। यदि 'जनपद-विद्यालय-परिषद्' इत्यस्य स्थापना न भवति तर्हि शिक्षाविभाग एव प्रशासकीयकार्याणां निरीक्षणार्थं पृथक्परिनिरीक्षकाणां नियुक्तिं कुर्यात् समस्तपरिनिरीक्षकाणां कार्यक्षेत्रं

शैक्षिकप्रशासनसम्बन्धि-प्रक्रियासु सहायतां प्रगतिं च सम्पादयितुं सहायकाभरणमेव। परिनिरीक्षकाणां कार्यक्षेत्रेस्य त्रिषु शीर्षकेषु वर्णनम् अधोलिखितरूपेण क्रियते—

(अ) सामान्यप्रशासनम्— विद्यालयस्य कार्यालयसम्बद्धकार्याणां निरन्तरनिरीक्षणं प्रधानाध्यापकस्य कर्त्तव्यमस्ति। तेन च कार्यालयीयकर्मचारिगणः स्वकार्यमतिकुशलतया सम्पादयितुं प्रयासं कुर्वन्ति, पत्रव्यवहाराणां विभिन्नलेखानां च पूर्तिः उचितसमये विधिपूर्वकञ्च भवेत्। सततपरिनिरीक्षणाभावे प्रायः कर्मचारिगणस्य अनेकानि कार्याणि अपूर्णानि भवन्ति, येन कार्यालये शनैः शनैः अव्यवस्था वर्धेत।

दैनिक-आय-व्यय-गणनायामपि गणकाः (एकाउण्टेण्ट) सावधानाः भवन्ति, येन ते विभिन्नत्रुटिभिः समस्याभिश्च विमुक्ताः भवन्ति। प्रधानाध्यापकेनापि अपेक्ष्यते यत् वार्षिककोशस्य (Yearly budget) निर्माणातिरिक्तसहायतानुदानानां प्रयोगः विधिवत् भवेत्। विद्यालयस्य च सम्पूर्णवित्तीयप्रकरणानां सन्तोषजनकरीत्या व्यवस्था भवेत्।

प्रधानाध्यापकस्य परिनिरीक्षणसम्बन्धे महत्त्वपूर्णमन्यत् उत्तरदायित्वं वर्तते यत् विद्यालयस्य सामूहिकचारित्रिकभावनायाः विकसनम्। विद्यालयस्य सर्वेषां कार्यकर्तॄणां मनोभावना, पारस्परिकव्यवहारश्चेति सम्बन्धेषु एव विद्यालयस्य उत्तमवातावरणं भवति। एतादृशवातावरणस्य निर्माणं प्रधानाध्यापकः स्वनिर्मलचरित्रेण शिष्टव्यवहारेण च कर्तुं शक्नोति। शिक्षकेषु छात्रेषु च उचितकार्यभारविभाजनं विद्यालय-समयतालिकायाः निर्माणञ्च सरलं कार्यं नास्ति। यदि अस्मिन् कार्ये ईषदपि त्रुटिः जाता तर्हि शिक्षकेषु असंतृप्तिः जायते। पाठ्यक्रमसहगामिक्रियाणां सञ्चालनम्, अस्यां दिशायां विशेषरूपेण सहायकः भवति।

'जनपद-विद्यालय-परिषद्' सर्वकारेण नियुक्तविद्यालय-परिनिरीक्षको वापि विभिन्नप्रशासकीयकार्याणाम् अपेक्षानुसारं च सहायतां प्रदास्यति। सहायतानुदानप्रयोगः अन्यवित्तीयप्रकरणानां परीक्षणं च तस्य मुख्यकर्तव्यं भवति। सर्वकारः यदा अमुं धनराशिं विद्यालयेभ्यो ददाति, तदा तस्य सदुपयोगोऽपि तस्य दायित्वं भवति।

शिक्षकाणां चयनं, नियुक्तिः, स्थानपरिवर्तनञ्च इत्येतत्सम्बन्धितानि कार्याणि अपि परिनिरीक्षकस्य साहाय्येन सरलानि भवन्ति। यदा-कदा शिक्षकप्रबन्धसमित्योः मध्ये मतभेदानां निराकरणमपि परिनिरीक्षकस्य दायित्वं भवति। सर्वकारस्य

विद्यालयानाम् अनुदानप्राप्तविद्यालयानाञ्च शिक्षाविभागादेशानां नियमानां च पालनमपेक्षितं यस्य परीक्षणमपि सर्वकारपरिनिरीक्षका: कुर्वन्ति। यत्रोल्लङ्घनं भवति, तत्र सूचना ते शिक्षाविभागाय ददति।

(ब) शैक्षिककार्याणि— विद्यालयस्य शिक्षणकार्यस्य संवर्धनेऽपि परिनिरीक्षका: अतिसहायका: भवितुं शक्नुवन्ति। यदा शिक्षकेषु विश्वासो भवति यत् परिनिरीक्षक:, प्रधानाध्यापक: वा विभागाध्यक्ष: वा तेषां समस्यासमाधानं कृत्वा, आवश्यकतानुसारं परामर्शं दत्वा, नवीनविधीनां प्रयोगमुक्त्वा वा सहानुभूतिपूर्वकं तेषां कार्यमुत्कृष्टं कर्तुं सहयोगं दातुं शक्नोति तर्हि ते निजसमस्याया: तेषां पुरत: प्रस्तुतीकरणे संकोचं न कुर्यु:। शिक्षका: विभिन्नशैक्षिककार्याणां विकासार्थं संकोचं विना समस्यासन्दर्भे अवश्यरूपेण विचारविमर्शं कुर्यु:। एतादृशवातावरणनिर्माणे प्रधानाध्यापकानां वरिष्ठशिक्षकाणां च महत्त्वपूर्णसहयोग: भवति। वाग्वर्धिनी-विचारगोष्ठी-प्रभृतीनामायोजनेन निजसहयोगिनां समस्यासमाधानं प्रति ध्यानाकर्षणमेव न करोति, अपि तु तान् सदैव प्रगतिपथे अग्रे सारयितुं प्रेरणाप्रदानमपि करोति। परिनिरीक्षका: विभिन्नविषयाणामुचितशिक्षणविधीनां साधनानां च प्रयोगस्य यथोचितव्यवस्थां कृत्वा शिक्षकाणां कृतज्ञताग्रहणस्याधिकारिण: भवन्ति। प्रयोगशालायाम् उचितसाधनानामुपस्कराणामभावे कार्यं कदापि सन्तोषजनकरीत्या भवितुं नार्हति, उचितपुस्तकालयाभावे च स्वाध्यायाभ्यास: विकासयितुं न शक्यते। प्रधानाध्यापक: पुस्तकचयने स्वसहयोगिभ्य: सहायतां प्राप्नोति।

कार्यभारस्य उचितविभाजनेन, विचारविमर्शानन्तरं समयतालिकानिर्माणेन च शिक्षकाणां मनसि प्रधानाध्यापकं प्रति अविश्वासस्य अन्यायस्य च भावना उत्पन्ना न भवति, विद्यालयस्य च शैक्षिककार्याणि सम्यग्रीत्या सम्पन्नानि भवन्ति। विभिन्नव्यक्तीनां कार्यभारनिर्धारणे पाठ्यक्रमसम्बन्धिन्य: विद्यालयीयाश्च अन्या: समस्तक्रिया: ध्याने भवेयु:। कार्यविभाजनसमये शिक्षकाणाम् अन्यकर्मचारिणां च योग्यतां रुचिं च विचिन्त्य प्रधानाध्यापक: विद्यालयस्य परोपकारं सम्यग्रीत्या कर्तुं शक्ष्यति। स: शिक्षणकार्यविकासार्थं प्रदर्शनात्मकशिक्षणस्य व्यवस्थायां सहायक: भवति। एतदतिरिक्तं स: वरिष्ठसहयोगी च कक्षायामनौपचारिकपरिदर्शनेन साधनैश्च यथा गृहकार्यस्य, कक्षाकार्यस्य च परीक्षणं कृत्वा, आन्तरिक-परीक्षाया: पुस्तिकानां निरीक्षणं कृत्वा, शिक्षणे या: न्यूनता: भविष्यन्ति एतासां शिक्षकै: सह वैयक्तिकं सामूहिकं च विचार-विमर्शं कृत्वा निवारणं कर्तुं शक्नुत:। प्रधानाध्यापक: तेषां

व्यावसायिकप्रगत्यै विभिन्नानां वाग्वर्धिनि-विचारगोष्ठी-सम्मेलन-कार्यशाला-ग्रीष्मकालिकसंस्थान (Summer Institutes)–अभिनवपाठ्यक्रमाणाम् (Refresher Courses) आयोजनं स्वयं करिष्यति अथवा शिक्षकेभ्यः अन्यस्थानानि गन्तुमनुमतिं दत्वा उचितान् प्रबन्धान् करिष्यति।

सर्वकारेण नियुक्तः परिनिरीक्षकः विद्यालयस्य कार्यकर्तृभ्यः प्रधानाध्यापकेभ्यः शिक्षकेभ्यश्च मित्रपरामर्शदातृपथप्रदर्शकरूपेण कार्यं करोति, तर्हि विद्यालये भयोत्पादिका स्थितिः न भविष्यति। इमे परिनिरीक्षकाः स्वानुभवज्ञानमाधारीकृत्य विभिन्नविषयाणां शिक्षणं विकासयितुं शिक्षकेभ्यः सहायतां प्रेरणां च दत्त्वा स्वीकार्यानाम् उत्तरदायित्त्वानां निर्वाहं कर्तुं शक्नुवन्ति, नवीनशिक्षणविधीनां प्रक्रियाणां सहायकसाधनानां च विषये बोधयित्वा व्यवहारे प्रयोगार्थं प्रेरयितुं शक्नुवन्ति।

सर्वकारपरिनिरीक्षकः निर्देशात्मकसामग्रीणां पुस्तकानां सूचीः च निर्माय विद्यालये सरलतापूर्वकं वस्तूनां पुस्तकानां च चयने सहायतां कर्तुं शक्नोति। इमे परिनिरीक्षकाः नवीनसामग्रीप्रयोगसम्बन्धे निर्देशमपि निर्माय शिक्षकान् तेषां प्रयोगे प्रोत्साहयितुं शक्नुवन्ति।

सर्वकारपरिनिरीक्षकाः पाठ्यक्रमनिर्धारणेऽपि प्रायः सहायतां ददति। ते पाठ्यक्रमनिर्माणे शिक्षकाणां विशेषज्ञानां चापि परामर्शं स्वीकृत्य पुस्तकानां चयनस्य कृते मानदण्डमाविष्कृत्य कक्षाशिक्षणेऽपि सहयोगं दातुं शक्नुवन्ति।

शिक्षकाणां व्यावसायिकप्रगत्यर्थं सेवाकालिकप्रशिक्षणव्यवस्था उत्तमा वर्तते। तदर्थं सर्वकारपरिनिरीक्षकाः प्रशिक्षणविद्यालयेषु महाविद्यालयेषु च अभिनवपाठ्यक्रमस्य प्रसारसेवा, पत्राचारपाठ्यक्रमः (Correspondence Courses), विभिन्नवाग्वर्धिनीसभा इत्यादीनामायोजनार्थं कार्यं कुर्युः, तदैव शिक्षकस्य व्यावसायिकप्रगतिः भविष्यति।

(स) पर्यवेक्षणम् अनुसन्धानञ्च— शिक्षकाणां पुरतः दैनिककार्यक्रमेषु अनेकसमस्याः आगच्छन्ति यथा— बालकानां पठनं प्रति अरुचिः, उदासीनता च, वैयक्तिकं सामूहिकं चानुशासनहीनता, पारिवारिकपरिस्थितयः ये बालकानां शारीरक-मानसिक-विकासबाधकाः भवन्ति। प्रधानाध्यापकः अन्ये च वरिष्ठशिक्षकाः, सन्तोषजनकरपरिस्थितीनां बालकानां च शैक्षिकविकाससम्बन्धिसमस्यानां पर्यवेक्षणं कृत्वा तासां समाधानं कर्तुं शक्नुवन्ति। अनुसन्धानविधिः योऽधुना सर्वेषु क्षेत्रेषु

प्रगतेः मुख्यसाधनं वर्तते। शिक्षाक्षेत्रेऽपि सहायको भवितुं शक्नोति। शैक्षिकसमस्यानां वैज्ञानिकरीत्याध्ययनं कृत्वा नवीनशैक्षिकविधीनां साधनानाञ्च प्रयोगात्मकस्वरूपं दातुं शक्यते।

समर्थः सर्वकारनिरीक्षकोऽपि इत्थं स्वाधिकव्यापकक्षेत्रस्य शैक्षिकप्रगतेः तस्य च शैक्षिकावश्यकतानां ज्ञानं प्राप्तुं पर्यवेक्षणं करोति, यस्याधारेण सः सर्वकारस्यानुमत्या परामर्शं दत्वा शिक्षाक्षेत्रे परिष्कारं नेतुं शक्नोति। विभिन्नविद्यालयानां शिक्षकेभ्योऽपि शैक्षिकानुसंधानार्थं उचितव्यवस्थां कारयेत् येन नवीनशैक्षिकविचारधाराणां प्रयोगात्मकं स्वरूपं प्रदातुं विद्यालयेषु जागृतिः कर्तुं च शक्यते। सः शिक्षकैः विभिन्नविषयेषु उपलब्धिपरिक्षणानि (Achievement Tests) निर्माय प्रमाणयितुं (Standardized) शक्नोति।

परिनिरीक्षकस्य गुणाः

कस्यापि पद्धतेः सफलता प्रधानरूपेण तस्य कार्यकर्तॄणां व्यक्तित्वं व्यावसायिकञ्च गुणमाश्रित्य भवति। योग्यः प्रशिक्षितः अनुभवी च परिनिरीक्षकः एव परिनिरीक्षणपद्धतीनां साफल्यं सम्पादयितुं शक्नोति। ते शिक्षोद्देश्यानां पूर्तये स्वदायित्वानां निर्वहणं कर्तुं शक्नुवन्ति। तदर्थं शैक्षिकनेतृषु अधोलिखितगुणाः अपेक्षिताः।

(अ) व्यक्तिगतगुणाः— एकस्मिन् परिनिरीक्षके केचन वैयक्तिकगुणाः अपेक्षिताः सन्ति। यथा अस्माभिः दृष्टं यत् परिनिरीक्षणं एका सहयोगी प्रक्रिया वर्तते यत्र कार्यकर्तारः मिलित्वा कार्यं कुर्वन्ति। अनया दृष्ट्या परिनिरीक्षके सहकारिता सहानुभूतिश्चावश्यं भवेत्। यदि तस्मिन् एते गुणा न सन्ति, तर्हि सः स्व–सहयोगिनां सहयोगं प्राप्तुं न शक्ष्यति, न च तेभ्यः सहायतां प्रेरणां वा आदातुं शक्ष्यति।

परिनिरीक्षणे उदारभावना आवश्यकी भवेत्, यतो हि अस्याः अभावे न तु सः स्वसहयोगिनां समस्याः अवबोधयिष्यति, न च तेषामुपयुक्तरीत्या पथप्रदर्शनं कर्तुं प्रभवति। अस्याः अभावे तस्मिन्नधिकारिताभावनायाः विकासः न भविष्यति, येन सः स्वसहयोगिनां विचारान् परामर्शान् च स्वीकरिष्यति। अतः परिनिरीक्षणपद्धतेः सफलतायै परिनिरीक्षकः उदारहृदयः अपेक्षितः।

विद्यालयस्य मुख्योद्देश्यं बालकानां सर्वाङ्गीणविकासनं वर्तते। अस्योद्देश्यस्य प्राप्तये सः एतादृशकार्याणां भारं गृह्णाति, यस्मै समाजगृहयोः सहयोगप्राप्तिः

आवश्यकरूपेण भवति। अतः परिनिरीक्षके सामाजिकज्ञानं चेतना च अवश्यमेव स्यात्, यतः एतदभावे न तु सः बालकस्य पारिवारिकस्थितेः परिचयं प्राप्तुं शक्नोति, न च तेषामुचितदिशायां प्रवर्तयितुं शक्नोति। पाठ्यक्रमनिर्धारणेऽपि समाज-स्यावश्यकतानामुपरि ध्यानं परमावश्यकम्। इदं सः तदैव कर्तुं शक्नोति यदा सः समाजस्य संस्कृतिम् आकांक्षाः च सम्यक् प्रकारेण जानाति अवगच्छति च।

परिनिरीक्षकः यदि सुचरित्रयुक्तव्यक्तिः वर्तते तर्हि स्वसहयोगिनां छात्राणाञ्च समक्षं निजव्यवहारमादर्शरूपेण प्रस्तुतीकर्तुं समर्थः भविष्यति। यदि सः सुचरित्रव्यक्तिः नास्ति, तदा सः स्व-सहयोगिनां सफलतापूर्वकं नेतृत्वं नैव कर्तुं शक्ष्यति।

परिनिरीक्षणपद्धतेः सफलतायै शैक्षिकनेतरि अन्येषां योग्यतानां विश्वनीयतानाञ्च विश्वासकरणस्य सामर्थ्यमत्यावश्यकं वर्तते। यदि तस्मिन् अयं गुणः नास्ति तर्हि अन्येषां विश्वासपात्रं तेभ्यश्च सम्मानप्राप्तिः नैव कर्तुं शक्नोति, अस्मै च तेषां सहयोगः नैव मिलिष्यति अनेन सम्पूर्णवातावरणमेव सन्देहपूर्णं भविष्यति।

परिनिरीक्षकः शारीरक-मानसिक-रूपेणापि स्वस्थो भवेत्। यदि सः शारीरकरूपेण स्वस्थः नैव भविष्यति तर्हि सः स्वजीवनं भारभूतमनुभविष्यति। विद्यालयेषु स्फूर्त्तिमयवातावरणनिर्माणस्य कृते तत्कार्यं प्रत्युत्साहं नैव कर्तुं शक्ष्यति। एतत् तदैव संभविष्यति यदा सः शारीरकरूपेण स्वस्थो भविष्यति। विद्यालयस्य शैक्षिक-क्रियाणामुचितरीत्या सञ्चालनाय, निजसहयोगिभ्यः पथप्रदर्शनाय च मानिसकरूपेणापि स्वस्थो भवेत्। यदि सः स्वयमेव स्वस्थः नास्ति तर्हि सः स्व-सहयोगिनां छात्राणां च समक्षमादर्शप्रस्तुतीकरणे असमर्थः भविष्यति। न च तेषां विचारान् व्यवहारान् प्रभावयितुं शक्ष्यति।

(ब) प्रशासकीया योग्यता— परिनिरीक्षकः स्व-सहयोगिनः निरन्तरं उत्तमकार्यकरणार्थं प्रेरयति। तदर्थं तस्मिन् रचनात्मकनेतृत्वगुणः यदि स्यात्, तर्हि सः स्वसहयोगिनां समुचितपथप्रदर्शनं कर्तुं शक्नोति। तेषां पूर्णसहयोगप्राप्तये साफल्यं लब्धुं शक्नोति। एतदतिरिक्तं तदीयः दृष्टिकोणः मानवीयः भवति तर्हि सः स्वसहयोगिनां वास्तविकयोग्यताः, न्यूनताः, जटिलताः च ज्ञातुं समर्थः भविष्यति, स च सहयोगिभिः क्रियमाणानां प्रयासानां सफलताभावे कारणानि ज्ञास्यति, सहानुभूतिपूर्वकं च सहायतां प्रदास्यति।

परिनिरीक्षके नियोजनस्य सङ्घटनस्य च योग्यता परमावश्यकी भवति। एतदभावे

सः विद्यालयं प्रगतिपथं नेतुं शक्नोति, यतः कार्यात्पूर्वं तस्मिन् विषये विचार–विमर्शं कृत्वैव नियोजनं भवेत्। परिनिरीक्षके यदि समन्वयस्य योग्यता नास्ति तर्हि विद्यालयस्य सम्पूर्णाः क्रियाः अव्यवस्थितरूपेण सञ्चालिताः भविष्यन्ति। समय–शक्ति–धन–सदुपयोगार्थं विभिन्नक्रियासु विभिन्नानां विभागानाञ्च भौतिकेषु मानवीयेषु च तत्त्वेषु सामञ्जस्यमवश्यमेव भवेत्।

(स) व्यावसायिकज्ञानम्— यथा पूर्वं कथितं यत् परिनिरीक्षकः मुख्यतः संस्थायाः प्रगतिविषये निर्देशने च जागरूकः भवेत्। निर्देशनकार्यस्य प्रगतये शिक्षकेषु सामान्यस्य व्यावसायिकस्य च ज्ञानस्य संवर्धनं आवश्यकं वर्तते। अस्मिन् कार्ये सहायता, परामर्शः, पथप्रदर्शनञ्च स एव जनः कर्तुं शक्नोति, यः समुचितरूपेण उदारशिक्षाप्राप्तः भवेत्, एवं शिक्षायाः नवीनप्रवृत्ति–विधि–रीतिनामाधुनिकज्ञानेन च परिचितः स्यात् तेषां व्यावसायिकस्वरूपमपि ज्ञायेत। मूल्याङ्कन–निर्देशन–मन्त्रणासम्बन्धिज्ञानं तस्मै विशेषरूपेण सहायकं सिद्धं भविष्यति।

परिनिरीक्षकः वैज्ञानिकदृष्ट्या शिक्षणकार्याणि परिष्कर्तुं शक्नोति। विभिन्नशिक्षण–विधीनां, प्रविधीनां, सहायकसाधनानाञ्च प्रयोगविषये शिक्षकाणां सामर्थ्यं वर्धयितुं शक्नोति।

सर्वकारपरिनिरीक्षकः विभिन्ननवीनशैक्षिकविचारधाराणां प्रयोगात्मकं स्वरूपं प्रदातुं स्वक्षेत्रस्य विद्यालयेषु विभिन्नप्रयोगान् कारयितुं शक्नोति। एतदतिरिक्तं विभिन्नसामान्यदैनिकसमस्यानां समाधानार्थम् अनुसन्धानकार्यं कारयितुं च शक्नोति, यथा गृहकार्ये छात्राणामरुचिः, कक्षां त्यक्त्वा पलायनस्य समस्या इत्यादीनां समस्यानां समाधानार्थं परिनिरीक्षकोऽनुसन्धानकार्यं तदैव कारयितुं शक्नोति, यदा तदीयः स्वस्य दृष्टिकोणः प्रायोगिकः स्यात्।

अन्ते इदं कथनमनुचितं न भविष्यति यत् प्रचलिता निरीक्षणपद्धतिः शिक्षणस्तरस्य अवनतेः पर्याप्तसीमां यावत् उत्तरदायिनी अस्ति। अतः एतादृशीं स्थितिं यथाशीघ्रं निराकर्तुं वयम् आधुनिकपरिनिरीक्षणस्य धारणाः स्वीकुर्मः, या क्रमिकरूपेण निरन्तर–प्रगतिं प्रति नीयमाना प्रक्रिया वर्तते। अनया वयं स्वशिक्षणस्य स्तरान् अवश्यमेव संवर्धयितुं शक्नुमः।

पुनरावृत्ति-प्रश्नाः

1. भारतीयनिरीक्षणपद्धतेः मूलधारा केन अभिलेखेन सञ्जाता ?
2. वर्तमाननिरीक्षणपद्धतेः के के दोषाः सन्ति ?
3. माध्यमिक-शिक्षा-आयोगेन वर्तमाननिरीक्षणपद्धतेः केषां दोषाणाम् उल्लेखः कृतः ?
4. प्रचलितपरीक्षाप्रणाल्यां केन प्रकारेण संवर्धनं कर्तुं शक्यते ?
5. 'परिनिरीक्षणम्' इत्यस्य कोऽभिप्रायः ? इदं परम्परागतनिरीक्षणात् केन प्रकारेण भिन्नम् ?
6. निरिक्षणापेक्षया परिनिरीक्षणम् अधिकप्रभावशालि कथं मन्यते ? स्पष्टयत।
7. "परिनिरीक्षणम् एका विशिष्टा सेवा वर्तते" सोदाहरणं स्पष्टयत।
8. "परनिरीक्षणम् एका सहयोगिप्रक्रिया वर्तते" सोदाहरणं स्पष्टयत।
9. परिनिरीक्षणस्य के के प्रविधयः सन्ति ?
10. परिनिरीक्षणस्य सम्बन्धे माध्यमिक-शिक्षा-आयोगः, कोठारी-आयोगश्च कान्-कान् विचारान् स्पष्टीकृतवन्तौ ?
11. परिनिरीक्षणं सामान्यप्रशासनविषये किं कार्यं कर्तुं शक्नोति ?
12. परिनिरीक्षणस्य शैक्षिककार्याणि कानि-कानि सन्ति ?
13. पर्यवेक्षणस्य अनुसन्धानस्य च क्षेत्रे परिनिरीक्षणं कि कार्यं करोति ?
14. भवान् दक्षपरिनिरीक्षके केषां गुणानाम् अपेक्षां करोति ?

लेखार्थः प्रश्नः

शिक्षायाः स्तरस्य अवनतौ अस्माकं निरीक्षणपद्धतिः कियत्पर्यन्तम् उत्तरदायिनी वर्तते ? तर्कयत।

❑❑❑

18

विद्यालयानुशासनम्

(School Discipline)

"Dicsipline must be based on and controlled by love."

—Pestalazzi

'डिसिप्लिन' (Discipline) शब्दस्य उत्पत्तिः लैटिनभाषायाः "Discipline" इति शब्दात् मन्यते, यस्यार्थः–व्यवस्था, नियमः, शिक्षा, अभ्यासः, अध्यापनं, प्रशिक्षितावस्था च। आंग्लशब्दः 'Disciple' शब्दस्य उत्पत्तिः लैटिनभाषायाः 'Discipulum' इति शब्दात् मन्यते, यस्य अर्थः अस्ति शिष्यः इति। शिष्येण इयमाशा क्रियते, यत् सः स्वगुरूणामादेशानां श्रद्धापूर्वकं पालनं कुर्यात्, तदनुसारेण च सफलजीवनस्य हेतोः स्वजीवने आवश्यकापेक्षितगुणानां विकासः क्रियेत। एवं 'डिसिप्लिन' शब्दस्य अर्थो भवति आचरणे नियमिततायाः उत्पादनम्। 'डिसिप्लिन' शब्दस्य कृते संस्कृतभाषायाम् अनेकेषां शब्दानां प्रयोगः दृश्यते, यथा नियन्त्रणम्, नियमनम्, संयमः, विनयः, अनुशासनमित्यादि। 'नियन्त्रणम्' इति शब्दस्य प्रयोगः तस्मिन् स्थाने भवति यत्र केनाऽपि कमपि बलपूर्वकं वशे स्थापयति। यत्र कश्चन निर्धारितनियमानामनुसारेण व्यक्तिं कार्यं कर्तुं कथयति तत्र 'नियमनम्' इति शब्दस्य प्रयोगः उचितः भविष्यति। यत्र स्वयमेव स्ववशे स्थापयेत्, तत्र 'संयमः' इति शब्दस्योपयोगो भविष्यति। यत्र बालकः विनम्रतया श्रद्धया च सह ज्येष्ठानां गुरूणाञ्च आदेशानां पालनं करोति, तत्र 'विनयः' इति शब्दस्य प्रयोगः उचितो भविष्यति। परन्तु 'डिसिप्लिन' शब्दस्य कृते 'अनुशासनम्' इति शब्दस्य प्रयोगः अधिकतया प्रचलितो वर्तते। प्रस्तुतपुस्तिकायाम् 'अनुशासनम्' शब्दस्यैव प्रयोगः कृतः।

आधुनिकशैक्षिकविचारधारानुसारमनुशासनस्य अर्थः व्यापकरूपेण क्रियते। अधुना यत्र शिक्षायाः प्रयोजनम्–बालकेषु सफलनागरिकतायाः सामाजिकतायाश्च

गुणानां विकासनं ज्ञायते, तत्र विद्यालयानुशासनस्य अयमभिप्रायः यद् आन्तरिकं, बाह्यं चानुशासनं शारीरक–बौद्धिक–सामाजिक–नैतिक–मूल्यानां विकासाय कल्पते।

विद्यालयानुशासनस्य आधुनिकधारणायाम् आत्मानुशासनस्य सामाजिकानुशासनस्य च विशेषमहत्त्वं दत्तं वर्तते। इयमवधारणा महतः शिक्षाशास्त्रिणः जॉन डीवी. महोदयस्य विचारैः अतिशयेन प्रभाविता अस्ति। **डीवी महोदयानुसारम्—** ''सामाजिकजीवनमूल्यानि अन्तर्भावयत्सामाजिकानुष्ठानरूपेण विद्यालयस्य परिचिन्तने निर्माणे च असाफल्यस्य विदितं कारणं भवति — बौद्धिकनैतिकप्रशिक्षणयोः, विषयग्रहण–चरित्राभिवृद्धेश्च मध्ये अतिसामान्येन दृश्यमानः शोचनीयः पृथग्भाव एव इति।''[1]

बालकस्य जीवने एकैकोऽनुभवः, सः बौद्धिकः स्यात् नैतिको वा, तस्य व्यक्तिगतविकासे प्रभावकारको भवति। अतः विद्यालयस्य एतादृशस्थानरूपेण कल्पना स्यात्, यत्र बौद्धिक–विकासेन सहैव अन्ये विकासाः अपि सहयोगिक्रिया–द्वारा समानोद्देश्येन प्राप्यन्ते। **डीवी महोदयस्य** कथनं वर्तते— ''सामाजिक–सहयोगभावनया परिणामोत्पादककार्याणां निर्वर्तनेन स्वप्रकारकं स्वगुणकं च अनुशासनं स्वतः उत्पद्यते।''[2] इदमेवात्मानुशासनं वर्तते, यः समाजस्य स्वीकृतौ आधारितं वर्तते। एतादृशमनुशासनं नैतिकं चारित्रिकञ्च प्रशिक्षणम् अभिलक्ष्याग्रसरं भविष्यति। अतः डीवी–महोदयमतानुसारमनुशासनं विद्यालयस्य सामाजिकस्थितिषु निहितमस्ति।

अन्ते वयं वक्तुं शक्नुमः यत् सर्वाधिकाधुनिकविचारधाराणामनुसारेण अनुशासनस्य अर्थः वर्तते लोकतन्त्रीयसमाजे बालकानां बालिकानां च जीवनस्य कृते सज्जीकरणम्। अस्याभिप्रायः व्यक्तिभ्यः ज्ञान–शक्ति–अभ्यास–रुचि–आदर्शादीनां

---

1. ''The much and commonly lamented separation in school between intellectual and moral training, between the acquiring of information and growth of character, is simply one expression of the failure in conceive and construct the school as a social institution having social life and value within itself.''

-John dewey : Ethical Principles Underlying Education, P-13.

2. ''Out of doing thinks that are to produce result, and out of doing these in a social and co-operative way, there is a born discipline of its own kind and type.''

-John Dewey : The School and Society, P-30.

प्राप्तये सहायताप्रदानं, यः स्वस्य तेषां मित्राणां च कल्याणार्थं सम्पूर्णसमाजस्य कृते च कल्पितो वर्तते।

अनुशासनस्य महत्त्वम्

जीवने अनुशासनस्य महत्त्वपूर्णं स्थानं वर्तते। अस्याभावेन मानवः प्रकृतिदत्तशक्तीनामुचितप्रयोगं कर्तुं न शक्नोति। अनुशासनेनैव व्यक्तिः उत्तमशक्तिं प्राप्नोति, अनया शक्त्या जनः स्वनैसर्गिकप्रवृत्तीनां विकासे समर्थो भवति। व्यक्तिगतदृष्ट्या अनुशासनस्यातिमहत्त्वं वर्तते। तेनैव साकमेवानुशासनस्य सामाजिक-दृष्ट्याप्यतिमहत्त्वं वर्तते। दार्शनिकस्य अफलातूनमहोदयस्य कथनमस्ति— ''राष्ट्रस्य निर्माण शिलाभिः वृक्षैश्च नैव क्रियते, अपि तु नागरिकाणां चरित्रेण निर्माण क्रियते।'' इदं कथनं पूर्णरूपेण सत्यमस्ति। यदा कस्यापि देशस्य नागरिकाः अनुशासिताः भविष्यन्ति, तदा ते स्वदेशम् उन्नतिपथमानेतुं समर्थाः भविष्यन्ति। अनुशासिताः जनाः सच्चरित्रेण, मनसा, वचसा, कर्मणा च शुद्धाः भवन्ति। अनेन स्पष्टं भवति यत् राष्ट्रस्य कृते सम्पूर्णसमाजस्य कृते च अनुशासनस्यातिमहत्त्वमस्ति। तथ्यमिद-मितिहाससाहाय्येनापि स्पष्टं कर्तुं शक्यते। इतिहासः साक्षी वर्तते यत् यदा कोऽपि देशः अनुशासनहीनतया ग्रस्तः जातः, तदैव सः बाह्यशक्तीनां दासतामपि स्वीकरिष्यति। अनुशासनेनैव व्यक्तिषु, समाजेषु राष्ट्रेषु वा स्फूर्तिः उत्पन्ना भवति। अस्याभावे सर्वेषां शक्तेः विनाशो भवति, यस्मादतिदुष्परिणामाः निर्गच्छन्ति। अनेन प्रकारेण व्यक्तेः, राष्ट्रस्य, समाजस्य च व्यक्तित्त्वमनुशासनेनैव महिम्ना युक्तं निर्मीयते।

रेनमहोदयस्य इदं कथनं सत्यमस्ति यत्— ''येन प्रकारेण स्थलसेनायां, जलसेनायां वा राज्यस्य अस्तित्वस्य कृते अनुशासनं परमावश्यकं तथैवानुशासनं विद्यालयस्य कृते महत्त्वपूर्णं वर्तते।''[1]

विद्यालयस्य समस्तकार्याणि अस्याभावे सम्यग्रूपेण सञ्चालयितुं न शक्यन्ते। अस्याभावे विद्यालयेषु अनैतिकतायाः साम्राज्यं भविष्यति। अतोऽनुशासनं सा शक्तिः वर्तते यया व्यक्तिः समाजः राष्ट्रं विद्यालयः इत्यादयः उन्नतिपथि अग्रसराः भवन्ति। तेषां च व्यक्तित्त्वं सुष्ठु निर्मीयते। महान् शिक्षाशास्त्री **टी.पी. ननमहोदयस्य**

---

1. "As in the army, the navy or the state, so in the school, the pre-requisite, the very condition of existence is discipline". **P. C. Wren.**

मतानुसारम्— "स्वावेगशक्तयः तद्व्यवस्थाधीनाः करणीयाः, या व्यवस्था अराजकतां नाशयति, अकुशलतापव्यययोः स्थाने कुशलता–मितव्ययते स्थापयति इति।"[2]

अनुशासनस्थापनस्य सिद्धान्ताः

उक्तकथनानुसारं व्यक्तिगतं सामाजिकं च अनुशासनं महत्त्वपूर्णं वर्तते। अत्र प्रश्नः जायते यत् के ते सिद्धान्ताः सन्ति यैः विद्यालयेषु उत्तमानुशासनं स्थापयितुं शक्यते, येन तेषां महत्त्वं लब्धुं शक्यते ? अस्मिन् सम्बन्धे कस्यापि निश्चितसिद्धान्तस्य निर्धारणं कर्तुं न शक्यते, यतः एकस्य विद्यालयस्य परिस्थितयः द्वितीयविद्यायात् भिन्नाः भवन्ति। अतः मया परामर्शरूपेण केचन विषयाः अधः प्रस्तूयन्ते, यैः विद्यालये उत्तमानुशासनस्थापने सहायता भवति।

1. अनुशासनस्याधारः स्नेहात्मकव्यवहारः, विश्वासः, सद्भावना च स्यात्, यतः भयात् संशयात् वा यत् अनुशासनं भवति तत् क्षणिकं भवति।

   उत्तमानुशासन–सम्पादनार्थं विद्यालयाधिकारिणां प्रधानाध्यापकानां, शिक्षकाणां बालकानाञ्च मध्ये पारस्परिकस्नेह–सद्भावना स्थापनीया भवेत्, स्नेहसद्भावना विश्वासं जनयति तथा उत्तमानुशासनस्य मूलाधारं दृढ़ं करोति।

   छात्राः शिक्षकैः भीताः, तत्कृतनियमानामुल्लङ्घने दण्डः स्यात् इति भीत्या च शिक्षकान् तत्कृतनियमान् च नाद्रियेरन्। किन्तु शिक्षकनिष्ठप्रेम्णा तान् आद्रियेरन्। एतादृशं हि अनुशासनं शिक्षणीयं भवति, यत्र शिक्षकच्छात्रयोः पारस्परिकं प्रेम एव अनुशासनस्याधारः स्यात्।

2. उत्तमानुशासनं सहयोगे आधारितं भवेत्। प्रधानाध्यापकाध्यापकयोः, अध्यापकाध्यापिकयोः, अध्यापकच्छात्रयोः, अध्यापकाभिभावकयोः, छात्रबालिकयोश्च मध्ये परस्परं सहयोगः परमावश्यको वर्तते। यदि तेषां मध्ये सहयोगो न भविष्यति तर्हि उत्तमनुशासनस्य सम्पादनमत्यन्तकठिनं भविष्यति। तदर्थं सर्वेषां मध्ये मधुरसम्पर्कस्थापनं परमावश्यकम्।

3. अनुशासनस्थापनार्थं दण्डस्य प्रयोगः न भवेत्। यदि स्वदुष्टप्रवृत्तीः येन केन

---

2. "Discipline consists in the submission of one's impulses and powers to regulation which impose form upon chaos and brings efficiency and economy where there would otherwise be ineffectiveness and waste". **- T.P. Nunn**

प्रकारेण न त्यजति, तदैव अस्य प्रयोगस्य आवश्यकतां अनुभवेत्। पुनः पुनः दण्डस्य प्रयोगेण बालकानां मस्तिष्के विभिन्नप्रकारक-ग्रन्थीनां निर्माणं सम्भविष्यति, यस्य परिणामस्वरूपं तेषां व्यक्तित्त्वमसन्तुलितं भविष्यति। अतः यथासम्भवं दण्डस्य प्रयोगो नैव भवेत्तर्हि शोभनम्।

4. विद्यालयस्य सम्पूर्णवातावरणं सुन्दरं सामञ्जस्यपूर्णञ्च निर्मितं भवेत् अस्य दायित्वं केवलं शिक्षकाणां, अधिकारिणां च एव न भवति, अपि तु एतादृशवातावरणस्य निर्माणार्थं छात्राणामभिभावकानां समाजानां चापि उत्तरदायित्वं भवेत्।

5. विद्यालये छात्राः अध्यापकाः च स्व-स्वदायित्वानि पूर्णं कर्तुं स्वतन्त्रता साधनानि च प्रदीयेरन्।

6. विद्यालये विभिन्नरचनात्मककार्याणां स्थानं प्रदीयेत येन बालकानां तेषां रुच्यनुसारं विभिन्नकार्यकरणेन मानसिकसंवेगात्मक-संतुष्टिः स्यात्। येन अनुशासनहीनतायाः समस्या न सम्भविष्यति।

7. अभिभावकानां पारिवारिकजीवनं सुन्दरं सुखमयं च निर्मातुं प्रोत्साहनं कुर्यात्। यतो हि बालकाः अधिकं समयं गृहे एव यापयन्ति। यदि छात्रस्य जीवनम् अनुपयुक्तं दूषितं चास्ति तर्हि विद्यालयस्य सत्प्रयासोऽपि निष्फल एव सम्भविष्यति। अतः विभिन्नैः साधनैः अभिभावकान् स्वपारिवारिकजीवनम् उपयुक्तं सामञ्जस्यपूर्णञ्च निर्मातुं प्रेरयेत्।

8. बालकाः अनुशासनस्य महत्त्वविषये परिचिताः भवेयुः। तदर्थमुपदेशाः नोचिताः अपि तु विभिन्नमहापुरुषाणाम् उदाहरणैः अस्मिन् विषये ज्ञानं दातव्यम् स्वयं च प्रधानाध्यापकः शिक्षकाश्चान्ये तेषां समक्षं स्वोदाहरणं प्रस्तुतं कुर्युः।

अनुशासन-स्थापनस्य साधनानि

उत्तम-अनुशासनस्य मूलाधारः विद्यालयस्य सम्पूर्णकार्यक्रमे निहितः वर्तते। यदि विद्यालये उत्तमानुशासनस्य स्थापनमपेक्षितं तर्हि प्रधानाध्यापकस्य परमकर्तव्यमस्ति यत् विद्यालयस्य सम्पूर्ण-वातावरणम् उपयुक्तं सामञ्जस्यपूर्णञ्च स्थापयेत्। तदर्थं सः विभिन्नसाधनानां प्रयोगं कर्तुं शक्नोति, यानि निम्नलिखितश्रेणिषु विभाजयितुं शक्यन्ते—

(अ) सकारात्मक (Positive) साधनानि।

(ब) नकारात्मक (Negative) साधनानि।

(अ) सकारात्मकसाधनानि

1. स्वशासनम्— विद्यालयनियन्त्रणे छात्राणां सहयोगेनानुशासनस्थापनं, विद्यालयवातावरणञ्च मार्मिकं कर्तुं सहयोगिनां च निर्माणे पर्याप्तसहायता मिलति। बालकेषु विद्यालयस्य दैनिककार्यक्रमाणामुत्तरदायित्वे निक्षेपणमेव उत्तमानुशासनस्य स्थापनायां महत्त्वपूर्णं सहायकं च वर्तते। छात्राः स्वयमेव स्वाचरणसम्बन्धिनियमानां निर्माणं कर्तुं शक्नुवन्ति। नियमपालने छात्राणां कोऽपि संकोचः न भविष्यति, यतः नियमाः स्वयं तैः निर्मिताः सन्ति। एतदतिरिक्तं तेषु विद्यालयस्य स्वच्छता, व्यक्तिगत-स्वच्छता, विद्यालय-सम्पत्तिसुरक्षा, विलम्बेनागतछात्राणां समस्या, स्वास्थ्यसम्बन्धिनियमानां बोधः तेषां प्रसारश्चेत्यादीनां दायित्वं निक्षेपयितुं शक्यते। इत्थं तेषां सहयोगेन विद्यालयस्य सम्पूर्णवातावरणं एतादृशं निर्मातुं शक्यते, यस्मिन् ते स्वयमेव स्वानुशासने समर्थाः भविष्यन्ति।

2. विद्यालयस्य नियमाः परम्पराश्च— अनुशासनस्थापने विद्यालयस्य नियमानां परम्पराणाञ्च महत्त्वपूर्णं स्थानं वर्तते। विद्यालयेषु नियमनिर्माणं विभिन्नशक्तिभिः क्रियते। तत्र प्रथमः—शिक्षाविभागस्य नियमाः, द्वितीयः—प्रबन्धसमितिद्वारा निर्मितनियमाः, तृतीयः—प्रधानाध्यापकाशिक्षकवर्गद्वारा निर्मितनियमाः चतुर्थश्च-छात्रपरिषद्द्वारा निर्मितनियमाः। प्रायः विभागीय-प्रबन्धसमितिद्वारा निर्मितनियमानां संकोचं विना पालनं क्रियते प्रधानाध्यापकैः शिक्षकैश्च निर्मितनियमाः प्रगति-अनुपस्थिति-व्यवस्थास्थापनैः सम्बन्धिताः भवन्ति। छात्राः एतेषां नियमानां महत्त्वं प्रति परिचिताः भवेयुः। तथा च इदं ज्ञानमपि अपेक्षितं यत् सामाजिकहितार्थं व्यक्तिगतहितानां बलिदानमावश्यकं भवति। एतेन साकमेव छात्राणाम् इदमपि ज्ञानं भवेत् यत् एतेषां नियमानामनुसारमत्र कार्यकरणेऽपि भाविजीवने नियमितरूपेण कार्यकरणे कोऽपि काठिन्यं न भविष्यति। परन्तु अत्र एको विषयः ध्यानयोग्यो वर्तते यत् एते नियमाः यावच्छक्यं न्यूनाः भवेयुः तावत् एव उपयुक्ता भविष्यन्ति, यतः छात्रः अधिकनियमानां विरुद्धं विद्रोहं कर्तुं तत्परो भवति।

प्रत्येकं विद्यालयस्य काश्चन स्व-परम्पराः भवन्ति। वस्तुतः विद्यालयानुशासनं परम्पराणामेव विषयः वर्तते। यदि कस्यचित् विद्यालयस्य परम्पराः समीचीनाः

वर्तन्ते तर्हि तस्मिन् विद्यालयेऽनुसन्धानस्य स्तरः स्वयमेव समीचीनः भविष्यति। यदि स्थितिः विद्यालयस्य विपरीता वर्तते तर्हि तत्रस्थमनुशासनं समीचीनं न भविष्यति। प्रत्येकं विद्यालयस्य स्वस्य वातावरणं भवति, यस्मिन् छात्राः व्यवस्थापनीयाः। तैः इदं ज्ञातव्यं भवति यत् अत्र के नियमाः सन्ति, काश्च परम्पराः विद्यमानाः सन्ति, तदनुसारं तैः विद्यालयस्य वातावरणे कार्यं करणीयमस्ति। अनुशासनस्थापनार्थं विद्यालयाधिकारिवर्गैः स्वप्रचलितप्रगतिशीलपरम्पराः निर्मातुं प्रयत्नः करणीयः।

3. पारस्परिकसहयोगः— विद्यालयस्य सर्वाणि कार्याणि सहयोगम् एव आश्रितानि सन्ति। प्रधानाध्यापकः समस्तशिक्षकाणां सहयोगाभावे, छात्रसहयोगाभावे, अभिभावकसमाजसहयोगाभावे च किमपि कार्यं सफलतापूर्वकं नैव कर्तुं शाक्नोति। अतः सः विद्यालये प्रतिव्यक्ति प्रतिसमूहं वा स्वदायित्वावबोधनं स्वशक्तिञ्च सामाजिकहितप्राप्तये अथवा समूहस्य समस्यासमाधानार्थं प्रयुञ्जीत। विद्यालये एतान् सर्वान् जनान् एकसमूहरूपेण कार्यकरणार्थं तत्परान् कुर्यात् तदर्थं प्रधानाध्यापकः विद्यालयकल्याणे विभिन्नव्यक्तीनां समूहानाञ्च प्रयत्नेषु समन्वय-स्थापनमवश्यं कुर्यात्। यदा सर्वे जनाः स्वदायित्त्वावबोधने तस्य च पूर्तये तत्पराः भविष्यन्ति, तदात्रानुशासनं स्वयमेव उत्पन्नं भविष्यति, यतः प्रत्येकस्मिन् दायित्वे अनुशासनात्मक-परिस्थितयः निहिताः भवन्ति। एवं विद्यालयेऽनुशासनस्थापनार्थं पारस्परिकसहयोग-स्यावश्यकता वर्तते।

4. उपयुक्तपाठ्यक्रमसहगामिक्रियाणां व्यवस्था— पाठ्यसहगामि-क्रियाणामतीवानुशासनात्मकं महत्त्वं वर्तते। अनया बालकेषु नेतृत्वं, कर्त्तव्यपरायणता, अधिकारिणं प्रत्यादरभावना, व्यवस्थां, नियमिततां च प्रति श्रद्धा, आत्मनिर्देशनस्य शक्तिः, सामाजिकतायाः भावना, सहयोगः इत्यादेः विकासः जायते। अतः अनुशासनस्थापनार्थं विद्यालये पाठ्यसहगामिक्रियाणामुपयुक्तकार्यक्रमः निर्धारितः स्यात्, येन बालकाः स्वरुचीनां योग्यतानाञ्चानुसारं तस्मिन् भागं ग्रहीतुं शक्नुयुः। एतासां क्रियाणां विवेचनमग्रे एकस्मिन् अध्याये पृथक्तया करिष्यते।

5. बाह्यप्रभावेषु नियन्त्रणम्— अनुशासनस्थापनार्थं बाह्यप्रभावाः अर्थात् समाजस्य दूषितराजनीतिः, सामाजिकदौर्मनस्यम् पारस्परिकसंघर्षः इत्यादिषु नियन्त्रणमावश्यकमस्ति। एतेषां विद्यालयस्य विशुद्धवातावरणे प्रवेशेन विकासस्यावरोधः स्यात्। महान् शिक्षाशास्त्री **जॉन डी.वी. महोदयः** कथयति यत्

विद्यालयः एकविशेषवातावरणमस्ति, यं बाह्यजीवनस्य कुरूपभावतः पृथक् स्थापयेत्। एतस्मै तानि तत्त्वानि चिनुयात्, ये मूल्यवन्ति शिक्षाप्रदानि च सन्ति। अतः एतत् शुद्धविशेष–वातावरणस्य शुद्धतायै समाजस्य दूषितराजनीतेः पृथक्स्थापना आवश्यकी। अस्माकं देशे अनुशासनहीनतायाः प्रमुखकारणं समाजस्य दूषितराजनीतिः पारस्परिकसंघर्षश्च वर्तते। अतः अनुशासनस्थापनाय बाह्यप्रभावैः विद्यालयं संरक्षेत्।

6. नैतिकशिक्षायाः व्यवस्था— अनुशासनस्थापने नैतिकशिक्षायाः अतिमहत्त्वपूर्णं स्थानं वर्तते। विद्यालये एतदर्थं व्यवस्थां कुर्यात्। अनया बालकेषूच्चादर्शान् प्रति निष्ठा तेषां चानुसारं कार्यकरणस्य भावनायाः विकासः स्यात्। परन्तु पाठ्यविषयरूपेण न पाठयेत्, तस्योपरि समस्तविषयाणाञ्च शिक्षणं विशेषतः विभिन्नक्रियाणां सञ्चालनरूपेण परिवर्तयेत्। तदतिरिक्तं सम्पूर्णविद्यालयस्य वातावरणे नैतिकतायाः भावनां पूरयेत्, विद्यालयाधिकारिणः छात्राणां समक्षे स्वोदाहरणं प्रस्तुतं कुर्युः।

7. विद्यालयस्य वातावरणं शैक्षिकसुविधाश्च— यदि विद्यालयस्य वातावरणमनुपयुक्तं स्यात्तर्हि उत्तमानुशासनस्य स्थापनायां बहुकाठिन्यं भविष्यति। उचितशिक्षणस्य कृते विद्यालयस्य समीपस्थप्रतिवेशः, स्वच्छता, वायुः, प्रकाशः, उपस्करः, आवश्यकोपकरणानि— एतेषामुचितव्यवस्था आवश्यकी वर्तते। यदि कक्षायाम् उपवेशनार्थमुचितोपस्करस्य स्थानस्य वा अभावः अस्ति तर्हि अनुशासनहीनतायाः समस्योत्पत्तेः समभावना भविष्यति। एतदतिरिक्तं विद्यालये पुस्तकालयः प्रयोगशाला तेषाञ्च सज्जा, क्रीडायाः क्षेत्रमित्यादेः उचितप्रबन्धः भवेत्। एतेषामुचितव्यवस्थया बालकाः स्वावकाशस्य सदुपयोगं कर्तुं शक्ष्यन्ति, अनुशासने च स्थास्यन्ति।

8. शिक्षकाभिभावकसहयोगः— शिक्षकाभिभावकानां सहयोगस्य अनुशासन–स्थापनायां महत्त्वपूर्णं स्थानं वर्तते। शिक्षकाः एतेषां सहयोगेन बालकानां जटिलगतिविधीनां ज्ञाने समर्थाः भविष्यन्ति। अनेन ज्ञाने बालकानां विभिन्नसमस्यासमाधाने समर्थाः भवितुमर्हन्ति। विद्यालये बालकानां गतिविधीनां ज्ञानेऽभिभावकाः शिक्षकेभ्यः तेषां विकासार्थं पर्याप्तरूपेण सहायतां दातुं शक्नुवन्ति। यथा वयमुपरि पश्यामः यत् बालकस्याधिककालः गृहे यापनं भवति। विद्यालयः अभिभावकानां सहयोगाभावे तेषामुचितप्रकारेण विकासकरणे सफलः नैव भवितुं

शक्नोति। अतः बालकान् अनुशासितजीवनयापनं शिक्षयितुमध्यापकाभिभावकयोः मध्ये मधुरसम्पर्कस्थापनमावश्यकं वर्तते। शिक्षकाभिभावकसहयोगस्य विस्तृतविवेचनं 'विद्यालयं गृहञ्च' इति नामकाध्याये वयं करिष्यामः।

9. पारितोषिकम्— प्रायः सर्वेषु विद्यालयेषु छात्रेभ्यः तेषां सत्कार्याणां कृते पुरस्कारप्रदानस्य प्रथा प्रचलिता वर्तते। अनुशासनस्थापने पुरस्काराणां बहुमहत्त्वं वर्तते, यतः एतेन बालकेषु सत्कार्यकरणस्याभ्यासः, मनोवृत्तेश्च विकासः जायते। प्रतिव्यक्ति इयमिच्छा भवति यत् सा समाजेन स्वीकृता भवेत्। केचन जनाः स्वसत्कार्यैः समाजस्य स्वीकृतिं प्राप्नुवन्ति। परन्तु ये जनाः समाजस्य स्वसत्कार्यैः स्वीकृतिं नाप्नुवन्ति, ते असत्कार्यैः अन्येषां ध्यानानयनस्य प्रयासं कुर्वन्ति। विद्यालयेषु पुरस्कारैः बालकेषु एतस्याः भावनायाः संपुष्टये मार्गः प्रशस्तः जायते। यदि कोऽपि बालकः स्वसत्कार्यस्य स्वविशेषतायाश्च कारणेन पुरस्कारं प्राप्नोति, तर्हि अनेनान्यबालकेभ्यः प्रोत्साहनं मिलति। ते पुरस्कारप्राप्त्यर्थं प्रयत्नशीलाः भवन्ति। अनेन प्रकारेण पुरस्कारप्राप्त्यर्थं ते सदैव स्वमन्येषां श्रेष्ठताप्रदर्शनस्य प्रयासं कुर्वन्ति। अनेन प्रकारेण पुरस्काराः अनुशासनस्थापनेऽतिमहत्त्वपूर्णानि कार्याणि कुर्वन्ति। वस्तुतः अस्योद्देश्यम्–बालकेभ्यः सत्कार्यस्य सद्व्यवहारस्य च कृते प्रोत्साहनप्रदानं वर्तते।

पुरस्कारप्रदानेन लाभाः

1. पुरस्कारं प्राप्तुं बालकेषु स्पर्धाभावनायाः विकासः भवति, येन ते परस्पराधिकसत्कार्यार्थं तत्पराः भवन्ति।
2. पुरस्कारैः बालकेषु स्वशक्तिषु विश्वासः सञ्जायते।
3. पुरस्कारप्राप्त्या तेषामानन्दः प्रेरणा च वर्धते।
4. बालकाः पुरस्कारस्य कृते नियमिताः कर्त्तव्यपरायणाः भूत्वा कार्यं शिक्षयन्ति।

कैश्चिद् विद्वद्भिः पुरस्काराणामालोचना कृता। तेषां मतानुसारं ते मनोवैज्ञानिकं सामाजिकञ्च दृष्ट्यानुपयुक्ताः सन्ति, यतः अनेन बालकेषु ईर्ष्याद्वेषभावनाः उत्पन्नाः भवन्ति। द्वितीयः—अनेन केचन एव बालकाः प्रभाविताः भवन्ति। अर्थात् ये बालकाः पुरस्कारम् आप्नुवन्ति ते एव प्रभाविताः भवन्ति। अस्य विपक्षेऽयमपि कथ्यते यत् ये बालकाः पुरस्कारं न प्राप्नुवन्ति तेषु बालकेषु हीनतायाः भावना समुत्पद्यते। बहवः छात्राः पुरस्कारप्राप्तये अनुचितसाधनानामुपयोगार्थमपि तत्पराः भवन्ति, यः समाजस्य स्वस्य वा कृतेऽकल्याणकरः भवति।

पुरस्काराणां सार्थकनिर्माणे इदं परमावश्यकं वर्तते यत् तेषां सावधानतया निष्पक्षतया च प्रदानं भवेत्। पुरस्कारप्रदानसमये निम्नविषयाः मनसि ध्यातव्याः—

1. बालकस्य कस्मिंश्चित् एकस्मिन्नवसरे प्रदर्शितविशेषतायाः आधारेण पुरस्कारप्रदानं न भवेत् अपि तु तेषां वार्षिककार्यं पुरस्कारप्रदानस्याधारः भवेत्।
2. बालकेभ्यः येभ्यः गुणेभ्यः कार्येभ्यश्च पुरस्कारप्रदानं क्रियते तैः समस्तछात्रान् अवगतान् कारयेत्, तेषां महत्त्वविषये उल्लेखनं भवेत्, येन इतरे छात्राः अपि तेषां गुणानां प्राप्तये प्रयत्नशीलाः भवितुं शक्नुवन्ति।
3. पुरस्काराणां वैयक्तिकरूपेण प्रदानं न कृत्वा सामूहिकरूपेण प्रदानं कुर्युः, यतः एतेन व्यक्तिगत–ईर्ष्याद्वेष–भावना च समापयितुं शक्यते।
4. महार्घवस्तुरूपेण पुरस्कारप्रदानं न भवेत्। यतः महार्घपुरस्कारः बालकेषु लोभजनने सहायकं भवितुं शक्नोति। एतेन साकमेव इदमपि ध्यातव्यं यत् पुरस्काररूपेण धनप्रदानापेक्षया प्रशंसायाः सम्मानस्य वा स्वरूपेण प्रदानं स्यात्। प्रशंसापत्रस्य सम्मानस्य वा केनापि वस्तुना धनेन वा अधिकं महत्त्वं वर्तते।

(ब) नकारात्मकसाधनानि

अस्यान्तर्गततया दण्डव्यवस्थां स्थापयति। वस्तुतः दण्डव्यवस्था अनुशासन–स्थापनस्य साधनं नैव मन्यते, यतः उत्तमानुशासनं तु व्यक्तेः अन्तःकरणात् उत्पन्नः गुणः वर्तते। परन्तु वास्तविकपरिस्थितौ दण्डव्यवस्थायाः आवश्यकता प्रतीयते। विद्यालयरूपसमाजे प्रसरन्तीं कुरीतीं अनुशासनहीनतां चावरोधयितुं काश्चित् सीमां यावत् दण्डव्यवस्थायाः आवश्यकताऽनुभूयते। अतः विशेषपरिस्थितौ वयं बालकान् दण्डयितुं निरुपायाः भवामः। वयं एतादृशीं सम्भावनां समापयितुं न शक्नुमः यतः मानवः मानवीयदुर्बलताभिः ग्रस्तः वर्तते, तस्य चानेकाः दुर्बलताः एतादृश्यः सन्ति याः तावत् अवरोद्धुं न शक्यन्ते यावत् दण्डः न दीयेत्। अथवा दण्डस्य भयं न भवेत्। **पी. रेन महोदयस्य मतानुसारम्—** ''दण्डः एकः कुत्सितं वस्तु वर्तते तस्य चावहेलनापि क्रियेत परन्तु यथा शल्यवैद्यस्य छुरिका शरीरस्य दूषितं भागं दूरीकर्तुम् आवश्यकी वर्तते तथैव मानवस्य दुर्बलतां दूरीकर्तुं दण्डोऽप्यावश्यकः वर्तते। अतः

यथा राज्यं एकः आवश्यकदोषः वर्तते तथैव दण्डोऽपि एकः आवश्यकः दोषः यं वयं स्वीकुर्मः।''

दण्डस्य सिद्धान्ताः

यदा दण्डः एकः आवश्यकदोषः वर्तते अपि च तस्य ग्रहणमावश्यकमेव तर्हि प्रश्नः भवति यत् दण्डः केन प्रयोजनेन दीयते। अस्मिन् सन्दर्भे निम्नाः धारणाः प्रचलिताः सन्ति।

1. प्रतिकारात्मकसिद्धान्तः (Retritutive Theory)—अनेन सिद्धान्तेन इदं प्रतिपाद्यते यत् यो जनः दोषम्, अपराधं वा करोति, सः दोषस्यापराधस्य वा प्रतिकारं कुर्यात्। अयं सिद्धान्तः 'इष्टिकायाः प्रत्युत्तरं पाषाणखण्डेन दातव्यम्', इत्युक्तिं चरितार्थं करोति। अनेन प्रकारेणापराधिने दण्डं प्रतिकारभावनया ददाति। परन्तु सिद्धान्तोऽयं न न्यायसंगतः, यतः यदि बालकः शिक्षकस्यादेशानां पालनं न करोति तर्हि स्वतः एव तस्य क्रोधोऽऽगमिष्यति, सम्भाव्यते च यत् सः क्रोधे प्रतिकारभावनया तस्मै अधिकं दण्डं प्रदातुं शक्नोति।

2. सुधारात्मकसिद्धान्तः (Reformative theory)—अस्य सिद्धान्तस्यानुसारं दण्डस्य प्रयोजनमपराधिनः सुवर्धनं वर्तते। अयं सिद्धान्तोऽस्यां वार्तायां विश्वासं करोति यत् अपराधी स्वयमेव इमामनुभूतिं कुर्यात् यत् वस्तुतः तेनैवापराधः कृतः, तदर्थञ्च दुःखानुभूतिं कुर्यात् तथा तस्योपायः आत्मपरिष्कारः एव।

3. उदाहरणात्मकसिद्धान्तः (Exemplary Theory)—अनेन सिद्धान्तेनायं प्रतिपाद्यते यत् अपराधी एतदर्थं दण्ड्यते येन इतरेषां कृते इदमेकमुदाहरणं स्यात्, तथा इतरे तादृशापराधात् प्रतिरुद्धाः भवेयुः। यथा— यदि बालकः चौर्यकार्यं करोति तर्हि सः अनेनोद्देश्येन दण्डितः स्यात्, यत् सः पुनः चौर्यकार्यं न कुर्यात्, अन्ये चेदमनुभवेयुः यत् यदि वयं चौर्यकार्यं कुर्मः तर्हि वयं दण्डभागिनः स्याम। एवं तस्य बालकस्योदाहरणमन्यान् बालकान् चौर्यकरणात् रक्षिष्यति। सम्भवतः उदाहरणप्रस्तुतीकरणे यः बालकः दण्डितः तं प्रति अन्ये छात्राः सहानुभूतिं कुर्वन्ति तदीया स्थितिः कठिनतरा भविष्यति।

4 अवरोधात्मकसिद्धान्तः (Preventive Theory)—अस्य

सिद्धान्तानुसारमपराधिनः तदैवापराधस्य पुनरह्लावृत्त्यावरोधनं अन्येषाञ्च संरक्षणं वर्तते। परन्तु सिद्धान्तोऽयम् अपराधिनः निजसुवर्धनार्थमवसरप्रदानं न करोति। प्रायः दृश्यते यत् दण्डस्य भयेनापराधः नावरुद्धः परमधिकः वर्धते।

दण्डस्य विषये एकोऽन्यः सिद्धान्तः प्रचलितः यत् नियमानां पालनं कारयेत्। अस्यानुसारं नियमः सर्वोच्चः वर्तते। यदि काऽपि व्यक्तिः नियमस्य पालनं न करोति चेत्, दण्डः दातव्यः। अस्य सिद्धान्तस्योद्देश्यं नियमानां संरक्षणं वर्तते। सिद्धान्तोऽयं सामान्यजीवनस्य कृते सम्यग् प्रतीयते परन्तु विद्यालये तस्य सर्वोच्चतां प्रति बलं न दद्यात्।

उपर्युक्तसिद्धान्तानामध्ययनात्परं प्रश्नोऽयं वर्तते यत् यदि दण्डस्य प्रयोगोऽपेक्षितः तर्हि सः केन उद्देश्येन दातव्यः अथवा कस्य सिद्धान्तानुसारं दातव्यः अस्मिन् सम्बन्धे कस्यापि निश्चितसिद्धान्तस्य प्रतिपादनं कर्तुं न शक्यते यतः प्रथमतः दण्डदातुः दर्शनं चिन्तनं वा भिन्नं भवितुं शक्नोति, अस्मिन् सम्बन्धे केवलं प्रस्ताव एव दातुं शक्यते। प्रस्तावोऽयं वर्तते यत् यदि दण्डोऽपेक्षितः तर्हि सः सुवर्धनात्मकोद्देश्येन दद्यात्। तदतिरिक्तं दण्डप्रदानसमये निम्नाः वार्ताः ध्यातव्याः—

1. दण्डप्रदानात्पूर्वमपराधस्य कारणानां परिस्थितीनाञ्च ज्ञानप्राप्तिः ताः दूषितपरिस्थितीः परिष्कर्तुं प्रयत्नं कुर्यात्।
2. तेनावबोधनात्परं बालकान् स्वदोषस्यानुभवं कारयेत् भाविकाले च एवं न कर्तुं पूर्वज्ञापनं दद्यात्। यदि सः पुनरपि एवं करोति तर्हि तस्य कृते दण्डव्यवस्था क्रियते, परन्तु दण्डप्रदानसमये बालकस्य आयुः, स्वभावः, विचारधारा इत्यादिकं मनसि निधातव्यम्।
3. दण्डप्रदाने निष्पक्षता भवेत्।
4. दण्डोऽपराधानुकूलं दातव्यः तेन चाधिकं न्यूनं वा मात्रायां न भवेत्।
5. दण्डप्रदाने, यदि सम्भवति चेत् बालकानामभिभावकैरपि परामर्शः नीयेत। अनेन साकमेव बालकानां छात्रपरिषदः सम्मतिं प्राप्नुयात्। अनेन सामूहिकानुशासनहीनतायाः समस्या उत्पन्ना न भविष्यति।

दण्डस्य विभिन्नानि रूपाणि

अधुना विद्यालये तेषां दण्डानां स्थानं नास्ति, ये प्राचीनकाले विद्यालयेषु प्रचलिताः आसन्, यथा कशया (कोडे), बेत्रदण्डेन (बेंत) च ताडनमित्यादि।

इदानीं तर्जनम् (डॉटडपट), अपमानं, निन्दा, विद्यालयसमयात्परमवरोधनं, विद्यालयकार्यादतिरिक्तं कार्यप्रदानं, अङ्कानां न्यूनीकरणं, सुविधाबलात् ग्रहणं, क्षतिपूर्तिकरणं, आर्थिकदण्डः, शारीरकदण्डः इत्यादीनि विभिन्नानि रूपाणि प्रचलितानि सन्ति। सर्वेषु लघुदण्डः तर्जनमेवास्ति, अयञ्च प्रभावशाली सिद्धो भवति, परन्तु अपशब्दाः न समीचीनाः। बालकान् विद्यालयसमयात्परमवरोधनमपि उचितं नास्ति, यतोऽनेन बालकस्य हृदये विद्यालयं प्रति अरुचिजननस्य सम्भावना वर्तते। अस्माकं विद्यालयेषु आर्थिकदण्डस्य पर्याप्तमात्रायां प्रयोगः क्रियते, परन्तु अयमनेन कारणेन नोचितः यतः अस्य भारं मातापितरौ वहतः। बालकः न वदति पितर्नि् एतादृशो दण्डः प्रदत्तः इति। एतेन सुविधाबलात् ग्रहणं अतिरिक्तकार्यप्रदानं, अङ्कानां न्यूनीकरणं, पदे अवनतिः इत्यादयोऽधिकाः उपयुक्ताः सन्ति, यतः एतेषां प्रभावः दोषयुक्तछात्रस्योपरि सद्यो भवति।

शारीरकदण्डप्रदानमपि उचितं नास्ति। अधुना शिक्षकैः चपेटा (थप्पड) ताडनस्य प्रथापि हतोत्साहिता क्रियते। केवलं प्रधानाध्यापक एव विशेषपरिस्थितौ अस्य उपयोगं कर्तुं शक्नोति। भारतीयसंघस्य प्रायः सर्वेषु राज्येषु शारीरकदण्डस्य प्रयोगाय शिक्षाविभाग–द्वारा पद्धतीनां परिस्थितीनाञ्च निर्धारणं कृतं वर्तते।

दण्डस्यैकं महत्त्वपूर्णं रूपं निलम्बनं निष्कासनञ्च (Suspension and Expulsion) वर्तते। अस्य प्रयोगः गम्भीरपरिस्थितिषु एव कुर्यात्। एतेषां प्रयोगः तदैव भवेत् यदा समस्तप्रकारबालकान् उचितमार्गे आनयनमसम्भवं भवति। इदं विद्यालयाधिकारिणामधिकारे अन्तिममस्त्रं वर्तते। अस्य उपयोगोऽति न्यूनरूपेणैव स्यात्।

विद्यालयेऽनुशासनहीनता

अद्यास्माकं देशस्य वर्धमानामनुशासनहीनतां दृष्ट्वा विद्यालयस्याधिकारिवर्गः एव न अपि तु सम्पूर्णं राष्ट्रं चिन्तितं वर्तते। दुःखस्य विषयोऽयं यत् स्वतन्त्रात्परमियं समस्याधिकगम्भीरा जाता। विद्यालयाधिकारिणोऽनया वार्तया चिन्तिताः न सन्ति यत् छात्राः कक्षायां बहिश्च अव्यवस्थां उत्पन्नां कुर्वन्ति अपि तु चिन्तायाः कारणं वर्तते यत् राष्ट्रस्य भाविजीवनं सुन्दरं निर्मातुं येषां मूल्यानां गुणानाञ्चावश्यकता वर्तते, छात्राः तेषां विनाशे उत्सुकाः भवन्ति। तेषां गुणेषु आदर्शेषु च राष्ट्रस्य सुन्दरजीवनं निर्भरमस्ति यतः त एव तस्य भाविनिर्मातारः सन्ति।

अनुशासनहीनतायाः रूपाणि— अस्माकं विद्यालयेषु अनुशासनहीनतायाः रूपद्वयं वर्तते तत्र प्रथमः—व्यक्तिगतानुशासनहीनता, द्वितीयः—सामूहिकानुशासनहीनता च। व्यक्तिगतानुशासनहीनतायां असत्य-वदनं, चौर्यकरणं, कक्षायां विलम्बेनागमनं, विद्यालयात्पलायनं, परस्परं कलहः, भित्तिषु अनुचितलेखनं, साजसज्जा-त्रोटनं, चित्तेन कार्यं न करणं, शिक्षकादेशस्य अपालनं, शिक्षकान् प्रति अनैतिकव्यवहारः, अनुत्तरदायित्वम् इत्यादयः वार्ताः आयान्ति। सामूहिकानुशासनहीनता सर्वेषु कुत्सिता वर्तते। इदं यदा-कदा राजनैतिकसमस्यां उत्पादयति। अस्य प्रमुखलक्षणानि सामूहिकरूपेण प्रदर्शनं कार्यबाधश्च, सामूहिकरूपेण परस्परवादविवादः, अन्येषु आक्रमणं, सामूहिकरूपेण कोलाहलः (Rowdyism) इत्यादयः सन्ति।

अनुशासनहीनतायाः कारणानि— अनुशासनहीनतायाः रूपविवेचनात्पूर्वं समस्या उत्पद्यते यत् अनुशासनहीनतायाः कानि कारणानि ? अस्मिन् सन्दर्भे विभन्नैः जनैः भिन्न-भिन्नरीत्या स्वाशयाः प्रतिपादिताः। वयमत्र प्रमुखमहत्त्वपूर्ण-विचाराणामुल्लेखनं कुर्मः—

हुमायूँ-कबीर-महोदयेन 'स्टूडेन्ट इन्डिसिपिलिन' (Student Indiscipline) नामकपत्रिकायां छात्राणां वर्धमानानुशासनहीनतायाः निम्नलिखितकारणानि उक्तानि—

1. शिक्षक-द्वारा सम्मानं प्रतिष्ठा च विनष्टे— अद्य छात्रेषु याऽनुशासनहीनता वर्तते तस्य प्रमुखकारणं शिक्षकैः सम्मानं विनष्टं वर्तते। अद्य शिक्षकवर्गः स्वछात्रैः तावत् सम्मानं श्रद्धां च न प्राप्नोति यथा अतीते आप्नोति स्म। अत्र केवलमध्यापकः एव दोषयुक्त इति न वक्तुं शक्यते, अपि तु अस्मिन् बहूनि महत्त्वपूर्णानि तथ्यानि सम्मिलितानि सन्ति तेषां विवेचनं निम्नरूपेण वर्तते—

(i) स्वतन्त्रतासङ्ग्रामे विभिन्नराष्ट्रियनेतृभिः छात्राणां भावनाः पर्याप्तरूपेण प्रभाविताः, ते च तस्मिन् सक्रियभागं नेतुं प्रोत्साहिताः। परन्तु शिक्षकवर्गः विविधैः कारणैः सङ्घर्षेऽस्मिन् सक्रिय-भागं नैव नेतुमशक्नोत्। अस्य परिणामस्वरूपमध्यापकाः छात्राणां भक्तिं सम्मानञ्च किञ्चित् सीमां यावत् न प्राप्नुवन्।

(ii) व्यतीतत्रिंशद्वर्षतः वयं विद्यमानशिक्षापद्धतेः आलोचनां श्रृणुमः। आलोचना शनैः शनैः शिक्षकं यावत् प्राप्नोत् अर्थात् शिक्षापद्धतेरङ्गत्वेन शिक्षकस्यापि आलोचना कृता। अस्याः आलोचनायाः परिणामस्वरूपं जनानां मस्तिष्के

शिक्षणव्यवसायं प्रति सम्मानः हीयते स्म, अयञ्च दृष्टिकोणः छात्रानपि प्राभावयत्। अनेन कारणेन तेऽपि स्वशिक्षकान् आदरस्य सम्मानस्य च दृष्ट्या न दृष्टुमशक्नुवन्।

(iii) शिक्षकस्य सामाजिकस्तरः पर्याप्तरूपेण निम्नः वर्तते। एतस्मै किञ्चिदंशं यावत् तु उपर्युक्तकारणमुत्तरदायि वर्तते, परन्तु तेषां निम्नसामाजिकस्तरस्य प्रमुखं कारणं तेषां न्यूनार्थिकस्थितिः वर्तते।

(iv) शैक्षिकसुविधानां प्रकारस्यावश्यकता (Demand) शिक्षकाणां प्रतिष्ठायाः न्यूनीकरणे महत्त्वपूर्णयोगदानम् अकरोत्। शिक्षा-सुविधा-प्रदानाय शिक्षकाणामावश्यकता जाता। अनयावश्यकतया अस्य व्यवसायस्य द्वाराणि तेभ्यः जनेभ्यः अप्युद्घाटितानि येऽयोग्याः आसन्। द्वितीयः—विद्यालयेषु बालकानां संख्यायाः वृद्धया शिक्षकाणां तेषाञ्च मध्ये व्यक्तिगतरूपेण सम्पर्कस्थापनं कठिनं सञ्जातम्। अतीते एषः सम्पर्कः शिक्षकैः छात्राणां भक्ति-श्रद्धयोः प्राप्तये महान् सहायकः आसीत्। परन्तु आसु नवीनपरिस्थितिषु अयोग्यशिक्षकाः व्यक्तिगतसम्पर्कस्थापनस्य न्यूनसुविधानां कारणेन छात्राणामादरं सम्मानञ्च प्राप्तुं नाशक्नुवन्।

(v) परीक्षाणाम् अतिप्राधान्यात् शिक्षकाः छात्रान् केवलं परीक्षायोग्यान् कर्तुम् अभिकरणत्वेन कार्यं कर्तुम् आरभन्त।

(vi) प्रायः शिक्षकाः व्यक्तिगतप्रबोधने (प्राइवेटट्यूशन) अधिकं बलं ददति। ते विद्यालयेषु स्वकार्यं प्रति ध्यानं न दत्त्वा व्यक्तिगतप्रबोधनं प्रत्यधिकं ध्यानं ददति। एतत् तथ्यं शिक्षकाणां नेतृत्वं पर्याप्तरूपेण न्यूनीकरोति।

(2) दोषपूर्णशिक्षापद्धतिः— शिक्षापद्धतेः दोषाणामपि बालकेषु अनुशासनहीनतायाः उत्पादने महत्त्वपूर्णः भागो वर्तते। दोषपूर्णशिक्षापद्धतिः बालकेषु पर्याप्तमात्रायामसंतोषं निराशाञ्च उत्पादयति। अत्र प्रमुखदोषाणां विवेचनं क्रियते, ये छात्रेषु अनुशासनहीनतायाः उत्पादने उत्तरदायिनः सन्ति—

(i) वर्तमानशिक्षापद्धतिः अधिकसैद्धान्तिकी शास्त्रीया च वर्तते। अस्याः प्रमुखोद्देश्यं केवलं लिपिक-(क्लर्क) निर्माणमेव वर्तते। अनया ज्ञानेन्द्रियस्य वा शारीरकक्षमतायाः वा विकासस्यावहेलना क्रियते। इयं पद्धतिः चरित्र-नैतिकमूल्यानां विकासं प्रति ध्यानं न ददाति।

(ii) अस्यां परीक्षायै अधिकबलं दीयते। वस्तुतः परीक्षाः साध्याः सञ्जाताः। बालकाः केवलं परीक्षा-उत्तीर्णतायै पठन्ति, शिक्षकाश्च परीक्षा-उत्तीर्णतायै पाठयन्ति, अस्य दुष्परिणामः विभिन्नप्रकारेण अनैतिकतायाः प्रकटनमेव भवति।

(iii) छात्रेषु अनुशासनहीनतायाः वृद्धौ शिक्षापद्धतेः अधिकारिक-चरित्रस्य महद्योगदानमस्ति। लोकतन्त्रीयसमाजे सत्यपि विद्यालयेऽद्यापि अधिनायक-दृष्टिकोणः एव वर्तते। अस्य दृष्टिकोणस्य परिणामस्वरूपं बालकेभ्यः विवेकरहिताया आज्ञाकारितायाः अपेक्षा क्रियते। इयं स्थितिः तेषामनुशासनहीतानिर्माणे सहायतां प्रददाति।

(3) आर्थिककाठिन्यम्— आर्थिकसमस्याः अप्यनुशासनहीनतायाः वृद्धिषु पर्याप्तरूपेण सहयोगं प्रददति। यदा वैदेशिकाः भारतं त्यक्त्वा गताः तदा देशस्यार्थिकस्थितिः समीचीना नासीत्। स्वतन्त्रतायाः पश्चात् भारतसर्वकारेण आर्थिकस्थितिसंवर्धनाय महत्त्वपूर्णप्रयासः कृतः, परन्तु जनसंख्यावृद्धेः नियन्त्रणेऽनेकाः समस्याः उत्पन्नाः। इयमार्थिकस्थितिः छात्रसमाजमपि प्रभावितवती। शैक्षिकसुविधाविस्तारस्य परिणामस्वरूपं विद्यालयेषु विभिन्नसामाजिकवर्गाणां बालकाः शिक्षाप्राप्त्यर्थमागताः। तेषु एतादृशानां वर्गाणां ते बालकाः अप्यागच्छन्ति, येषामार्थिकस्थितिः समीचीना न भवति। अनेन कारणेन अनेके बालकाः स्वकीयच्छात्रजीवने धनाभावेन नैराश्यम् असन्तोषं च अन्वभूवन्। अनेके बालकाः स्वयमेव स्वकीयायाः शिक्षायाः भारमुद्वहन्ति। सर्वाधिकासन्तोषः तेषां तदा भवति यदा स्वविद्यालयीयजीवनं त्यक्त्वा सामाजिकजीवने प्रविशन्ति, ते च तस्मिन् स्वं स्वकीयजीविकोपर्जने असमर्थाः भवन्ति अर्थात् निरुद्योगितारूपायाः समस्यायाः प्रतिरोधः करणीयो भवति। एतादृशी स्थितिः तेषां मनसि उद्वेगं हृदयेऽसन्तोषञ्च जनयति।

(4) आदर्शानामभावः— निर्धनतया मानवस्य उत्तमभावनायाः विनाशः जायते। अस्यार्थिकासन्तोषस्य दुष्प्रभावैः अन्यतत्त्वैः चादर्शान् मूल्यान् च प्रति तिरस्कारः प्रारब्धः। द्वितीयमहासङ्ग्रामात्परं भौतिकवादिदृष्टिकोणस्य प्रसारः सञ्जातः येन व्यक्तिगतः सामाजिकश्च नैतिकस्तरः पातितः, मानवाश्च धनोपार्जनार्थमधिका-धिकप्रयासान् अकुर्वन्। तस्य मुख्यप्रयोजनं धनोपार्जनमासीत्। अभिप्रायः-येन केन

प्रकारेण धनोपार्जनं भवेत्। अयं भौतिकवादिदृष्टिकोणः मानवान् आध्यात्मिकमूल्यानां तिलाञ्जलिं दातुं बाध्यान् अकरोत्। समाजे च ईर्ष्या, द्वेषः, कलहः, शोषणमित्यादीनां कुरीतीनां प्रभावः छात्राणामुपरि जातः।

(5) स्वतन्त्रतासङ्ग्रामस्य प्रभावः— स्वतन्त्रतासंग्रामकाले जनान् अनुचितविधीनां स्वीकरणायापि उक्तमासीत् परन्तु यदा कदा उचितानुचितविधिषु भेदः कठिनो भवति। यदा छात्रेषु विधिभञ्जनस्य भावनां विकासः क्रियते तदा तैः सर्वेषां विधीनाम् उल्लंघनभावना विकसिता भवति। अद्य बालकेषु अनुशासनहीनतायाः प्रमुखकारणमस्मिन् तथ्ये निहितं वर्तते इति वक्तुं शक्नुमः। बालकैः यत्कार्यं स्वतन्त्रतासंग्रामे कृतं तस्य पुनरावृत्तिं कर्तुं तेऽद्यापि संकोचं न कुर्वन्ति।

किञ्चित्वर्षपूर्वं दिल्लीनगरे युवकसमारोहः आयोजितः। यस्मिन् भागं वोढुं भारतस्य विभिन्नभागैः छात्रप्रतिनिधयः आगताः तैः अनुशासनहीनतायाः समस्यायाः उपरि विमर्शः कृतः। अत्र निम्नलिखितकारणानां विवेचनं कृतम्—

1. दोषपूर्णा शिक्षापद्धतिः।
2. शिक्षकेषु छात्रेषु च पारस्परिकसम्पर्कस्याभावः।
3. विद्यालयाधिकारिभिः छात्राणां समस्यां प्रति उदासीनता।
4. विद्यालयेषु कक्षासु च छात्राणां संख्यायां वृद्धिः।
5. शिक्षितवर्गस्य निरुद्योगिता आर्थिकसमस्याश्च।
6. गृहस्य समाजस्य च दूषितवातावरणम्।
7. दूषितराजनीतेः प्रभावः।

उपर्युक्तेषु विचारेषु किञ्चित् विवेचनं **हुमायूँ-कबीर-महोदयैः** कथितकारणानामन्तर्गतं सञ्जातम्। अत्र तेषु कारणविषयेषु किञ्चित् शब्दकथनमनुपयुक्तं न भविष्यति, येषां विवेचनमुपरि न भवितुं शक्नुयात्। विद्यालयाधिकारिभिः छात्राणां समस्याः न ध्यायन्ते इति छात्राः स्वकीयावश्यकतायाः स्वीकरणाय, समस्यासमाधानाय च अनुशासनहीनतायाः साहाय्यं स्वीकुर्वन्ति। विभिन्नप्रकारस्य उद्धत (उद्दण्ड)-क्रियान्वयनमाध्यमेन विद्यालयाधिकारिणः स्वकीयं प्रत्याकृष्टान् कुर्वन्ति। गृहे समाजस्य दूषितवातावरणमपि छात्रेषु अनुशासनहीनतां वर्धयितुं पर्याप्तमात्रायां सहायकमस्ति। अस्माकं सहानुभूतिरहितानि गृहाणि बालकेषु

अपराधप्रवृत्तेः विकासाय प्रायः उत्तरदायीनि सन्ति। तदतिरिक्तमस्माकं समाजस्य क्लेश–ईर्ष्या–द्वेषपूर्णवातावरणमपि छात्रेषु दूषितभावनाविकासे सहायकमस्ति।

छात्रेषु अनुशासनहीनतायाः वर्धने राजनीतिः अतीवमहत्त्वपूर्णं भागं गृह्णाति। लोकतन्त्रीयव्यवस्थायां इयमावश्यकी वर्तते यत् छात्राः स्वकीयदेशस्य राजनैतिकव्यवस्थामवगन्तुं प्रयासं कुर्वन्तु यत् तस्याः सञ्चालनं केन प्रकारेण भवेत्, तस्याः काः समस्याः सन्ति, तद्विषयकदायित्वानि कानि ? सत्यमिदं यत् राजनैतिकरूपेण जागरूकः छात्रः निर्मातव्यः। परन्तु छात्राणां तत्र प्रवेशः न कारणीयः। परन्तु राजनैतिकदलानि छात्रान् स्वस्वार्थसिद्धये महत्त्वपूर्णानि साधनानि मन्यन्ते। तानि दलानि तेषामुपयोगं स्वेच्छानुसारं कुर्वन्ति, यद्यपि छात्रपरिषदः निर्माणं छात्रहिताय कृतमासीत्। वस्तुतः तथ्यमिदं वर्तते यत् राजनैतिकदलानि अस्याः परिषदः निर्वाचनेषु महत्त्वपूर्णभागं गृह्णन्ति। स्वार्थयुक्ता राजनीतिः छात्रेषु अनुशासनहीनतायाः वृद्धये महत्सहयोगं प्रदत्तवती। अस्मिन् सम्बन्धे **माध्यमिक–शिक्षा–आयोगेन** महत्त्वपूर्णः परामर्शः दत्तः। **आयोगस्य शब्देषु** ''यदि विद्यालयजीवनस्य राजनीतेः दूषितप्रभावेन संरक्षणमपेक्षितं तर्हि सप्तदशवर्षेभ्यः अल्पायुर्वर्गस्य बालकान् विवादपूर्णराजनीत्या दूरं स्थापयेत् तेषाञ्च निर्वाचनकार्येषु प्रयोगो न कार्यः। अतः एतदर्थमुपयक्तनियमाः निर्मिताः स्युः तैः विधिभिः सप्तदशवर्षेभ्यः अल्पायुर्वर्गस्य बालकाः राजनैतिकप्रचारस्य कार्येषु भागं वोढुं राजनैतिकदलैः तेषामुपयोगाय निषेधो भवेत्।'' अधुना पर्यन्तमेतादृशविधानस्य कृते प्रयासो न कृतः।

अनुशासनहीनताम् अपाकर्तुमुपायाः

अनुशासनहीनतासमस्यायाः दूरीकरणार्थं विभिन्नैः विद्वद्भिः विभिन्नाः परामर्शाः प्रदत्ताः। ते प्रमुखपरामर्शाः निम्नलिखिताः सन्ति—

1. शिक्षकाणाम् आर्थिकं सामाजिकं च स्थितिं सुवर्धयितुं महत्त्वपूर्णप्रयासः कर्त्तव्यः।
2. शिक्षकाणां छात्राणां च मध्ये व्यक्तिगतसम्पर्कस्थापनार्थमुचितां व्यवस्थां कुर्यात्।
3. शिक्षापद्धतेः दोषान् अपाकर्तुं विश्वविद्यालयशिक्षा–आयोग–माध्यमिकशिक्षा आयोग–कोठारी–आयोगप्रभृतिभिरतीव महत्त्वपूर्णाः परामर्शाः प्रदत्ताः सन्ति। तादृशपरामर्शानुसारं शिक्षायाः स्वरूपं निर्मीयेत। शिक्षायाश्च व्यावहारिकपक्षेषु बलमपि दातव्यम्।

4. परीक्षापद्धतेः सुवर्धनं कर्त्तव्यम्।
5. विद्यालयाधिकारिणां छात्राणाञ्च समस्यां प्रति सहानुभूतिपूर्णदृष्टिकोणं धारयेत्।
6. विद्यालयस्य वातावरणं नैतिकं सौहार्दपूर्णं च निर्मीयेत येन छात्रेषु उच्चादर्शेषु निष्ठा तेषाञ्चानुसारं कार्यकरणस्य भावनायाः विकासः कर्तुं शक्यते।
7. विद्यालयस्य गृहेण समाजेन च घनिष्ठसंबन्धं स्थापयेत्।
8. छात्रान् स्वकीयजीविकोपार्जनस्य योग्यतानिर्माणाय कार्यानुभव-श्रममहत्त्व-व्यावसायिकशिक्षासु बलं दातव्यम्, येन ते स्वभाविजीवनस्य नैराश्यात् असन्तोषात् च रक्षणे समर्थाः भवेयुः।

हुमायूँ कबीरमहोदयस्य मतानुसारं शिक्षकाणां नेतृत्वं स्थापयेत्। एतदर्थं योग्यशिक्षकाणां नियुक्तिः, तेषां वेतनमाने वृद्धिः, तेषां सामाजिक-स्तरोन्नयनं च स्यात्। सामान्यजनानां दृष्ट्या तेषामुच्चस्तरस्य निर्माणार्थं महत्त्वपूर्णानि कार्याणि कुर्युः। अस्मिन् सन्दर्भे भारतसर्वकारैः एकः प्रयासः कर्तुं शक्यते यत् उच्चस्तरनिर्माणे सहायताप्रदानमिति। राष्ट्रपतिना राष्ट्रपतिभवने प्राथमिकविद्यालयानां शिक्षकाणां स्वागताय विभिन्नानि आयोजनानि क्रियन्ते। एतादृश-उत्सवानामायोजनं प्रत्येकराज्ये मुख्यमन्त्रिणा कर्त्तव्यम्। एतदतिरिक्तं तेभ्यः स्वशैक्षिकयोग्यतायां वृद्धिकरणार्थं सुविधाप्रदानं करणीयम्। एतत्साकमेव व्यक्तिगतप्रबोधनाप्रथायाः प्रतिषेधः भवेत्।

अनुशासनहीनतामपाकर्तुं **श्री जी.के. भोंसले-महोदयद्वारा 1964** तमे वर्षे 'एका राष्ट्रिय-अनुशासनयोजना' (National Discipline Scheme) प्रारब्धा, यस्याः अनुसारं बालकानां 'शारीरक-विकासे बलं स्यात्। इयं योजना भारतीयसंघस्य अनेकराज्येषु पञ्जाब-गुजरात-महाराष्ट्र-उत्तरप्रदेश-दिल्ली-मध्यप्रदेशादिषु विद्यालेषु प्रारब्धा तु वर्तते परन्तु एतां प्रति उत्साहस्य न्यूनता दृश्यते।

पुनरावृत्ति-प्रश्नाः

1. अनुशासनेन भवता किमवगम्यते ? स्पष्टयत।
2. विद्यालयानुशासनसम्बन्धिनीनाम् आधुनिकानां परम्परागतानाञ्च धारणानां भेदं स्पष्टयत।

3. वैयक्तिके सामाजिके च जीवने शासनस्य किं महत्त्वं वर्तते ? सोदाहरणं स्पष्टयत।
4. उत्तमानुशासनस्थापनार्थं केषां सिद्धान्तानां स्थापनमावश्यकमस्ति ?
5. अनुशासनस्थापने विद्यालयपरम्परायाः पारस्परिकसहयोगस्य च महत्त्वं स्पष्टयत।
6. विद्यालये नैतिकशिक्षायाः व्यवस्थया अनुशासनस्थापने का सहायता मेलिष्यति ? सोदाहरणं स्पष्टयत।
7. अनुशासनस्थापने शिक्षकाभिभावकसहयोगः कथं लाभप्रदो भविष्यति ? स्पष्टयत।
8. सदाचारणार्थं पुरस्काराणां महत्त्वस्य विवेचना करणीया।
9. पुरस्कारप्रदानसमये काः काः वार्ताः आवश्यकाः सन्ति ?
10. 'दण्डः एकः आवश्यकः दोषः वर्तते' इति कथनं कथं सङ्गच्छते ?
11. ''विद्यालयानुशासनस्य स्थापनायां पुरस्कारः दण्डश्च इति द्वयोः न्यायोचित-प्रयोग आवश्यकः वर्तते।'' अस्य कथनस्य व्यावहारिकपरामर्शसहिता विवेचना करणीया।
12. अनुशासनहीनतायाः कानि कानि रूपाणि सन्ति ?

लेखार्थः प्रश्नः

भारतीयविद्यालयेषु प्रसरन्त्याः अनुशासनहीनतायाः कानि कारणानि सन्ति ? तानि अपाकर्तुं भवान् कान् उपायान् कार्ये आनेष्यति किमर्थञ्च ? सतर्कं लिख्यताम्॥

19

विद्यालय-सङ्कुलम्

(School Complex)

"The idea of school complexes was mooted as an innovation in the school education system by Education Commission (1964-66) which observed that such an organization would have several advantages in helping to promote educational advances. Firstly, it would break the benumbing isolation under which each school functioned; it would enable a small group of schools working in a neighborhood to make a comparative effort to improve standard; and it would enable the state education departments to devolve authority to functional levels."**A Report of the Committee for Review of National Policy on Education, 1986.**

शिक्षा आयोगेन (1964-66) स्वप्रतिवेदनेऽयं परामर्शो दत्तः यत् स्तराणामुन्नतौ आवश्यकं यत् शिक्षायाः विभिन्नावस्थासु समन्वयः स्यात्, तादृशी एकान्तता च नष्टा स्यात् यत्र शिक्षासंस्थाः कार्यरताः सन्ति। अनया दृष्ट्या विश्वविद्यालयाः महाविद्यालयाश्च विभिन्नैः उपायैः माध्यमिकविद्यालयानां कार्यदक्षतावर्धने सहायकाः भवेयुः। विद्यालयसंकुलः निर्मितः भवेत्। प्रत्येकस्मिन् संकुले एको महाविद्यालयः पार्श्वे च प्राथमिकोच्चप्राथमिकविद्यालयाः भवेयुः। अनेन प्रकारेण संकुले समस्त-विद्यालयानामेकः सहकारिसमूहः भवेत्, यः सुवर्धनस्य चेष्टायां संलग्नः स्यात्।

चतुर्थयोजनायाः प्रारम्भे देशे माध्यमिकविद्यालयानां संख्या 26,000 आसीत्, यस्मिन् 14000 विद्यालयाः ग्रामीणक्षेत्रेष्वासन्। तदतिरिक्तं ग्रामीणक्षेत्रेषु 65,000 उच्चप्राथमिकविद्यालयाः, अपि च 3,60,000 अवरप्राथमिकविद्यालयाः आसन्। तस्मिन् समये 5 तः 10 पर्यन्तं योजनस्य त्रिज्यान्तर्गतग्रामीणक्षेत्रे एकमाध्यमिक-विद्यालयः, 5 उच्चप्राथमिकविद्यालयाः, अवरप्राथमिकविद्यालयाश्च 28 आसन्। एतेषु शिक्षकाणां संख्या 80 तः 100 मध्ये आसीत्। शिक्षा-आयोगः एतादृशीं

स्थितिं मनसि कृत्वाऽकथयत् यत् अयमतिलघुसमुदायः वर्तते, यः सरलया एकस्य उपागमस्य सीमायां कार्यं कर्तुं शक्नोति। अयं नियोजनस्य मार्गप्रदर्शनस्य व कृतेऽपि सशक्तः वर्तते। यतोऽस्मिन् समूहे 5 तः 6 पर्यन्तं प्रतिशतं स्नातकाः भविष्यन्ति। तदतिरिक्तं प्रत्येकं माध्यमिकविद्यालयाय नवीनसहायकोपकरणानि यथा-दूरवेधिनी (प्रोजेक्टर), उत्तमपुस्तकालयः, निर्मला प्रयोगशाला च इति व्यवस्था सरला भविष्यति। अयं माध्यमिकविद्यालयः घटकरूपेण कार्यं करिष्यति यः तानि उपकरणानि स्वनिकटस्थेषु विद्यालयेषु कार्याय उपलम्भयितुं शक्ष्यति। माध्यमिकविद्यालयस्य मध्यस्थितोऽयं विद्यालयसमुदायः शैक्षिकसुवर्धनस्य न्यूनतमक्षमतायै परिपूर्णः घटकः भविष्यति। तदनुसारञ्च एतेषां विकासः कर्तुं शक्ष्यते।

विद्यालय-संकुलोद्देश्यानि

शिक्षायोगः विद्यालयसंकुलस्य निर्दिष्टेषु उद्देश्येषु बलमददात्—

1. विद्यालयानां पृथक्त्वदूरीकरणं, लघुसहकारिसमूहानाञ्च कार्यकरणे तेषां साहाय्यप्रदानम्।
2. अधिकारोऽयं शिक्षाविभागे निहितः स्यादिति तु सम्भवत्येव।

शिक्षा-आयोगः लिखति- वयं यस्याः स्थितेः कल्पनां कुर्मः। तस्यां जनपदशिक्षा-अधिकारिणः प्रत्येकविद्यालयसंकुलेन विशेषसम्पर्को भविष्यति, यथासम्भवञ्च सः विद्यालयसंकुलं घटकं मत्वा कार्यं करिष्यति। विद्यालयसंकुलं स्वयमेवैतादृशं प्रदत्तकार्यं करिष्यति यः शिक्षाविभागस्य निरीक्षणाधिकारिभिः क्रियते। स्वसीमायाञ्चागतानां विद्यालयानां सम्बन्धेषु आवश्यकं क्रियान्वयनं करिष्यति। अस्मिन् कार्यक्रमे विद्यालयानां शक्तिः वर्धिष्यते, ते स्वतन्त्रेण कार्यं कर्तुं शक्ष्यन्ते, पद्धतिञ्च स्थितिस्थापकतां गतिशीलां च कर्तुं ते सहायकाः भविष्यन्ति।

विद्यालयसंकुलं स्वकार्यं केन प्रकारेण करिष्यति ?

शिक्षा-आयोगानुसारमस्मिन् कार्यक्रमे माध्यमिक-प्राथमिक-विद्यालयानां शृङ्खलनं द्वयोः चरणयोः भविष्यति। प्रथमचरणे उच्च-प्राथमिकविद्यालयः 10 अवरप्राथमिकविद्यालयैः संश्लिष्टः भविष्यति, येन सर्वे मिलित्वा एकं शैक्षिकसौविध्यानां संकुलं निर्मातुं शक्नुवन्ति। उच्चप्राथमिक-विद्यालयस्य प्रधानाचार्यः स्वाधिकारक्षेत्रे अवरप्राथमिक-विद्यालयविस्तारसेवायाः व्यवस्थां करिष्यति, तस्य

च उत्तरदायित्त्वं भविष्यति यत् ते सम्यग्रीत्या कार्यं कुर्युः। अस्योद्देश्यस्य कृते तस्याध्यक्षतायामेका समितिः भविष्यति, यस्य क्षेत्रगतसमस्तावरप्राथमिकविद्यालयानां प्रधानाध्यापकाः सदस्याः भविष्यन्ति। इयं समितिः समस्तविद्यालयानामेकसंकुलवत् विकासार्थं योजनाकार्यार्थञ्च उत्तरदायीनी भविष्यति।

द्वितीयचरणे माध्यमिकविद्यालयस्य प्रधानाध्यापकाध्यक्षतायामेका समितिः भविष्यति, यस्य क्षेत्रगतसमस्त–उच्च–अवर–प्राथमिकविद्यालयानां मुख्याध्यापकाः सदस्याः भविष्यन्ति, यः कार्यस्य योजनां निर्मास्यति, क्षेत्रगतानाञ्च सर्वेषां विद्यालयानां पथप्रदर्शनं करिष्यति, येन माध्यमेन प्रत्येक–उच्च–प्राथमिकविद्यालयसंकुलं स्वकार्यसञ्चालनं करिष्यति। अध्यापकानां विद्यालयानाञ्चायं समुदायः स्वकार्यक्रम–निर्माणार्थं स्वतन्त्रः भविष्यति। परन्तु सः (समुदायः) निरीक्षकाधिकारिवर्गस्य मार्गदर्शनानुसारेणैव कार्यं करिष्यति।

इदं सङ्घटनं शैक्षिकप्रगतौ अनेकरूपेण सहायकं भविष्यति। इदं तदेकान्ततां समापयिष्यति यत्र अधुना प्रत्येकं विद्यालयः कार्यं करोति। अस्य क्षेत्रस्य समीपस्थानां सर्वेषां विद्यालयानां समुदायस्य स्तराणां सुवर्धने सहकारिप्रयासः योग्यः भविष्यति। अनया शिक्षाविभागं प्रत्यधिकारसमर्पणसमये तेषां दुष्प्रयोगस्यापेक्षया न्यूनाशङ्का भविष्यति, अस्याश्च स्वतन्त्रताया उपयोगार्थं कार्यकारिस्तरेऽपेक्षितप्रतिभापुञ्जस्यापि व्यवस्था भविष्यति।

विद्यालयसङ्कुलस्य व्यवस्थां प्रभावपूर्णां निर्मातुं सङ्कुलस्य कृतेऽधिकाराः दायित्त्वानि च समर्पिताः भवेयुः एतेषु निम्नलिखिताः भविष्यन्ति—

(1) मूल्याङ्कनस्योत्तमविधीनां प्रारम्भे, तथा एककक्षातः द्वितीयकक्षायां, एकस्तरस्य विद्यालयात् द्वितीयस्तरस्य विद्यालये वा बालकानामुन्नतेः नियमनिर्धारणस्य कृते विद्यालयसङ्कुलस्य उपयोगः घटकरूपेण क्रियेत।

(2) एतादृशं सौकर्यं सज्जासाधनानि च यः प्रत्येकविद्यालये प्रदातुं न सक्षमः तदा तस्य सङ्कुलस्य समस्तविद्यालयानां कृते सामूहिकरूपेण कर्तुं शक्यते।

(3) सामान्यतया शिक्षकाणाम् अन्तः–सेवाशिक्षायाः विशेषतया चाल्पयोग्यताप्राप्तशिक्षकाणां स्तर–उन्नतौ विद्यालय–संकुलस्य महत्त्वपूर्णं दायित्त्वं भविष्यति। अनेन उद्देश्येनाध्यापकानामुपयोगाय एकस्य

चलत्पुस्तकालयस्य व्यवस्था क्रियेत। दीर्घावकाशेषु शिक्षकसमूहानां कृते संक्षिपतविशिष्टपाठ्यक्रमान् चालयेयुः।

(4) प्रत्येकं विद्यालयः स्वशिक्षावर्षस्य कृते स्वकार्यस्य विस्तृत–योजनां रचयेत्। विद्यालयसंकुलम्, अस्याः योजनायाः सम्पूर्तये महत्त्वपूर्णं प्रयासं कुर्यात्।

(5) अभिचितविद्यालयसंकुलानामुपयोगः नवीनपाठ्यपुस्तकानां शिक्षक–संदर्शिकाणाम्, अध्यापनसाधनानाञ्च परीक्षा–मूल्याङ्कनयोः कृते भवितुमर्हति।

विद्यालयसंकुलावधारणायाः क्रियान्वयनात्पूर्वं शिक्षकाणां सावधानपूर्वकमेतदर्थं निर्माणं स्यात्, साकमेव शिक्षकाणां प्रशिक्षणमवश्यमेव स्यात्। शिक्षा–आयोगेनानुशंसा कृता यत् इमां योजनां पूर्वं प्रत्येकं राज्यस्य चितजनपदेषु प्रायोगिकपरियोजनायाः रूपेण प्रारब्धा स्यात्। 1967 तमे वर्षे सर्वप्रथमं राजस्थानप्रदेशे विद्यालय–संकुलस्यावधारणा क्रियान्विता। तत्पश्चात् पञ्जाब–उत्तरप्रदेश–तमिलनाडु–आन्ध्रप्रदेशेषु 1970 तमे वर्षे सञ्चालिता। पञ्जाबराज्यस्य शिक्षाविभागः द्वित्रान् निम्नमाध्यमिकविद्यालयान् माध्यमिकविद्यालयैः सम्बध्य विद्यालयसंकुलस्य निर्माणमकरोत्। अस्य कार्यक्षेत्रं समयानुसारं वेतनवितरणपर्यन्तं निर्धारितमकरोत्। 1977–78 तमे वर्षे महाराष्ट्रराज्ये इयमवधारणा प्रारब्धा। अधुना केवलं महाराष्ट्रप्रदेशे योजना वर्तते अन्यप्रदेशेषु च इयं योजना समाप्ता वर्तते[1]।

1986 तमे वर्षे राष्ट्रियशिक्षानीतेः क्रियान्वयनाय कार्ययोजना (Plan of Action-POA) निर्मिता। इयं कार्ययोजना विद्यालय–संकुलयोजनां क्रियान्वेतुमकथयत्। परन्तु पुनरीक्षणसमितिः (1990) या आचार्यराममूर्तिमहोदयस्याध्यक्षतायां नियुक्ताऽऽसीत्, एतत्स्थाने शैक्षिक–संकुलस्यावधारणाया अनुशंसां अकरोत्। इयं समितिः शैक्षिकसंकुले स्थानीयमहाविद्यालयः, उच्च–माध्यमिकविद्यालयः, माध्यमिकविद्यालयः, निम्नमाध्यमिक–विद्यालयः, प्राथमिकविद्यालयश्चेत्यादयः भवेयुरिति परामर्शम् अदात्। एते शैक्षिकसंकुलाः पञ्चायतराज्यसंस्थाभिः सम्बद्धाः भविष्यन्ति। समितेरयमपि परामर्शोऽऽसीत् यत् तस्य क्षेत्रस्य विश्वविद्यालयोऽस्य

---

1. Report of the Committee for Review of National Policy on Education,1986, P.326

संकुलस्य साहाय्यं करिष्यति। शनैः शनैः एतानि शैक्षिकसंकुलानि पञ्चायतराज्याधीनानि भविष्यन्ति।

1992 वर्षस्य कार्ययोजनायां शैक्षिकसंकुलानां (Educational Complexes) प्रोन्नतये बलं आसीत्। अनया योजनया शिक्षकेषु व्यावसायिकतावर्द्धने बलं प्रदत्तम्। विद्यालय-संकुलं क्षेत्रायोजनस्य निम्नतमव्यावहारिकघटकरूपेण कार्यं करिष्यति, 8 तः 10 पर्यन्तं संस्थानानामेकः समूहः निर्मास्यते, यस्मिन् समूहे विभिन्नाः संस्थाः संसाधनानां कार्यकारकाणां, साधनानां, शिक्षा-सहायकोपकरणानाञ्च विनिमयं कृत्वा परस्परसहयोगः सम्भवति, तेषाञ्चोपयोगः सहभागिताधारेण कर्तुं शक्यते।

अष्टम्यां योजनायां प्रायोगिकाधारेण शैक्षिकसंकुलरूपेण जनपदे संस्थानां कार्यशृङ्खलानिर्माणस्य प्रयासः भविष्यति। केन्द्रसर्वकारः द्वयोः वर्षयोः यत्र कुत्रापि संकुलारम्भाय अनुकूलवातावरणं वर्तते प्रायोगिकरूपेणायोजनार्थं दिशानिर्देशं करिष्यति। शैक्षिकसंकुलविकाससमये जनपद-शिक्षा-प्रशिक्षणसंस्थान (DIET) शिक्षक-प्रशिक्षणमहाविद्यालयाः, भारतीयप्रौद्योगिकी संस्थाः, पौलिटेक्नीकसंस्थाः इत्यादिभ्यः विशेषरूपेण समुदायपौलिटेक्नीकसदृश-संस्थाभ्यः सहयोगः प्राप्येत।

पुनरावृत्ति-प्रश्नाः

1. विद्यालय-संकुलावधारणां स्पष्टयत उद्देश्यानि च वर्णयत।
2. शिक्षा-आयोगेन विद्यालय-संकुलस्य क्रियान्वयनस्य कृते के के विचाराः प्रकाशिताः सन्ति ?

लेखार्थः प्रश्नः

विद्यालय-संकुलस्योपरि एकः संक्षिप्तनिबन्धः लेख्यः।

□□□

20

संस्थागतनियोजनम्

(Institutional Planning)

''I have a thesis about the manner in which a revolution in Indian education can come about. I have no hope of carrying a revolution from Delhi to the thousands of schools. That is a small point impossible, party because no revolution can be born in Delhi and partly because even if such a revolution is born there, it will die by the time it reaches the remotest village. But there is every possibility of carrying a revolution from the village school to Delhi. In other words, if we get some creative thought at the centre, the changes of this creative thought reaching the remote school and doing something using there are rare. But if teachers are trying to face their problems creativity and originally, some new ideas might be born which might travel up to Delhi and fertilize the whole field of education. If this faith has some justification, I believe it has, we have to find a method wherein freedom can be given to teachers who want to do something so that they can become effective.''

J.P. Naik

सामाजिकजीवने नवीनधारणाः तदैव प्रविशेयुः यदा तस्य समाजस्य शिक्षाप्रणाली गतिशीला भवति। गतिशीलशिक्षा- प्रणाल्येव समस्य परिस्थितीनामनुकूलने समर्था भवति। सा प्रगतिं सम्भावयति। अस्मिन् सम्बन्धे शिक्षा-आयोगस्य (1964-66) उल्लेखनीयाः शब्दाः सन्ति—''शिक्षाप्रणाली निरन्तररूपेण आत्मानं नवीनां न करोति चेत् सा समयात्परिस्थितिभ्यः दूरं भवति, प्रगतिञ्च रोधयति, यतः सा

कार्यप्रणाल्युद्देश्ययोः विकासस्य नवीनयाचनानां (Demand) आवश्यकतानाञ्च मध्ये परिमाणात्मक-गुणात्मकरूपेण भेदं करोति''।

अतः समाजस्य पुनर्निर्माणाय विकासाय च शिक्षा पुनर्घटिता विकसिता च भवेत्। शिक्षासमाजस्यावश्यकतानां याचनानाञ्चानुरूपं तदैव भवितुं शक्ष्यति यदा ते विद्यालयाः संस्थाश्च स्वकीयेषु गुणात्मकं मात्रात्मकञ्च परिवर्तनं करिष्यन्ति। संस्थाभिः स्वकीयस्य विकासायाभिवृद्धये च ये कार्यक्रमाः योजनाः वा रचयन्ति। अतः शैक्षिक-नियोजनं केन्द्रपर्यन्तमेव सीमितं न भवेत् अपि तु शैक्षिकनियोजनं संस्थां यावत् प्राप्नुयात् अर्थात्, संस्थात्मकैककं विद्यालयात्मकैककं वा यावत् नियोजनमानीय व्यापकरूपेण शिक्षायाः पुनारचनासङ्घटनयोः आवश्यकतां पूरयितुं शक्नुमः।

संस्थायाः विद्यालयस्य वा नियोजनस्यार्थः
(Meaning of Institutional Planning)

संस्थागतनियोजनं कस्यापि संस्थायाः निर्मितकार्यक्रमाणां विवरणं वर्तते। अत्र तेषां कार्यक्रमाणां क्रियाकलापानाञ्च विवरणं वर्तते, यत् विद्यालयः संस्था वा एकस्मिन् सत्रे कर्तुमिच्छति। **प्रो. एम. बी. बुचमहोदयेन** संस्थायाः नियोजनमनेन प्रकारेण परिभाषितम्—

''संस्थागतयोजना तत्कार्याणां समुच्चयो भवति यानि च संस्थया स्वानुभूतावश्यकताभिः उपलभ्यमानोपलप्स्यमान-संसाधनानां ज्ञाऽेन निर्मितानि भवन्ति। संस्था एतेषां कार्यक्रमाणां निर्धारणं विद्यालयस्तरव्यवहारयोः उन्नतये भाविविकासार्थं च करोति।''[1]

इयं योजना अल्पावधेरपि भवितुं शक्नोति दीर्घावधेर्वा। इयं योजना विद्यालये समुदाये चोपलब्धानां संसाधनानामधिकतम-उपभोगस्य सिद्धान्तमाधृत्य भवति।

---

1. "An institutional plan is a set of programmes prepared by an institution on the basis of its felt needs and the knowledge of its resources – available and likely to be available – with a view to improve the school standards and practices and with a view to provide for the future development of the institution." **– M.B. Buch.**

उपर्युक्तविवेचनेन निम्नलिखिता: वार्ता: स्पष्टा: भवन्ति—

(1) संस्थागतयोजना शिक्षाया: व्यापकोद्देश्यपूर्णस्य साधनं वर्तते।

(2) संस्थागतयोजनाया: निर्माणार्थं मानवीयभौतिकसंसाधनानां ज्ञानमावश्यकमस्ति।

(3) उपलब्धसंसाधनानां, यानि संस्थासु समुदायेषु चोपलब्धानि सन्ति, आधिक्येन प्रयोग: भवेत्।

(4) इयं योजना दीर्घकालिकापि भवितुं शक्नोति, अल्पकालिकापि।

संस्थागतनियोजनस्य प्रमुखविशेषता:

संस्थागतनियोजनस्य प्रमुखविशेषता: निम्नलिखिता: सन्ति—

(1) आवश्यकताधारिता (Need based)—संस्थागतयोजना संस्थाविशेषस्य कार्यकर्तृभि: विद्यालये अनुभूतावश्यकतानाम्, आधारेण निर्मेया। इमा: आवश्यकता: विद्यालयसङ्घटनं, पाठ्यक्रम:, पाठ्यसहगामिक्रिया: इत्यादिक्षेत्रेण सम्बद्धा: भवितुं शक्नुवन्ति। अध्ययनाध्यापनकार्यक्रमेषु, कक्षाशिक्षणे, शिक्षणविधिषु, शिक्षकाणां व्यावसायिकविकासे, पर्यावरणपरिस्थितौ च सुवर्धनमित्यादिपक्षेण सम्बन्धितावश्यकता: यासां प्रत्यक्षप्रभाव: छात्राणामधिगमने जात:, संस्थागतनियोजनस्य विस्तारक्षेत्रे आगच्छन्ति। अत: संस्थागतयोजना अनुभवजनितावश्यकतासु आधारिता भवेत्।

(2) विशिष्टता (Specificity)—प्रतिसंस्थं स्वयमेव एक: घटक: वर्तते, तस्य च घटकस्य स्वकीयं वैशिष्ट्यं भवति। साकमेव तस्य घटकस्य स्वविशेषसमस्या: भवन्ति। अत: संस्थागतयोजना संस्थाविशेषस्य योजना भवति। सा योजना समस्तसंस्थाभ्य: उपयोगिनी भवितुं नार्हति।

(3) अधिकतम-उपयोगिताया: सिद्धान्त: (Principle of Optimum Utilisation)—संस्थागतयोजना व्यय-उन्मुखी (expenditute oriented) नैव भवति, अपि तु संस्थायामुपलब्धसंसाधनानाम् अधिकतम-उपयोग- सिद्धान्ताधारिता भवति। योजनानिर्माणसमयेऽस्य तथ्यस्यानुमानं क्रियते यत् कियत् कथञ्च संसाधनानि संस्थायामुपलब्धानि सन्ति ? समुदायेन कियत् सीमापर्यन्तमतिरिक्तसंसाधनानि प्राप्तुं शक्यन्ते ? एतेषामधिकतम-उपभोग: केन प्रकारेण कर्तुं शक्यते ? अत: संस्थागतयोजना संस्थाया: सामर्थ्यं शक्तिं चाधारिता भवति।

(4) मानवीयप्रयासवर्धनम् (Augmenting Human Efforts)—संस्थागतनियोजनं मानवीयभौतिकसंसाधनानामधिकाधिकमात्रायामुपयोगकरणे बलं प्रददाति, तथैव मानवीयप्रयासवर्धनेऽपि बलं ददाति। संस्थागतनियोजनं तेषां कार्यक्षमता, अनुभवः, कल्पनाबोधश्चेत्यादीनां वर्धने बलं ददाति।

(5) उद्देश्योन्मुखम् (Goal Oriented)—संस्थागतनियोजनं सोद्देश्यं भवति। अस्य नियोजनस्य साध्यं शिक्षालक्ष्याणां प्राप्त्यर्थं वर्तते। यानि लक्ष्याणि गुणात्मक-मात्रात्मकरूपेण द्विधा भवति। एतेषां प्राप्तिः संस्थागतनियोजनस्य साध्यं वर्तते।

(6) सहकारी (Co-operative)—संस्थागतनियोजनं स्वप्रकृतौ सहकारि भवति। अस्मिन् सर्वेषु स्तरेषु सम्बद्धव्यक्तीनां साधनानाञ्च सहभागिता प्राप्यते। अस्मिन् सर्वेषां भूमिकाः सम्मिलिताः भवन्ति।

(7) देशीयप्रदेशीयशैक्षिकनीतीः प्रतिबिम्बयति (Reflects the State and National Educational Policy)—संस्थागतनियोजने स्वदृष्ट्या सहैव राष्ट्रस्य राज्यस्य च शैक्षिकनीतीरपि प्रतिबिम्बिता जायते। यतः संस्थाः राष्ट्रिय-राज्यीयशैक्षिकनीतीनां तेषाञ्चोद्देश्यानां पूरणे घटकरूपेण वर्तते।

(8) नमनीयता (Flexibility)—संस्थागतनियोजने विद्यालयानां परिस्थितेः याचनायाश्चानुसारं स्वप्रयासकार्यक्रमनिर्माणस्य स्वतन्त्रता भवति। इयं स्वतन्त्रता संस्थागतनियोजनं काठिन्यस्य सीमायाः बहिः आनयति। अस्मिन् परिष्कारस्य सुवर्धनस्य, विकासाय वा अवकाशाः मिलन्ति। एतादृशं तस्य नमनीयताकारणेन सम्भवति।

(9) समुदायस्य समर्थनम् (Community Support)—संस्थागतनियोजनं समुदायाधारितं भवति। समुदायस्य सहयोगेन संस्था स्वप्रयासानां पूरणे सफला भवति। एतयोः द्वयोः (संस्था, समुदायश्च) स्वस्थसम्बन्धाः स्थापिताः भवन्ति।

(10) लोकतान्त्रिक-संरचना (Democratic set-up)—संस्थागतनियोजनं लोकतान्त्रिकं भवति। इदं प्रतिनिधित्वसहभागिता, सहकारिता, पारस्परिकविनिमयः इत्यादीन्याधृत्य भवति। अस्मिन् सामूहिकनिर्णयोपरि बलं दीयते।

अस्य नियोजने क्रियान्वयने च सर्वासां व्यक्तीनां सहभागितायां बलं दीयते। संस्थागतनियोजनं सुवर्धनं, विकासश्चेति द्वयोरपि बलं ददाति।

संस्थागतनियोजनस्य पदानि

संस्थागतनियोजनार्थं कोऽपि निश्चितप्रारूपस्य निर्माणं कर्तुं नैव शक्नोति, यतः प्रतिसंस्थं स्वविशिष्टव्यक्तित्वं भवति। नियोजनसमये निम्नवार्ताः ध्यातव्याः—

1. संस्थाविशेषस्य ऐतिहासिकपृष्ठभूमेः अवलोकनम्।
2. संस्थाविशेषस्य दर्शनस्याध्ययनम्।
3. संस्थायाः समस्यानां ज्ञानप्राप्तिः।
4. संस्थायाः आवश्यकताः ज्ञात्वा तेषां मूल्याङ्कनम्।
5. संस्थायाः संसाधनानां सर्वेक्षणम् तद्विषये अनुमानिकं ज्ञानम्।
6. संस्थायाः विकासयोजनायाः निर्माणम्। अस्य निर्माणसमये ध्यानयोग्याः वार्ताः—
    - I. समस्यायाः स्पष्टीकरणम्,
    - II. उद्देश्यनिर्धारणम्,
    - III. विधि-निर्धारणम्,
    - IV. शैक्षिकसहायकसामग्री-निर्धारणं तस्य च प्राप्तिसाधनानां निर्धारणम्,
    - V. समयावधेः निर्धारणम्।
    - VI. योजनायाः क्रियान्वयनम्।
    - VII. मूल्याङ्कनञ्च।

संस्थागतनियोजने प्राचार्यस्य महत्त्वपूर्णभूमिका वर्तते। प्राचार्यः सा शृङ्खला वर्तते, या नियोजने क्रियान्वयने च विभिन्नशृङ्खलानां योजनस्य कार्यं करोति। स एव स्वसहयोगिषु आस्थां विश्वासञ्च जनयति। संस्थागत-नियोजनस्य सफलता तस्य भूमिकायाः उपरि निर्भरा भवति। यदिः सः प्रत्येकचरणे सहयोगिमित्रं, मार्गदर्शकः, दर्शनिकश्चित्येवं भूमिकायाः निर्वाहः करोति तर्हि संस्था विकासस्य पथि अग्रसरा भविष्यति।

पुनरावृत्ति-प्रश्नाः

1. संस्थागतनियोजनस्य अर्थं महत्त्वञ्च स्पष्टयत।
2. संस्थागतनियोजनस्य विभिन्नाः विशेषताः काः काः सन्ति ?
3. संस्थागतनियोजनसमये केषु-केषु तथ्येषु ध्यानं दद्यात् ?

लेखार्थः प्रश्नः

संस्थागतनियोजनस्य अर्थं स्पष्टयन् विशेषताः वर्णयत।

❏❏❏

पञ्चमः खण्डः

विद्यालय-सहायक-सेवाः

(SCHOOL AUXILIARY SERVICES)

- शारीरकशिक्षायाः अर्थः तस्याश्च कार्यक्रमः
- स्वास्थ्यशिक्षायाः अर्थः, तस्याश्च कार्यक्रमः
- सन्तुलिताहारः तेषाञ्च निर्माणकतत्त्वानि
- विद्यालये निर्देशनकार्यक्रमाः

''शारीरकशिक्षा उत्तमनागरिकतायाः स्वास्थ्यस्य च उन्नतेः एकं महत्त्वपूर्णं साधनमस्ति।''

—Nixon & Cozens.

21

शारीरकशिक्षायाः अर्थः तस्याश्च कार्यक्रमः

(Meaning of Physical Education And its Programme)

''The physical welfare of the youth of the country should be one of the main concerns of the state, and any departure from the normal standards of physical well-being at this period of life may have serious consequences.''

– Secondary Education Commission.

मानवानामितिहासावलोकनेन सर्वेषु मानवसमाजेषु येन-केन प्रकारेण शारीरकप्रशिक्षणस्य शारीरकशिक्षायाः वा व्यवस्था-अवश्यमासीदिति ज्ञायते। इयं शिक्षा आयोजितरूपेण प्रत्यक्षरूपेण चाकस्मिकरूपेण वा आसीत्। पूर्वमायोजितशारीरकशिक्षा आखेट-क्रीडा, युद्धकला चाधिगमनेन सम्बद्धाऽऽसीत्। आकस्मिकरूपेण प्रदत्ता शारीरकशिक्षा क्रीडया कार्येण च सम्बद्धाऽऽसीत्। सर्वप्रथमं यवनाः शारीरकशिक्षायाः समुचितकार्यक्रमाणामावश्यकतामनुभूय ते शैक्षणिककार्ये शारीरकशिक्षायाः महत्त्वं प्राददुः। एकोनविंशतिशताब्द्यां यदा जर्मन-स्वीडन्-अन्ययूरोपीयदेशानां शिक्षाप्रणालीनां विकासः सञ्जातः, तदा सङ्घटितशारीरकशिक्षायाः आवश्यकताविषयप्रारम्भिकं कार्यमारब्धम्। तत्समयात् सङ्घटित-शारीरकशिक्षायाः आवश्यकता प्रतिदिनं वर्धिता अभूत्। अस्यामावश्यकतायां निम्नलिखितौ द्वौ विषयौ मुख्यौ स्तः—

(अ) स्वविकासस्य सन्दर्भे मानवस्य प्रकृतिः।

(ब) यन्त्रीकरणयुगे मानवास्तित्वस्य परिवर्तितपरिस्थितयः।

शारीरकशिक्षायाः अर्थः

प्रायः शारीरकशिक्षायाः अर्थः मानवशरीरस्य सर्वाङ्गानां विकासस्य स्थितिरेव गृहीता। परन्तु अयं दृष्टिकोणः अतीव संकुचितो वर्तते। अस्मिन् दृष्टिकोणे शारीरकशिक्षा शरीरनिर्माणपर्यन्तं सीमिता, परन्तु वास्तविकरूपेण शारीकशिक्षा शारीरकनिर्माणम्

यावत् सीमिता नास्ति अपि तु उत्तमनागरिकतायाः स्वास्थ्यस्य चोन्नतेः साधनभूतास्ति। अत्र स्वास्थ्यस्यार्थः शारीरक-मानसिकोभयप्रकारयोः स्वास्थ्येन सहसम्बन्धः वर्तते। वस्तुतः ''शारीरकशिक्षा, सम्पूर्णशिक्षाप्रक्रियायाः पर्यायः वर्तते। या व्यवसायक्रियाः तेन च सम्बद्धप्रतिक्रियासु व्यक्तिषु च एतासां प्रक्रियाणां परिणामस्वरूपभूतैः परिवर्तनैः सम्बद्धा वर्तते।''[1] अतः वयं वक्तुं शक्नुमः यत् शारीरकशिक्षा समग्ररूपेण व्यक्तेः विकासप्रक्रियायाः योजनायाः वा अङ्गभूता वर्तते।

शारीरकशिक्षा स्वास्थ्यशिक्षा च

प्रायः जनाः शारीरकशिक्षां स्वास्थ्यशिक्षाञ्च समाने मन्यन्ते। एतादृशः दृष्टिकोणः सन्देहयुक्तः वर्तते। शारीरकशिक्षा, शिक्षायाः तदङ्गं वर्तते यत् व्यवसायक्रियाभिः प्राप्ता भवति। स्वास्थ्यशिक्षायां तत्समस्तप्रशिक्षणं निहितं वर्तते यद् व्यक्तेः स्वास्थ्यज्ञाने, स्वास्थ्यसमबद्धाभ्यासे, मनोवृत्तीनां विकासे च सहयोगं करोति। स्वास्थ्यशिक्षा शारीरकशिक्षया च साकमेव प्रदातुं शक्यते। प्रायः एतयोः बहवः अंशाः समानरूपेण भवन्ति। सा शारीरकशिक्षा व्यर्था या स्वास्थ्यज्ञानाय, स्वास्थ्यसम्बद्धाभ्यासाय मनोवृत्तिविकासाय चावसरं न प्रददाति। यद्यपि शारीरकशिक्षा, स्वास्थ्यशिक्षायै स्वस्थजीवनाय च बहुयोगदानं करोति, तथापि इयं व्यक्तेः स्वास्थ्यं रोगं वा अपाकर्तुं न प्रयोजिका भवति।

शारीरकशिक्षायाः उद्देश्यानि

शिक्षायाः मूलधारणाः आधारीकृत्य शारीरकशिक्षायाः उद्देश्यानां निर्माणं कृतम्। आसु धारणासु निम्नलिखिताः प्रमुखाः सन्ति—

(1) शिक्षा व्यक्तौ स्वकीयप्रतिक्रियाणां परिणामस्वरूपं परिवर्तन-प्रक्रिया वर्तते।

(2) व्यवस्थितशारीरकशिक्षा व्यक्तेः परिवर्तनानां समृद्ध्या सम्बन्धिता वर्तते या व्यक्तिं जीवनस्य सर्वेषु क्षेत्रेषु उच्चविकासपर्यन्तं प्रापणयोग्या निर्मास्यते। साकमेव यन्मिन् विश्वे सः निवसति तस्मिन् सम्यग्रूपेण व्यवस्थितं भवितुं साहाय्यं प्रदास्यति।

---

1. "Physical education is that phase of the whole process of education which is concerned with vigorous muscular activities and related responses, and with the modification of the individual resultant from these responses.'' -Nixon & cozens : **An Introduction to Physical Education, p.6**

एतासां धारणानामाधारेण **निकसनाकॉजिन्स-डगलसमहोदयाः** शारीरकशिक्षायाः उद्देश्यानां निर्धारणं निम्नरूपेण कुर्वन्ति—

1. "व्यवस्थितशारीरकशिक्षा जीवनस्य सर्वेषु क्षेत्रेषु व्यक्तेः क्षमतानां भृशं विकासने सुतरां योगदानं कुर्यात्। एतदर्थं व्यक्तिं तादृशवातावरणे स्थापयति यत्र पेशीयतत्सम्बन्धिनीनां प्रतिक्रियाणाम् उन्नतिः सम्भवेत्।"[1]
2. आन्तरिकशक्तेः विकासः।
3. शारीरकशिक्षया सम्बद्धक्रियासु कुशलतायाः विकासः।
4. उचितसामाजिकाभ्यासानां वृत्तीनाञ्च विकासः।
5. क्रीडार्थं मनोरञ्जनार्थञ्च उत्साहवर्धनम्।

अन्ते वयं वक्तुं शक्नुमः यत् शरीरस्य मनसश्च स्वास्थ्यसंवर्धनं शारीरकशिक्षायाः मुख्यमुदेद्श्यमिति। शिक्षा एतयोः शरीरमनसोः स्वस्थतानिर्माणेन सह तयोः स्वास्थ्यसंरक्षणकार्यमपि कुर्यात्।

भारते शारीरकशिक्षा

शिक्षा-आयोगानुसारं भारते शारीरकशिक्षायां शरीरस्वस्थतैव भृशमवधीयते, तस्य च शैक्षिकमूल्यानि विस्मर्यन्ते। शारीरकशिक्षया न केवलं शारीरकस्वास्थ्ये एव सुप्रभावः जायते अपि तु शारीरकक्षमता-मानसिकजागरूकता-परिश्रम-दलभावना-नेतृत्व-नियमपालन-विजय-पराजयेत्युच्चगुणानां विकासेऽपि सहायता प्राप्यते। भारते निम्ननिर्दिष्टसिद्धान्तानामाधारेण सन्तोषजनकं शारीरकशिक्षाकार्यक्रमनिर्माणं कर्तुं शक्यते—

1. कार्यक्रमेषु भागं गृह्णतां रुचिं क्षमताञ्च समवधाय अभीष्टपरिणामानां दृष्ट्या शरीरकशिक्षायोजना निर्मेया भवति।

---

1. "Organised physical education should aim to make the maximum contribution to the optimum development of the individual's potentialities in all phases of life, by placing him in an environment as favorable as possible o promotion of such muscular and related response of activities as will best contribute to this purpose."

-Nixon & Cozens.

2. एतेषु कार्यक्रमेषु परम्परागतक्रीडानां शारीरकक्रियाकलापानां च येऽस्माकं देशे विकसिताः सन्ति, तेषां स्थानं स्यात्।
3. प्रस्तुताः कार्यक्रमाः शिक्षायाः अन्यकार्यक्रमाणां पूरकः स्युः।
4. कार्यक्रमाः सर्वेभ्यः छात्रेभ्यः भवेयुः।
5. प्रतिभाऽऽसक्तियुक्तछात्रेभ्यः विशेषशिक्षणं प्रशिक्षणञ्च दद्यात्।
6. क्रीडाक्षेत्रे व्यायामशालायां च प्राप्तानुभवैः लोकतान्त्रिकसहकारिताभावनाभ्यां यथोचितं सम्भूय दायित्वं निर्वोढुं समभिबोधः वर्धनीयः।
7. सर्वासामवस्थानां कृते शारीरकशिक्षाकार्यक्रमनिर्माणे सौकर्यं, समयः, शिक्षकाणाञ्च सीमिततायाः कारणानि, न पश्येत् यत् किमुपयोगी वर्तते? अपि तु इदमपि दृष्टव्यं यत् किं सम्भवेत्?
8. कार्यक्रमाः अस्माकं वित्तीयव्यवस्थानुसारं भवेयुः।

विद्यालये शारीरकशिक्षायाः कार्यक्रमः

विद्यालयस्य शारीरकशिक्षाकार्यक्रमेभ्यः विभिन्नक्रियाणां चयनसमये ध्यानयोग्याः वार्ताः निम्नाः सन्ति—

1. विकासस्य विभिन्नेषु स्तरेषु बालकानां जन्मजातविशेषताः रुचयश्च।
2. बालकानां शारीरकस्थितयः।
3. लिङ्गीयविभिन्नताः।
4. शिक्षकाणां कार्यभारः।
5. स्वास्थ्यसम्बन्धितथ्यानि।
6. क्रीडानुसारं स्थानस्य प्राप्तिः।
7. सज्जीकरणस्य उपलब्धता।
8. समयस्योपलब्धिः।
9. जलवायु-भौगोलिकपरिस्थितयः।

उक्ततथ्यानुसारेण विभिन्नस्तराणां बालकेभ्यः शारीरकशिक्षायाः कार्यक्रमः निम्नरूपेण निर्धारयितुं शक्यते—

पूर्वप्राथमिकविद्यालयस्य बालकेभ्यः कार्यक्रमाः

अस्मिन् स्तरे 3 तः 5 पर्यन्तं आयुर्वर्गस्य बालकाः भवन्ति। अस्मिन् स्तरे बालकानां प्रमुखविशेषताः आवश्यकताश्च सन्ति– सक्रियजिज्ञासा, व्यायामजिज्ञासा, अनुकरणे प्रबला प्रवृत्तिः, अधिकतमवैयक्तिकता, स्वतन्त्रता, अनुगमने रुचिः, चित्तस्य एकाग्रतायाः अभावः।एताः विशेषताः आवश्यकताश्च ध्याने निधाय शारीरकशिक्षायाः कार्यक्रमे स्वतन्त्रव्यावसायिकक्रियाणां स्थानं प्रदत्तम्। अतः अस्य स्तरस्य कार्यक्रमे सङ्गीत–लय–नृत्य–आरोहणादीनां सन्तुलनेन सम्बद्धा क्रिया अनुकरणेन सम्बद्धक्रिया–इत्यादीनाञ्च महत्त्वपूर्णं स्थानं दद्यात्।

प्राथमिकविद्यालयस्य छात्रेभ्यः कार्यक्रमाः

अस्मिन् स्तरे 6 तः 11 पर्यन्तं आयुर्वर्गस्य बालकाः भवन्ति। एतेषां छात्राणां प्रमुखविशेषताः सन्ति– मन्दगत्या विकासः, लये रुचिः, द्वेषप्रवृत्तिः, जिज्ञासायाः अनुकरणस्य च भावना, धैर्यस्य अभावः, समूहानां मेलकानां (क्लब) च प्रारम्भः, बालिकानां लयपूर्णक्रियासु रुचिः।अस्य स्तरस्य कार्यक्रमेषु कथया सम्बद्धनाटकम्, लयपूर्णाः क्रियाः, आखेटेन सम्बन्धिता क्रीडा, नाटकीयकार्याणि, विश्रामदायिधावनम्, तरणम्, कन्दुकक्रीडा–फुटबॉल–बेसबॉल–बास्किटबॉल इत्यादीनां स्थानं स्यात्।

माध्यमिकविद्यालयस्य छात्रेभ्यः कार्यक्रमाः

अस्मिन् स्तरे 11 तः 14 पर्यन्तमायुर्वर्गस्य छात्राः भवन्ति। एतेषां छात्राणां मुख्यविशेषताः सन्ति— तीव्रगत्या विकासः, अकुशलता, (Awkwardness) चित्तस्य एकाग्रतायां वृद्धिः, समूहमेलापकत्वं, दलं प्रति निष्ठायाः भावना, परस्परं लिङ्गीयाकर्षणं, नेतृत्वे आस्था, प्रौढदृष्टिकोणमवगमनस्याभावः पितृनियन्त्रणेन धैर्याभावः सामाजिकसम्बन्धेषु रुचिः, बालकापेक्षया बालिकाः अधिकतया परिपक्वाः, बालिकासु लोकनृत्यं, नाटकीयनृत्यञ्च प्रत्यधिका रुचिः। एतस्मै स्तराय शारीरकशिक्षायाः कार्यक्रमेषु व्यवस्थितक्रीडनं–कूर्दनं, मेलापकानां सङ्घटनं, लयनृत्यमित्यादिषु बलं दातव्यम्।

उच्चमाध्यमिकविद्यालयस्य छात्रेभ्यः कार्यक्रमाः

अस्य स्तरस्य छात्राः 14 तः 18 पर्यन्तमायुर्वर्गस्य भवन्ति। अस्य स्तरस्य छात्रेषु नेतृत्वे आस्था, प्रतिस्पर्धाभावना, आत्मविश्वासशक्तिः धैर्यम्, सामञ्जस्ये

समन्वयने वा विकासः, विवेकः, एकाग्रतायाः विकासः, निष्ठा, साहसम् इत्यादयः विशेषताः भवन्ति। अस्य स्तरस्य कार्यक्रमे दलक्रीडा, लयपूर्णक्रिया, तरणं, वैयक्तिकक्रियाः, व्यवस्थितक्रीडनं-कूर्दनं, जिम्नेस्टिक्स, प्रतिस्पर्धात्मकक्रीडेत्यादीनां महत्त्वपूर्णं स्थानं प्रदद्यात्।

अन्ते वयं शिक्षा-आयोगानुसारेण वक्तुं शक्नुमः—"शारीरकशिक्षायां विकासात्मक-व्यायामः, लयपूर्णकार्यकलापः, क्रीडाकूर्दनं, भ्रमणं, सामूहिककार्यकलापाश्च सम्मिलिताः भवेयुः। एतेषां सर्वेषां सरलं कठिनञ्च रूपद्वयं स्यात्। प्रारम्भिककक्षासु सरलकार्येणु प्रारम्भो भवेत्, यथा यथा च छात्राः परिपक्वावस्थायां गच्छन्ति तदैव कठिनकार्यं शिक्षयेत्।"

पुनरावृत्ति-प्रश्नाः

1. शारीरकशिक्षायाः किं तात्पर्यमिति स्पष्टयत?
2. शारीरकशिक्षायाः स्वास्थ्यशिक्षायाश्च भेदं सोदाहरणं स्पष्टयत।
3. शारीरकशिक्षायाः कानि-कानि उद्देश्यानि सन्ति?
4. शारीरकशिक्षासिद्धान्तानां विषयेषु शिक्षा-आयोगस्य के के विचाराः सन्ति?
5. पूर्वप्राथमिकस्तरस्य प्राथमिकस्तरस्य च छात्रेभ्यः शारीरकशिक्षा-कार्यक्रमेषु काः काः क्रीडाः, क्रियाश्च भवेयुरिति स्पष्टयत?
6. माध्यमिक-उच्चमाध्यमिक-विद्यालयानां छात्रेभ्यः शारीरकशिक्षाकार्यक्रमेषु कासु-कासु क्रीडासु बलं दद्यात्?

लेखार्थः प्रश्नः

यदि भवान् कस्यापि विद्यालयस्य प्रधानाचार्यः भवति तर्हि स्वविद्यालये शारीरकशिक्षाकार्यक्रमेषु कान्-कान् कार्यकलापान् अन्तर्भावयेत् इति विवेचयत।

❑❑❑

22

स्वास्थ्यशिक्षायाः अर्थः तस्याः कार्यक्रमश्च

(Meaning of Health Education and Its Programme)

''Health is a state of complete physical, mental and social well-being and not merely the absence of disease or infirmity.''

-World Health Organisation

कस्यापि राष्ट्रस्य उन्नतिः समृद्धिश्च तस्य नवयुवकान् आश्रित्य वर्तते। यदि राष्ट्रस्य युवकानां स्वास्थ्यं समीचीनं तर्हि ते तस्य राष्ट्रस्य शक्तिसम्पन्नाः नागरिकाः भविष्यन्ति। प्रश्नोऽयं भवति यत् स्वास्थ्यस्य कोऽर्थः? अस्मिन् सम्बन्धे वक्तुं शक्यते यत् स्वास्थ्यं केवल रोगस्य विकलाङ्गतायाः वा अनुपस्थितिः एव नास्ति अपि तु शारीरक—मानसिक—सामाजिकल्याणानां पूर्णदशा वर्तते। अतः स्वास्थ्यं जीवनस्य सः गुणः वर्तते यः व्यक्तिविशेषं सुखपूर्वकं जीवितुं सर्वोत्तमरूपेण योग्यं करोति। यस्य देशस्य नवयुवकाः शारीरक–मानसिक–नैतिकरूपेण स्वस्थाः भविष्यन्ति, सः देशः सदैव उन्नतिपथे अग्रे सरिष्यति। स्वास्थ्यं व्यक्तिगतजीवनार्थमेव आवश्यकं नास्ति अपि तु राष्ट्रजीवनार्थमपि आवश्यकं वर्तते। अस्याभावे व्यक्तेः स्वस्मै समाजाय चेति द्वाभ्याम् एव भारस्वरूपं भवति। अतः देशस्य भाविनागरिकाणां स्वास्थ्यं प्रति ध्यानं परमावश्यकं वर्तते। एतेषां भाविनागरिकाणां निर्माणं राष्ट्रस्य विद्यालयेषु भवति। अतः विद्यालयानां परमकर्त्तव्यं वर्तते यत् तैः स्वास्थ्यं प्रति ध्यानं प्रदेयम्। तेषामेतत् प्रति केवलं ध्यानमेवावश्यकं नास्ति, अपि तु स्वास्थ्यरक्षामुन्नतिं च उद्दिश्य–महत्त्वपूर्णकार्य–सम्पादनमपि आवश्यकमस्ति। इयमावश्यकता विद्यालयान् स्वास्थ्यशिक्षायाः कार्यक्रमनिर्माणार्थं अनुबध्नाति। प्रत्येकं राष्ट्रस्य विद्यालयैः कार्यक्रमाणां निर्माणार्थं महत्त्वपूर्णाः प्रयासाः कृताः, ते च तेषामनुसारं कार्यं कृत्वा राष्ट्रस्य स्वास्थ्यस्य उच्चनिर्माणे च प्रयत्नशीलाः सन्ति।

स्वातन्त्र्यात्परमस्माकं राष्ट्रस्य नेतृभिः अपि अस्मिन् विषये ध्यानं दत्तम्। पूर्वं तु शिक्षायाः उद्देश्यानां निर्धारणं कृतमासीत्। **'माध्यमिकशिक्षाऽऽयोगानुसारं'** सन्तुलितव्यक्तित्त्वविकासः शिक्षायाः मुख्योद्देश्यत्वेन निर्धारितः आसीत्। राष्ट्रस्य च उन्नतये नवयुवकानां शारीरक-मानसिक-नैतिक-कल्याणेष्वेव बलं न दत्तम् अपितु राज्यं राष्ट्रयोः मध्ये स्थितानां नवयुवकानां स्वास्थ्यं प्रति ध्यानं दातुं विद्यालयस्वास्थ्य-शिक्षायाः कार्यक्रमाणां सङ्घटनं-सञ्चालनं च उत्तरदायित्वेन भवेत्।

स्वास्थ्यशिक्षाया अर्थः

स्वास्थ्यशिक्षा स्वस्थजीवनयापननियमान् छात्रान् ज्ञापयितुम् एका पद्धतिः वर्तते। अनेके विद्वांसः विभिन्न-दृष्ट्या स्वास्थ्यशिक्षां परिभाषितवन्तः। **डॉ. वुडमहोदयेन** इयं शिक्षा व्यक्तेः जीवनानुभवरूपेण परिभाषिता वर्तते। सः लिखति "स्वास्थ्यशिक्षा तेषामनुभवानां योगो विद्यते ये व्यक्ति-समुदाय-प्रजातीनां स्वास्थ्यसम्बन्धिस्वभावं वृतिं ज्ञानं च प्रभावयन्ति।"[1] वुडमहोदयः अस्यां परिभाषायां व्यक्तेः तान् जीवनानुभवान् संकेतयति ये एतानि तथ्यानि प्रभावयन्ति—सः किं जानाति, सः केन प्रकारेणानुभवं करोति, सः च किं करोति? **'ग्राउट' महोदयेन** स्वास्थ्यशिक्षा सामुदायिकक्रियायाः सामाजिकोद्देश्यरूपेण परिभाषिता। सः लिखति— "शैक्षिकप्रक्रियया व्यक्तेः समुदायस्य च स्वास्थ्यसम्बन्धिव्यवहारविषये यत्किमपि ज्ञानमस्ति तस्य रूपान्तरणमेव स्वास्थ्यशिक्षा।"[2] अनया परिभाषया स्वास्थ्यव्यवहारे उचितनिर्देशने प्रभाविप्रेरणायां च औत्कृष्ट्यं निक्षिप्यते।

स्वास्थ्यशिक्षायाः क्षेत्रम्
(Scope of Health Education)

स्वास्थ्यशिक्षायाः क्षेत्रं व्यापकं वर्तते। सामान्यतया अस्मिन् क्षेत्रे बालकानां स्वास्थ्यस्य संरक्षणं, तेषां स्वास्थ्ये उत्पन्नविभिन्नदोषाणां रोगाणाञ्चान्वेषणं, तस्य निराकरणं, तेषां स्वास्थ्यस्य वर्धनार्थं स्वास्थ्यसम्बन्धिनियमानामवगतिश्च निहिता

---

1. "Health education is the sum of experiences which favourably influence habits, attitudes, and knowledge relating to individual. Community and racial health." **-Dr.Thomas D.Wood**
2. "Health education is the translation of what is known about health into desirable individual and community behaviour patterns by means of the education process." **-Ruth E, Grout.**

वर्तन्ते। अतः शिक्षाक्षेत्रे व्यक्तिगतस्वास्थ्य-शारीरकशिक्षा-स्वास्थ्यविज्ञान-सामुदायिकस्वास्थ्येन सम्बन्धितथ्यानां ज्ञानस्यावश्यकता वर्तते।

स्वास्थ्यसंरक्षणार्थम् उचितवातावरणस्य स्थापनायां सङ्क्रमणरोगेषु नियन्त्रणमावश्यकं वर्तते। उचितवातावरणस्य स्थापनाय विद्यालयभवनस्य स्थितिः, शुद्धवायोः, प्रकाशस्य व्यवस्था, उपस्कराणां शैक्षिकसाधनानाञ्च उपयुक्तता, भोजनस्य, जलस्य च उचितव्यवस्था, शारीरकशिक्षायाः समुचितप्रबन्धः चेति विषयेषु ध्यानमावश्यकं वर्तते। संक्रमणरोगाणां नियन्त्रणार्थं विभिन्नसाधनानां ज्ञानं दीयते। विद्यालयस्वास्थ्यशिक्षायाः क्षेत्रसंरक्षणं तावदेव संक्षिप्तं नास्ति। अपि तु अनेन एतदपि दृश्यते यत् बालकानां स्वास्थ्यसम्बद्धान्यावश्यकानि कानि सन्ति, तेषां चिकित्सकीयनिरीक्षणं सम्यक् प्रकारेण भवति न वा, नियमाः, विभिन्नशारीरकसंरचना, तत् क्रियाप्रणाली इत्यादिना परिचाययति वा न वेति। विद्यालयान्तर्गतं ते समस्तक्रियाकलापा अपि सम्मिलिताः स्युः यैः मानवाः शारीरक - मानसिक - नैतिकरूपेण च स्वस्थाः भवेयुः। व्यक्ति - समुदाय - जातेः स्वास्थ्यसम्बन्धिदृष्टेः अभ्यासस्य च समुचितनिर्माणे साहाय्यं करोति।

स्वास्थ्यशिक्षाया उद्देश्यानि

स्वास्थ्यशिक्षायाः प्रमुखमुद्देश्यमस्ति यत् बालकान् इदं प्रशिक्षयेत् यत्—

1. ते केन प्रकारेण स्वस्थाः भवितुमर्हन्ति।

2. सहैव इदं ज्ञानमपि अपेक्ष्यते यत् ते स्वास्थ्यस्य स्तरं केन प्रकारेण वर्धयितुं शक्नुवन्ति।

स्वास्थ्यशिक्षा उक्तकथनस्य कृते बालकेभ्यः सन्तुलितभोजन - जल-शुद्धवायु-प्रकाश-व्यायाम-सम्बन्धितनियमानां ज्ञानस्य वैज्ञानिक-प्रभावपूर्णरीत्या जीवनयापनाय उत्तमाभ्यासानां निर्माणस्य च बलं ददाति। एतदुद्देश्यातिरिक्तं स्वास्थ्यशिक्षायाः निम्नलिखितानि अन्योद्देश्यानि च महत्त्वपूर्णानि सन्ति—

3. छात्राणां दुर्घटनाविभिन्नरोगाणां कारणानि तेषाञ्च अपाकरणोपायविषयेऽव-बोधनम्।

4. शिक्षकाणां विद्यालयस्य अन्यकर्मचारिणाञ्च स्वास्थ्यमपि वर्धयितुं साहाय्यप्रदानम्।

5. अभिभावकानां समाजस्य च अन्यसदस्यानां स्वास्थ्यसम्बन्धिनियमैः

सिद्धान्तैश्च अवबोधनं येन ते स्वस्य स्वास्थ्यस्य वृद्धिं कर्तुं शक्नुवन्ति बालकानाम् स्वास्थ्यस्य वर्धनार्थं, उचितवातावरणस्य निर्माणं च कर्तुं शक्नुवन्ति।

विद्यालयस्वास्थ्यशिक्षाकार्यक्रमाः

अमेरिकादेशस्य विद्यालयस्वास्थ्यशिक्षाकार्यक्रमस्य समितिः शिक्षा स्वास्थ्य–कार्यक्रमान् एषु शब्देषु परिभाषितवती—

''स्वास्थ्यसेवाः, स्वस्थजीवनयापनं, स्वास्थ्यशिक्षा च इत्यादयः विद्यालयप्रक्रियाः याः बालकानां विद्यालयाधिकरिणां स्वास्थ्यस्य संरक्षणार्थम् उन्नत्यर्थञ्च योगदानं ददति ; ताः विद्यालय – स्वास्थ्यकार्यक्रमाणां निर्माणं कुर्वन्ति।''[1]
उक्तकथनानुसारेण विद्यालयस्वास्थ्यकार्यक्रमाः अधोनिर्दिष्टेषु त्रिषु वर्गेषु विभाजिताः सन्ति—

(अ) स्वास्थ्यसेवाः — छात्राणां कृते समुचितस्वास्थ्यसेवा – प्रदानं विद्यालयस्य महत्त्वपूर्णं कर्तव्यमस्ति। स्वास्थ्यसेवान्तर्गतं ताः सर्वाः प्रक्रियाः निहिताः सन्ति याः बालकस्य स्वास्थ्यस्तरस्य निर्धारणं कुर्वन्ति, अपि च स्वास्थ्यस्य स्थापना तस्य च संरक्षणे सहयोगं कुर्वन्ति। साकमेव तस्य दोषात् अभिभावकान् अवबोधयन्ति, रोगान् रुन्धन्ति, दोषान् च अपाकुर्वन्ति। व्यवहारे स्वास्थ्यसेवायां चिकित्सकीयनिरीक्षणम्, अनुवर्तिकार्यं (Follow up work) च स्वास्थ्यसम्बद्धावश्यकतानां ज्ञानं, अस्मिन् सम्बन्धे सूचनाः लेखबद्धकरणं, बालकानां विषये शिक्षकाणां प्रतिवेदनं, विद्यालये भोजन–जल–शौचालयानां व्यवस्था च निहिता वर्तते। बालकानां शारीरकहितस्य तेषां स्वास्थ्यस्य च स्तरम् वर्धयितुं चिकित्सकीयनिरीक्षणस्य सन्तोषजनकव्यवस्थां कुर्यात्। प्रवेशानन्तरमेव बालकानां निरीक्षणं भवेत्। तत्पश्चात् वर्षे न्यूनातिन्यूनमेकवारं पुनः निरीक्षणं भवेत्। इदं निरीक्षणं विद्यालयसत्रस्यान्ते भवति चेत् समीचीनं भविष्यति। एतानि निरीक्षणानि औपचारिकरूपेण न, अपि तु व्यापकरूपेण भवेयुः। बालकानाम् उच्चता–भार–दन्त–स्नायु–इन्द्रिय–पोषणपेशीतन्त्र–श्वसनक्रिया–पाचनक्रिया–

---

1. The school Health Education Programme is defined as " the school procedures that contribute to the maintenance and improvement of the health of pupils and school personnel including health services, healthful living and health education". -Report of the Committee on Terminology in School Health Education, Journal of the American Association for Health, Physical Education and Recreation, Sept. 1951, P.14.

परिवहनक्रियाः इत्यादीनां सर्वेषां निरीक्षणं स्यात्। अस्य निरीक्षणस्य अभिलेखं स्थापयेत्। अस्य अभिलेखस्य प्रतिलिपिं बालकस्य अभिभावकानां कृते प्रेषयेत्। निरीक्षकैः बालकेषु शारीरकदोषान् ज्ञात्वा तेषाम् उपचारार्थम् उचितव्यवस्था करणीया। चिकित्सकीय-सेवा तावत् सफलं भवितुं न शक्नोति यावत् अनुगमनकार्यस्य व्यवस्था न क्रियते। चिकित्सकीयनिरीक्षणानन्तरं दोषान् अपाकर्तुं तानि कारणानि अन्वेष्टुं शीघ्रं प्रयासं कुर्यात्। माध्यमिक-शिक्षा-आयोगस्य चिन्तनं वर्तते यत् ''प्रत्येकस्मिन् रोगे विद्यालयद्वारा प्रदत्तसाधनानां शीघ्रं ग्रहणं कर्तव्यम्, विद्यालयाधिकारिणः पश्येयुः यत् चिकित्सकीयपरामर्शः क्रियान्वितः विद्यते न वा।''

बालकानां चिकित्सकीयनिरीक्षणस्य प्रभावजननार्थं विद्यालयचिकित्सकस्य उपचारिकायाः च नियुक्तिः कर्तुं शक्यते। परन्तु चिकित्सकीयनिरीक्षणमेव पर्याप्तं नास्ति अपि तु अन्विष्टदोषाणाम् उपचारोऽपि परमावश्यको वर्तते। अतः विद्यालये औषधशालापि अनिवार्यरूपेण भवेत्।

शिक्षकाणामस्मिन् सम्बन्धे बहूनि कार्याणि सन्ति। तेषां प्रमुखकार्यं वर्तते यत् शिक्षकाः तैः दोषैः विद्यालयचिकित्सकमवगमयतु येषां लक्षणानां बालकेषु विकासस्याशङ्का भवति। एतैः दोषैः चिकित्सकमवगतं कारयित्वा तेषां निरीक्षणस्य उपचारस्य च कृते शिक्षकैः, महत्त्वपूर्णाः प्रयासाः कर्तव्याः।

बालकः विद्यालये पञ्चतः षट् घण्टापर्यन्तं निवसति। विद्यालये मध्याह्न-भोजनस्य विशेषव्यवस्था नास्ति चेत् बालकः दीर्घकालं तावत् भोजनं विना एव निवसति। भोजनाभावे बालकानां स्वास्थ्योपरि कुप्रभावो जायते। अतः विद्यालयस्य कार्यं वर्तते यत् विद्यालयः बालकानां मध्याह्नभोजनस्य समुचितव्यवस्थां कुर्यात्। एतत् तु आवश्यकं वर्तते यतो हि अनेकेषां बालकानां स्वगृहे पौष्टिकभोजनं न मिलति। तेषां पौष्टिकन्यूनता विद्यालये मध्याह्नपौष्टिकभोजनेन पूरयितुं शक्यते। विद्यालये बालकेभ्यः एतादृशं भोजनं दद्यात् यस्मिन् पौष्टिकतत्त्वानां मात्रा पर्याप्तरूपेण भवति यथा-दुग्ध-चणक-फल-क्वथन (सोयाबीन) इत्यादि।

उपर्युक्तकथनानन्तरं विद्यालयः मन्दबुद्धि-विकलाङ्ग-श्रवण-दृष्टि-वाचालन-सम्बन्धिदोषान् अपाकर्तुमपि उचितां व्यवह्यथां कुर्यात्। विभिन्नविशेषज्ञैः चिकित्सकैः मनोवैज्ञानिकैः मनोचिकित्सकैः च सम्पर्कः साधनीयः आवश्यकतानुसारञ्च तेषामपि सहायतां नेतुं शक्नोति।

(ब) स्वस्थजीवनयापनम्— विद्यालये स्वास्थ्यशिक्षायाः कार्यक्रमस्य द्वितीयमहत्त्वपूर्णाङ्गं स्वस्थजीवनयापनमस्ति। एकस्य आदर्शविद्यालयस्य महत्त्वपूर्णं दायित्वमस्ति यत् एकं स्वस्थं स्वच्छञ्च भौतिकवातावरणं दद्यात् यत् पूर्णतः स्वास्थ्यप्रदम् भवति। विद्यालयस्य स्थितिः कोलाहल–धूम–आर्द्रादिभिः इति अस्वास्थ्यप्रददशाभिः रहिता भवेत्। विद्यालयभवनस्य कक्षाः, क्रीडाक्षेत्रमित्यादयः स्वच्छाः, आकर्षकाः, बालकानामभिवृद्धिविकासार्थञ्च उपयुक्ताः कक्षाकक्षेषु शुद्धवायोः प्रकाशस्य च समीचीना व्यवस्था भवेत्। तदतिरिक्तं विद्यालयस्य उपस्करः बालकानां वयोऽनुसारं, औन्नत्यानुसारञ्च भवेत्। अतः विद्यालयस्य सम्पूर्णं वातावरणं बालकानां दृष्ट्या उपयुक्तं स्वास्थ्यवर्द्धकञ्च भवेत्।

स्वास्थ्यशिक्षायाः मुख्योद्देश्यम्— बालकानां स्वस्थजीवनयापनार्थं विद्यालये उचिता व्यवस्था भवेत्। एतदर्थं बालकेषु विभिन्न–अभ्यासानां रुचीनाञ्च विकासः भवेत्। शिक्षकः बालकानां विकासे अतिमहत्त्वपूर्णं कार्यं कर्तुं शक्नोति। स्वच्छतासप्ताह–स्वास्थ्य सप्ताह–माध्यमेन बालकेषु समाजसेवां परिश्रमं च प्रति सम्मानभावनायाः विकासं कर्तुं शक्नोति। निश्चयेन स्वास्थ्यसम्बन्धिकार्यक्रमैः विद्यालयस्य सम्पूर्णवातावरणं स्वस्थजीवनस्य प्रेरकः निर्मातुं शक्यते।

स्वास्थ्यरक्षणार्थं भौतिकवातावरणप्रदानमेवावश्यकं नास्ति, अपि तु बालकानां संवेगात्मकविकासस्य उत्तमाभ्यासानां निर्माणार्थमपि उचिता व्यवस्था आवश्यकी वर्तते। विद्यालयः बालकानां शारीरकविकासेन सहैव मानसिकसंवेगात्मक–स्वास्थ्यार्थमपि उत्तरदायि वर्तते।

(स) स्वास्थ्यसम्बन्धिशिक्षा— विद्यालयस्य इदमपि उत्तरदायित्वं वर्तते यत् प्रत्येकं बालकः उत्तमस्वास्थ्यस्थापनस्य आवश्यकताविषये परिचितो भवेत्। बालकानाम् उत्तमस्वास्थ्यं किमस्ति, केन प्रकारेण प्राप्तुं शक्यते, रोगैः कथं रक्षयितुं शक्यते इत्यस्य विषये ज्ञानमावश्यकमस्ति। एतदतिरिक्तं तेषां पौष्टिकभोजनस्य स्वच्छतायाश्च महत्त्वं मानसिक–संवेगात्मक–विषये अपि अवगमनं परमावश्यकम्।

सम्पूर्णविषयस्य ज्ञानं स्वयं बालकस्य कृतैव लाभप्रदं नास्ति, अपि तु सम्पूर्णसमुदायाय राष्ट्राय अपि लाभप्रदं वर्तते। इदं ज्ञानं स्वास्थ्यशिक्षायाः व्यवस्थितकार्यक्रमैः दातुं शक्यते। शारीरकविज्ञाने स्वास्थ्यविज्ञाने च प्रत्यक्षरूपेण स्वास्थ्यसम्बन्धिनिर्देशाः दातुं शक्यन्ते। भौतिकविज्ञानं, जीवविज्ञानं, गृहविज्ञानं,

सामाजिकविज्ञानञ्च शिक्षया सह मानसिकसंवेगात्मकस्वास्थ्यस्य प्रकरणेषु विशेषव्याख्यानानां प्रबन्धः कर्तुं शक्यते। स्वास्थ्यशिक्षायाः कार्यक्रमाः बालकान् मानवशरीरस्य स्वरूपं तस्य च क्रिया-पद्धतेः ज्ञानेन सह ते स्वयमेव शाऔरक-मानसिक-संवेगात्मक-नैतिक-रूपेण आवश्यकतायाः अनुभूतिं कर्तुं योग्यान् रचयिष्यन्ति। स्वास्थ्यनिर्देशनस्य पाठ्यक्रमे भोजनं जलवायुः, व्यायामः, विनोदः, निद्रा, शरीरस्य भागाः तस्य च क्रिया-प्रणाली, विपरीतपरिस्थितीनां कुत्सित-अभ्यासानञ्च स्वास्थ्ये दुष्प्रभावः, रोगाणां कारणानि, लक्षणानि, एतेषामपाकरणस्योपायाः, प्राथमिकसाहाय्यम् इत्यादीनां स्थानं स्यात्। स्वास्थ्यशिक्षा प्रायः व्याख्यानेन सम्भाषणेन वा विभिन्नप्रकारस्य मुद्रितसामग्र्यः प्रयोगेण च स्यात्, आकाशवाणीकार्यक्रमस्य उपयोगः, नाटकानाम् आयोजनं, चलचित्राणां प्रदर्शनम्, प्रदर्शिन्या आयोजनं, स्वास्थ्यसप्ताहः इति माध्यमेन च स्वास्थ्यशिक्षां रुचिकरीं निर्मातुं शक्यते।

स्वास्थ्यशिक्षाप्रदानस्य महत्त्वपूर्णसाधनं वातावरणमपि वर्तते। अतः स्वास्थ्यशिक्षाप्रदानार्थं गृहे, विद्यालये, समाजे च स्वास्थ्यवातावरणस्य निर्माणं क्रियते चेत् उद्देश्यस्य प्राप्तिः सरला भवितुं शक्नोति।

स्वास्थ्यशिक्षाकार्यक्रमे प्रधानाचार्यस्य भूमिका

स्वास्थ्यशिक्षा-कार्यक्रमस्य सम्बन्धे प्रधानाचार्यस्य महत्त्वपूर्णमुत्तरदायित्वमिदं वर्तते यत् सः विद्यालयस्वास्थ्यकार्यक्रमेषु विभिन्नविभागानां कार्येषु समन्वयस्य स्थापनं कुर्यात्, एतदर्थं सः एतादृशं प्रशासनिकप्रक्रियाणां स्थापनं कुर्यात्, येन शारीरकशिक्षायाः शिक्षकः, विद्यालयचिकित्सकः उपचारिका मानसिक-स्वास्थ्यवैज्ञानिकः च स्वप्रयासेषु सफलाः भवितुं शक्नुवन्ति। प्रधानाचार्य स्वास्थ्यशिक्षायाः शिक्षणं प्रति पूर्णतः लाभप्रदनिर्माणस्य कृते शिक्षकेभ्यः उपयोगिसामग्रीः प्रदद्यात्। सः स्वास्थ्यकार्यक्रमाणां साफल्यार्थं सामयिक-स्वास्थ्यपर्यवेक्षणं कुर्यात्, संक्रामकरोगाणां विद्यालये प्रसरणमवरोद्धुं कार्यं कुर्यात्। अस्मिन् कार्ये सः विद्यालयस्य स्वास्थ्यशिक्षा-कार्यक्रमेण सम्बद्धानां सर्वेषामधिकारिणां कर्मचारिणाञ्च सहयोगं स्वीकर्तुं शक्नोति। सः बालकानामभिभावकानां समुदायस्य च जनानामपि सहयोगं प्राप्तुं महत्त्वपूर्णं कार्यं कुर्यात्। उपर्युक्तरीत्या विद्यालये स्वास्थ्यशिक्षायाः, तस्याः प्रक्रियाणाम् अनुभवानाञ्च योगः वर्तते, यः व्यक्तेः, समुदायस्य, जातिवर्गस्य च स्वास्थ्यं प्रभावयति। अतः प्रधानाचार्यस्य इदमपि कर्त्तव्यं

वर्तते यत् सः स्वास्थ्यशिक्षाकार्यक्रमस्य साफल्यार्थं समाजस्य विभिन्नसाधनानां प्रयोगं कुर्यात्, यथा—सार्वजनिकस्वास्थ्यविभागस्य अधिकारिभ्यः, समाजस्य अन्यजनेभ्यः ये स्वास्थ्यशिक्षया सम्बद्धाः सन्ति, यथासम्भवं सहायतां प्राप्नुयात्।

सः बालकस्याभिभावकानां सहयोगं प्राप्य बालकानां स्वास्थ्यविषये महत्त्वपूर्णं कार्यं कर्तुं शक्नोति। प्रत्येकस्मिन् विद्यालये केचन एतादृशाः बालकाः ध्यानाकर्षणं कुर्वन्ति अलसाः बाल्यकालस्य स्फूर्तितश्च वञ्चिताः भवन्ति, ये कक्षायामुदासीनाः भवन्ति, क्रीडाक्षेत्रे च न गच्छन्ति। एतादृशानां बालकानामभिभावकैः मिलित्वा स्थितेः परीक्षणं प्रधानाचार्यस्य कर्त्तव्यमस्ति। गृहस्य भौतिकं सामाजिकं मनोवैज्ञानिकञ्च वातावरणं बालकं कुत्सितं प्रभावयति। भोजनं भौतिकवातावरणस्य विशेषाङ्गं वर्तते। यदि बालकेभ्यः उचितभोजनं मिलति तर्हि तस्य स्वास्थ्ये तस्य रुचिषु क्रियासु च अवश्यमेव कुप्रभावो न भविष्यति। बालकः यथा भोजनं करोति तथैव सः वर्धते। अतः प्रधानाचार्यः यथासम्भवं बालकेभ्यः गृहस्य भोजनं विद्यालयस्य मध्याह्नभोजनञ्च सन्तुलितं निर्मातुं व्यवस्थां कुर्यात्।

पुनरावृत्ति-प्रश्नाः

1. व्यक्तेः राष्ट्रस्य च जीवने स्वास्थ्यस्य किं महत्त्वं वर्तते?
2. स्वास्थ्यशिक्षाविषये भवान् किं जानाति?
3. स्वास्थ्यशिक्षायाः विषयक्षेत्रे काः काः वार्ता आयान्ति?
4. स्वास्थ्यशिक्षायाः कानि कानि उद्देश्यानि भवेयुः?
5. विद्यालयस्वास्थ्यशिक्षाकार्यक्रमेण भवान् किं जानाति? अस्मिन् केषां विषयाणां समावेशो भवति?
6. स्वास्थ्यसेवान्तर्गततया काः काः सेवाः निहिताः सन्ति?
7. स्वस्थजीवनयापनार्थं विद्यालयः कां व्यवस्थां कुर्यात्?
8. स्वास्थ्यशिक्षाकार्यक्रमे प्रधानाचार्यस्य का भूमिका वर्तते?

लेखार्थः प्रश्नः

अस्माकं विद्यालयेषु उपलभ्यमानस्वास्थ्यसेवानां मूल्याङ्कनं विधाय तत्सुवर्धनार्थं परामर्शाः दातव्याः।

23

सन्तुलित–आहारः तस्य च निर्माणकतत्त्वानि

(Balanced Diet And Its Constituents)

''Balanced Diet is that, which both in sickness and health will meet but not exceed a person's caloric needs and which is designed to provide as far as possible in liberal excess of body's calculated requirements of all nutritive essentials proteins and vitamins.'' **-Dr. J.S. Mclester**

''स्वास्थ्यम्'' एतादृशं वस्तु नास्ति यदौषधस्य कस्यापि कूप्यां नीत्वा व्यक्तये प्रदातुं शक्यते। इदं जीवनस्य समुचितस्वभावं वृत्तिं चाश्रित्यास्ति। जार्जन्यूमैन (George Newmen) महोदयेन स्वास्थ्यस्य षड् मौलिकावश्यकताः कथिताः सन्ति। ते सन्ति— सन्तुलितभोजनं, स्वच्छवायुः प्रकाश्च, उष्णं, व्यायामः, विश्रामः, स्वच्छता च। वयं सर्वे जानीमः यत् भोजनं विना मानवः कानिचन दिनान्येव प्राणान् धारयितुं शक्नोति, अर्थात् मानवजीवनस्य कृते भोजनं परमावश्यकं वर्तते। भोजनस्याभिप्रायः तेषां सर्वेषां पदार्थैः वर्तते येषामुपयोगेन सर्वे प्राणिनः जीविताः स्युः

भोजनस्य कार्याणि

भोजनमस्माकं शरीरे निम्नलिखितानि कार्याणि करोति—

1. भोजनं शारीरकक्रियाणां सञ्चालनार्थम् ऊर्जामुत्पादयति, शक्त्या सह शरीरस्य उष्णतामपि प्रददाति।
2. भोजनं शिशूनां बालकानाञ्च शरीरस्य वृद्धिं, नवीनकोशिकानां निर्माणं क्षतकोशिकानां समीकरणञ्च करोति।
3. भोजनं शरीरस्यान्तरिकक्रियाः सञ्चालयित्वा नियन्त्रयित्वा च शरीरवृद्धिं स्वास्थ्यस्य सुरक्षां च करोति।

मुख्यभोजनतत्त्वानि

भोज्यपदार्थाः तेषां रासायनिकनिर्माणदृष्ट्या निम्नेषु वर्गेषु विभज्यन्ते—

1. **कार्बोहाइड्रेट** (Carbohydrate)—मंडः (Starch) शर्करा (Sugar) च।
2. **वसा** (Fats) जीवजन्तुजन्यः वनस्पतितैलं चिक्कणपदार्थश्च।
3. प्रोटीन् (Protein)।
4. **खनिजलवणानि** (Mineral Salts) कैल्शियम, फास्फोरस–आयोडीन–लोहा–सोडियम–क्लोराइड–इत्यादयः।
5. **विटामिन** (Vitamin) ए–बी–बी$_2$–निकोटिनिक–एसिड–सी–डी इत्यादयः।

जलम्–उपर्युक्तपञ्चतत्त्वातिरिक्तमिदमपि अन्यत्तत्त्वं वर्तते यद् बहुषु खाद्यपदार्थेषु भवति। इदमपि भोजनस्य मुख्यतत्त्वं वर्तते। जलं शरीरस्यापि मुख्यम् अङ्गमस्ति। इदं पाचनक्रियायै आवश्यकम्। मूत्र–स्वेद–श्वास–माध्यमेन इदं शरीरात् मलरूपेण बहिः निर्गच्छति।

भोजनतत्त्वानां विशिष्टानि कार्याणि

1. शरीराय ऊर्जातापयोः प्रदानं कार्बोहाइड्रेट–वसाद्वारा भवति।
2. शरीरवृद्धिः क्षतकोशिकानां समीकरणस्य कार्यञ्च प्रोटीनखनिज लवणयोः कुरुतः।
3. शारीरकक्रियाणां स्वास्थ्यसंरक्षणकार्याणाञ्च भारः विटामिन्–इत्याख्येषु खनिजलवणेषु च वर्तते।

सन्तुलिताहारस्याभिप्रायः महत्त्वं च

इदानीमवगतं यत् कार्बोहाइड्रेट–वसा–प्रोटीन–खनिजलवण–विटामिन्–इत्यादीनां भोजने किं महत्त्वम्, भोजने एतेषामभावेन न्यूनतया वा शरीरे दुष्प्रभावः भवति। अतः आहारे सर्वेषां भोज्यतत्त्वानामुपस्थितिः एव न अपि तु तेषां मात्राः अप्यावश्यकतानुसारं भवेयुः। वस्तुतः सन्तुलिताहारः सः भोजनं वर्तते यस्मिन् सर्वाणि भोज्यतत्त्वानि व्यक्तेः आवश्यकतायाः दृष्ट्या उचितमात्रासु प्राप्यन्ते।

मानवस्य विभिन्नपरिस्थितयः संतुलिताहारं प्रभावयन्ति। प्रत्येकं मानवस्य कृते

आहारेण ऊर्जाताप–उत्पादयितारः शरीरनिर्माणकाः स्वास्थ्यरक्षकाश्च भोज्यतत्त्वानां प्राप्तिः आवश्यकं भवति। परन्तु सर्वेषां जनानाम् कृते एतेषां त्रिप्रकारतत्त्वानां समानरूपेणावश्यकता न भवति। विभिन्नान् जनान्–आयु–लिङ्ग–परिश्रम–ऋतूनामनुसारमेव पोषकतत्त्वानां भिन्न–भिन्नमात्राणामावश्यकता भवति। शिशु–बालक–किशोराणां, स्त्रीपुरुषयोः, शारीरक–मानसिक–कार्यस्य प्राधान्यजनानां, शीतोष्णप्रधानदेशानां निवासिनां, शीतकालस्य च ग्रीष्मकालस्य चाहारे भेदः भवति। एतेषां भेदानां कारणानि स्पष्टमेव सन्ति, उदाहरणार्थं–कस्यापि स्थितौ अवस्थायाञ्च शरीरनिर्माणक–पोषकतत्त्वप्रोटीन् अधिकं भवेत्। तर्हि अन्यस्थितौ ऊर्जा–उत्पादकतत्त्वं कार्बोहाइड्रेट अधिकं भवेत्। अतः बालकेभ्यः एव न अपि तु सर्वस्य कृते एतादृश–सन्तुलितभोजनस्यावश्यकता भवति। यस्मिन् जनानाम् ऊर्जा–उत्पादनं, शरीरनिर्माणं, स्वास्थ्यसुरक्षा चेत्यादीनामावश्यकतानामुचितपूर्तये विभिन्नपोषकतत्त्वानि उचितमात्रायां प्राप्तुं शक्यन्ते।

अतः वक्तुं शक्यते यत् सन्तुलिताहारः सः आहारः वर्तते यस्मिन् शरीर–स्यावश्यकतानां पूरकाणि समस्तभोज्यतत्त्वानि प्राप्स्यन्ते, व्यक्तिविशेषस्य चावश्यकतानुसारमुचितमात्रायामपि भवेयुः।

सन्तुलिताहाराभावस्य शरीरे प्रभावः

यथा जीवनस्य कृते भोजनं परमावश्यकं तथैव स्वस्थदीर्घजीवनस्य कृते सन्तुलिताहारस्य महत्त्वं वर्तते। पोषणसम्बन्धिसर्वेक्षणैः ज्ञायते यत् विशेषपरिस्थितियुक्ताः जनाः यथा शिशुः बालकः गर्भवती स्तनपाययित्री च आहारे सन्तुलनस्य महत्त्वपूर्णतत्त्वानाञ्च अल्पत्वेन अधिकतया दुष्प्रभाविताः भवन्ति। प्रायः प्रोटीन–खनिजलवण–विटामिन्–आदयः सर्वेषां वर्णानां भारतीयानां भोजने अपर्याप्ताः भवन्ति, परन्तु बालकाः असन्तुलितभोजनेन अधिकतया प्रभाविताः भवन्ति। अनेन अस्माकं देशे बालकानां शारीरकविकासः स्वास्थ्यञ्च प्रायः निम्नस्तरस्य भवति। बहवः बालकाः तु प्रमुखतत्त्वानामभावेन न केवलमस्वस्थाः अपि तु अनेकैः रोगैः पीडिताः भवन्ति।

प्रोटीनतत्त्वस्य न्यूनतायाः दुष्प्रभावः

प्रोटीन्–अभावे बालकानां शारीरकविकासः अवरुद्धो भवति। यकृत वर्धते,

त्वक् शुष्का पीता च भवति, यदा कदा ग्रहणी अपि भवति।

‘विटामिन - ए’ इत्यस्य न्यूनतायाः दुष्प्रभावः

‘विटामिन-ए’ इत्यस्य न्यूनतायां बालकाः जीवनपर्यन्तं कष्टमनुभवन्ति। तस्य मुख्यरूपेण दुष्प्रभावः नेत्रयोः जायते। अस्याभावेन नेत्राणामाभा गच्छति। सः दर्शनेऽसमर्थः भवति। वस्तूनामन्वेषणं हस्तेन करोति। शनैः शनैः दृष्टिदोषः वर्धते। यदा कदा नेत्राणां प्रकाशः पूर्णतया समाप्तो भवति। स्वस्थत्वचः कृतेऽपि ‘विटामिन-ए’ आवश्यकमस्ति।

‘विटामिन-बी’ इत्यस्याभावे दुष्प्रभावः

अस्य न्यूनतया बालकाः पैलाग्रा-अनिमिया इत्यादिरोगग्रस्ताः भवन्ति। मुखस्यान्तरिकभागस्य त्वगादीनां कष्टं भवति, जिह्वया, खररूपा भवति। इदं विटामिन् तन्त्रिका तन्त्रस्य स्वस्थ-निर्माणार्थमपि आवश्यकं वर्तते।

‘विटामिन-सी’ इत्यस्याभावे दुष्प्रभावः

अस्याभावेन बालकाः ‘स्कर्वी’ रोगग्रस्ताः भवन्ति। साकमेव अस्य न्यूनतया दन्तमूलं दन्ताश्च अस्वस्थाः भवन्ति।

‘डी’ विटामिनस्याभावे दुष्प्रभावः

अस्याभावे बालकेषु अस्थिरोगः, रिकेट्स वा भवति।

खनिज-लवण-अभावस्य दुष्प्रभावः

कैल्सियम-फॉस्फोरस-इत्यस्य न्यूनतया बालकानां विकासः अवरुद्धो भवति। अस्थितन्त्रं दन्ताश्च दुर्बलाः जायन्ते। अयस्तत्वस्याभावेन बालकाः रक्तहीनरोगेण पीड़िताः भवन्ति। आयोडीन्-अभावेन थायरायडग्रन्थिः स्वकार्यं सम्यग्रीत्या न करोति।

बालकानामाहारस्य विशेषताः

देशस्य विभिन्नभागेषु कृतेभ्यः पोषणसम्बन्धिसर्वेक्षणेभ्यः निश्चितं जातं यत् पोषकतत्त्वानामभावेन बालकाः अधिकतया दुष्प्रभाविताः भवन्ति। तेषां प्रारम्भिकावस्थायां शरीरवर्धनार्थं विकासार्थञ्च पौष्टिकभोजनस्य विशेषरूपेणावश्यकता भवति। विद्यालयीयबालकानां शरीरवृद्धिः निरन्तररूपेण भवति। अतः तेषां भोजने प्रोटीन् अधिकमात्रया भवेत्। शरीरविकासस्यातिरिक्तं तेषां सततक्रियाशीलतया

ऊतकानां (Tissues) अपघातस्य समीकरणार्थं पूर्तये चापि किशोराणामपेक्षया बालकानामधिक-प्रोटीन्-युक्तभोजनस्यापेक्षा वर्तते। यः प्रायः भारतीय-बालकानामिदमुपलब्धं न भवति।

बालकाः इतरापेक्षया क्रियाशीलाः भवन्ति। अतः तेषां कृते ऊर्जापेक्षापि अधिका वर्तते। अधिक-ऊर्जा-उत्पादनार्थं तेषां कार्बोहाइड्रेट-वसानामपि अपेक्षा अधिका वर्तते। प्रोटीनकार्बोहाड्रेट-वसाभिः सह समस्तायुर्वर्गीयव्यक्तीनामिव बालकानामपि स्वास्थ्यरक्षकभोज्यतत्त्वरूपाणां खनिजलवणानां विटामिन् इत्यादिनाञ्च पर्याप्तावश्यकता भवति।

बालकानां स्वास्थ्यस्य रक्षणार्थं दुग्धं सर्वाधिकं पौष्टिकभोजनं वर्तते, यतः दुग्धात् प्राप्यमाणं प्रोटीन् उच्चश्रेणिकं भवति। कैल्सियम-प्रोटीन्-आदिभिः सह दुग्धे शक्तिदायकतत्त्वानि-कार्बोज-वसादीनि अपि विद्यन्ते। दुग्धे प्रायः सर्वाणि खनिजलवणानि सन्तुलितमात्रायां प्राप्यन्ते। तदतिरिक्तं स्वास्थ्यरक्षणार्थमस्मिन् विटामिन् 'ए'-'बी' अपि सन्ति।

इदमपि अनुमीयते यत् बालकानां बालिकानाञ्च भोज्यावश्यकतासु भेदः भवति। बालकानामपेक्षया बालिकाः भोजनं न्यूनामात्रायामिच्छन्ति। भवितुं शक्यते यत् तासां शरीरस्य संरचनायाः, औन्नत्यस्य (कद) कार्यस्य च भेदेन भोज्य-आवश्यकताः अपि न्यूनाः स्युः। अतः बालकानामपेक्षया बालिकानां कैलोरी-मात्रायाः न्यूनावश्यकता भवति।

तालिका (अ) – दैनिकभोजने विभिन्नतत्त्वानां प्रस्ताविताः मात्राः

	कैलोरी (ग्रामेषु)	प्रोटीन (ग्रामेषु)	कैल्सियम (ग्रामेषु)	लोहः (मि.ग्रामेषु)	विटामिन् 'ए' (अ.रा.इ.)	थार्यामन विटामिन 'बी' (मि.ग्रामेषु)	एस्कोर्बिक विटामिन 'सी' (मि.ग्रामेषु)	विटामिन 'डी' (अ.रा.इ.)
5 तः 6 वर्षपर्यन्तम्	1500	3.0 प्रति कि. ग्राम भारः	1.0	10	3000	0.5	30	400
6 तः 7 वर्षपर्यन्तम्	1800	3.0 प्रति कि. ग्राम भारः	1.25	10	3000	0.5	30	400
7 तः 9 वर्षपर्यन्तम्	1800	2.5 प्रति कि. ग्राम भारः	1.25	15	3000	0.5	30	500
10 तः 12 वर्षपर्यन्तम्	2100	2.5 प्रति कि. ग्राम भारः	1.25	15	3000	0.8	30	500
13 तः 15 वर्षपर्यन्तम्	2100	2.5 प्रति कि. ग्राम भारः	1.5	25	4000	1.0	40	700
13 तः 15 वर्षपर्यन्तम्	2700	2.5 प्रति कि. ग्राम भारः	1.5	25	4000	1.0	50	800
16 वर्षस्य बालिकाः	3150	2.0 प्रति कि. ग्राम भारः	1.5	30	4000	1.0	50.6	800
16 वर्षस्य बालिकाः	2100	2.0 प्रति कि. ग्राम भारः	1.5	30	4000	1.0	45	700

सूचना— उपर्युक्तगणनानामाधारः मुख्यरूपेण इण्डियन काउन्सिल–ऑफ–मेडिकल–रिसर्च इत्यस्य विशेष–प्रतिवेदनक्रमसंख्या – 42 (1963) वर्तते।

तालिका (ब) - बालकानां कृते दैनिक-आवश्यक-आहारः[1]

भोज्यपदार्थाः	5 तः 7 वर्षपर्यन्तम्		7 तः 8वर्षपर्यन्तम्		9 तः 10 वर्षपर्यन्तम्		11 तः 12 वर्षपर्यन्तम्		13 तः 14 वर्षपर्यन्तम्	
	शाकाहारी (ग्रामेषु)	मांसाहारी (ग्रामेषु)	शाकाहारी (ग्रामेषु)	मांसाहारी (ग्रामेषु)	शाकाहारी (ग्रामेषु)	मांसाहारी (ग्रामेषु)	शाकाहारी (ग्रामेषु)	मांसाहारी (ग्रामेषु)	शाकाहारी (ग्रामेषु)	मांसाहारी (ग्रामेषु)
अन्नम्	198.8	198.8	255.6	255.6	312.4	312.4	340.0	340.0	450.0	450.0
सूपः	42.2	42.2	56.0	56.0	56.0	56.0	56.0	56.0	85.0	56.0
कलायः (मूँगफली)	28.0	—	28.0	28.0	56.0	28.0	56.0	28.0	56.0	28.0
चणकः सूपः	28.0	—	28.9	—	56.0	—	56.0	—	28.0	—
दुग्धं दधि च	450.0	249.0	450.0	240.0	450.0	240.0	250.0	240.0	300.0	150.0
मांसः, मीनश्च	—	56.0	—	56.0	—	56.0	—	56.0	—	56.0
अण्डः	—	28.0	—	28.0	—	28.0	—	28.0	—	28.0
हरितपत्रशाकम्	60.0	60.0	90.0	90.0	90.0	90.0	90.0	90.0	120.0	120.0
अन्यशाकः	28.0	28.0	55.0	55.0	110.0	110.0	140.0	140.	120.0	120.0
तैलं, वसा च	90.0	90.0	90.0	90.0	90.0	90.0	90.0	90.0	120.0	120.0
शर्करा गुडश्च	14.0	14.0	14.0	14.0	28.0	28.0	28.0	28.0	60.0	60.0
	50.0	50.0	50.0	50.0	50.0	50.0	50.0	40.0	60.0	60.0

1. आवर-फूड - एम. स्वामीनाथन् तथा आर.के. भगवान्, पृष्ठ संख्या 80 इत्याधारेण।

'अ' तालिकायां 5 तः 16 वर्षपर्यन्तस्यायुर्वर्गेभ्यः बालकेभ्यः बालिकाभ्यश्च महत्त्वपूर्णानां भोज्यतत्त्वानाम् आवश्यकमात्राः निर्दिष्टाः सन्ति, तथा 'ब' तालिकायां 5 तः 16 वर्षं तावत् आयुर्वर्गीयाणां बालकानां दैनिक-आहारे विभिन्नानां पदार्थानां मात्राः निर्दिष्टाः सन्ति, येन तेषां भोजनं समस्त-आवश्यक-तत्त्वानामुचितमात्राभिः परिपूर्णं भवितुं शक्नोति।

एकस्य किशोरस्य स्वास्थ्यनिर्माणार्थं प्रतिदिनम् आहारे विभिन्नभोज्यपदार्थानाम् आवश्यकमात्रा निम्नतालिकायां प्रस्तावितास्ति—

प्रस्तावितः सन्तुलिताहारः[1]

भोज्यपदार्थाः	भारः (ग्राम्-मानेषु)	आहारस्य पौष्टिकता
अन्नम्	400	कैलोरी 3000
सूपः, शुष्कफलानि च	85	प्रोटीन-90 ग्राम
हरितपत्रशाकाः	144	कार्बोहाइड्रेटस्-450 ग्राम
अन्यशाकाः	85	वसा-90 ग्राम
तैलं घृतमादि	57	कैल्शियम्-1.4 ग्राम
दुग्धं, दुग्धनिर्मितपदार्थाः	287	फास्फोरस-2.0 ग्राम
शर्कराः	57	लोहः-48 मि. ग्राम
मांसः, अण्डञ्च	125	विटामिन् 'ए' 4800 अन्तर्राष्ट्रियघटक
फलानि	85	विटामिन् 'बी^{2}' - 2.1 मि.ग्राम विटामिन् 'बी^{2}'-1.7 मि.ग्राम निकोटीन् एसिड-22 मि.ग्राम विटामिन् 'सी'-420 मि.ग्राम

1. तालिका II पृष्ठ-28, विशेषप्रतिवेदनक्रमाङ्क 42, इण्डियन-काउन्सिल-मेडिकल-रिसर्च 1966 इत्यधारेण।

प्रायेण भारतीयाः जनाः निरक्षरतायाः निर्धनतायाश्च कारणेन न हि सन्तुलित–आहारस्य महत्त्वं जानन्ति, न वा तस्य व्यवस्थां कर्तुं समर्थाः भवन्ति। स्वास्थ्य–मन्त्रालयस्य पोषणपरामर्शपरिषदा उक्तं यत् भारते प्रायः द्वादशसहस्रतः चतुर्दशसहस्रं तावत् बालकाः 'ए' विटामिन्–इत्यस्य न्यूनतायाः कारणेन प्रतिवर्षमन्धाः भवन्ति। विद्यालयीयबालकानां भोजनसम्बन्धिसमस्यायाः समाधानार्थं मध्याह्नभोजनकार्यक्रमः 1961 तमे वर्षे प्रारब्धः। अयं कार्यक्रमः सर्वप्रथमं मद्रासनगरे सञ्चालितः आसीत्। तत्पश्चात्–बिहार–आन्ध्रप्रदेश–हरियाणा–गुजरात–उत्तरप्रदेश–मैसूर–उडीसा–मध्यप्रदेशादिषु राज्येषु अपि सञ्चालितः। वर्धमानेभ्यो बालकेभ्यः पूर्णरूपेण पोषकतत्त्वानां प्रदानमेव एतेषां कार्यक्रमाणां मुख्यं प्रयोजनम्। यतः एतेषामस्यामवस्थायाम् अधिकपोषकतत्त्वानामावश्यकता वर्तते।

पुनरावृत्ति–प्रश्नाः

1. सन्तुलिताहारः नाम कः ?
2. बालकेभ्यः सन्तुलिताहारे केषां केषां तत्त्वानां विशेषरूपेण समावेशः भवेत् ?
3. सन्तुलिताहाराभावस्य शरीरे कः प्रभावः भवति ?
4. भारते विद्यालयं गच्छद्भ्यः बालकेभ्यः पोषकतत्त्वप्रदानार्थं कस्य कार्यक्रमस्य सञ्चालनं कृतं वर्तते ?

लेखार्थः प्रश्नः

सन्तुलिताहारस्य महत्त्वं स्पष्टयन् 13 तः 26 वर्षस्य बालकानां भोज्यावश्यकताः ध्याने स्थापयित्वा तेषां सन्तुलिताहारे विभिन्नतत्त्वानां मात्राः कथयत।

24

विद्यालये निर्देशनकार्यक्रमः

(Guidance Programme in the School)

''School guidance programmes seek to help pupils make wise choices so that larger and better measure of growth and development may result from the experiences available to him in a school." **-French and others.**

''उचितशैक्षिक - व्यावसायिक - वैयक्तिक - सामाजिकनिर्देशनं दत्त्वा छात्राणां स्वकीयस्य विद्यालयजीवनस्य विद्यालयात्परं जीवनस्य च मध्येऽन्तरं दूरीकर्तुं साहाय्यकरणम् एव विद्यालयस्य कार्यमस्ति।''[1]

आधुनिकशताब्देः आरम्भतः निर्देशनविषयः बहुषु देशेषु विशेषतः अमेरिकायामतिमहत्त्वपूर्णं स्थानं प्राप्नोत्। अमेरिकादेशस्य विद्यालयेषु निर्देशनस्य प्रचलनं 1908 तमे वर्षे **'बोस्टन - वोकेशन - ब्यूरो'** (Boston Vocation Bureau) स्थापनया सह अभवत्। एतस्योद्देश्यं युवकेभ्यः व्यवसायस्य चयनं समाजे च स्वकीयं स्थितिं प्राप्तुं सहायताप्रदानमासीत्। 'ब्यूरो' एतदुद्देश्यप्राप्तये सफलं सञ्जातम्। परिणामतः 1910 तमे वर्षे बोस्टन - विद्यालय - समितिः बोस्टन् नगरे प्रत्येकस्मिन् माध्यमिकविद्यालये व्यावसायिकपरामर्शं दातुं परामर्शकस्य नियुक्तेः आदेशम् अदात्। शनैः शनैः अस्य विषयस्य लोकप्रियता अवर्धत। अधुना तत्र माध्यमिकविद्यालये निर्देशनकार्यक्रमस्य महत्त्वपूर्णं स्थानं वर्तते।

---

1. "The function of the school is to provide adequate educational, vocational, personal and social guidance to help student to bridge the gap between his and past-school life ."

-Stanley, W.Williams.

निर्देशनस्य आवश्कता

माध्यमिक–शिक्षा–आयोगः अस्यावश्यकतायाः अनुभवं कृत्वा कथयति यत् शिक्षा–अधिकारिभिः शैक्षिकनिर्देशनेऽधिकं ध्यानं दातव्यम् इति। अस्य अनेकानि कारणानि सन्ति। कारणानां विवरणं संक्षिप्तरूपेण एवं वर्तते—

1. माध्यमिकविद्यालयेषु बालकानां सङ्ख्यायां तीव्रगत्या वृद्धिर्भवति। बालकानामावश्यकताः, रुचयः क्षमताः च विभिन्नाः सन्ति। यदि बालकानां क्षमतानां शक्तीनाञ्च विकासः समुचितदिशायां न भवति तर्हि ते व्यक्तिगतरूपेण सामाजिकरूपेण चेति उभयथाऽपि अनुपयुक्ताः जनाः भविष्यन्ति। अतः निर्देशनकार्यक्रमः नितराम् आवश्यको भवति।
2. पाठ्यक्रमस्य विविधता, बहूद्देशीयानां विद्यालयानां स्थापनं च निर्देशनस्य आवश्यकतामधिकं स्पष्टं करोति। उक्त–तथ्यैः विद्यालयस्य प्रशासकेषु शिक्षकेषु च इदमतिरिक्तमुत्तरदायित्त्वं निक्षिप्तं यत् ते छात्रान् पाठ्यक्रमस्य व्यवसायस्य च चयने उचितनिर्देशनं दद्युः।
3. अद्यतनीयः समाजः जटिलः सञ्जातः। व्यक्तिः उचितनिर्देशनस्याभावेन जटिलताम् अवगन्तुं, सामञ्जस्यं रक्षितुं च असमर्थो भविष्यति। अतः निर्देशनस्य–आवश्यकता अनुभूता।

निर्देशनस्य अर्थः

यदि निर्देशनसम्बद्धसाहित्यस्य पर्यवेक्षणं क्रियते तर्हि वयम् अस्य अर्थस्य क्षेत्रस्य च विषये विभिन्नानि मतानि आप्स्यामः। केचन लेखकाः निर्देशनं शिक्षायाः पर्यायं मन्यन्ते। अस्मिन् जॉन–एम–ब्रीवर–महोदयस्य नामोल्लेखनीयं वर्तते। ब्रीवर महोदयेन अस्य विस्तृतव्याख्या कृता — ''निर्देशनम्'' इति शब्दः प्रायः असमीचीनोऽवगम्यते, अयमात्मनिर्देशस्य धारणायाः माध्यमेन सम्यक् प्रकारेणावगन्तुं शक्यते–निर्देशनं न तु अनुकूलनं, न परामर्शप्रदानं, न अभीष्टावस्थायामानयनम्, न

नियन्त्रणं, न पथप्रदर्शनं, न चोत्तरदायित्वग्रहणम्-----भविष्यत्सन्ततिः शिक्षणीया, यथार्थ-शिक्षा तु निर्देशनमेवेति दर्शयितुं प्रयासो विधेयः।''[1]

अनेकेषां निर्देशकानां विश्वासः वर्तते यत् यथा ब्रीवरमहोदयेन निर्देशनस्य धारणा स्पष्टा क्रियते, ततो वयं वस्तुतः स्वदृष्टिमन्यस्यां दिशायां परिवर्तयामः। यद्यपि एते जनाः ब्रीवरमहोदयस्य परिभाषां गुणयुक्तां मन्यन्ते, परन्तु एतेषां कथनं वर्तते यत् व्यावहारिककारणैः शिक्षायाः मुख्यपक्षम् अर्थात् निर्देशनं सविशेषं चिन्तयितुं निश्चितं व्याख्यातुं च पृथक् कुर्मः। यदि इदं पृथक् न क्रियते तर्हि विद्यालयाधिकारिभिः पूर्णरूपेण न चेदपि आंशिकरूपेणावश्यमेव विस्मरिष्यते। यः पक्षः एतैः जनैः पृथक्करणार्थं कथ्यते सः व्यक्तिजीवनेन भाविसङ्कटैश्च सम्बद्धः अस्ति। एतादृशेन दृष्टिकोणेन **आर्थर-जे-जोन्समहोदयस्य** निर्देशनस्य व्याख्या निम्नेषु शब्देषु वर्तते—
''सुसङ्घटितरूपेण निर्देशनस्य सम्बन्धः सङ्कटैः जटिलक्षणैश्च वर्तते, यथा निर्वाचनसमये, द्विमार्गप्राप्तसमये, व्यवस्थापनस्य आवश्यकतायाः समये च। स्पष्टोऽयं यत् प्रदत्तसहायता प्रत्यक्षमप्रत्यक्षं वा भवितुं शक्नोति। यः निर्देशितो भवेत्, सः जनः प्रदत्तसहायतायाः विषये विज्ञः अविज्ञः च भवितुं शक्नोति। निर्देशनं सङ्कटसमयेऽथवा तस्य आगमनात्पूर्वमपि दातुं शक्नोति। वस्तुतः उत्तमनिर्देशनं तत् वर्तते यद् चयनस्य आवश्यकतायाः पूर्वं स्यात्। निर्देशने तत् साहाय्यं निहितं वर्तते येन व्यक्तिः क्रमिकरूपेण तथ्यानामनुभवानाञ्च सङ्ग्रहं कुर्वती अस्ति, या तत्समये विवेकेन सह निर्णेतुं समर्था

---

1. "The word Guidance is frequently misconceived, it is best understood through the concept of self-guidance. Guidance is neither adjusting nor suggesting, neither conditioning nor controlling, neither directing nor taking responsibility for any body-.......... Educate the coming generation, we must , and a true education, as we shall try to show, means guidance."

-John M.Brewer:Education as Guidance,PP 2-3

भविष्यति।''[1] अनया परिभाषया स्पष्टं भवति यत् निर्देशनं वैयक्तिकसहायता वर्तते तथा इदं शिक्षायाः आवश्यकं मूलभूतञ्च अङ्गं वर्तते। अत्र एका वार्ता ध्यातव्या यत् उपर्युक्तपरिभाषाः भिन्नाः भवन्त्यपि एकस्मिन्नेव लक्ष्ये बलं ददति यत् जनः जीवनस्य वर्तमान–भावी–समस्याः येन केन प्रकारेण समाधातुं तत्परः समर्थश्च स्यात्।

हेमरिन—इरिक्शनमहोदयोरनुसारं निर्देशनस्य परिभाषा इत्थं वर्तते— ''माध्यमिकविद्यालये निर्देशनं, शैक्षिककार्यक्रमस्य तस्य पक्षस्य उल्लेखं करोति यः प्रधानतः बालकं तस्य वर्तमानपरिस्थित्या अनुकूलयितुं, स्वरुचीनां योग्यतानां सामाजिकावश्यकतानां च अनुसारेण भाविजीवनं योजयितुं सहायतां ददाति।''[2]

उपर्युक्तपरिभाषया स्पष्टं भवति यत् निर्देशनमेका वैयक्तिकसेवा वर्तते, या व्यक्तिं स्वसमस्यानां समाधाने सहायताप्रदानार्थं नियोजिता भवति। निर्देशनं व्यक्तेः समस्यानां समाधानमेव न करोति अपि तु तस्याः समाधाने सहायतामपि ददाति। निर्देशनं एका प्रक्रिया वर्तते। निर्देशनं कार्यचयने, तत्सिद्धतायां, तत्रान्वयने, उन्नतौ च व्यक्तेः साहाय्यप्रदात्री प्रक्रिया भवति। अतः इयं प्रक्रिया बालकं स्वशक्तीनाम् आदर्शानाम्, आत्मानं परितः विद्यमानजागतिकवास्तविकस्थितेश्च अनुसारेण समुचित–निर्णय–चयनव्यवस्थापनेषु सहकरोति। सेवारूपेण इयं बालकानां शिक्षकाणाम् अभिभावकानां प्रबन्धकानाञ्च प्रक्रियाणां समीचीनतया सञ्चालनार्थं सूचनां सहायतां च प्रददाति!

---

(1) "….Guidance, as organized , is then concerned with crisis with times of choice, with times when the ways diverge, with times of need adjustment…. It is clear that the help given may be direct or indirect, the one guided may be conscious of the help given or may be entirely unconscuious of it. The guidance may be given at the time of a crisis or long before it occur. Indeed, the best guidance is usually that given long before the need for choice arises. It consists the assisting of the individial in the gradual accumulation of facts and experiences that will , when the time comes , enable him to decide wisely." **- Arthur J. Jones : Principles of Guidance, PP. 28-29.**

(2) "Guidance in the secondary school refers to that aspect of educational programme which is concerned especially with helping the pupil to become adjusted to his present situation and to plan his future in line with interests, abilities and social needs." **- S.A. Hamrin & E.C. Erickson : Guidance in the Secondary Schools, PP. 1-2**

निर्देशनस्य प्रकाराः

व्यापकार्थे निर्देशनं व्यक्तेः जीवनस्य प्रत्येकक्षेत्रेण सम्बन्धितं वर्तते परन्तु व्यावहारिकप्रयोजनार्थं विभिन्नपक्षान् यस्मै विशेषप्रकारस्य निर्देशनस्य आवश्यकता अस्ति, मान्यता प्रदत्ता। एतेन प्रकारेण निर्देशनस्य निम्नलिखिताः भेदाः कर्तुं शक्यन्ते।

1. शैक्षिकनिर्देशनम्— इदं विद्यालयस्य चयनं, पाठ्यक्रमस्य चयनं, पाठ्यक्रमसहगामिक्रियाः, शैक्षिककार्यक्रमाः इत्यादिभिः च सह उचितानुकूलनेन सम्बद्धं वर्तते। एतदतिरिक्तं शैक्षिकनिर्देशनं बालकानां प्रवेशस्य प्रक्रिया, मूल्याङ्कनं, समयतालिकायाश्च नियमानां ज्ञानप्रदानेनापि सम्बद्धं वर्तते।

2. व्यावसायिकनिर्देशनम्— इदं कस्यापि व्यवसायस्य चयने, अभिचितव्यवसायस्य कृते व्यक्तेः सन्नद्धतायै, तत्र उपयुक्तस्थितिप्राप्तये, उन्नतये च सहायताप्रदानेन सम्बद्धं वर्तते। एतस्मिन् निर्देशने निरुद्योगितायाः आधिक्येन जनानां रुचिः अधिका वर्तते।

3. अवकाशसमयस्य निर्देशनम्— औद्योगीकरणस्य परिणामस्वरूपेण कार्यं घण्टामनु प्रविभक्तं सत् लघुतां भजते अतः अस्य प्रकारस्य निर्देशनं प्रति अधिकं ध्यानं स्यात्। इदं व्यक्तिं स्वावकाशसमयस्य सदुपयोगे सहायताप्रदानेन सम्बद्धं वर्तते। अतः विद्यालयस्य पाठ्यसहगामिक्रियाणामतिमहत्त्वपूर्णं स्थानं वर्तते। अतः बालकाः एताभिः क्रियाभिः अनेन कार्यक्रमेण च परिचिताः भवेयुः।

4. चारित्रिकनिर्देशनम्— इदं चरित्रस्य नैतिकभावस्य च विकासेन सम्बद्धं वर्तते। विदुषां मतानुसारं सामान्यतः अमेरिका-देशस्य सार्वजनिकविद्यालयैः (पब्लिक-स्कूल) अस्य प्रकारस्य निर्देशनस्य अवहेलना कृता। यदा शिक्षिका विद्यालया-धिकारिणश्च बालकानाम् अनुशासनप्रशिक्षणावसरे चारित्रिकनिर्देशनस्य आवश्यकतामनुभवन्ति।

5. नागरिकनिर्देशनम्— अनेन व्यक्तिं समुदायस्य, प्रदेशस्य, राष्ट्रस्य, विश्वस्य च उपयोगिसदस्यां कुशलनागरिकत्वेन च निर्मातुं उचितव्यवस्थायाः आयोजनं क्रियते।

6. स्वास्थ्यनिर्देशनम्— अनेन व्यक्तेः शारीरक-मानसिक-स्वास्थ्यस्य विकासाय यस्मै सः योग्यः तदर्थं सहायता प्रदीयते। विद्यालयेषु शिक्षकाः उपचारिकाः, चिकित्सकाः मनोवैज्ञानिकाश्च स्वास्थ्यनिर्देशनप्रदानार्थं बहून् अवसरान् प्राप्नुवन्ति।

निर्देशनकार्यक्रमस्य सङ्घटनम्

प्रत्येकं विद्यालयस्य स्वसुविधाः समस्याश्च भवन्ति। अतः समस्तविद्यालयानामेतादृशस्य निर्देशनकार्यक्रमस्य निश्चितसङ्घटननिर्धारणम् अतिजटिलमस्ति येन प्रत्येकं विद्यालयस्य आवश्यकतानां पूर्तिः कर्तुं शक्यते। अतः प्रत्येकं विद्यालयस्य आवश्यकतानुसारं निर्देशनकार्यक्रमस्य समायोजने काश्चित् सामान्यतवार्ताः ध्यातव्याः। यासां विवेचनम् अधः वर्तते—

1. राज्यस्य शिक्षाविभागेन एकः राजकीयनिर्देशनाधिकारी नियुज्येत।
2. निर्देशनकार्यक्रमस्य सङ्घटनस्य नियोजनसमये इयं वार्ता ध्याने भवेत् यत् निर्देशनं विद्यालयस्य प्रतिक्रिया अभिन्नाङ्गं वर्तते। विद्यालयेऽस्य सङ्घटनमेतादृशं भवेत् येन निर्देशनस्य सर्वेषु कार्येषु प्रयासेषु च सामञ्जस्यं भवेत्।
3. निर्देशनकार्यक्रमस्य केवलं समस्यात्मकबालकेभ्यः एव न अपि तु सर्वेभ्यः बालकेभ्य नियोजनं स्यात्।
4. निर्देशनकार्यक्रमस्य सङ्घटनं व्यक्तिं केन्द्रं स्वीकृत्य कुर्यात्, अर्थात् कार्यक्रमः तेन जनेन सम्बद्धः स्यात् यस्मै निर्देशनं दातव्यं, यः बालकः स्यात् युवकः प्रौढ़ः वा।
5. निर्देशनकार्यक्रमस्य सङ्घटनमेतादृशप्रकारेण भवेत् येन सः तस्य विद्यालयस्य आवश्यकतानां पूर्तिं कर्तुं शक्नोति, यदर्थं सङ्घटितः वर्तते।
6. निर्देशनकार्यकर्तृभ्यः आवश्यकनिर्देशनसामग्रयाः उचितव्यवस्था भवेत् येन ते स्वकार्यक्रमाणां सम्यग्रीत्या सञ्चालनं कर्तुं शक्नुवन्ति।

लघुविद्यालयेषु निर्देशनसङ्घटनम् अनिवार्यरूपेण सरलं भवेत्, यतः तस्मिन् साधनानामभावः, विस्तृतविद्यालयापेक्षया च निर्देशनसमस्यानां सरलता भवति। एतेषु विद्यालयेषु प्रायः प्रधानाध्यापकः एव समस्तनिर्देशनक्रियाणां सञ्चालनं करोति। सः निर्देशनकार्यक्रमस्य सञ्चालनार्थं निरीक्षणार्थञ्च शिक्षकाणां निर्देशनसमितेः नियुक्तिं कर्तुं शक्नोति। समितिसदस्यानां निर्देशनप्रदानेन निर्देशनस्य समस्तक्रियासु समन्वयस्थापनार्थं विद्यालयस्य अन्यशिक्षकाणां सहयोगेन च कार्यं करणीयम्।

विस्तृतविद्यालयस्य निर्देशनकार्यक्रमस्य सङ्घटनं लघुविद्यालयस्य सङ्घटनस्य अपेक्षया अधिकः व्यापकः भविष्यति। इयं वार्ता ध्याने भवेत् द्वयोः प्रकारयोः

विद्यालययोः निर्देशनस्य कार्याणि समानमेव भविष्यन्ति, अर्थात् तेषां कार्येषु भेदः न भविष्यति। विस्तृतविद्यालयेषु लघुविद्यालयापेक्षया अधिकाः निर्देशनकार्यकर्तारः भविष्यन्ति, ये निम्नलिखिताः भवितुं शक्नुवन्ति—

1. प्रधानाचार्यः।
2. निर्देशनसमितेः सदस्याः।
3. शिक्षकाः।
4. विशिष्टविषयेषु परामर्शदातृविशेषज्ञाः।
5. परामर्शदाता— यदि कस्यापि विद्यालये सहशिक्षा प्रचलति तर्हि तस्मिऽ् बालिकानां बालकानाञ्च पृथक्तया परामर्शदातारः स्युः।

विभिन्ननिर्देशनकार्यकर्तॄणां कार्याणि

1. निर्देशनकार्यक्रमस्य तस्य विभागस्य च सङ्घटनम्।
2. शिक्षकाणां कृते निर्देशनकार्यक्रमस्य उद्देश्यानां सिद्धान्तानां च स्पष्टीकरणम्।
3. परामर्शदातुः चयनं तस्य प्रशिक्षणस्य च व्यवस्था।
4. विद्यालयकार्यक्रमे आवश्यकतानुसारं संशोधनम्।
5. शिक्षकाणां निर्देशनकार्याणां निरीक्षणम्।
6. पाठ्यसहगामिकार्यक्रमस्य विकासनम्।

शिक्षकस्य निर्देशनकार्याणि

1. बालकेषु उपर्युक्तदृष्टिकोणस्य रुचीनाञ्च विकासनम्।
2. स्वविषयस्य व्यावसायिकदृष्टिकोणे बलप्रदानम्।
3. बालकेषु विशिष्टयोग्यतानां विकासनम्।
4. परामर्शदातृभ्यः निर्देशनसमित्यै च सहयोगप्रदानम्।
5. प्रत्येकबालके व्यक्तिगत—रुत्युत्पादनम्।
6. बालकानां रुचीनां, योग्यतानां, आवश्यकतानां समस्यानाञ्च अवगमनम्।
7. बालकानाम् अभिलेखपत्रस्य प्रतिवेदनस्य च निर्माणम्।
8. बालकानाम् उद्यत (Willing) सहयोगप्रापणं तेषाञ्च स्वकीयस्य विकासस्य मूल्याङ्कने सहायताप्रदानम्।

परामर्शदातुः निर्देशनकार्याणि

परामर्शदातुः निर्देशनकार्याणि अतीवमहत्त्वपूर्णानि सन्ति। सः शिक्षकाणामपेक्षया विशेषज्ञस्य स्थानं स्वीकरोति। सः तेषामपेक्षया बालकानामनुकूलने विद्यालयप्रशासने च सहायतां दातुमुपयुक्तव्यक्तिः भवति। परन्तु सः विद्यालयस्य अन्यशिक्षकाणां सहयोगं स्वीकुर्यात्, सहायताभावे च स्वकार्यं समीचीनतया न चालयितुं शक्नोति। अतः प्रथमकार्यं तस्य सहयोगप्राप्तिः, येन सः बालकानां विषये आवश्यकं ज्ञानं प्राप्तुं शक्नोति। परामर्शदाता बालकस्य विषये शिक्षकस्य प्रधानाध्यापकस्य च उत्तरदायित्वरूपे पर्याप्तरूपेण भागग्रहणं करोति, परन्तु सः सम्पूर्णनिर्देशनकार्यक्रमं नियोजयितुं प्राथमिकरूपेण उत्तरदायी वर्तते। तस्य मुख्यकार्याणि निम्नलिखितानि सन्ति—

1. बालकस्य वैयक्तिकतथ्यानां सङ्ग्रहणम्।
2. मनोवैज्ञानिकपरीक्षणस्य व्यवस्था तन्निरीक्षणञ्च।
3. व्यावसायिकसूचनानामेकत्रीकरणम्।
4. बालकेभ्यः वैयक्तिक–सामूहिकमन्त्रणा।
5. विभिन्नव्यवसायेषु बालकानां समायोजने (Placement) सहायता–प्रदानम्।
6. निर्देशनप्राप्तबालकानां विभिन्नपद्धत्या अध्ययनं कृत्वा निर्देशनसेवायाः परिणामानां परीक्षणम्।
7. मनोवैज्ञानिकपरीक्षणानां परिणामानां च व्याख्यानम्।

निर्देशनप्रक्रियायाः मूलाधाराः

निर्देशनकार्यक्रमसञ्चालनसमये निम्नलिखितान् स्तरान् ध्यायेत्—

1. व्यक्तिविषये समस्तसूचनानां प्राप्तिः—विद्यालये निर्देशनमनेन तथ्येन सम्बन्धितं यत् व्यक्तीनां शैक्षिक–व्यावसायिक–जीवनस्य (Careers) नियोजनं कुर्यात्। एतादृशं तदैव सम्भवति यदा व्यक्तिविषये उपयुक्तसूचना, ज्ञानं च प्राप्येरन्। विद्यालयेषु बालकान् निर्देष्टुं यासां वार्तानां ज्ञानमावश्यकं ताः निम्नलिखिताः सन्ति—

(क) सामान्यवार्ताः— एतदन्तरा बालकस्य गृहस्य संकेतः, पित्रोर्नाम, व्यवसायश्चेति सूचनाः सङ्ग्रहीताः भवन्ति।

(ख) शारीरकतथ्यम्— अस्मिन् बालकस्य स्वास्थ्यसम्बन्धिसूचनाः एकत्रिताः क्रियन्ते।

(ग) पारिवारिक-सामाजिकवातावरणसम्बन्धितथ्यम्— एतस्मिन् पारिवारिकवातावरणसम्बन्धिसूचनाः, परिवारस्याकारः, परिवारस्य सदस्यानां परम्परसम्बन्धः, पित्रोः शैक्षिक-आर्थिकस्तरः, प्रतिवेशी सामाजिकदशाः, बालकस्य गृहात् बहिः रुचयश्च सम्मिलिताः सन्ति। तदतिरिक्तं तस्य समाजस्य सम्बन्धे सूचना प्राप्यते।

(घ) ज्ञानप्रापणसम्बन्धितथ्यम्— अत्र बालकानां विषय-ज्ञानप्रापण-सम्बन्धि, तेषां सैद्धान्तिक-व्यावहारिकयोग्यतासम्बन्धि च तथ्यं प्राप्यते।

(ङ) मनोवैज्ञानिकतथ्यम्— इदं बालकस्य मानसिकविशेषताविषयं सूचयति। शैक्षिकव्यावसायिकनिर्देशनार्थं मानसिकविशेषतानामतिमहत्त्वं वर्तते। बालकस्य रुचयः, क्षमताः, अभिवृत्तयः सामान्यबुद्धिः इत्यादीनां ज्ञानं निर्देशनकार्यार्थमत्यन्तम् आवश्यकमस्ति।

(च) व्यक्तेः स्वकीयस्य शैक्षिकं व्यावसायिकं च योजनासम्बन्धितथ्यम्— निर्देशनार्थं स्वयं बालकस्य शैक्षिकव्यावसायिकयोजनानां ज्ञानमावश्यकं वर्तते। बालकानां योजनाभिः सम्बन्धितानां वार्तानां ज्ञानं प्राप्तुं परामर्शदातुः शिक्षकस्य वा साक्षात्कार-प्रश्नावली-निरीक्षण-पद्धतीनामुपयोगं कुर्यात्।

2. वातावरणसम्बन्ध्यवसरैः सम्बद्धं तथ्यम्— निर्देशनं प्राप्तुं समस्तशैक्षिक-व्यावसायिकानां च अवसराणां (Opportunities) ज्ञानमावश्यकमस्ति। विद्यालये ये शैक्षिकावसराः प्राप्ताः सन्ति तेषां विषये ध्यानं नास्ति चेत् परमर्शदाता उपयुक्तप्रकारेण बालकानां पथप्रदर्शनं नैव कर्तुं प्रभवति। अस्मिन् सम्बन्धे पाठ्यक्रमः, पाठ्यक्रमसहगामिक्रियाः, विद्यालयस्य नियमाः परम्पराश्च, शैक्षिकसुविधाः, पुस्तकालयः, कार्यशाला, प्रयोगशाला, शिक्षणपद्धतयः, सहायकसामग्री इत्यादीनां विषये सूचनाप्राप्तिः आवश्यकं वर्तते। व्यावसायिक-अवसराणां सम्बन्धे कार्यकर्तर्णिां कर्तव्यानि, विभिन्नदेशैः व्यवसायैश्च सम्बन्धिसूचनाः तस्मिन् च प्रवेशाय विधयः इत्यादिभिः सम्बद्धं ज्ञानं प्राप्तव्यमस्ति।

3. मन्त्रणा (Counselling)**—** मन्त्रणा, निर्देशनकार्यक्रमस्य एका महत्त्वपूर्णा रीतिः वर्तते। सा च द्विविधा- व्यक्तिगतमन्त्रणा, सामूहिकमन्त्रणा चेति। वस्तुतः उपयुक्तमन्त्रणाम् एव सम्पूर्णनिर्देशनकार्यक्रमस्य सफलता आश्रित्य वर्तते।

4. व्यवस्थापनं वर्गीकरण वा— एतद्विषयकार्यप्रशिक्षणात्पूर्वं (Job-

Training) उपयुक्तनिर्वाचने निर्देशनस्यावश्यकता भवति। अनेन बालकेभ्यः अनुकूलने सहायता प्रदीयते, अनुकूलनं शैक्षिकक्षेत्रे भवेत् व्यावसायिकक्षेत्रे वा।

5. निर्देशितव्यक्तेः भाविजीवनस्य सूचनाप्राप्तिः[1]— एतेन निर्देशनप्राप्तबालकानां विभिन्नपद्धतिभिः अध्ययनं कृत्वा निर्देशनसेवानां परिणामानां मूल्याङ्कनं क्रियते। बालकैः व्यक्तिगत–सामाजिक–जीवने साफल्यं निर्देशनस्य सफलतां द्योतयति। उच्चतरमाध्यमिकस्तरे निर्देशनं सफलमिति तदैव वक्तुं शक्यते यदा तत्स्तरीयः छात्रः भूताद्यतनभविष्यत्स्थितीः आत्मानं च स्पष्टमवगन्तुं समर्थः स्यात्।

निर्देशनसम्बन्धिनः शिक्षा–आयोगस्य विचाराः–शिक्षा–आयोगस्य मतानुसारं निर्देशनं मन्त्रणा च शिक्षायाः आवश्यकमङ्गं भवति। तत् केवलं समस्यात्मकबालकेभ्यः एव न अपि तु समस्तबालकानां कृते भवेत्। अस्योद्देश्यं तेषां यथासमयं स्वनिर्णयानां व्यवस्थापने निर्धारणे सहायताप्रदानं भवेत्। शिक्षा–आयोगेन विद्यालयशिक्षायाः विभिन्नस्तरेषु अस्मिन् विषये निम्नलिखिताः परामर्शाः दत्ताः सन्ति—

(अ) प्राथमिकस्तरे निर्देशनम्

1. प्राथमिकविद्यालयस्य निम्नतमकक्षाया निर्देशनं प्रारभेत।

2. प्राथमिकविद्यालयेषु पृथग्रूपेण परामर्शदातुः नियुक्तिः कठिना भवति, यतः तेषां संख्या अधिका भवति। इयं व्यवस्था व्ययसाध्या भविष्यति। अतः व्यावहारिकदृष्टिकोणेन तेषां शिक्षकाणां प्रशिक्षणकाले निर्देशनसम्बन्धिवार्तानां ज्ञानं दातव्यं येन ते एतत् कार्यं सफलतापूर्वकं व्यक्तिगतविभिन्नताभिः आवश्यकरूपेण परिचिताः भवेयुः।

3. प्रशिक्षणविद्यालयेषु निर्देशनसेवानां (Guidance Service) सञ्चालनं स्यात्।

4. प्राथमिकशिक्षकेभ्यः सेवाकालिकपाठ्यक्रमस्य (In service course) व्यवस्था क्रियेत। प्रादेशिकभाषासु व्यावसायिकसाहित्यस्य निर्माणं स्यात्।

5. प्राथमिकशिक्षायाः समाप्तौ छात्रेभ्यः तेषामभिभावकेभ्यः च अग्रिमशिक्षायै विषयाणां चयने सहायताप्रदानम्।

(ब) माध्यमिकस्तरे निर्देशनम्

1. माध्यमिकस्तरे निर्देशनं छात्राणां रुचीणां योग्यतानाञ्च विकासे साहाय्यं स्यात्।

---

1. Adjustment or Placement.

2. सर्वेषां माध्यमिकविद्यालयानां न्यूनतमनिर्देशनकार्यक्रमस्य निर्माणं भवेत्।

3. 19 माध्यमिकविद्यालयेभ्यः एकस्य परामर्शदातुः नियुक्तिं कुर्यात्। परन्तु विद्यालयस्य अन्यशिक्षकाः परामर्शदातृभ्यः निर्देशनस्य कार्येषु आवश्यकसहयोगं स्वीकुर्युः।

4. प्रत्येकस्मिन् जनपदे न्यूनातिन्यूनमेकस्मिन् विद्यालये निर्देशनस्य विस्तृतकार्यक्रमस्य सञ्चालनं कुर्यात्, यत् तस्य जनपदस्य सर्वेभ्यः विद्यालयेभ्यः आदर्शकार्यं करिष्यति।

5. माध्यमिकविद्यालयस्य सर्वे अध्यापकाः प्रशिक्षणकाले सेवाकाले वा निर्देशनसम्बन्धितथ्यैः अवगताः भवेयुः।

भारतीयपरिस्थितौ निर्देशनेन सम्बद्धसमस्यासु अनुसन्धानकार्यं तत्सम्बन्धितसाहित्यं सन्नद्धं कुर्यात्। शिक्षायोगस्य उपर्युक्तपरामर्शाः अतिमहत्त्वपूर्णाः वर्तन्ते। आयोगेन निर्देशनस्यावश्यकतानुभूता। एतेन कारणेन एव प्राथमिकस्तरात् एव अस्यां व्यवस्थायां बलं दत्तम्।

पुनरावृत्ति-प्रश्नाः

1. निर्देशनेन भवान् किं जानाति? स्पष्टयत।
2. अद्यतनीयमाध्यमिकविद्यालयेभ्यः निर्देशनस्य आवश्यकता कथमस्ति?
3. ''निर्देशनं वैयक्तिकसेवा वर्तते'' इति कथनं विवेचयत?
4. निर्देशनस्य के के भेदाः सन्ति? निर्देशनकार्यक्रमस्य सङ्घटनसमये काः काः वार्ताः ध्यानयोग्याः भवन्ति, कथञ्च?
5. ''परामर्शदाता सम्पूर्णनिर्देशनकार्यक्रमस्य नियोजने उत्तरदायी वर्तते'' इति कथनं स्पष्टयत।
6. निर्देशनप्रक्रियायाः सञ्चालने काः बाधाः भवन्ति?
7. शिक्षा -आयोगेन विद्यालयस्तरस्य कृते निर्देशनकार्यक्रमस्य विषये के परामर्शाः दत्ताः सन्ति?

लेखार्थः प्रश्नः

''निर्देशनकार्यक्रमः केवलं परामर्शदातुः एव न अपि तु अयं विद्यालयस्य बहिर्भागे अन्तर्भागे च प्रशासनिकानां सर्वेषु कार्यक्रर्तर्णिां सम्मिलितं दायित्वं वर्तते'' सोदाहरणं स्पष्टयत।

❑❑❑

षष्ठः खण्डः

विद्यालयस्य सामाजिकपक्षः

(SOCIAL ASPECT OF THE SCHOOL)

- विद्यालयः समाजश्च
- विद्यालयः समुदायश्च
- विद्यालयः गृहञ्च
- विद्यालयस्य संसृष्टजीवनम्
- नागरिकतायाः शिक्षा
- जनसंख्याशिक्षा
- पर्यावरणशिक्षा

''विद्यालयः सामाजिकजीवनस्य आदर्शः सारभूतः स्यात्। विद्यालयः स्वपरिवेशे समाजस्य सर्वेषां मुख्योपयोगिगतिविधीनां स्थानं दद्यात्।''

—के.जी. सैयदेन-महोदयः

25

विद्यालयः समाजश्च

(School And Society)

"The school is to be a reflection of larger society, outside its walls, in which life can be learnt by living. But it is to be a purified, simplified and better balanced society."

-John Dewey.

मानवसमाजः स्वादर्शान् भावान् क्रियाः आगामिन्यै सन्ततये प्रददत् आत्मानं जीवयति, यदा हि तदीयमूल्यादर्शपरम्पराविचारधाराः पुरातनतां यान्ति, न सन्ति च लाभप्रदा इत्यनुभूयते तदा ताः त्यज्यन्ते, नूतनादर्शविचारधाराः आत्मसात्क्रियन्ते च। समाजः इदं कार्यं शिक्षायाः माध्यमेन करोति। समाजः स्वकीयं जीवितं स्थापयितुं विभिन्नप्रकारस्य शैक्षिकसंस्थानां स्थापनां करोति, यथा समाजस्य विचारान्, भावान्, आदर्शान्, क्रियाः, मानदण्डान्, परामर्शान् च भाविसन्ततिं प्रापयितुं शक्नोति। अस्मिन् सम्बन्धे **फ्रेंकलिनमहोदयस्य** मतमस्ति ''समाजः शिक्षासंस्थानां स्वसदस्येषु एतादृश–ज्ञान–कौशलादर्श–वृत्तीनाञ्च प्रसारणाय संरक्षणाय च स्थापनं करोति, यत् तस्य स्थिरतायै निरन्तरविकासाय च परमाश्यकं वर्तते।'' [1] अतः समाजः शिक्षासंस्थाः स्थापयित्वा ततः अस्यापेक्षां करोति यत् संस्थाः बालकेषु तान् गुणान् विकासयेयुः यान् प्राप्य ते समाजस्य विभिन्नक्रियासु कुशलपूर्वकं भागं नेतुं शक्नुवन्ति। समाजः व्यक्तेः विकासाय हितानां रक्षायै च प्रयत्नशीलः अस्ति, समाजः व्यक्तेः अपेक्षते सा सामाजिकजीवनं स्थायि कुर्यादिति। एतेन स्पष्टं यत् विद्यालयस्य महत्त्वपूर्णं

---

(1) ''Society maintains educational institutions to preserve and disseminate among its members such knowledge, skills, ideals and habits that are essential to its perpetuation and to its constant development **''** **—Franklin.**

दाायित्वमिदं वर्तते यत् बालकाः बालिकाश्च समाजस्य आदर्शैः विचारधाराभिः परम्पराभिः अवगताः स्युः येन च तेषु समाजं समृद्धं विधातुमुत्कुण्ठा उत्पन्ना स्यात्।

उपर्युक्तविवेचनस्याधारेण वक्तुं शक्यते यत् समाजः शिक्षायाः समुचितव्यवस्थामकृत्वा जीवितुं न शक्नोति, न वा शैक्षिकसंस्थाः समाजस्याश्यकताः पूर्तिं विना स्थिरं स्थातुं शक्नुवन्ति। यस्मिन् समाजे विद्यालयः स्थिरो भवति, तादृशविद्यालये सामाजिक–राजनैतिक–सांस्कृतिक–प्रभावाः नूनं भवन्ति। ये नागरिकाः विद्यालयस्य व्ययभारं वहन्ति, ते शिक्षायाः मात्रायाः प्रकारस्य च नियन्त्रणं कुर्वन्ति। विद्यालयः स्वादर्शप्रस्तुत्या, समाजस्याप्रत्यक्ष–रूपालोचनया च तस्य प्रदूषितवातावरणं शुद्धीकर्तुं प्रयासं करोति। साकमेव सः एतादृशनागरिकाणां निर्माणं करोति ये भाविसमाजस्य निर्मातारः भवन्ति। अतः एतयोः द्वयोः परस्परं आश्रयता प्राप्स्यते। विद्यालयस्य समाजस्य च सम्बन्धानां विषये **सी.एम. कैम्पबैल** (C.M. Campbell) महोदयेन निम्नलिखिताः समवधीयन्ते—

1. विद्यालयकार्यक्रमस्य सामाजिक–आर्थिक–राजनैतिक–सांस्कृतिकजीवनस्य च घनिष्ठसम्बन्धः वर्तते। अतः विद्यालयस्य पाठ्यक्रमः समाजावश्यकताः ध्याने निधाय निर्धारितः स्यात्।

2. विद्यालयकार्यक्रमाणां पूर्तये समाजस्य समस्तसाधनानाम् उपयोगः आवश्यकः। अतः समाजस्य उत्तरदायित्त्वं वर्तते यत् स. स्वसमस्तसाधनैः विद्यालयस्य कार्येषु सहायतां प्रददातु।

3. विद्यालयः सामाजिकविकासयोजनासु सक्रियभागं नीत्वा योग्यनेतृत्वेन समाजं प्रति स्वकर्तव्यानि निर्वहति।

विद्यालयस्य समाजस्य च सम्बन्धदर्शनेन स्पष्टं यत् एतयोः परस्परसहयोगेन विना कार्यं भवितुं न शक्नोति। विद्यालयानां कर्तव्यमस्ति यत् ते बालकान् जीवनस्य विभिन्नपक्षैः अवगमयन्तु येन ते परिवर्तनशीलवातावरणस्य विभिन्नतत्वानि ज्ञातुं शक्नुवन्ति। स्वसंस्कृतेश्च सुवार्तां गृहीत्वा सामाजिक–उन्नतौ सहयोगं कुर्युः।

विद्यालयः— समाजस्य लघुरूपम्

अधुना पर्यन्तं विद्यालयः मुख्यरूपेण एतादृशं स्थानं ज्ञायते स्म यत्र पाठ्यक्रमस्य कस्मिंश्चित् विषये निर्देशो दीयते। इत्थं विद्यालयस्य कार्यं परम्परागतविषयस्य परम्परागतपद्धत्या शिक्षणपर्यन्तं सीमितमासीत्। पाठ्यपुस्तकानां निर्माणं सूचनाप्रदानस्य

दृष्टिकोणेन प्रदीयते स्म, शिक्षणान्तर्गतं बालकेभ्यः मात्रं सूचनाः प्रदीयन्ते स्म। निरीक्षणानि परीक्षाश्च सामान्यरूपेण अद्यापि निर्देशस्य सूचनात्मकपक्षे बलं ददति। सत्यमिदं यत् सूचनाः शिक्षायाः आवश्यकाङ्गानि सन्ति। परन्तु अनेन सह स्पष्टमस्ति यत् येन प्रकारेण ज्ञानं सूचनायाः प्रवरं तेन प्रकारेण शिक्षापि ज्ञानेन प्रवरास्ति। न ज्ञानमेव साध्यं, न वा ज्ञानं हि सर्वं शिक्षायाः। आधुनिकशिक्षाचार्याणामयमनुभवः विद्यालयस्य प्रवर्तमानपरम्परागतधारणाः समापयितुं तान् विवशान् अकरोत्, तथा ते विद्यालयं नूतनदृष्टिकोणेन द्रष्टुं प्रारभन्त। नवीनदृष्टिकोणानुसारं विद्यालयः समाजस्य एकं लघुरूपं मन्यते। पाश्चात्त्यदेशेषु अयं नवीनदृष्टिकोणः प्रतिदिनं प्रवर्धते, पारम्परिकविद्यालयान् एतद्दृष्टिकोणानुसारेण परिवर्तनाय प्रयासो विधीयते।

माध्यमिकशिक्षा-आयोगस्य— ''नास्त्यत्र सन्देहः विद्यालयः लघुसमाज इति, परन्तु सः बृहत्समाजमन्तरा विद्यमानः लघुसमाजः भवति। एतस्य साफल्यं जीवनशक्तिश्च विद्यालयसमाजयोः मध्ये सततं जायमानं पारस्परिकप्रभावमाश्रित्यैव भवतः। इदं खलु साधनीयं यत् पारिवारिक-सामाजिकजीवने याः समस्याः उत्पद्यन्ते, यश्च प्राप्यते अनुभवः, तान् विद्यालयं प्रापयामः तदाधारितां कुर्मः शिक्षां ; येन समाजस्य वास्तविकजीवनेन विद्यालयस्य घनिष्ठः सम्बन्धः स्थापितः स्यात्। तथैव विद्यालये बालकः यत् नूतनं ज्ञान-कौशल-मनोवृत्ति-मूल्याादिकं प्राप्नोति, तत् समाजिकसमस्यानां समाधानार्थं, समाजस्तरप्रवर्धनाय च प्रयुञ्ज्महे'' इति मतम्।

एवं माध्यामिक-शिक्षा-आयोगः विद्यालयस्य समाजस्य च पारस्परिक-उपयोगितायाः वृद्धेः आवश्यकतायाः एवानुभवं न अकरोत् अपि तु अस्योद्देश्यस्य प्राप्तये परामर्शम् अदात् यत् विद्यालयः समाजस्य लघुरूपं स्यात्। समाजस्य प्रवृत्तिः क्रियाकलापाः विभिन्नावस्थाश्च विद्यालये प्रतिविधत्ताः स्युः। येन छात्राः स्वसरलजीवने एव भाविनागरिकजीवनस्य प्रत्यक्षं व्यावहारिकञ्च अनुभवं प्राप्तुं शक्नुवन्ति। विद्यालयजीवनं सामाजिकजीवनस्य एकमङ्गमस्ति। अतः विद्यालये बालकेभ्यः बालिकाभ्यश्च एतादृशान् अवसरान् प्रदद्युः यैः लाभान्विताः भूत्वा ते विद्यालयात्परं सामाजिकक्रियासु भागग्रहणाय समार्थ्यं सम्पादयितुं शक्नुवन्ति। तदर्थं विद्यालये सामाजिकजीवनस्य क्रियाः अनुभवान् च सरलरूपेण शुद्धरूपेण सन्तुलित-रूपेण च बालकानां समक्षं प्रस्तुयुः। यदा विद्यालयेषु बालकेभ्यः त एव अनुभवाः दास्यन्ते ये सामाजिकानुभवेन सम्बद्धाः सन्ति तेषां च प्राप्त्या प्रमुखक्रियाकलापान्

अवगन्तुं शक्नुवन्ति, तदैव विद्यालयः समाजस्य लघुरूपं कथयितुं शक्यते। अद्यास्माकं समाजः प्रजातन्त्रीयः वर्तते। विद्यालयं समाजस्य लघुरूपं निर्मातुं सर्वप्रथम-मावश्यकमस्ति यत् तस्मिन् प्रजातन्त्रीयसिद्धान्तानां स्थानं स्यात्, तदर्थं व्यवस्था प्रजातन्त्रीयादर्शानां सिद्धान्तानाञ्च अनुसारेण क्रियेत। अनेन बालकेभ्यः स्वशासनं, स्वदायित्त्वानां निर्वहणं, मतस्य सदुपयोगः च इति व्यावहारिकज्ञानप्रदानाय अवसराः प्राप्यन्ते। नेतृत्वं समाजस्य एका आवश्यकी जनक्रिया वर्तते। छात्रेभ्योऽपि विभिन्नसभानां समितीनाञ्च सञ्चालनस्य कार्यं दत्वा नेतृत्वस्य अनुभवप्राप्तये अवसराः प्रदातुं शक्यते। समाजसेवायै, मानवस्य कल्याणकामनायाः शुभेच्छा जागरणाय च विद्यालये विभिन्नसेवासमितीनां स्थापना कर्तुं शक्यते। प्राथमिकचिकित्सा-श्रमदान-आर्थिक-शैक्षिक-सेवानां रूपेण विद्यालयजीवने मूल्यवदनुभवाः प्राप्तुं शक्यन्ते।

विद्यालयव्यवस्थायां पारविारिकजीवनस्य गुणानां समावेशनेन बालकेभ्यः स्नेहपूर्णं सहयोगपूर्णं च वातावरणं मेलिष्यति। तस्मिन् परस्परकल्याणकामना, अन्यसदस्यानां कल्याणाय स्वकल्याणस्य त्यागः अन्यस्य च दुर्बलतां प्रति उदारभावाः च विकसिताः भविष्यन्ति। ते शिक्षकाणां स्नेहं प्राप्स्यन्ति, कनिष्ठछात्रान् प्रति स्नेहयुक्ताः, ज्येष्ठैः आदरयुक्तव्यवहारं कर्तुमभ्यस्ताः च भविष्यन्ति।

बालकेभ्यः समाजस्य अर्थव्यवस्थायाः च ज्ञानं दातुं स्थानीय-उद्योगैः परिचयो भवेत् विकसितदेशेषु अद्यत्वे सहकारितायाः सिद्धान्तानां क्रियान्वयस्यावश्यकता उत्तरोत्तरं बलं गृह्णन् अस्ति। सहकारितायाः भावनां विकासयितुं विद्यालये सहकारिवस्तुभण्डारस्य सहकारिजलपानगृहस्य च स्थापना कर्तुं शक्यते। बालकाः सहकारिवित्तकोषेण मितव्ययतार्थं प्रोत्साहनस्यातिरिक्तं शैक्षिक-अनुभवान् च प्राप्नुवन्ति।

'क्रय-विक्रयः' 'आपणः' च समाजस्य आर्थिकजीवनस्य एकं प्रमुखाङ्गं वर्तते। एतस्य क्रियात्मक-अनुभव-प्राप्तये विद्यालये 'बालमेला' इत्यस्यायोजनं कुर्तं शक्यते। एतस्मिन् छात्राः स्वस्वापणान् व्यवस्थापयेयुः क्रय-विक्रयञ्च कुर्युः, कूपन्-पद्धतेः प्रयोगं कुर्वन्ति चेत् समीचीनं भविष्यति। अस्याः योजनायाः सफलतायां बालकानां सहकारिवित्तकोषोऽपि साहाय्यं दातुं शक्नोति। बालकाः तस्मिन् धनप्रदानलेखद्वारा (चैक) विशेषमुद्रां प्राप्तुं शक्नुवन्ति।

देशस्य प्रदेशस्य च शासनव्यवस्थां स्पष्टयितुं छात्रसंसदः (छात्रपार्लियामेंट) स्थापना अपि भवितुं शक्यते। एवं समाजानुरूपव्यवस्थया विभिन्नक्रियाभिश्च विद्यालये एव समाजस्यावधारणा स्थापयितुं शक्यते। एवमेव विद्यालयः समाजस्य लघुरूपं भवितुं शक्ष्यति।

परन्तु विद्यालयं समाजस्य लघुरूपं निर्मातुं विद्यालये केवलं तेषामनुभवानां एव स्थानं दातव्यम् ये सामाजिकजीवनस्य उज्ज्वलस्वरूपस्य व्याख्यां कुर्युः, तासां च क्रियाणां स्थानं स्यात् यासां जीवने स्थायिमहत्त्वं वर्तते। एवं विद्यालये समाजस्य शुद्धस्वरूपस्य प्रस्तुतिं कुर्यात् बाह्यसामाजिकजीवनेन च केवलं तादृशविचारान् एव गृह्णीयात् ये शुद्धाः निर्दोषाश्च सन्ति।

विद्यालय एका सामाजिक—संस्था

(School is a Social Institution)

ड्यूवी महोदयस्य मतानुसारम्— यथा स्वस्थशरीस्य कृते भोजन-प्रजननादि अनिवार्यं वर्तते तथा समाजस्य अस्तित्वाय शिक्षाऽनिवार्या भवति। शिक्षा तदा प्रारब्धा भवित यदा बालकः प्रजातेः सामाजिकचेतनायां सक्रियरूपेण भागं गृह्णाति। अतः सः शिक्षायाः महत्त्वपूर्णसाधनरूपेण विद्यालयमेकां सामाजिकसंस्थां मन्यते यस्यां प्रजातेः सामाजिकचेतनानां स्थानं प्रदातुं शक्यते। एतस्यां सामाजिकसंस्थायां बालकाः परस्परम् अधिकाराणां, विचारणां, व्यक्तीनाञ्च सम्मानं स्वकर्त्तव्यानां बुद्धिपूर्वकं निर्वहणं च शिक्षन्ते। एतदतिरिक्तमेषा संस्था बालकान् तासु सामाजिक—क्रियासु प्रशिक्षितान् करोति याः वर्तमान—सामाजिकजीवने प्रचलिताः सन्ति। अतः विद्यालयः स्वपरिसरस्य बहिः विद्यमानस्य बृहत्समाजस्य प्रतिबिम्बमस्ति यस्मिन् जीवनं जीवनेन शिक्ष्यते। **ड्यूवी महोदयस्य** कथनमस्ति—''विद्यालयोऽस्ति सामाजिकसंस्था। शिक्षा हि सामाजिकप्रक्रियेति कारणात् विद्यालयः सामुदायिकजीवनस्य तत्स्वरूपमस्ति यत्र सर्वं साधनं केन्द्रितं वर्तते, यच्च बालकं स्वानुवंशिकपैतृकसंपत्तेः स्वीयं भागं प्राप्तुं, स्वशक्तीः सामाजिकहिताय उपयोक्तुं च सन्नद्धं करोति।''

शिक्षा-आवश्यकरूपेण सामाजिककार्यमस्ति। समाजः एतत्कार्यं विद्यालयं प्रति समर्पयति, तस्योपरि च बालकानां शिक्षणस्य दायित्वं निक्षिपति येन ते स्वसमूहस्य जीवने कुशलतापूर्वकं भागं नेतुं शक्तुवन्ति। अनया दृष्ट्या विद्यालयः सामुदायिक-

जीवनस्य केन्द्रं भवति। अस्मिन् सम्बन्धे **बालकृष्णजोशी** (T. Balkrishan Joshi) महोदयस्य कथनं वर्तते "विद्यालयः गतिशीलसामुदायिककेन्द्रं वर्तते यत् चतसृषु दिशासु जीवनस्य शक्तेश्च सञ्चारं करोति।" अतः वयं वक्तुं शक्नुमः यत् विद्यालयः एका सामाजिकसंस्था वर्तते। संस्थां समाजः स्वोद्देश्यानां प्राप्तये स्थापयति। वयमस्य तथ्यस्य पुष्टिं **टी.पी. नन् महोदयस्य** शब्देषु कुर्मः—"कस्यापि राष्ट्रस्य विद्यालयाः तस्य जीवनस्य तानि अङ्गानि सन्ति येषां विशेषकार्यमस्ति तस्याध्यात्मिकशक्तेः दृढीकरणं, तस्य ऐतिहासिकनिरन्तरतायाः स्थापनं, तस्यातीतस्य सफलतायाः संरक्षणं, तस्य भविष्यस्य निश्चयः चेति।" सामाजिकसंस्थायाः रूपेण अद्यतन—विद्यालयानां निम्नकार्याणि निर्धारितानि सन्ति—

1. अद्य विद्यालयस्य कार्यं **3R** यावत् एवं सम्बद्धं न भूत्वा **7R** पर्यन्तं विस्तृतं सञ्जातं—**पठनं** (Reading), **लेखनं** (Writing), **गणना** (Arithmetic), **मनोरञ्जनं** (Recreation), **अधिकाराः** (Rights), **दायित्वं** (Responsibilities), **सम्बन्धाश्च** (Relationships)।
2. लोकतन्त्रस्य कृते प्रशिक्षणप्रदानम्।
3. संस्कृतेः संरक्षणम्।
4. सामाजिकसंवर्धनस्य साधनरूपेण कार्यकरणम्।
5. सामाजिकन्यायस्य स्थापनायाः साधनरूपेण कार्यकरणम्।
6. वैज्ञानिकप्रवृत्तेः विकासः, येन बालकः सामाजिकः सहयोगी च भूत्वा जीवनयापनं शिक्षितुं शक्नोति।

बहूद्देशीयविद्यालयाः

(Multipurpose Schools)

'**माध्यमिकशिक्षा— आयोगः**' उच्चमाध्यमिकस्तरस्य कृते यस्य पाठ्यक्रमस्य प्रारूपं प्रास्तौत् तस्य शिक्षणस्य व्यवस्थायै बहूद्देशीयविद्यालयानां स्थापनायाः परामर्शः दत्तः। बहूद्देशीयविद्यालयस्यार्थं स्पष्टयन् आयोगः लिखति—"बहूद्देशीयविद्यालयः विभिन्न—उद्देश्य—रुचि—क्षमता—युक्तछात्रेभ्यः विभिन्नप्रकाराणां पाठ्यक्रमाणामायोजनं करोति। एषः प्रत्येकं छात्रं व्यक्तिगतरूपेण तेन चितस्याध्ययनस्य विशिष्टपाठ्यक्रमे

स्वस्वाभाविकयोग्यतानाम् आशक्तीनाञ्च प्रयोगस्य तेषां विकासाय च उपयुक्तावसरप्रदानस्य प्रयासं करोति।''[1]

शिक्षामर्मज्ञाः कथयन्ति यत् माध्यमिकशिक्षा स्वयमेव पूर्णा भवेत्, अर्थात् बालकः एतादृशीं शिक्षां प्राप्यानन्तरं स्वकीये समाजे आत्मानं व्यवस्थापयितुं स्वकीयकार्यं कर्तुं च योग्यो भवेत्। बहूद्देशीयविद्यालयेषु प्रदीयमाना माध्यमिकशिक्षा छात्रान् आर्थिककुशलान् योग्यनागरिकान् च कुर्तं सहायिका भवितुं शक्नोति। यदि एते विद्यालयाः समुचितरूपेण सञ्चाल्यन्ते तर्हि एतेभ्यः बालकेभ्यः कस्यापि रचनात्मकोत्पादक—समाजस्य कृते कल्याणमयकार्यस्य शिक्षां दत्वा राष्ट्रियसम्पत्तेः वृद्धौ सहायकाः स्युः एते विद्यालयाः।

'**माध्यमिकशिक्षा—आयोगेन**' बहु-उद्देश्यीयविद्यालयानां निम्नलिखिताः लाभाः उक्ताः—

1. ''बहु-उद्देशीयविद्यालयाः तत्घृणास्पदभेदभावं समापयन्ति यः छात्रेषु विभिन्नपाठ्यक्रमस्य अध्ययनेन उत्पन्नः, हीनतायाः तां भावनां समापयन्ति ये व्यावसायिकविषयैः सम्बद्धाः सन्ति, शिक्षाप्रणालीं तादृशीं करोति, या वस्तुतः लोकतन्त्रीया अस्ति।''[2]

2. ''बहु-उद्देशीयविद्यालयः छात्रेभ्यः शिक्षायाः विभिन्नमाध्यमं सुलभं रचयति, एवं तेभ्यः स्वरुचीनां योग्यतानाञ्चानुसारमध्ययनस्य विषयेषु चयनार्थम् उपयुक्तशैक्षिकनिर्देशनं करोति।''[3]

---

(1) "A multipurpose school seeks to provide varied types of courses for students with diverse aims, interests and abilities. It endeavours to provide for each individual pupil suitable opportunity to use and develop his natural aptitude and inclination in the special course of studies chosen by him."

-Report of the Secondary Education Commission, P.37.

(2) "It removes all invidious distinctions between students preparing for different courses of studies, breaking down the sense of inferiority that is associated with vocational subjects and makes it possible to plan the educational system on a truely democratic basis."

-Report of the Secondary Education Commission, P.30.

(3) "It provides a greater variety of educational media and there by facilitates proper educational guidance in the choice of studies."

Ibid. P.31.

3. ''बहु-उद्देशीयविद्यालयः तेषां बालकानां समस्यायाः समाधाने साहाय्यं करोति ये विषयस्य चयने दोषान् कुर्वन्ति। यतः तान् अन्यान् विद्यालयान् प्रति स्थानान्तरणस्य अपेक्षया स्वरुचि—योग्यतानुसारं तस्यैव विद्यालयस्य कस्यापि समूहे वर्गे वा स्थानान्तरणमधिकं सुकरं भवति।''[1] भारतसर्वकारेण 1954 वर्षात् बहूद्देशीयविद्यालयानां स्थापनायाः योजनां क्रियान्विताः। प्रथमपञ्चवर्षीययोजनापर्यन्तं 255 बहूद्देशीयविद्यालयाः स्थापिता आसन्। इदानीं प्रायः चतुःसहस्रं बहूद्देशीयविद्यालयाः सन्ति। एतेषु 262 विद्यालयेषु प्राविधिकविषयाणां शिक्षा प्रदीयते।

उपर्युक्तविचाराणामाधारेण इदं प्रतीयते यत् बहु-उद्देशीयविद्यलायैः छात्रस्य, समाजस्य, राष्ट्रस्य च कल्याणं सम्भवति। परन्तु शिक्षाऽऽयोगः एतेषां विद्यालयानां सम्भवतः कांचन विशेषोपयोगितां न मन्यते यतः आयोगेन स्वप्रतिवेदने एतेषां विद्यालयानां विषये कोऽपि विचारः न प्रकटितः अस्ति अपि तु स्वप्रतिवेदने **बहुव्यवसायपाठानां** (Polytechnics) स्थापनायां बलमदीयत।

1986 वर्षस्य राष्ट्रियशिक्षानीतौ गतिनिर्धारकविद्यालयानां कल्पना कृता यस्याः कार्ययोजना 1986 वर्षानुसारं 'नवोदयविद्यालयः' इति नाम्ना क्रियान्विता। अद्य देशे 342 तः अधिकाः नवोदयविद्यालयाः स्थापिताः सन्ति। (सूचना-पुस्तकस्य प्रथमखण्डेऽस्मिन् विषये विस्तरेण विवेचनं कृतं वर्तते।)

सार्वजनिकविद्यालयाः (Public Schools)

भारते सार्वजनिकविद्यालयाः आङ्गलशासनस्य योगदानं वर्तते, यतः एते इंग्लैण्डदेशे हैरो—रगबी—ईटन् इति प्रसिद्धसार्वजनिकविद्यालयानामनुसारं स्थापिताः। भारते इदं स्थापनकार्यं 1927 वर्षात् प्रारब्धम्। अस्मिन् वर्षे शिमलानगरं निकषा सनावरनामकस्थाने 'सर-लारेंस-पब्लिक-स्कूल' इत्यस्य स्थापना कृता। 1928 तमे वर्षे **'इण्डियन-पब्लिक-स्कूल-सोसायटी'** (Indian Public School Society) इत्यस्य सङ्घटनं कृतम्। इयं सोसायटी अनेकसार्वजनिक—विद्यालयानां स्थापनाम् अकरोत्। 1939 तमें वर्षे नियमानुसारं **'इण्डियन-पब्लिक-स्कूल-**

(1) "It helps to solve the problem of the wrongly classified pupil, because transfer within the school is easier to arrange than transfer from one school to another." **-Ibid.P.31**.

कान्फ्रेंस' (Indian Public School Conference) इत्यस्य निर्माणं जातम्। अस्य निर्माणानन्तरं यस्य विद्यालयस्य प्रधानाचार्यः अस्य सम्मेलनस्य सदस्यः निर्वाचितः भवेत् स एव विद्यालयः सार्वजनिकविद्यालयानां श्रेण्यां सम्मिलितो ज्ञायते। अधुना भारते एतादृशाः 26 सार्वजनिकविद्यालयाः सन्ति।

भारते प्रचलितसार्वजनिकविद्यालयान् चतुर्षु भागेषु विभाजयितुं शक्नुमः—

1. युवराजस्य सार्वजनिकविद्यालयः—अस्मिन् मेयो कॉलेज—अजमेर-रायपुर—राजकोटविद्यालयाः प्रमुखाः सन्ति। परन्तु 1994 तः एतेषां विद्यालयानां द्वाराणि सर्वेषां वर्गाणां छात्रेभ्यः उद्घाटिताः सन्ति।
2. योरोपियन् एङ्लो—इण्डियन् सार्वजनिकविद्यालयाः—एतेषु शिमला दार्जिलिंग सार्वजनिकविद्यालयाः परिगण्यन्ते।
3. सैनिकविद्यालयाः—भारते एतेषां विद्यालयानां संख्या 17 वर्तते।
4. सार्वजनिकविद्यालयाः—एतेषु दूनविद्यालयः देहरादून, सिंधि—विद्यालयः, मॉर्डन-विद्यालयाः, दिल्ली पब्लिकस्कूल—इत्यादयः सम्मिलिताः सन्ति।

एते सार्वजनिकविद्यालयाः देशस्य सर्वकारासर्वकार- माध्यमिक विद्यालयानामपेक्षया उत्तमाः विद्यालयाः सन्ति। एते विद्यालयाः सामान्यतः नगरस्य कोलाहलात् दूरे भव्येषु विशालेषु च भवनेषु स्थिताः सन्ति। साकमेव सर्वे सार्वजनिकविद्यालयाः सामान्यरूपेण आवासीयसंस्थाः सन्ति। एतेषु सुयोग्यशिक्षकाः, प्रयोगशालाः, व्यायामशालाः, गृहप्रणाली (हाऊस प्रणाली), प्रीफेक्ट-प्रणाली, प्रबोधनात्मकप्रणाली (ट्यूटोरियल प्रणाली), इत्यादयः प्रचलिताः सन्ति। डॉ. श्रीमालीमहोदयस्य कथनमस्ति—''काऽपि व्यक्तिः इदमस्वीकारं न करोति यत् अस्य देशस्य सार्वजनिकविद्यालयाः सुशिक्षाप्रदानं कुर्वन्ति। ये बालकाः एतेभ्यः विद्यालयेभ्यः निष्क्रामन्ति, तेषु सन्तुलनस्य आत्मविश्वासस्य च गुणाः भवन्ति येषामस्माकं समाजिकजीवने अत्यावश्यकता वर्तते। एते विद्यालयाः शारीरकशिक्षायाः क्रीडाकूर्दनस्य, चरित्रनिर्माणस्य, बौद्धिकविकासस्य च सुविधाप्रदानं कुर्वन्ति, याः वयं स्वसामान्यमाध्यमिकविद्यालयेषु अपि उपलम्भयितुमिच्छामः। शिक्षायाः स्तरस्य

विषयेऽपि एते विद्यालया: अत्युन्नता: सन्ति, वयञ्च इच्छाम: यदस्माकं सर्वे विद्यालया: एतत्स्तरं प्राप्नुयु:।

वस्तुत: सार्वजनिकविद्यालयेषु प्रदीयमाना शिक्षा महार्घा वर्तते। एतेन कारणेन एतेषु केवलं धनिन एव स्वबालकान् प्रवेशयितुं समर्था: भवन्ति। अपरं च एते विद्यालया: विशेषवर्गाणां संस्था: वर्तन्ते, य: स्वकीय: समाज: अन्यवर्गेभ्य: श्रेयान् मन्यते तान् च घृणादृष्ट्या पश्यति। तृतीयम्—एतेषां पाश्चात्त्यमूल्येषु, आदर्शेषु, प्रकृतिषु जीवनस्य विधिषु व्यवहारस्य प्रतिमानेषु च बलं दीयते। एतेन कारणेन वयं वक्तुं शक्नुम: यत् लोकतन्त्रीयसमाजवादिसमाजे एतेषां किमपि स्थानं न भवेत्। माध्यमिकशिक्षा—कोठारी—आयोगयो: द्वयो: एतेभ्य: किमपि महत्त्वं न दत्तम्। मुदालियर-शिक्षा-आयोगानुसारम् ''सार्वजनिकविद्यालया आधुनिकलोकतन्त्रस्य सिद्धान्तानां प्रतिकूला: सन्ति, ते च देशस्य शैक्षिकप्रगत्यै विशेषयोगदानं नैव कुर्वन्ति।'' कोठारी-आयोगस्य मतानुसारम् ''सार्वजनिकविद्यालयस्य प्रणाल्या: नवीनलोकतान्त्रिकसमाजवादिसमाजे किञ्चन मान्यस्थानं न भवितुं शक्नोति, यस्य वयं निर्माणं कर्तुमिच्छाम:।''

स्थानीयसाधनानामुपयोग:

स्थानीयसाधनै: अस्माकमभिप्राय: तै: सर्वै: वस्तुभि:, स्थानै:, संस्थाभि:, सामाजिकक्रियाकलापै:, समस्याभि:, स्थानविशेषै:, सम्बद्धो भवति। एतेषां साधनानामुपयोगेन छात्र: स्थानीयसमुदायस्य वस्तुत: जीवनविषये ज्ञानं प्राप्नोति। अनेन कारणेन एतेषां साधनानां शैक्षिकमूल्यं भवति। अत: प्रतिविद्यालयं स्वपार्श्व-स्थसमुदायस्य सर्वेषां साधनानामुपयोगार्थं प्रयत्न: स्यात्। समुदायस्य शैक्षिकमहत्त्वं स्पष्टयन् **जॉन्. यू. माइकेलिस महोदय:** लिखति—''समुदाय: जीवनयापनस्य विभिन्नविधीनां विषये प्रत्यक्षज्ञान—प्रदानार्थं बालकस्य प्रयोगशाला वर्तते। समुदाये बालक: भूगोल-इतिहास—यातायात—सन्देशवाहन—शासनानां जीवनस्य अन्यपक्षाणां सम्बन्धे च धारणा: विकासयितुं शक्नोति।''[1] विद्यालय: छात्रेषु उक्तधारणा: विकासयितुं समुदायस्य निम्नलिखितप्रमुखसाधनानाम् उपयोगं कुर्यात्—

---

1. The community is a child's laboratory for first hand learning about ways of living. In the community, a child develops concepts of geography, history, transportation, communication, government and other aspects of living." **John U.Michaelis.**

1. प्रशासकीयसंस्थाः— अस्यान्तः ताः संस्थाः विभागश्चायान्ति यैः स्थानीयप्रशासनसम्बन्धिकार्याणि क्रियन्ते, उदाहरणार्थम्—ग्रामपञ्चायती, नगरपालिका, अन्तर्मण्डल-परिषत्प्रभृतयः। छात्राः एतासां संस्थानां कार्यप्रणालेः वास्तविकज्ञानं दातुं तत्र नीयन्ते। बालकाः निरीक्षणेन अवलोकनेन च एतेषु विषयेषु प्रत्यक्षज्ञानं प्राप्स्यन्ति। एवं प्राप्तं ज्ञानमधिकं स्थायि उपयोगि च भविष्यति।

2. सार्वजनिक—सेवा-संस्थाः— समाजसेवायां निरन्तरक्रियाशीलपत्रालय-चिकित्सालय—विद्युद्वार्तावह (टेलीग्राफ)—कार्यालय—वित्तकोश—जल—विद्युतविभागप्रभृतीनां संस्थानां कार्यसञ्चालनस्य प्रत्यक्षज्ञानं कारयित्वा छात्राणां ज्ञानं व्यावहारिकं निर्मातुं शक्यते।

3. विभिन्नप्रकाराणि उद्योगकेन्द्राणि— प्रतिसमुदायं स्थानीय—उद्योगः कलाकौशलकेन्द्रञ्च भवति। यावत् छात्रेभ्यः तेषां निरीक्षणावसरः न दास्यते तावत् तेषां ज्ञानमपूर्णं भवति। अतः बालकान् स्थानीयसमाजस्य लघु-उद्योगाानाम् अन्यबृहदौद्योगिककेन्द्राणि प्रदर्शयेत्। तानि स्थानानि प्रदर्शयितुं विभिन्नयात्राणामायोजनं कर्तुं शक्यते।

4. स्थानीयभौगोलिकवातावरणं प्राकृतिकसाधनानि च- समाजः स्वभौगोलिकेन प्राकृतिकवातावरणेन च प्रभावितं विना न निवसति। स्थानीय—नदी—सरोवर—गिरि—धरातलादीनां विषये ज्ञानं सम्पादयितुं शैक्षिकयात्राः आयोजिताः अवश्यमेव भवेयुः येन छात्रः इदं ज्ञातुं शक्नोति यत् केन प्रकारेण प्राकृतिकसाधनानामधिकाधिकः उपयोगः क्रियते, येन समाजः लाभान्वितः स्यात्।

5. ऐतिहासिकस्थानानि— यत्र विद्यालयः स्थितः अस्ति, यदि तत्क्षेत्रे ऐतिहासिकस्थलमस्ति तर्हि बालकान् अवश्यमेव प्रदर्शयेत्। एवं प्रदत्तं ज्ञानं बालकानां मस्तिष्के स्थायि भविष्यति, बालकाः शिक्षणे रुचिं प्रदर्शयिष्यन्ति, सूक्ष्मवार्तानां अवगमनेऽपि समर्थाः भविष्यन्ति। एतदतिरिक्तं बालकानां अस्याः वार्तायाः ज्ञानमपि भविष्यति यत् तेषां स्थानीयक्षेत्रेण राष्ट्रिय-इतिहासस्य कृते किं योगदानं कृतमस्ति। स्थानीय—ऐतिहासिकस्थानानामतिरिक्तम् अन्यक्षेत्राणाम् ऐतिहासिकस्थानानि अपि यथासम्भवं प्रदर्शनार्थं शैक्षिकयात्राणामायोजनं करणीयम्।

6. सङ्ग्रहालयः— सङ्ग्रहालये समाजस्य अतीतस्य वर्तमानस्य च प्रत्यक्षरूपेण

दिग्दर्शनं भवति। परिवर्तमानस्वरूपेण परिचयार्थं सङ्ग्रहालयस्य निरीक्षणमत्यावश्यकं वर्तते। तत्र नीत्वा बालकान् विभिन्नप्रकारककलानां भिन्न-भिन्न-प्रतिकृतीनां तद् विशेषतानां विषये ज्ञापयितुं शक्नुमः। तेषां च तुलनात्मकमध्ययनं कृत्वा तेषां विषये विस्तृतज्ञानं प्रदातुं शक्नुमः। एतेषां निरीक्षणेन बालकेषु स्वराष्ट्रस्य कलाकृतिषु अन्यमहत्त्वपूर्णवस्तुषु गौरवभावनामुत्पादयितुं शक्नुमः।

7. विशिष्टव्यक्तीनां विशेषज्ञानाञ्च व्याख्यानात्मकं प्रयोगात्मकञ्च प्रदर्शनम्— समाजस्य आदर्शैः सिद्धान्तैः विचारधाराभिश्च परिचयार्थं विशिष्टव्यक्तीनां जननायकानाञ्च व्याख्यानं श्रोतुमवसराः प्रदातुं शक्यन्ते। विशिष्टवैज्ञानिकानां कलाकाराणां च प्रयोगात्मकप्रदर्शनेन छात्राणां ज्ञानं सारगर्भितं निर्मातुं शक्नुमः।

8. सामाजिकसंस्थाः— अस्या अन्तर्भूताः संस्थाः ताः भवन्ति, याः समाजस्य संरचनायाः निर्माणे सहायिकाः भवन्ति। उदाहरणार्थं—परिवारः, विवाहः, सम्पत्तिः, सामाजिकरीतिः, परम्पराश्च। छात्रान् छात्राः एतद्विषयव्यावहारिकज्ञानाय समुदायं प्रति नेतव्याः। तत्र ते इदं ज्ञातुं समर्थाः भविष्यन्ति यत् अस्माकं समुदाये पितृदाय-मातृदायप्रकाराणां परिवाराणां प्रचलनं वर्तते, संयुक्तपरिवारप्रथा वा व्यक्तिगतपरिवारप्रथा वा अस्तीति। साकमेव ते इदं ज्ञास्यन्ति यत् समुदाये निर्वहणस्य काः काः पद्धतयः प्रचलिताः सन्ति।

उपर्युक्तसाधनानामुपयोगं कृत्वा विद्यालयकक्षाशिक्षणं सजीवं निर्मातुं शक्यते। अतः प्रत्येकविद्यालयेषु एतेषां साधनानां प्रायश उपयोगं कुर्यात्।

पुनरावृत्ति-प्रश्नाः

1. समाजः विद्यालयस्य स्थापनां कथं करोति?
2. विद्यालये समाजे च पारस्परिकसम्बन्धाः किमर्थं भवेयुः?
3. "विद्यालयः प्राथमिकरूपेण एका सामाजिकसंस्था वर्तते" स्पष्टयत।
4. विद्यालयं समाजस्य लघुरूपं कथं निर्मापयेत्?
5. भवान् विद्यालयं समाजस्य लघुरूपं निर्मातुं कान् प्रयासान् करिष्यति?
6. विद्यालयशिक्षायाः विभिन्नेषु स्तरेषु केषां विद्यालयानां प्रचलनं वर्तते?

7. बहु-उद्देशीयविद्यालयेन भवान् किं जानाति ? एतेषां लाभानां विवेचना कर्त्तव्या।
8. व्यक्तिगतविद्यालयः नवीनभारतीयसमाजस्य कृते किमर्थमावश्यकः ?
9. भवान् शैक्षिकाभिप्रायाणां पूर्तये कानि कानि स्थानीयसाधानानि उपयोक्ष्यति ?

लेखार्थः प्रश्नः

''विद्यालयः सा संस्था वर्तते यस्याः स्थापना समाजेन स्वसाध्यानां प्राप्त्यर्थं भवति।'' अस्य कथनस्य उपयुक्ततायाः परीक्षणं कर्तव्यम्।

26

विद्यालयः समुदायश्च

(School And Community)

"A school is and ought to be a reflection of the life of the community. The Public School in India must therefore brought nearer to the pattern of Indian life'' **—Humayun Kabir.**

भाषासु समान्यतया 'समुदायः' व्यक्तीनां एतादृशः समूहोऽस्ति यत्र ताः मिलित्वा सामान्योद्देश्यानां साधनाय सामान्यजीवनयापनाय च एकस्मिन् निश्चितभूभागे निवसन्ति। अतः समुदायस्य निर्माणाय सामान्यहितेन स्थितस्य निश्चितभूभागस्य, सामान्यजीवनस्य एकताभावनायाश्चानिवार्यताऽस्ति। वस्तुतः 'समुदायः' इति अतिविस्तृतः व्यापकश्च शब्दः। यत्र विभिन्नप्रकारस्य सामाजिकसमूहानां समावेशः भवति, उदाहरणार्थं—परिवार—धार्मिक—संघ—जातिवर्ग—प्रतिवेशि–नगर—राज्य–राष्ट्ररूपेण समुदायस्य विभिन्नानि रूपाणि सन्ति। मानवसभ्यतायां विज्ञानस्य प्रगतिः विश्वस्य जनान् परस्परमधिकं समीपम् आनीतवतीत्यनेन कारणेन अद्य समुदायस्य धारणा विस्तृता सञ्जाता। अद्य वयं विश्वसमुदायस्य धारणायाः कृते व्यावहारिकरूपं प्रदातुं प्रयत्नशीलाः स्मः। अतः समुदाये एकवर्गक्रोशादपि क्षेत्रं भवितुमर्हति। इदं क्षेत्रं परिधिर्वा ततस्थसदस्यानाम् आर्थिक–सांस्कृतिक—राजनैतिकसमानताः इत्यमुं विषयमाश्रित्य वर्तते। समुदायस्य अर्थं स्पष्टयन् **ब्राउनैल महोदयः** वक्ति—''समुदायेन मम अभिप्रायः तल्लघुसमूहेन वर्तते, यत्र विभिन्नप्रकारकाः जनाः युवक–वृद्ध–स्त्री–पुरुषाः विभिन्नकुशलताभिः योग्यताभिश्च युक्ताः सजातीयप्रतिवेशिनां सदृशाः

परस्परं मिलित्वा निवसन्ति। एषः एकः प्राथमिकसमूहः वर्तते, यदन्तः जीवनस्य अनेकप्रमुखकार्याणि पारस्परिकसहयोगेन निर्वर्त्यन्ते।''[1]

विद्यालयसमुदाययोः सम्बन्धः

(Relationship between School and Community)

विद्यालयसुमदाययोर्मध्ये घनिष्ठः सम्बन्धः विद्यते। तौ स्वस्थायित्वार्थम् औन्नत्यर्थं च परस्परम् आधारितौ भवतः। विद्यालयः एका सामाजिकसंस्था अस्ति। समाजः स्वजीवनार्थं विभिन्नानां शिक्षासंस्थानां स्थापनां करोति, याः समाजस्य विचारान्, मान्यताः, आदर्शान्, क्रियाकलापान्, मानदण्डान् परम्पराश्च आगामिसन्ततये प्रदातुं समर्थाः। विद्यालयः समुदायस्य जीवनं तस्य प्रगतिम् अधिकं प्रभावयति। विद्यालयः स्वविचारैः कार्यैश्च समुदायस्य कृते पथप्रदर्शनं कृत्वा तं प्रगतिपथे नयति। समुदायः विद्यालयस्य कृते जीवनस्य वास्तविकपरिस्थितीनां प्राथमिकं ज्ञानं प्रददाति। द्वयोः परस्परसाहाय्येन द्वयोरपि कार्यं प्रचलित। अनयोः घनिष्ठतां स्पष्टयन् **हुमायूँ कबीर महोदयः** विलिखति—

''विद्यालयः समुदायस्य जीवनस्य प्रतिबिम्बमिव भवति, अतः एते एवमेव भवेयुः। अतः भारते सार्वजनिकविद्यालयाः भारतीयजीवनादर्शान् निकषा आनेतव्याः।

सामुदायिककेन्द्रत्वेन विद्यालयः

(School as a Community Centre)

वस्तुतः शिक्षा एका सामाजिकसमस्याऽस्ति। समाजः विद्यालयस्य कृते इदं कार्यं समर्पयति यत् स युवकानां प्रशिक्षणं तेषां पालनपोषणञ्च अनेन प्रकारेण कुर्यात् येन समाजः एतेषां समुदायेन सम्बद्धः भवति। तेषां जीवने यथा प्रभावि भवेत् तादृश्या रीत्या भागं नेतुं सम्भवेत्। अत्र प्रश्नोऽयमुदेति यत् विद्यालयः एव इदं कार्यं किमर्थं सम्पादयेत्। अस्य उत्तरतया अधोल्लिखितानि तथ्यानि समाधानत्वेन प्रस्तूयन्ते—

---

(1) "By a community I mean a small, diversified group of people young and old, male and female, with different skills and abilities, living together as kin neighbours. It is a primary group , in which many of the major functions of life carried on co-operatively within the group itself." **-Brownel.**

1. बालकानां कृते सामाजिकपरम्परा: उत्तराधिकारत्वेन तथा न प्राप्ता: यथा स्वपैतृकं धनं जन्मना प्राप्तं भवति।

2. बालकानां कृते सांस्कृतिकसम्पत्ति: जन्मना न प्राप्यते अपि तु शिक्षया एव।

पूर्वोक्तकारणै: बालक: पुस्तकेन, सामाजिकसम्पर्केण, स्वानुभवेन च शिक्षित: भवति। यदि बालकस्य सामाजिकसम्पत्ति: सामाजिकविधेश्च पृथक्त्वं स्यात्तर्हि तेषां समेषां परिश्रमा: निष्फला: भविष्यन्ति। पुनश्च ते अन्धकारे परिभ्रमन्ति। एतदर्थं मानवस्य सञ्चितानुभवानां ज्ञानप्रदानकार्यञ्च विद्यालयस्य कृते समर्पयितव्यम्।

विद्यालय: उक्तकार्यस्य निर्वाहं तदैव कर्तुं शक्नोति, यदा तस्य बाह्यसमाजस्य च जीवनेन साक्षात्सम्बन्ध: भविष्यति। प्रकारान्तरेण वक्तुं शक्यते यत् विद्यालयस्य बाह्यजीवनेन सह साक्षात्सम्बन्ध: अवश्यं भवेत्। साकमेव स वर्तमानावश्यकताभि: बालकान् बोधयेत्। परन्तु भारतीयविद्यालया: जीवनात् पूर्णत: पृथग्भूत्वा शिक्षां प्रयच्छन्त: सन्ति। अद्य भारतीयविद्यालया: जीवनस्य सुदृढ़परिस्थित्या सम्बन्धं न स्थापयन्ति। अनेन कारणेन भारतीयविद्यालया: सामुदायिकजीवनस्य प्रगतये सुवर्धनाय च न किञ्चित् कार्यं कुर्वन्ति। यदि विद्यालय: स्वयमेव एतत् कार्यं पूर्णं कर्तुमिच्छति तर्हि विद्यालय: बृहत्समुदाये एकलघुसमुदायस्य निर्माणं करोतु, विद्यालयमेकं लघुसमुदायं कर्तुं विद्यालय: स्वयमेव सामुदायिकजीवनस्य केन्द्रवत् कार्यं निर्वहेत्। विद्यालयस्य सामुदायिकजीवनस्य केन्द्रत्वेननिर्माणार्थं निम्नलिखितान् उपायान् कार्ये योजयेत्—

(अ) समुदाय: विद्यालयनिकटे आनेय:।

(ब) विद्यालयं समुदायस्य समीपे नयेत्।

(अ) समुदाय: विद्यालयनिकटे आनेय:

समुदाय: विद्यालयनिकटे निम्नलिखितोपायै: आनेतुं शक्यते—

1. समुदायस्य सदस्यानामामन्त्रणम्—विद्यालय: सामुदायिकजीवनस्य विभिन्नेषु क्षेत्रेषु कार्यकर्तॄन् आमन्त्रयेत्, उदाहरणार्थम्—सामाजिककार्यकर्तृ—धार्मिककार्यकृर्तृ—चिकित्सक—कृषक—अधिवक्ता—सम्पादक—व्यापारि—प्रभृतीनामन्त्रयेत्। एते जना: स्वव्यवसायेषु सामाजिकतथ्येषु च विचारं कुर्वन्त: छात्रेभ्य: सामुदायिकजीवनस्य सुदृढ़परिस्थितीनां विषये प्राथमिकज्ञानं प्रदातुं

शक्नुवन्ति। कृषकः ग्राम्यजीवनस्य समस्याः विज्ञाय तस्मिन् कर्मणि साहाय्यं करोति। चिकित्सकः स्वव्यवसायेन सम्बद्धतथ्यैः तत्सम्बन्धिसमस्यायाः समाधानं कर्तुं शक्नोति। इत्थं विभिन्नव्यवसायेन सम्बद्धाः जनाः स्व-स्व-व्यवसायविषये छात्रान् वास्तविकं प्रत्यक्षं च ज्ञानं बोधयन्ति। सामाजिककार्यकर्त्तारः छात्राणां नागरिकसमस्यासु रुचिमुत्पादयितुं समर्थाः भवन्ति। औद्योगिकक्षेत्रतः आगन्तारः जनाः छात्रान् औद्योगिकसमस्यायाः विषये ज्ञानं प्रदातुं शक्नुवन्ति। एवं रीत्या सामुदायिकजीवनस्य विभिन्नानां पक्षाणां पर्यालोचनं कर्तुं शक्यते।

2. अभिभावक-शिक्षक-सङ्घः— समुदायं विद्यालये आनेतुमभिभावकशिक्षकसङ्घः प्रमुखं स्थानं भजते। छात्राणां मातापित्रोः शिक्षणकार्ये अधोलिखितप्रकारेण सम्बन्धः भवति—(1) ये विषयाः स्थानीयसमुदायेन सम्बद्धाः तत्प्रतिपादनसमये अभिभावकान् विद्यालये आह्वयेत्। अभिभावकाः छात्राणां अग्रे विषयेण सम्बद्धानि स्थानीयतथ्यानि उपस्थापयेयुः। (2) विद्यालयः कस्यापि प्रकरणस्य सम्बन्धे अभिभावकानां सविधे प्रश्नावली (Questionnaire) माध्यमेन सूचनां प्रापयति।

3. चलचित्रप्रदर्शनम् प्रदर्शनी च— चलचित्रमाध्यमेन समुदायः विद्यालयस्य निकटे आनेतुं शक्यते। विभिन्नेषु कार्येषु संलग्नान् जनान् चलचित्रमाध्यमेन समुदायस्य सम्बन्धेन उपयोगिभूतं महत्त्वपूर्णं ज्ञानं प्रदातुं शक्यते। विद्यालयः विभिन्नानां प्रदर्शिनीनाम् आयोजनेन समुदायं स्वस्थानं प्रत्याकर्षयितुं शक्तो भवति, तस्य सहयोगमपि प्राप्तुं सुष्ठु शक्नोति।

4. पर्वणाम् उत्सवानाञ्च आयोजनम्— विद्यालयः विभिन्नस्थानीयपर्वाणि, उत्सवान् च आयोज्य समुदायं विद्यालयं प्रत्यानेतुं शक्नोति। येषु भागं नेतुम् अवलोकयितुं च स्थानीयसमुदायान् आमन्त्रयेत्। अनेन विद्यालयः समुदायश्च परस्परं निकटसम्पर्के समीपे च आगन्तुं शक्नुतः।

5. सामुदायिकजीवनस्य विभिन्नक्रियाणां सङ्घटनम्— समुदायं विद्यालय-समीपे नेतुं विद्यालये सामुदायिकजीवनस्य विभिन्नकार्याणि आयोज्यन्ते। अनेन आयोजनेन छात्राः सामुदायिकजीवनस्य विभिन्नपक्षाणां विषये ज्ञानं प्राप्तुं शक्नुवन्ति। एतेषामायोजनेन सञ्चालनेन च समुदायस्य जनानां सहयोगः प्राप्स्यते। एवं समुदायस्य विद्यालयस्य च मध्ये सामीप्यसम्पर्कः स्थाप्यमानो भवति।

6. सामुदायिकसमस्यानां समाधानम्—विद्यालयः यस्मिन् समुदाये स्थितोऽस्ति सः तस्य समुदायस्य विभिन्नसमस्यानां समाधानाय कार्यं कुर्यात्। एतासां सामुदायिकसमस्यानां समाधानेन छात्राः सामुदायिकजीवनस्य दृढपरिस्थितीनां ज्ञानप्राप्तये समर्थाः भवितुमर्हन्ति, उदाहरणार्थम् यदि विद्यालयः ग्रामीणक्षेत्रे स्थितोऽस्ति तर्हि सः तस्य अमुकसमस्याः प्रति ध्यानं दद्यात्–स्वच्छतायाः समस्या, स्वास्थ्यसमस्या, कृषिक्षेत्रे उत्पादनं वर्धयितुं किं करणीयम् ? लघूद्योगानां स्थितिं केन प्रकारेण सुवर्धयितुं शक्नोति ? आपणस्य समस्यां केन प्रकारेण विश्लेषयितुं शक्नोति ? इत्यादि।

7. प्रौढशिक्षायाः केन्द्राणि—विद्यालयः यस्मिन् समुदाये स्थितोऽस्ति तत्र स्थितान् अशिक्षितप्रौढान् साक्षरतानिर्माणस्य कृते विद्यालयः प्रौढशिक्षायाः केन्द्रं निर्मायात्। सः विद्यालयसमयानन्तरं प्रौढानां प्रशिक्षणस्य सुव्यवस्थां कुर्यात्। अनया व्यवस्थया ते साक्षराः भविष्यन्ति, साकमेव ते स्वानुभवैः छात्रान् अवबोधयितुं समर्थाः भविष्यन्ति। एवं विद्यालयः समुदायश्च परस्परं समीपमागन्तुं प्रभवतः।

(ब) विद्यालयं समुदायस्य समीपे नयेत्

विद्यालयं समुदायस्य समीपे नेतुमधोलिखितोपायाः सन्ति—

1. साक्षात्कारः—प्रत्यक्षज्ञानप्राप्तये साक्षात्काराः आधारस्य कार्यं कुर्वन्ति। छात्रसमुदायस्य विभिन्नैः जनैः साक्षात्कारं कृत्वा समुदायस्य विषये विभिन्नप्रकारस्य सूचनाः प्राप्यामाना भवेयुः। अपि च समुदायस्य बहवः जनाः तेषां प्रकाशितसाहित्यं दृश्यश्रव्यसामग्रीं च प्रदाय महत्त्वपूर्णाः सूचनाः प्रदातुं शक्नुवन्ति।

2. सामाजिकसर्वेक्षणम्—सभायाः सङ्घटनम् **सैयदैन**महोदयानुसारेण—विद्यालये सामाजिकसर्वेक्षणसभायाः सङ्घटनं कुर्यात्, यः स्व-पार्श्वस्थ सामुदायिकजीवनस्य तात्कालिकावश्यकानां समस्यानाञ्च सम्बन्धेऽनुसन्धानकार्यं कर्तुं प्रभवेत्। उदाहरणार्थम्—मार्गाणां स्थितिः, नगरे ग्राम वा अशुद्धजलस्य कुल्याणां व्यवस्था, प्रतिवेशिक्षेत्रेषु स्वास्थ्येन स्वच्छतया सम्बद्धाः परिस्थितयः, रोगप्रसरणस्य स्त्रोतः तस्य क्षेत्रस्य प्रमुख—उद्योगाः व्यवसायश्च इत्यादि। अनेन प्रकारेण प्रतिकार्यं छात्राणां कस्मैचित् लघुदलाय समर्पयेत्, येषां तादृशसमस्यासु रुचिः स्यात्। इदं दलं शिक्षकस्य निर्देशने कार्यं कुर्यात्। अन्ते प्रतिदलं प्रतिवेदनमपि निर्मायात्, यस्मिन् शिक्षकेण दीयमानाः परामर्शाः अपि ग्राह्ह्याः स्युः। इदं प्रतिवेदनं प्रधानाचार्यस्य

माध्यमेन स्थानीयप्रशासनस्य संस्थायाः प्रमुखस्य पार्श्वे प्रेषणीयम्। अनेन प्रकारेण सर्वेक्षणसभायाः छात्रान् स्थानीयसमुदायस्य प्रत्यक्षं मौलिकञ्च ज्ञानं प्राप्स्यन्ति।

3. समाजसेवासङ्घानां निर्माणम्— सैयदैनमहोदयानुसारम्—अस्माकम् इदं ज्ञानमेव पर्याप्तं नास्ति यत. अस्माकं परितः वातावरणे कः दोषोऽस्ति। अस्मासु स्थितान् दोषान् आपाकर्तुं कः स्वशक्तेः प्रयोगं कुर्यात्।

अतः विद्यालये समाजसेवा-सङ्घान् निर्मापयेत्, येन ते आवश्यकतानुसारं स्वसेवां समुदायस्य कृते अर्पयितुं शक्नुवन्ति। ये सङ्घाः आप्लावस्य समये, महामारी-प्रसरणे, कस्यापि उत्सवे, शोभायात्रायाः अवसरे वा एतादृशे अन्यस्मिन्नवसरे, यत्र अनुशासनेन कार्यकरणस्य आवश्यकता स्यात्, प्रतिवेशिनां जनानां सहायतां कुर्युः।

4. समाजसेवा-सप्ताहानामायोजनम्— विद्यालयः समुदायं निकषा गन्तुं समाजसेवा—सप्ताहानाम् आयोजनं करणीयम्, उदाहरणार्थम् श्रमदानसप्ताह-ग्रामोद्धारसप्ताह-स्वच्छतासप्ताह-साक्षरतासप्ताह-प्रभृतयः। एतेषु अवसरेषु शिक्षकाः छात्राश्च नगरेषु ग्रामेषु च गत्वा श्रमदानं, ग्रामीणानामुन्नतिः, स्वच्छता, निरक्षराणां साक्षरीकरणम् इत्यादि कुर्युः।

5. सामाजिकशिक्षायाः व्यवस्था— विद्यालयेन नगरेषु ग्रामेषु च गत्वा शिक्षाप्रदकार्यक्रमाणां, नाटक-भजन-कीर्तन-इत्यादीनां च व्यवस्था करणीया येन विद्यालयः समुदायस्य संस्कृत्या अवगतो भवितुमर्हति।

6. क्षेत्रपर्यटनम् (Field Trips)— क्षेत्रपर्यटनमाध्यमेन छात्रान् समुदाये नेतुं शक्नुमः। पर्यटनस्योद्देश्यं मनोरञ्जनार्थमेव विद्यालयात् बहिः गमनं न भवेत्, अपि तु विषयस्य स्पष्टीकरणं समस्यायाः वा समाधानम् अन्वेषणं च भवेत्। पर्यटनस्य माध्यमेन छात्राः स्थानीयपरिस्थितीनां प्रत्यक्षतया निरीक्षणं कर्तुं प्रभवन्ति।

उपर्युक्तोपायैः विद्यालयः सामुदायिकजीवनस्य केन्द्ररूपेण परिवर्तयितुं शक्यते, यस्मात् ज्ञानज्योतिः प्रसारिता भविष्यति, सुवर्धनस्य च आन्दोलनं प्रसरिष्यति। अन्ते वयं एम.पी. मुफातमहोदयस्य शब्देषु वक्तुं शक्नुमः—"माध्यमिकविद्यालयः प्रमुखसामाजिकसाधनमस्ति, स च समुदायस्य भविष्यनिर्धारणे महत्त्वपूर्णं कार्यं प्रकरोति। सुविज्ञाः किञ्च क्रियाशीलजनाः विद्यालयस्य समुदायस्य च आवश्यकतानां समस्यायाश्च समाधानं कर्तुं समर्थाः भवेयुः।"

पुनरावृत्ति-प्रश्नाः

1. समुदायेन भवता किम् अवगम्यते ?
2. विद्यालयस्य समुदायस्य च सम्बन्धं स्पष्टयत।
3. समुदायं विद्यालयसमीपे केन प्रकारेण आनेतुं शक्नोति ? सोदाहरणं स्पष्टयत।
4. भवान् विद्यालयं समुदायनिकटं नेतुं कान् उपायान् प्रयोगे नेष्यति ?

लेखार्थः प्रश्नः

विद्यालयः सामुदायिककेन्द्ररूपेण केन प्रकारेण परिवर्तयितुं शक्यते ? उदाहरणं प्रदाय स्वोत्तरं स्पष्टयत।

❐❐❐

27

विद्यालयः गृहञ्च

(School And Home)

''Education is a continuous process, in school and out of it, at all stages parents and teachers should help to move children confidently.

—Central Advisory Council for Education (England)

विद्यालयस्य उपयोगिता गृहं तस्य घनिष्ठसम्बन्धं च आश्रितोऽस्ति। पूर्वस्मिन् काले विद्यालयस्य आवश्यकता नासीत्। यतः गृहमेव शिक्षायाः सर्वतोभावेन साधनमासीत्। तदा गृहमेव विद्यालयः आसीत्, मातापितरौ शिक्षकौ आस्ताम्। कौटुम्बिकजीवनमेव पाठ्यक्रमः आसीत्। तत्समये बालकाः स्वपरिवारस्य प्रौढसदस्यानाम् अनुकरणेन, तेषां निर्देशान् श्रुत्वा सर्वम् अधीयते स्म। परन्तु क्रमशः समाजः यदा सभ्यः जटिलः च अभवत् ; तदा शिक्षाप्रदानाय व्यवस्थितसाधनानाम् आवश्यकताः प्रादुरभूवन्। जनसंख्यायाः जीवनयापनस्य च आवश्यकतासु वृद्धिः, औद्योगिकीकरणं, सभ्यतायाश्च प्रगतिः, जटिलता च कस्याश्चित् नवीनसंस्थायाः आवश्यकताम् अजनयत्। अतः बालकानां कृते व्यवस्थित—नियोजितशिक्षाप्रदानार्थं विद्यालयस्य स्थापना समजनि। विद्यालयानां च प्रमुखमुद्देश्यं बालकस्य सर्वाङ्गीणविकसनमेव इत्यवधारणा जाता।

विद्यालयस्य गृहस्य वा बालकस्य शिक्षायां दायित्वम्

विद्यालयाः स्वोद्देश्यस्य प्राप्तये प्रयत्नशीलाः सन्ति परन्तु यावत् गृहस्य संपूर्णसक्रियसहयोगः न भवति, तावत् तेषामुद्देश्यप्राप्तिरपि असाध्यैव भवति। शिशोः प्राथमिक–शिक्षा गृहे भवति। बालकः विद्यालयं प्रविशति चेदपि स विद्यालये षड्घण्टापेक्षया अधिकं न स्थास्यति। इत्थं तस्य अधिकः समयः गृहे एव मातापित्रोः

निरीक्षणे व्यतीतो भवति। अनेन स्पष्टो भवति यत् बालकस्य विद्यार्जने विद्यालयस्य दायित्त्वं सीमितमस्ति, गृहञ्च तस्य विकासे विशेषतया भागं निर्वहति।

गृहं बालकस्य प्राथमिकविद्यालयः वर्तते। विद्यालये प्रवेशात्पूर्वं गृहे बहवः विषयाः अधीताः भवन्ति। भाषा, इतस्ततः गमनं, आचारव्यवहारः, प्रस्थानव्यवहारादयः च अधिगम्यन्ते। वस्तुतः गृहमेव बालकेषु पूर्वोक्तविचाराणाम् आदर्शाणाम्, अभ्यासानाञ्च अङ्कुरार्पणं करोति। यस्याधारेण तस्य भाविजीवनस्य निर्माणं सम्भवति। संक्षेपेण वक्तुं शक्यते यत् गृहे बालकस्य शारीरक–मानसिक–नैतिक–सांस्कृतिक–पक्षाणाञ्च पर्याप्ततया विकासः सञ्जायते। बालकः स्वपरिवारस्य संस्कृतिं गृहे एव बोद्धुं समर्थो भवति। संस्कृतिः तं विद्यालयं प्रति नयति। तत्र सः तस्य गृहसंस्कृतेः प्रभावम् अन्येषामुपर्यपि पातयति, किञ्च अपरपरिवारस्य संस्कृत्या स्वयमपि प्रभावितो भवति। इत्थं विद्यालयः गृहमिति द्वेऽपि बालकस्य विकासे प्रमुखं दायित्वं वहतः।

विद्यालये गृहे च शैक्षिकलक्ष्ये एकता

विद्यालयः सा संस्था अस्ति, या समाजेन प्रमुखोद्देश्यानां साधनार्थं स्थापिताऽस्ति। परन्तु यथा पूर्वं लिखितम् एतेषामुद्देश्यानां साधनं केवलं विद्यालय एव कर्तुं न शक्नोति, यतः विद्यालयस्य पञ्च षड् वा होरामतिरिच्य बालकः अवशिष्टं समयं प्रायः गृहे एव यापयति। एवं रीत्या बालकस्य विकासे गृहस्य दायित्वं किञ्चिदपि न्यूनं नास्ति। विद्यालयः गेहञ्च बालकस्य विकासे तदैव पूर्णत्वं प्राप्नुतः यदा द्वावपि बालकस्य विकासाय एकमेव निर्धारितलक्ष्यमाश्रित्य कार्यं कुरुतः। विकासस्य लक्ष्यं निर्धार्यानन्तरं गृहं विद्यालयश्च परस्परसहयोगं प्रकुर्वन्तौ कार्यक्रमं वर्धयेतां, बालकस्य विकासाय विद्यालयः यान् कार्यक्रमान् आयोजयति, तत्र अभिभावकानां स्वीकृतिः सहयोगश्च प्राप्तौ स्याताम्, किञ्च ते बालकानां कार्यक्रमेषु भागग्रहणकार्ये केनापि प्रकारेण टिप्पणीम् आक्षेपं वा न कुर्युः। अथवा बाधां न प्रापयेयुः। केवलं ग्रन्थालय—ज्ञानेन एव बालकस्य सर्वतोभावेन विकासः न भविष्यति। एतदर्थं विद्यालये विभिन्नाः पाठ्येतरक्रियाकलापाः प्रवृत्तयश्च आयोज्येरन् उदाहरणार्थं शारीरकविकासाय क्रीडाप्लवनादीनां प्रतियोगिताः, मानसिकविकासाय विचारगोष्ठ्यः, वादविवादप्रतियोगिताः प्रभृतयः। सामाजिकविकासाय समाजसेवा, श्रमदानशिबिरं

सांस्कृतिकविकासाय च नाटक–संगीतादि–ललितकलानाञ्च प्रदर्शनस्य प्रबन्धः क्रियेत।

विद्यालयेन आशास्यते यत् विद्यार्थिनः तासु क्रियासु भागं नयेयुः। परन्तु बालकानामभिभावकाः कदाचित् येषां कार्यक्रमाणां मूल्यं न जानीयुः तेषां च उपेक्षां कुर्युः। तेषामयमाशयः वर्तते परीक्षामुत्तीर्य प्रमाणपत्र—प्राप्तिरेव आवश्यकमस्ति, न तु एते कार्यक्रमाः इति। तेषां विचारेण एताः क्रियाः बालकानां समयं नाशयन्ति। येन बालकेषु तीव्रतया मानसिकद्वन्द्वः उत्पन्नो भवति। बालकः निर्णेतुं कठिनताम् अनुभवति यत् शिक्षकाणाम् आज्ञा पालयितव्या वा अभिभावकानां वा इति। अनेन कारणेन अनुशासनहीनता प्रसरति, शिक्षकाणाम् उत्साहोऽपि न्यूनो भवति। किञ्च शिक्षायाः उद्देश्यानां प्राप्तौ गत्यवरोधश्च जायते।

कदाचित् इदमपि अवलोक्यते यत् शिक्षकाः अपि अभिभावकानां परिस्थितिषु सीमासु च सहानुभूतिपूर्वकं चिन्तनं न कुर्वन्ति। किञ्च प्रायः तान् प्रति अनावश्यकतया कठोरताम् अनुदारताञ्च प्रदर्शयन्ति। बालकानां पित्रोः सम्मानतया व्यवहारः अत्यावश्यकः, अन्यथा उभयोः पारस्परिकसन्देहस्य अन्तरं वर्धिष्यते।

आवश्यकतायां सत्यां शिक्षकाणां कृते बालकानां गृहस्य आर्थिकस्थितेः, तेषां स्वास्थ्यस्य, किञ्च अन्येषां सामान्यपरिस्थितीनां च विषयेऽपि ज्ञानमावश्यकं स्यात्। तेषां समस्यानां विषये अभिभावकैः सह विचारविमर्शं कृत्वा समुचितकार्यं कर्तुं शक्येत। एवं रीत्या शिक्षकाः अभिभावकानां साहाय्यं प्राप्तुं शक्नुवन्ति।

बालकस्य विकासाय आवश्यकमस्ति यत् तस्य पुरतः गृहविद्यालययोः पक्षतः एक एव आदेशो भवेत्। एकमेव लक्ष्यं भवेत्। विद्यालयेन यत् दीयते मातापितरौ तन्निर्देशं विज्ञाय तस्य प्रपूरणे सहयोगं दद्याताम्, अभिभावकाः यान् परामर्शान् दास्यन्ति, विद्यालयस्याधिकारिणः तां हृदयेन चिन्तयेयुः, येन बालकानां हृदये शिक्षालयाधिकारिणं प्रति उपेक्षायाः भावना न उत्पत्स्येत। यच्च बालकस्य नैतिकभावात्मक–विकासे बाधकः कदापि न स्यात्। अनेन स्पष्टो भवति यत् विद्यालयस्य गृहस्य च द्वयोरपि प्रयत्नस्य दिशा निर्धारितलक्ष्यं प्रति समाना स्यात्। तर्हि निश्चयेन साफल्यं प्राप्येत। विभिन्नदृष्टिकोण–विभिन्नमार्ग–ग्रहणेन अभिभावकानां शिक्षकाणाञ्च प्रयत्नाः सफलाः न भविष्यन्ति। वैपरीत्येन बालकाः अपि विभिन्नासु

विरुद्धदिक्षु आकर्षणेन निराशाः भूत्वा उत्साहरहिताः भवेयुः। येन शिक्षायाः उद्देश्यानां प्राप्तये अवरोधः भविष्यति, बालकानां च विकासे पूर्णत्वं न भवितुमर्हति।

विद्यालये गृहे च सहयोगस्य आवश्यकता

बालकस्य सर्वतोभावेन विकासार्थं तेषां प्रकृति–रुचि मनोवृत्ति–क्षमता–योग्यतानां ज्ञानमावश्यकमस्ति। यावत् पर्यन्तं विद्यालयः गृहेण सह प्रभावपूर्णसम्बन्धं न स्थापयिष्यति तावत् पर्यन्तं सः बालकस्य विषये सम्पूर्णतया ज्ञातुमसमर्थो भविष्यति। अतः तस्य बालकस्य परिवारस्य च स्थितीनां परिज्ञानार्थं गृहस्य सहयोगोऽपि अपेक्षितः।

बालकस्य प्रतिदिवसं सामान्य–कठिनतायाः समस्यानाञ्च समाधानाय विद्यालये गृहे च पारस्परिकसहयोगः अपेक्षितः। अनयोः द्वयोः सहयोगः सामान्यतया काठिन्यानां समाधानाय एवावश्यकं नास्ति अपि तु बालकानां व्यक्तिनिष्ठकाठिन्यानां समस्यानां च समाधानेऽपि परमावश्यकम्। विद्यालयः गृहस्य सहयोगाभावेन गृहकार्यं, भोजनं, बालकस्य विद्यालये विलम्बेन आगमनम्, विलम्बेन गृहगमनम्, विषयविशेषे बालकस्य न्यूनता, अनुशासनमित्यादिविषयाणां समाधाने असमर्थो भविष्यति।

संक्षेपेण वक्तुं शक्यते यत् विद्यालयस्य गृहस्य च सहयोगः विद्यालया–भिभावकयोर्मध्ये गमनागमनस्य मार्गः अस्ति। एतादृश–सहयोगेन विद्यालयः प्रकारान्तेरण ज्ञातुं शक्नोति यत् बालकः गृहे कासु परिस्थतिषु स्थास्यति। पारिवारिकपरिस्थितयः तस्य विकासार्थमुपयुक्ताः सन्ति वा न वा, बालकस्य मित्राणि कीदृशाः सन्ति। इत्थं विद्यालयः बालकस्य विषये विभिन्नं ज्ञानं प्राप्नोति। द्वितीयः पक्षोऽस्ति यत् अभिभावकाः विद्यालयस्य प्रवृत्तिषु किञ्च क्रियाकलापेषु रुचिं स्थापयिष्यन्ति, तेषाञ्च उद्देश्यानि विज्ञास्यन्ति। बालकानां कृते प्रदीयमानां शिक्षाम् अधिकतया लाभप्रदां कर्तुं ते रचनात्मकपरामर्शान् सहयोगं च दातुं तत्पराः भवेयुः।

गृहस्य सहयोगप्राप्तये उपायाः

अत्र प्रश्नोऽयमुदेति यत् विद्यालयः गृहस्य समीपे कथम् आनेयः? एतदर्थं शिक्षकाणामभिभावकानाञ्च मध्ये व्यक्तिगतसम्पर्कं स्थापयितुम् अधिकावसराः कथं वा कल्प्येरन् तेषु सहानुभूतिः अवगतिश्च कथम् उत्पद्येताम्? अस्मिन् विषये अस्माकं विचारेण शिक्षकेषु अभिभावकेषु च निकटसम्पर्कं स्थापयितुं निम्नलिखितोपायाः प्रयोगे आनेतुं शक्याः—

1. छात्राणां सम्बन्धे आवश्यकसूचनानां विनिमयः—विद्यालयः प्रत्येकं बालकस्य प्रगतेः विषये सामाजिक-प्रतिवेदनं तस्य अभिभावकानाम् अथवा संरक्षकाणां समीपे प्रेषयेत्। एतेषु बालकस्य कार्यस्य व्याख्या भवेत्, येन अभिभावकाः तेषां कार्यस्य उन्नतेः अवनतेश्च विषये अवगताः भवेयुः। एतासां प्रगतिसूचनानां पूर्तिः वैयक्तिकानौपचारिकपत्रैः प्रेषणीया। यदि अपेक्षितं स्यात्तर्हि शिक्षकाः अभिभावकानां कृते साक्षात् पत्रमपि लेखितुं शक्नुवन्ति। बालकानां सम्बन्धे आवश्यकसूचनां प्रापयितुं, किञ्च अभिभावकानां कृते बालकानां क्रियाकलापरुच्यादीन् अवगमयितुं समये-समये पत्रव्यवहारः अथवा परस्परसम्पर्कः वा विधेयः, येन अस्मिन् विषये विशेषसाहाय्यं मिलति। ये बालकाः बहुसमस्याः प्रस्तुवन्ति तेषाम् अभिभावकैः सह मिलित्वा वार्तालापः करणीयः। उदाहरणार्थम्—ये बालकाः कक्षां परित्यज्य पलायन्ते, येषाञ्च आरोग्यं असमीचीनमस्ति, येषां वा प्रगतिः सन्तोषदायिका नास्ति, यश्च बालकः कुत्रचन विषये न्यूनतया पटुः, ये च चौर्यं उत अनैतिककार्यं कुर्वाणाः, ये अनुशासनहीनाश्च, तेषां विषये पूर्णविचारविमर्शानन्तरमेव समुचितनिर्णयः कर्तव्यः। अस्य विषये अभिभावकैः विचारविमर्शः क्रियेत किञ्च तेषाम् आवश्यक—सूचनाः प्राप्याः।

2. अभिभावकैः सह सद्व्यवहाराः—विद्यालयाधिकारिणः अभिभावकैः सह सद्व्यवहारं प्रदर्शयेयुः। इयमेव सफलतायाः कुञ्चिका वर्तते, यतो हि यदि तैः सह सद्व्यवहारः न स्यात्तर्हि विद्यालयाधिकारिणां कृते बालकानां पारिवारिक-परिस्थितीनाञ्च विषयज्ञानाभावात् काठिन्यं भवति। शिक्षकाः तैः सह सहानुभूति—पूर्णव्यवहारेण गृह—अभिभावकाभ्यां साकं वा सद्भावनां स्थापयितुं, किञ्च विद्यालयस्य कार्यक्रमेषु तेषां रुच्युत्पादने च सफला भविष्यन्ति। एवं शिक्षकाः अभिभावकानां विश्वासं प्राप्तुं समर्थाः भवेयुः।

3. शिक्षक-अभिभावकसङ्घः (Teacher-Parent-Association)—विद्यालय-गृहनैकट्ये प्रत्येकस्मिन् विद्यालये शिक्षक-अभिभावकसंघस्थापनं विशेषतया साहाय्यकं भवति। अयं सङ्घः अभिभावकानां कृते विद्यालयस्य प्रमुखेषु निर्णयेषु क्रियासु च भागग्रहणे अवसरं दापयति। अपि च अभिभावकाः विद्यालये यत्किमपि प्रचलति, तस्मिन् विषये रुचिं स्थापयितुं आरभन्ते विद्यालयस्य उद्देश्यैः अप्यवगताः भूत्वा तेषां प्राप्तये स्वीयं दायित्वं ज्ञास्यन्ति। संघस्य सम्मिलितसभाभिः विद्यालयसमुदायौ परस्परं समीपे आगच्छतः, येन बालकानां शैक्षिकावश्यकतायाः

प्रपूरणे विशिष्टं साहाय्यं प्राप्तं भवति। यदा अभिभावकाः विद्यालयस्य कार्येषु रुचिं स्थापयन्ति तदा ते शैक्षिकोन्नत्यर्थम् अनेकेषु कार्येषु साहाय्यमाचरितुं तत्पराः भविष्यन्ति।

संघस्य उद्देश्यानि—

(अ) बालकानां हितम् अभिप्रेरयेत् किञ्च शैक्षिकस्तरस्य पर्याप्ततया समुन्नतीकरणम्।

(ब) अभिभावक—अध्यापकयोर्मध्ये घनिष्ठं सम्पर्कं संस्थाप्य परस्परं सद्भावनया अवगतौ भूत्वा विद्यालयसमुदायौ परस्परं सन्निहितौ स्याताम्।

(स) बालकानां हितं मनसि अवधार्य पारिवारिकजीवनस्य स्तरमुत्थापयेत्।

संघस्य कार्याणि—

(अ) अभिभावकाः विद्यालयकार्यक्रमान् सम्यक् अवगन्तुं विद्यालयाधिकारिणः गृहस्य परिस्थतीः, बालकानाञ्च आवश्यकतां ज्ञातुं साहाय्यं आचरेयुः। तदर्थं संघः अभिभावक—शिक्षकदिवसस्य आयोजनं कर्तुं शक्नोति, येन तेषु परस्परं सद्भावनाः विश्वासश्च समुपस्थापिताः भवन्ति।

(ब) अनेकधा गोष्ठीनामायोजनं कृत्वा यत्र अभिभावकाः शिक्षकाश्च सामूहिकतया वैयक्तिकेन वा विद्यालय—बालकविषयकविभिन्नसमस्यानां विचारं कर्तुं शक्नुवन्ति। उदाहरणार्थम्—बालापराधः, अनुशासनराहित्यं कक्षातः पलायनप्रवृतिः, शिक्षायां व्ययस्य न्यूनता, नवीनशिक्षणविधीनां प्रयोगसम्बन्धि—विचारविमर्शैः सह यथोचितकार्यकरणस्य निर्णयोऽपि सम्भवति।

(स) एतादृशानां कार्यक्रमाणां सञ्चालनेन विद्यालयस्य समाजस्य च मध्ये सद्भावना घनिष्ठसम्बन्धश्च स्थाप्येते। यदा-कदा शिक्षक-बालक-अभिभावकेभ्यश्च सामाजिकसांस्कृतिककार्यक्रमाणामपि आयोजनं शक्यम्। शिक्षकप्रशिक्षण-अभिभावकशिक्षाविषयबहुविधयोजनायाः सञ्चालनेन अस्मिन् विषये विशिष्टं साहाय्यं सम्मिलति।

उपर्युक्तोपायैः विद्यालयं गृहञ्च परस्परं समीपे आनेतुं शक्नुमः। अत्रायं कथनमनुपयुक्तं न स्यात् यत् प्रभावपूर्णः सहयोगः शिक्षकान् एव आश्रित्य वर्तते। केचन अस्माकम् अभिभावकाः अशिक्षिताः अपि सन्ति, ते च अस्य सहयोगस्य

महत्त्वं ज्ञातुमसमर्थाः। शिक्षकाणां विशिष्टं कर्तव्यमस्ति यत् ते अभिभावकान् अस्मिन् विषये जागरूकान् कुर्वन्तु तेषां च सहयोगं प्राप्य विद्यालयकार्यक्रमं शिक्षायाः उद्देश्यानाम् अधिकतया साफल्यार्थं यथा सम्भवेत् तथा निर्वर्तयेयुः।

पुनरावृत्ति–प्रश्नाः

1. विद्यालयनामकसंस्थायाः जन्मनि के विषयाः सहयोगमकुर्वन्?
2. विद्यालये बालकस्य शिक्षायाः किमुत्तरदायित्त्वं वर्तते?
3. विद्यालयस्य गृहस्य च शैक्षिकलक्ष्यं किम् अस्ति?
4. विद्यालयगृहयोः सहयोगस्य का आवश्यकता?
5. विद्यालयः गृहस्य सहयोगं कैः साधनैः प्राप्नोति?
6. भवद्भिः अभिभावकानां सहयोगप्राप्तये के के प्रयत्नाः विधास्यन्ते?
7. अध्यापक–अभिभावकसङ्घस्य आवश्यकतां वर्णयत?
8. शिक्षक–अभिभावकसङ्घस्य कानि उद्देश्यानि कार्याणि च सन्ति?

लेखार्थः प्रश्नः

''स्वबालानां विद्यालये प्रवेशनेनैव पित्रोः दायित्वं समाप्तं न भवति'' इति कथनं विविच्य विद्यालयं गन्तर्णिां बालानां गृहकर्तव्यानि स्पष्टयत।

□□□

28

विद्यालयस्य संसृष्टजीवनम्

(The Corporate Life of The School)

"Developing a corporate life in a school is a long business and we have to take definite measures to ensure that our school becomes a real community and not simply a conglomeration of individuals who come together for a few hours everyday." **-W.M.Ryburn**.

मानवः एकः सामाजिकप्राणी वर्तते, सः समाजस्य अभावे स्थातुं नैव शक्नोति। सः स्वविभिन्नावश्यकतानां पूर्तये समाजस्य अभिन्नमङ्गम् भूत्वा निवसति। समाज एव तस्य जन्म भवति, तस्मिन्नेव स्थित्वा सः स्वविकासं करोति, तस्मिन्नेव च तस्य जीवनं समाप्तं भवति। वस्तुतः सः जन्मनः परं झटिति समाजस्य रीतयः परम्पराश्च न शिक्षते अपि तु सः मन्दं मन्दं समाजे स्थित्वा तस्य रीतीनां नियमानां परम्पराणाञ्च अनुसारं आचरणं कृत्वा समाजस्य सदस्यतायाः अर्थम् आवश्यकतां महत्त्वं च अवगच्छति। अस्मिन् कार्ये विद्यालयः अपि अतिसहायकः अस्ति। विद्यालये बालकस्य समाजीकरणं भवति, तत्र च बालकं समाजस्य एकादर्शसदस्यरूपेण निर्मातुं प्रयासः क्रियते। विद्यालये बालकः इदं शिक्षते यत् समाजस्य नियमरीति–आदर्शानामनुसारं केन प्रकारेण स्थातुं शक्नोति इति। विद्यालयस्य उद्देश्यं बालकानां समाजीकरणं वर्तते। एतदर्थं विद्यालयः बालकेषु परस्परस्नेहसहयोग–बन्धुत्व–सामाजिकतादीनां भावनानां विकासनं परमावश्यकं वर्तते। एतासां भावनानां विकासाय विद्यालयस्य जीवनं सामूहिकं संसृष्टं वा अवश्यं भवेत्। अन्येषु शब्देषु वक्तुं शक्यते यत् विद्यालयेषु समाजस्य इव सर्वे छात्र–अध्यापक–अधिकारि–कर्मचारि–सहयोगिनः जीवनं यापयन्तु। एते जनाः परस्परं सहयोगं दत्वा विद्यालयसदृशसमाजस्य नियमानां परम्पराणाम् आदर्शानां च पालनं कुर्वन्तु।

विद्यालयजीवनं संसृष्टनिर्माणस्य आधारभूतकारकाणि[1]

सामूहिकजीवनं संसृष्टजीवनं वा एतादृशं वस्तु–नास्ति यस्य उत्पत्तिः कर्तुं शक्यते, अपि तु इयं सा प्रवृत्तिः वर्तते यस्याः विकासः क्रियते। एतस्य विकासस्य कृते विद्यालये एतादृशं वातावरणं भवेत् यत्र बालकः अनुभूयेत यत् सः एकस्मिन् परिवारे वसन् अस्ति। सामूहिकभावनां प्रवृत्तिं वा वयं निर्धारितैः पाठैः बालकान् न शिक्षयितुं शक्नुमः, यतः विद्यालये सामूहिकजीवनस्य संसृष्टजीवनस्य वा विकासनं एकः दीर्घकालिकव्यवहारः वर्तते। वयं बालकान् इदं कथयित्वा—''त्वं एकः समाजः असि, त्वं स्वसमाजावगमनस्यारम्भं कुरु, तदनुसारं च वस'' नैव शिक्षयितुं शक्नुमः। अतः विद्यालये संसृष्टजीवनस्य विकासस्य कृते अस्माकं निम्नलिखित–कारकाणि प्रति ध्यानम् आवश्यकम् अस्ति—

1. विद्यालये शिक्षकाणां परस्परसहयोगिसम्बन्धाः—बालकः उपदेशापेक्षया उदाहरणैः अधिकं शिक्षते। अतः सामूहिकजीवनस्य विकासार्थं शिक्षकैः प्रधानाध्यापकैश्च सहयोगस्य मित्रतायाश्च उदाहरणं प्रस्तूयेत। शिक्षकाः शिक्षकाश्च, शिक्षकाः प्रधानाध्यापकश्च प्रतिकार्यं दल–भावनया मिलित्वा कुर्युः, विद्यालयस्य हिताय एतेन प्रकारेण कार्यं कृत्वा तेषां छात्राणां समक्षम् आदर्शं प्रस्तुयुः। येषु विद्यालयेषु शिक्षकप्रधानाध्यापकयोः मध्ये पारस्परिकसहयोगस्य मित्रतायाश्च भावना वर्तते, तेषु च स्नेह–सहानुभूतिः वर्तते, ते च परस्परमाश्रिताः उत्तरदायित्वं च जानन्तः मिलित्वा कार्यं कुर्वन्ति। एतस्य तात्पर्यमिदमस्ति यत् तस्मिन् विद्यालये सामूहिकजीवनस्य मूलाधारः स्थापितः अस्ति। यदि शिक्षकशिक्षकयोः, शिक्षकप्रधानाध्यापकयोः च मध्ये ईर्ष्या–द्वेष–वैमनस्यादि भविष्यति तर्हि ते विद्यालयहिताय कार्यं न करिष्यन्ति, तेन च छात्रेषु अपि कुप्रभावः भविष्यति। एतस्य परिणामस्वरूपं विद्यालयः बालकेषु सामूहिकभावनया विकासने सफलो न भवितुं शक्ष्यति।

2. शिक्षकेषु बालकेषु च सामुदायिकतायाः भावना—संसृष्टजीवनस्य कृते शिक्षकेषु छात्रेषु च परस्परं सामुदायिकतायाः सहयोगस्य च भावना परमावश्यकमस्ति। एतदर्थं शिक्षकाः छात्रान् प्रति सहानुभूतिपूर्णं व्यवहारं कुर्युः, तेषां च क्षमतायां योग्यतायां च निष्ठां कुर्युः यदि शिक्षकाः स्वछात्रेभ्यः उत्तरदायित्वप्रदानसमये तान्

1. FACTORS.

प्रति अविश्वासं प्रकटयिष्यन्ति तर्हि तेषां मध्ये कटुभावना अवश्यं भविष्यति। अतः संसृष्टसामूहिकजीवनस्य विकासाय शिक्षकेषु छात्रेषु च परस्पर–सहयोगस्य भावना भवेत्। यदि शिक्षकाः छात्राश्च परस्परं मिलित्वा कार्यं कुर्वन्ति, तर्हि तेषु सामुदायिकभावना विकसिता भविष्यति। यथा–यथा ते परस्परं मिलित्वा अनुभवान् अभिप्रायान् च प्राप्तुं प्रयत्नं करिष्यन्ति, तथा–तथा विद्यालयस्य सामूहिक–संसृष्टजीवनं विकसितं समृद्धं च भविष्यति।

3. संघभावनायाः विकासः—संघभावनायाः तात्पर्यं तया भावनया अस्ति यया विद्यालये बालकाः आत्मानं विशिष्टसमूहस्य क्षेत्रस्य वा सदस्यं मन्यन्ते, परस्परघनिष्ठैकतायाश्च भावनाम् अनुभवेयुः बालकाः इदं स्पष्टम् अवगच्छेयुः यत् अस्माकं लक्ष्यम् एकमेवास्ति संघशक्त्या एव वयं तत् प्राप्तुं शक्नुमः। एवम् ऐक्यभावनाया विकासेन तेषां जीवनमधिकसंसृष्टं भविष्यति।

बालकेषु सङ्घभावनायाः विकासः अनेकप्रकारेण कर्तुं शक्यते, यथा विद्यालये छात्रपरिषत्स्थापनेन। छात्रपरिषदि सर्वासां कक्षाणां, विभागानां च चितप्रतिनिधयः भविष्यन्ति ये समये–समये उत्सवानां, सामुदायिक–सामाजिक–प्राकृतिककार्याणां सङ्घटनं, सञ्चालनञ्च करिष्यन्ति। शिक्षकाः छात्राणां सङ्घटनं कार्यं सञ्चालनञ्च, तेषां क्षमताः योग्यताश्च संदिग्धदृष्ट्या न पश्यन्तु अपि तु तेषु विश्वासं कृत्वा तेभ्यः उत्तरदायित्वं दत्त्वा निश्चितसीमापर्यन्तं कार्यकरणस्य पूर्णस्वतन्त्रतां ददतु। एवं छात्रपरिषदि अन्यविभागीयपरिषत्सु च मिलित्वा कार्यकरणेन बालकेषु परस्परसहयोगस्य, सामाजिकतायाः, संघबद्धतायाश्च भावनायाः विकासः भवितुं शक्नोति, यः विद्यालयस्य संसृष्टजीवने विशेषरूपेण सहायकः भविष्यति।

छात्रपरिषदतिरिक्तं 'विद्यालयसभा' (एसेम्बली) विद्यालयस्य संसृष्टजीवनस्य कृते महत्त्वपूर्णा अस्ति। विद्यालयकार्यस्य प्रारम्भात् पूर्वं विद्यायलस्य सर्वे छात्राः, शिक्षकाः, प्रधानाध्यापकश्च एकस्मिन् स्थाने स्थित्वा सामूहिकप्रार्थनां, विद्यालयगानञ्च कर्तुं शक्नुवन्ति। अस्मिन् समये सर्वेषां समक्षं प्रतिदिनम् एकं नवीनादर्शविचारं प्रस्तोतुं शक्नोति, येन छात्राः तस्य दिवसस्य श्रेष्ठविचारेण प्रेरणां प्राप्तुं शक्नुवन्ति। एवं सर्वेषां चिन्तनधारा एकम् एव लक्ष्यं प्रति प्रवहति इति जीवने संसृष्टस्य विकासः भविष्यति। अस्मिन्नवसरे सर्वे आवश्यकनिर्देशाः, आदेशाः,

सन्देशाश्च दातुं शक्यन्ते। प्रतिदिनम् एतस्य प्रकारस्य सम्मेलनम् एकतायाः सामूहिकतायाश्च भावनायाः विकासे अतिसहायकं भविष्यति।

विद्यालये 'गृहपद्धतिः भवन-प्रणाली वा' संसृष्टजीवनस्य विकासाय अतिसहायकं सिद्धं भवति। 'भवनप्रणाली' इत्यनेन विद्यालयस्य समस्तबालकाः निश्चितभवनेषु विभाजयितुं शक्यन्ते। अस्मिन् इदं ध्यानमपेक्षितम् यत् प्रत्येकस्मिन् भवने विद्यालयस्य सर्वासां कक्षाणां प्रतिनिधयः उपस्थिताः भवेयुः। विभिन्नसमूहानां परिचयस्य कृते भवनानाम्, आदर्शव्यक्तीनां लक्ष्याणाञ्च नाम दातुं शक्नुवन्ति, यथा टैगोरभवनं प्रगतिभवनञ्च। भवनाधारेण विद्यालयस्य कक्षाणां सर्वे छात्राः मिलित्वा कार्यं करिष्यन्ति। अनेन तेषां पारस्परिकपरिचयः वर्धिष्यते, भवनस्य प्रतिष्ठायाः गौरवस्य च दायित्वं भवनस्य सर्वेषु सदस्येषु निहितं भविष्यति ते एतादृशानि एव कार्याणि करिष्यन्ति, येन तेषां भवनस्य प्रतिष्ठा उच्चा भवेत्। 'भवनप्रणाली' 'गृहपद्धतिः' वा इत्यनेन बालकेषु सामूहिकता-एकता-आत्मनिर्भरता-सहकारितानां मूलाधारः सरलतया स्थापयितुं शक्यते, यतः सम्पूर्णविद्यालयस्य छात्राणां सङ्ख्या अधिका भवति, तान् सर्वान् प्रत्येकस्मिन् अवसरे एकत्रयित्वा कार्यकरणे व्यावहारिककाठिन्यं भवति। भवनानि तु लघुसमूहाः सन्ति-अधिकसरलतया सामूहिकजीवनं शिक्षयितुं शक्यते।

विद्यालयस्य विभिन्नयोजनाः सामूहिकभावनायाः विकासे बहूपयोगिन्यः भवन्ति। विद्यालये कार्यकरणस्य एतादृश्यः अनेकाः योजनाः निर्मातुं शक्नुवन्ति येषु विद्यालयस्य छात्राणां शिक्षकाणां च मिलित्वा कार्यकरणस्य अवसराः लब्धुं शक्यन्ते। सामूहिकश्रमदानं, साक्षरताकार्यक्रमः, सामाजिकशिक्षा, स्वास्थ्यनियमानाञ्च प्रचारः प्रभृतिभिः योजनाभिः विद्यालये एकतायाः सामुदायिकतायाश्च भावनायाः विकासः भविष्यति। विद्यालयात् बहिः कस्मिंश्चित् उपयुक्तस्थाने किञ्चिद्दिवसपर्यन्तं शिबिरायोजनेन एकनिश्चितकार्यक्रमेण संसृष्टजीवनस्य अतिसुन्दरम् उदाहरणं प्रस्तोतुं शक्यते।

4. विद्यालयस्य सामान्यचारित्रिकभावना— विद्यालयस्य संसृष्टजीवनस्य द्रढीकरणे विद्यालयस्य सामान्यचारित्रिकभावना बहुसहायिकास्ति। वस्तुतः सामान्य-चारित्रिकभावना इत्यस्य परिभाषणं कठिनं वर्तते। सम्भवतः सम्पूर्णनिकायस्यात्मा विद्यालयस्य उत्तमचारित्रिकभावनायाः एकं मुख्यं तत्त्वं वर्तते यत् बालकानां निकाये

आच्छादितं वर्तते। रेनमहोदयस्य कथनमस्ति— ''यदि विद्यालयस्य सामान्य-चारित्रिकभावनानां सुनिर्माणमस्ति तर्हि सम्पूर्णनिकायस्य आत्मा विद्यालयं प्रति प्रेम-गर्वः, प्रत्येकस्मिन् क्षेत्रे विद्यालयस्य उन्नतिः, स्वेच्छापूर्वकम् आज्ञाकारिता, कठिनपरिश्रमः, विश्वसनीयता च प्रेरकाः भवेयुः।''

5. आदर्शवाक्य-पताका-गणवेशादीनि विद्यालयज्ञापक-चिह्नानि— विद्यालयस्य सामूहिकजीवनं द्रढीकर्तुं विद्यालयस्य एकतायाः केचन प्रतीकाः अवश्यं भवेयुः। ते प्रतीकाः एतादृशाः भवेयुः यान् प्रति विद्यालयस्य छात्रेषु आत्मीया भावना स्फुटिता भवेत्, यदा ते तान् प्रतीकान् पश्येयुः हर्षोल्लासेन, उत्साहिताः भवेयुः। एकता प्रतीकेषु विद्यालयस्य स्वादर्शवाक्यम्[1], पताका, गणवेशः[2], विद्यालयगानम्, विशिष्टचिह्नञ्च[3] अत्यावश्यकं वर्तते। एतैः बालकेषु एकतायाः सामाजिकतायाश्च भावना प्रबला जायते। यथा राष्ट्रियपताकया राष्ट्रियभावना विकसिता भवति, तथैव विद्यालयस्य एतेषां प्रतीकानां छायायां विद्यालये एकस्य संसृष्टजीवनस्य विकासः भवेत्। एतदतिरिक्तं एते विद्यालयस्य सामान्यचारित्रिकभावनाः उत्तमाः विधातुं च सहायकाः भवन्ति।

उपर्युक्तकारकैः बालकेषु सहयोगः, आत्मसंयमः, आत्मनिर्भरता, सद्भावना, सहानुभूतिः, इतरेषु आदरभावना, निःस्वार्थपरता, अनुशासनञ्चेति गुणानां विकासः जायेत। यस्मिन् विद्यालये एतेषां गुणानां विकासस्य कृते उचिता व्यवस्था वर्तते, तस्य विद्यालयस्य संसृष्टजीवनं सुन्दरं भविष्यति। वस्तुतः विद्यालयस्य सामूहिकजीवनस्य महत्त्वपूर्णं वैशिष्ट्यमिदमस्ति यत् बालकाः आत्मनो विद्यालयस्य अभिन्नमङ्गं मन्येरन्। विद्यालयस्य च कार्यैः उद्देश्यैः च सह स्वकार्यस्य उद्देश्यस्य च समन्वयं कुर्युः परस्परं च सहयोगि-सहानुभूतिपूर्णञ्च व्यवहारं कुर्युः, सम्पूर्णसङ्घटनस्य च आदर्शानां नियमानाञ्च पालनं विना कस्यापि आदर्शस्य स्वाभाविकरूपेण एव कुर्युः।

---

1. Motto
2. Uniform
3. Emblem.

पुनरावृत्ति-प्रश्नाः

1. विद्यालयस्य संसृष्टजीवनेन भवान् किम् अवगच्छति ? स्पष्टयत।
2. विद्यालये संसृष्टजीवनस्य सङ्घटने कानि उद्देश्यानि ध्याने भवेयुः ?
3. भवान् विद्यालयस्य जीवनं संसृष्टं निर्मातुं कान् प्रयासान् करिष्यति ?
4. विद्यालयस्य संसृष्टजीवनस्य निर्माणे शिक्षकाणां सहयोगिसम्बन्धानां किं महत्त्वं वर्तते ?
5. भवान् छात्रेषु सामुदायिकतायाः भावनां केन प्रकारेण विकासयिष्यति ?
6. भवान् छात्रेषु संघबद्धतायाः भावनां विकासयितुं कान् प्रयासान् करिष्यति ?
7. संघबद्धताभावनाविषये भवनप्रणाल्याः किं महत्त्वं वर्तते ?
8. विद्यालये सामूहिकजीवनस्य निर्माणे विद्यालयस्य सामान्यचारित्रिकभावना कीदृशं सहयोगं ददाति ?
9. भवान् विद्यालये एकतास्थापनार्थं कान् प्रयासान् करिष्यति ?

लेखार्थः प्रश्नः

बालकः स्वविद्यालयजीवने संसृष्टजीवनस्य प्रथमपाठं केन प्रकारेण प्राप्नोति ? सोदाहरणं स्पष्टयत।

❑❑❑

29

नागरिकतायै शिक्षा

(Education for Citizenship)

"Citizenship education is concerned with the moral, ethical, social and economic aspects of life as well as the political"

-Encyclopaedia of Educational Research.

बहुकालस्य दासतायाः परं भारतदेशः स्वतन्त्रः जातः। अगस्त-मासस्य 15 दिनाङ्कः पुण्य-राष्ट्र-पर्व सञ्जातं, साकमेव नवीनसमस्याः, उत्तरदायित्वानि च आनयत्। सोऽयं दिवसः-यत्रास्माभिर्विभावितं युगव्यापिनिद्रायाः जागरिताः वयं कर्तव्यपरायणताम् अधिरोहाम इति। वयम् अस्यां दिशायां प्रथमप्रयासे देशं धर्मनिरपेक्षलोकतन्त्रात्मकगणराज्यं घोषितं कुर्मः। लोकतन्त्रं केवल शासन-प्रणाल्याः रूपेण एव न अपि तु जीवनशैल्याः रूपेण अपि ग्रहणस्य संकल्पः अकरोत्। अनेन दृष्टिकोणेन अस्मान् समस्तनागरिक-अधिकाराः प्राप्नुवन्, यथा मूलाधिकारः, राजनैतिकाधिकारः, सामाजिकाधिकारः, धार्मिकाधिकारश्च। एवं अस्माभिः नागरिकता वैधानिकरूपेण प्राप्ता। वयं स्वतन्त्रतायाः, समानतायाः, भ्रातृत्वस्य च पाठम् अपठाम। परन्तु एतैः अधिकारैः सह वयं नागरिकस्य महत्त्वभूतानां कर्त्तव्यानाम् अपि निर्वाहं कुर्मः, तेषां दायित्वानामपि सफलतापूर्वकं निर्वाहं कुर्मः ये स्वाधीनतां अस्मभ्यं दद्युः।

केवलमधिकारप्रदानं कृत्वा लोकतन्त्रस्य स्थापनां सफलां निर्मातुं न शक्नुमः। लोकतन्त्रस्य अस्तित्वं तस्य च सफलता शिक्षितनागरिकान् आश्रितं वर्तते। अस्मिन् सम्बन्धे **बर्कमहोदयः** लिखति—"लोकतन्त्रस्य सुरक्षायै स्थायिविशालसेनायाः अपेक्षा शिक्षितनागरिकाणाम् आवश्यकता वर्तते।"[1] इदं तथ्यं भारतीयनेतृभिः अप्यनुभूतम्।

---

1. "An educated citizenary is a greater defence to democratic country than a vast standing army." **-Burke.**

एतै 6–14 वयोवर्गस्य बालकेभ्यः निःशुल्कानिवार्य–शिक्षायाः घोषणा कृता। अतः शिक्षितनागरिकाणां निर्माणकार्यं विद्यालयेभ्यः समर्पितम्। एतेन कारणेन कथ्यते यत् कस्यापि राष्ट्रस्य प्रगतेः निर्माणं विधानसभासु, न्यायालयेषु, यन्त्रालयेषु च न भूत्वा विद्यालयेषु भवति, विद्यालयाः एव तादृशं स्थानमस्ति यत्र भाविनागरिकाणां निर्माणं जायते। अतः स्वतन्त्रतानन्तरमनेन दृष्टिकोणेन शिक्षायाः पुनर्निर्माणस्य आवश्यकता अनुभूता। देशस्य नेतृभिः शिक्षापुनर्निर्माणाय विभिन्न–आयोगानां नियुक्तिः कृता। **माध्यमिक–शिक्षा–आयोगः** अस्मिन् सन्दर्भे लिखति—‘‘भारतदेशाय इदानीमेव राजनैतिक–स्वतन्त्रता प्राप्ता। देशश्च विचारविमर्शानन्तरम् आत्मानं धर्मनिरपेक्षलोकतन्त्रात्मक–गणराज्यत्वेन घोषितवान्। एतदर्थं शिक्षया नागरिकेषु एतादृशाः स्वभावाः, अभिरुचयः, चारित्रिकाणां च गुणानां विकासः क्रियेत, येन ते लोकतन्त्रीयनागरिकतायाः दायित्वानि सम्यक् प्रकारेण निर्वोढुं शक्नुवन्ति।’’[1]

शिक्षा–आयोगेन लिखितं वर्तते— ‘‘भारतम् इदानीं प्रगतिपथं अभिसरति। देशेऽस्मिन् पुनर्जागरणम् आगच्छति इति विश्वासोऽपि वर्तते। तथाऽपि देशोऽयम् अनेकविधराजनैतिकप्रयासान् अपि अभिमुखीकरोति। सर्वप्रथममस्माभिः लोकतन्त्रमिदं दृढीकरणीयम्। सकलासु कठिनतासु विद्यमानासु अपि देशस्यास्य लोकतन्त्रव्यवस्था स्वसामर्थ्यस्य परिचयं प्रददाति एव। परं देशवासिनः इतोऽप्यधिकं शिक्षिताः मतदातारः स्युः। नेतारश्च त्यागशीलाः भवेयुः। एवमेव देशवासिषु आत्मनियन्त्रणं सहनशीलता, परस्परसद्भावः परस्परसमादरभावश्च तथा रूढमूलाः भवेयुः। यथा एते भावाः एतेषु परम्परया इव विद्यमानाः स्युः न तु अधिकारिभिः बलात् नियमेन प्रचारिताः। एवमस्माभिः लोकतन्त्रस्य मूलं यावत् सुदृढं न निर्मीयते तावत् विश्रामो न कार्यः। अस्माकं देशस्य स्वातन्त्र्यम् इतोऽपि महत्त्वपूर्णं वर्तते यतो हि स्वातन्त्र्यं विना अस्माकं अस्तित्वमेव नास्ति। स्वातन्त्र्यस्य संस्थापनार्थं प्रत्येकं नागरिकस्य भोजनविषये तथा आवश्यकसामग्रीविषये आत्मनिर्भरता अपेक्षिता वर्तते। अपि च देशस्यार्थव्यवस्थां

---

1. “India has recently achieved its political freedom and has , after careful consideration, decided to transform itself into a secular democratic republic. This means that the educationl system must take its contribution to the development of habits, attitudes and qualities of character,which will enable its citizens to bear worthly the responsibilities of democratic citizenship.”

–Secondary Education Commission, p. 23

द्रढयितुं तथा देशे धर्मनिरपेक्षतायाः संस्थापनाय च अस्माभिः सम्पूर्णसहयोगो देय एव अस्ति।'' एतत्सर्वं कारयितु भारतीयेभ्यो नागरिकतायाः शिक्षा अवश्यं देया। अत एवाद्यत्वे भारते नागरिकतायाः शिक्षायाः दृढीकरणे अपेक्षा वर्धमाना दृश्यते।

नागरिकतायाः अर्थः नागरिकगुणाश्च—

तत्तद्देशेषु प्रचलितानां नियमानामाधारेण तत्रत्यव्यक्तीनां नागरिकताविषये निर्णयः भवति। प्रत्येकराष्ट्रे केचन नियमाः परम्पराश्च भवन्ति, ये नागरिकेभ्यः विचारान् प्रददति तेभ्यश्च केषाञ्चित् कर्त्तव्यानां निर्वहरणस्य अपेक्षां कुर्वन्ति। अतः अधिकाराः कर्त्तव्यानि मिलित्वा नागरिकतायाः निर्माणं कुर्वन्ति। **अमेरिकन्-विद्यालय-प्रबन्धकानां समुदायः** नागरिकतायाः अर्थं स्पष्टयन् लिखति—''नागरिकता तत् वस्तु नास्ति यत् कस्यापि घटकस्य विषयस्य च रूपेण पाठयितुं शक्यते अपि तु तत् जीवनयापनस्य एकमङ्गमस्ति। अस्माकं समक्षं वस्तुतः प्रश्नोऽयं नास्ति यत् एकः नागरिकः किं जानीयात्, अपि तु अयमस्ति प्रश्नः यत् उत्तमनागरिकः किं करोति, सः च एतादृशं कर्तुं किं जानीयात्।''[1] अतः नागरिकतायाः शिक्षा एकस्य विषयस्य रूपेण न, अपि तु एकानुभवसेवायाः रूपेण प्रदास्यते।

नागरिकतायाः अर्थस्य अवलोकनानन्तरं स्वयमेव प्रश्नः उत्तिष्ठति यत् उत्तमनागरिकः कः अस्ति? उत्तमनागरिकस्य धारणां स्पष्टीकर्तुं निम्नलिखित-ग्रीकनागरिकशपथः अतिसहायकः वर्तते—''वयं अस्माकम् अधर्माचरणेन भीरुतया वा स्वकीयं नगरं कलङ्कितं न करिष्यामः। न च कदापि दुःखापन्नानि आत्ममित्राणि परित्यज्य गमिष्यामः। वयं नगरस्य पवित्रादर्शानां वस्तूनां च संरक्षणाय एकाकीरूपेण सामूहिकरूपेण वा मिलित्वा योत्स्यामहे, वयं नगरस्य नियमान् पालयिष्यामः, स्वसामर्थ्यानुसारं च तेषु जनेषु अपि नियमेभ्यः श्रद्धां, आदरं च उत्पादयितुं प्रयासान् करिष्यामः ये तेषामुल्लङ्घनं कुर्वन्ति, वयं जनतायाः नागरिकभावनां परिपोषयितुं पृथक्परिश्रमं करिष्यामः। एवं एतैः समस्तैः प्रकारैः वयं अस्य नगरस्य सम्पत्तिम्

---

1. Citizenship is a way of living, not something that can be taught only as a unit or subject, .The real question is not merely 'What does a good citizen know' but 'What does a good citizen do', and 'What must he know to it ?"

–American Association of School Administrators.

इतोऽपि न न्यूनयिष्यामः अपि तु तदपेक्षया उत्तमरूपेण व्यापकरूपेण अधिकसुन्दररूपेण च तां संक्रामयिष्यामः।''[1]

वस्तुतः उपर्युक्तशपथः प्रत्येकं देशस्य नागरिकेभ्यः उत्तमादर्शं प्रस्तौति। एतस्मिन् विशेषरूपेण तेषां कार्याणां कर्त्तव्याणां वा विवेचनं कृतमस्ति। प्रत्येकं नागरिकः अस्य आदर्शस्य अन्यनिर्धारितादर्शस्य वा अनुसारेण स्वनागरिकजीवनं यापयेत्। परन्तु आधुनिकयुगे नागरिकतायाः धारणा तस्य क्षेत्रञ्च अतिव्यापकतां प्राप्नोत्। अधुना उत्तमनागरिकतायाः धारणा नागरिकतायाः वैयक्तिकसद्गुणानां च मिश्रणं मन्यते। एतदनुसारं व्यक्तिगतविकासः सामाजिकदायित्त्वं च परस्परं विरोधी न मन्यते अपि तु पूरकः अवगम्यते। अद्य अस्य क्षेत्रं केनापि विशेषस्थानेन, देशेन, राष्ट्रेण वा सीमितं नास्ति अपि तु अस्य क्षेत्रं सम्पूर्णमानवजातिं सम्पूर्णं विश्वं वा व्याप्यास्ति। अस्याः धारणायाः अनुसारं एकस्मिन् उत्तमे कुशले च नागरिके एते सद्गुणाः अवश्यं भवेयुः।

(अ) अमेरिकन्—विद्यालयप्रबन्धकसमुदायानुसारेण—

1. नागरिककुशलता
2. शैक्षिकग्रहणशीलता
3. सामाजिकबोधावबोधनम्
4. व्यावसायिककुशलता
5. धार्मिकचेतना
6. पारिवारिकशक्तिः[2]

(ब) डी. ई. स्टेनले, मेलर, वेस्टन[3] महोदयानामध्ययनस्य आधारेण—

1. उत्तमनागरिकः लोकतान्त्रिकादर्शेषु निष्ठां करोति।

---

1. "We will never bring disgrace to this our city by any act of dishonesty or cowardice nor desert our suffering comrades. We will fight for the ideals and sacert things of the city, alone and with many; we will revere and obey the city's laws and do our best to incite a like in those among us who are prove to annual them or set them at naught, we will strive unceasingly to quicken the public's sense of civic thought. Thus in all these ways we will transmit this city and not only less, but greater, better , more beautiful than it was transmitted to us." **-Greek Civik Oath.**
2. Civil competence, Educational flexibility, social understanding, Occupational efficiency; Religious consciousness, and Home loyalty.
3. D.E. Stanley, Meler and Weston

2. लोकतन्त्रीयसमाजस्य अनुकूलमानवीयसम्बन्धानां व्यावहारिकरूपं प्रददाति।
3. लोकतन्त्रीयजीवनयापनस्य प्रक्रियां सरलयितुं ज्ञानं, कौशलं, योग्यतां च गृहीत्वा व्यवहारे आनयति।
4. समाजस्य सामाजिक-राजनैतिकसमस्यानाम् अवगमने तेषां समाधाने च सहयोगं ददाति।
5. मानवस्य मौलिकावश्यकतानां पूर्तेः महत्त्वेन अवगतं भवति।

(स) सामाजिकशिक्षा-आयोगस्यानुसारेण—

1. अवगमनशक्तिः बौद्धिकसत्यनिष्ठा च[1]
2. वैज्ञानिकदृष्टिः
3. उदारमस्तिष्कः
4. सत्यदेशप्रेम
5. अनुशासनम्
6. सहयोगः
7. सामाजिकसंवेदना[2]
8. सहिष्णुता
9. नैतिकचरित्रम्

नागरिकतायाः शिक्षायाः आवश्यकादर्शाः— नागरिकतायाः शिक्षा व्यक्तिषु निम्नलिखितस्य विकासं कुर्यात्—

1. तासां सामाजिक-आर्थिक-राजनैतिक-शक्तीनाम् अवगमनम्, याः आधुनिक-संसारस्य स्वरूपस्य निर्माणे भागं नयन्त्यः सन्ति।
2. सहिष्णुतायाः उदारमस्तिष्कस्य निर्माणम्।
3. पूर्वाग्रहं विना स्पष्टप्रभाविचिन्तनस्य योग्यतानिर्माणम्।
4. स्वतन्त्रनिर्णययोग्यनिर्माणम्।

---

1. Understanding and Intellectual Integrity.
2. Social Sensitiveness.

5. नेतृत्वानुसरणक्षमतायाः विकासः।

6. स्वतन्त्रतायां निष्ठा।

7. स्वाशुद्धी स्वीकरणस्य प्रवृत्तेः विकासः।

8. स्वाधिकाराणां दायित्त्वानां च ज्ञानम्।

9. स्वाजीविकायाः सत्येन मार्गेण चयनम्।

10. विपरीतपरिस्थितीनां दृढतया सह तुल्यविरोधः।

11. मानवसमतायां निष्ठा।

12. जीवनस्य लोकतान्त्रिकादर्शेषु निष्ठा।

13. आदर्शानां जीवनस्य अङ्गनिर्माणम्।

नागरिकतायाः शिक्षायाः अङ्गानि

नागरिकतायाः शिक्षायां निम्नलिखिततथ्यानां स्थानं भवितुमर्हति—

1. आर्थिकप्रशिक्षणम्— आर्थिक-दृष्टिकोणेन एकः उत्तमः नागरिकः सः भवति यः कुशलपूर्वकमुत्पादयेत्, बुद्धया उत्पादिवस्तूनां उपयोगं कुर्यात्। अन्यनागरिकाणां च आर्थिकक्रियाणां संरक्षणाय कार्यं कुर्यात्। एतादृशाः नागरिकाः स्वयमेव उत्पन्नाः न भविष्यन्ति अपि तु तेषां निर्माणार्थं विशिष्टप्रकारस्य प्रशिक्षणस्य आवश्यकताऽस्ति। तेषाम् आर्थिकप्रशिक्षणे निम्नलिखितवार्तासु ध्यानं दातव्यम्—

(अ) व्यावसायिकप्रशिक्षणम् (व्यावसायिकशिक्षा दातव्या)

(ब) स्वव्यवसायेन कार्येण वा स्वकीयस्य परिवारस्य समाजस्य च निश्चितरूपेण उन्नयनाय तत्परता।

(स) अर्जितस्य धनस्य उचितोपयोगार्थम् आर्थिकनियोजनस्य योग्यतायाः विकासः।

(द) यथा समयं ऋणानां कराणां च प्रत्यर्पणे तत्परता।

(य) अन्यनागरिकाणां कार्यकरणस्य अधिकारस्य सम्मानम्।

2. सामाजिकप्रशिक्षणम्— सामाजिकदृष्ट्या उत्तमनागरिकः स अस्ति यः सामाजिकसमूहेषु भागग्रहणस्य कार्यकरणस्य च क्षमतां धारयति। साकमेव मौलिकसामाजिकसंस्थानां संरक्षणे विकासे च सहयोगं ददाति। एतस्य प्रकारस्य

नागरिकाणां निर्माणाय बालकेभ्यः सामाजिकप्रशिक्षणमावश्यकम्। एतादृशप्रशिक्षणेन तेषु सामाजिकगुणाः सहयोग–सहिष्णुता–सामाजिकसक्रियता–समाजसेवाभावना–सहानुभूति–सामाजिकसंवेदनशीलतादीनां गुणानां विकासः भवेत्। एतस्मै विकासाय केवलं विद्यालयमेव उत्तरदायिनं न कुर्यात्, अपि तु शिक्षायाः अन्यानौपचारिकसाधनेषु अपि दायित्वं निक्षिपेत्। विद्यालयः तु स्वशैक्षिककार्यक्रमस्य माध्यमेन तेषु एतेषां गुणानां विकासाय कार्यं करिष्यति। साकमेव परिवारः यत्र नागरिकतायाः जन्म भवति, समुदायः यः तस्य विकासं करोति, देवालयः तस्य मूलं दृढीकरोति, सामाजिकसमूहः मुद्रणयन्त्रं (प्रेस) आकाशवाणी च येन तस्य विस्तारः जायते एवमादीनि साधनानि सामाजिकप्रशिक्षणप्रदानार्थं प्रेरितानि क्रियेरन्। अस्मिन् सन्दर्भे **बाइनिंग–बाइनिंगमहोदयौ** लिखतः—"परिवार–चर्च–सामाजिकसमूहः, विभिन्न–देशभक्तिपूर्णसङ्घटनं सामाजिकजीवनस्य विचारान् कार्याणि च नवीनरूपप्रदायिसजीवसाधनानि सन्ति।"[1]

3. राजनैतिकप्रशिक्षणम्— लोकतन्त्रीयसमाजस्य सर्वकारनिर्माणं नागरिकाणां राजनैतिकक्रियाभिः भवति। केवलं लोकतन्त्र एव नागरिकजीवनस्य राजनीतेश्च महत्त्वपूर्णं स्थानमस्ति। सर्वकारः स्वनागरिकाणां सेवायै यथा योग्यः स्यात् तथा तस्य निर्माणं समेषां जनानां कर्तव्यं भवति। एतादृशं तदैव कर्तुं शक्नोति यदा तस्य सर्वे नागरिकाः राजनैतिकरूपेण जागरूकाः भवेयुः। तेषां जागरूकतायै तेभ्यः राजनैतिकप्रशिक्षणं आवश्यकमस्ति। एतस्य प्रकारस्य प्रशिक्षणे निम्नलिखितवार्तासु बलं दद्यात्—

(अ) छात्राणां राजनैतिकजीवने सक्रियभागग्रहणाय प्रोत्साहनम्। तेषां समक्षं समाजस्य प्रशासकीयसमस्याः प्रस्तूयेरन्।

(ब) समाचारपत्रपठनार्थं, आकाशवाण्यां दूरदर्शने च प्रसारितसूचनानां श्रवणार्थं छात्राः प्रोत्साहिताः स्युः।

(स) तत्कालिकसमस्याः प्रस्तुत्य तासां विषये निर्णयः नेतुं प्रोत्साहनम्।

---

1. "The family, the church, the social group and the various social and patriotic organizations are vital instruments in shaping the ideas and actions of social living." **–Bining and Bining.**

(द) स्थानीयस्तरस्य राजनीतौ सक्रियरूपेण भागग्रहणाय छात्राः प्रोत्साहिताः भवेयुः।

(य) मतदानस्य (Vote) महत्त्वे तस्य सदुपयोगे च बलं दद्यात्।

4. सांस्कृतिकप्रशिक्षणम्— सांस्कृतिकरूपेण स एव उत्तमः नागरिकः वर्तते यः अन्यान् प्रति तेषाम् आवश्यकताः, इच्छाः, भावनाः, अधिकारान् च प्रति सहानुभूतिम् उदारदृष्टिकोणं च स्थापयति। साकमेव विभिन्नताः अन्येषां विश्वासान् च आदरदृष्ट्या पश्यति। संक्षेपेण उत्तमनागरिकः समस्तप्रजातीनां, धर्माणां, राष्ट्रियतानां संस्कृतीनां च जनानाम् आदरप्रदानार्थं तत्परः अस्ति। एतस्य प्रकारस्य नागरिकाणां निर्माणार्थं बालकेभ्यः सांस्कृतिकज्ञानप्रदानमावश्यकम्। सांस्कृतिकज्ञानप्रदानार्थं विद्यालयस्य शैक्षिककार्यक्रमस्यातिरिक्तं राज्यस्य समाजस्य च सांस्कृतिक-उपादानानां कार्यक्रमाणां च उपयोगः करणीयः, सामुदायिकसंस्कृतेः विषये प्रत्यक्षज्ञानप्रदानार्थं समुदायस्य सांस्कृतिक-सामाजिकसाधनानाम् उपयोगः भवेत्। एतादृशप्रशिक्षणेन छात्रान् संवेगात्मकरूपेण सन्तुलितान् निर्मातुं साहाय्यं मेलिष्यति।

नागरिकतायै विद्यालयस्य शैक्षिककार्यक्रमः

नागरिकतायाः विकासाय विस्ताराय च विद्यालयानां शैक्षिककार्यक्रमे निम्नलिखितवार्तासु बलं दद्यात्—

1. उपयुक्तविद्यालयवातावरणम्— नागरिकतायाः विकासार्थं विद्यालय-वातावरणस्य तदनुकूलं निर्माणं परमावश्यकमस्ति। एतदर्थं विद्यालये सामाजिक-नागरिकक्रियाणां प्रमुखं स्थानम् आवश्यकमस्ति। साकमेव विद्यालयस्य अधिकारिणः-प्रधानाचार्यः, शिक्षकवर्गः, कर्मचारिवर्गः इत्यादिषु पारस्परिकसम्बन्धानां स्थापना परमावश्यकी वर्तते। यदि साधुपरिवारेभ्यः बालाः विद्यालयमायान्ति तर्हि विद्यालयवातावरणं तादृशं निर्मितं स्यात् येन अभिभावकानां प्रयासाः द्रढीयांसः समृद्धतराश्च भवेयुः। एतेन बालकेषु प्रभावशालिरीत्या नागरिक-वैयक्तिक-सद्गुणानां विकासः कर्तुं शक्येत। यदि बालकाः तिरस्कृतगृहेभ्यः आयान्ति तर्हि विद्यालयस्य वातावरणेन तेषां न्यूनतापूर्तिः तेषां च उचितनागरिकाचरणस्य विकासार्थमवसरः च स्यात्।

2. सम्पूर्णशिक्षकवर्गम् उत्तरदायिनं स्थापयेत्— नागरिकतायाः विकासस्य

कृते केवलं सामाजिकाध्ययनस्य नागरिकशास्त्रस्य च शिक्षकाः एव उत्तरदायिनः न सन्ति अपि तु अस्याः विकासाय सर्वेषु अध्यापकेषु दायित्त्वं निक्षिप्तं स्यात्। अस्मिन् सन्दर्भे **आई.जे. क्विलन महोदयः** लिखति— ''उत्तमनागरिकतायाः विकासः सर्वेषां शिक्षकाणां सम्पूर्णविद्यालयस्य च दायित्त्वं वर्तते-प्रत्येकं शिक्षकः छात्रसमूहस्य अनुभवान् निर्देशयति। अतः प्रत्येकं शिक्षकः उत्तमाचरणस्य, आत्मानुशासनस्य, आत्मनिर्भरतायाः, आत्मनिर्देशनस्य च विकासेन सम्बद्धः वर्तते।''[1]

3. पाठ्यक्रमः— नागरिकतायाः विकासाय पाठ्यक्रमे निम्नलिखितविषयाणां तथ्यानां च समावेशः भवेत्—

(अ) सामाजिकाध्ययनम्— नागरिकतायाः विकासे सामाजिकाध्ययनस्य विषयवस्तुनः महत्त्वपूर्णं स्थानमस्ति। अनेन आर्थिक-राजनैतिक-सामाजिकविश्वं ज्ञातुं पर्याप्तमात्रायाम् अनुभवाः प्रदास्यन्ते। साकमेव छात्रेभ्यः मानवीयसम्बन्धान् अवगन्तुं उत्तमनागरिकतायाः च व्यावहारिकानुभवः प्रदास्यते।

(ब) नागरिकशास्त्रम्— नागरिकशास्त्रस्य अध्ययनं बुद्धिपूर्णनागरिकतायै छात्रेषु बोधावबोधनं विकासयति। एतेन शिक्षणेन छात्रेषु स्पष्टचिन्तनस्य, वैज्ञानिकदृष्टिकोणस्य स्वतन्त्रनिर्णयस्य च कौशलानां विकासः जायते। एतानि कौशलानि उत्तमनागरिकतायाः आधाराः सन्ति।

(स) समस्यात्मकपाठ्यक्रमः— समस्यात्मकपाठ्यक्रमः छात्रेभ्यः समाजस्य प्रमुखसमस्यानाम् अध्ययनार्थमवसरं प्रददाति। ताः समस्याः वस्तुतः जीवन-स्थानीय-प्रदेशीय-राष्ट्रिय-सर्वकारैः सम्बद्धाः भवेयुः। उदारहणार्थं - वयं स्वग्रामस्य उत्तमनागरिकाः केन प्रकारेण भवितुं शक्नुमः ? वयं स्वराष्ट्रस्य उन्नतये किं कर्तुं शक्नुमः ? जनमतं सर्वकारं केन प्रकारेण प्रभावयति ? इत्यादि।

(द) अन्यतथ्यानि— अन्यविषयाणां पाठ्यवस्तु अपि बालकेषु उत्तम-नागरिकतायाः विकासाय उपयोगि वर्तते। अस्मिन् सन्दर्भे **क्विलिन् महोदयः**

---

1. " Developing good citizenship is the responsibility of all teachers and of the school as a whole. Every class room teacher directs the experiences of a group of puplis, hence every teacher is concerned with good conduct, with the development of self-discipline, self-dependence, and self-direction" **- I. J. Quillen,21**.

लिखति— ''साहित्य-कला-संगीत-विज्ञानादिक्षेत्राणां पाठ्यवस्तु, बुद्धिमत्तायाः, आदर्शानां, कौशलनाञ्च विकासे सहयोगि भवितुं शक्नोति, उत्तमनागरिकतायाः मूलाधारश्च भवति।''[1]

4. अनुभवसेवा (Experience Service)**—** अनुभवः सर्वोत्तमः शिक्षकः वर्तते। अतः नागरिकतायाः प्रशिक्षणप्रदानार्थं छात्रेभ्यः विभिन्नानुभवानां विभिन्नपरिस्थितीनाञ्च प्रदानं कुर्यात्। उदाहरणार्थम्—

1. विद्यालयप्रशासने भागग्रहणाय अवसराः भवेयुः येन ते कार्याय अनुशासनाय च नियमान् निर्मातुं शक्नुवन्ति।
2. स्थानीयक्षेत्रस्य विभिन्नावश्यकताः ज्ञातुं सर्वेक्षणानि कारयेयुः।
3. स्थानीय-विद्यालयीयक्षेत्रेषु छात्रैः विभिन्नसमाजसेवाकार्याणि कारयेयुः।
4. स्थानीयपरिस्थितीः ज्ञातुं पर्यटनानाम् आयोजनं कुर्यात्।
5. संसद-विधानसभा-नगरनिगम-नगरपालिका-पञ्चायत-प्रभृतीनाम् अवलोकनं कुर्यात्।
6. विद्यालये छात्रावासजीवनस्य व्यवस्था सम्भवति चेत् तस्मिन् निवासाय छात्रेभ्यः अवसरकल्पनम्।
7. विद्यालयसभायाः व्यवस्थां कारयेत् तां छात्रैः संचालयेत्।
8. वादविवादप्रतियोगिताभ्यः विचारविमर्शाय च अवसरान् प्रदद्युः।
9. क्रीडाकूर्दनम्, संगीतसम्बन्धिमेलकः, (Club), सामाजिकमेलकश्च इत्येतेषां व्यवस्था भवेत्। एतेषां माध्यमेन विभिन्नक्रियाकलापान् संचालयेत्।
10. विद्यालये छात्रदिवसः, राष्ट्रियपर्व, अन्तार्राष्ट्रियपर्वाणि च अनुपालयेरन्। अस्य सङ्घटनस्य सञ्चालनस्य च दायित्वं छात्रेभ्यः प्रदातव्यम्।

---

1. "Content from literature, art, music, science and many other areas can contribute to the understanding, ideals and skills which are basic to good citizenship." **-I.J.Quillen.**

5. अन्यकार्यक्रमाः—

1. आकाशवाणी, समाचारपत्रं, चलचित्रं, दूरदर्शनं, भाषणञ्चेत्यादीनाम् अनौपचारिकसाधनानां प्रयोगः कर्तव्यः।
2. विद्यालये छात्रावासे च संसृष्टजीवनस्य व्यवस्थां कुर्यात्।
3. नागरिकतायाः कार्यान्वयनेन सम्बद्धानि सामुदायिकसर्वेक्षणानि कारयेयुः।
4. स्थानीयस्वशासनस्य संस्थानां कार्यप्रणाल्याः निरीक्षणं कुर्यात्।
5. समाजसेवा-कार्येषु भागग्रहणमनिवार्यं कुर्यात्।
6. विद्यालयस्य स्वच्छतायाः कक्षकक्षाणां सज्जायाः दायित्त्वं छात्रेषु निक्षिपेत्।
7. राष्ट्रियपर्वाणि दिवसान् च नियमानुसारं पालयेत्।

भारतस्य आर्थिकप्रगतये, सामाजिक-राजनैतिक-सुदृढतायै उत्तमनागरिकाणां भवनम् आवश्यकं वर्तते। साकमेव आधुनिकयुगे इदमपि अनुभूयते यत् विश्वे स्थायिशान्तिस्थापनार्थमपि उत्तमनागरिकाः अवश्यमेव भवेयुः। अतः उत्तमनागरिकाणां निर्माणार्थं नागरिकताशिक्षायाः व्यवस्था प्रत्येकं राज्यस्य परमकर्तव्यमस्ति। राज्यम् एतत् कर्तव्यं विद्यालयमाध्यमेन पूरणे समर्थं भवितुमर्हति। अतः प्रति-राज्यं सुसंचालितं सुव्यवस्थितं च भवितुं विद्यालयैः अस्याः शिक्षायाः व्यवस्था कार्या। राज्यस्य कृते नागरिकतायाः शिक्षायाः एकाम् अन्याम् उपयोगितां ज्ञापयन् **प्लेटो महोदयः** लिखति ''राज्यस्य स्थायिस्थिरतायाः वस्तुतः केवलं एकः एव उपायः-नागरितायाः शिक्षा वर्तते। अमुमुपायमन्तरा संसदधिनियमैः समुदायार्हाणां नागरिकाणां संरूपणाशयः सदा वृथैव स्यात्।''[1]

---

1. "Education for citizenship is the only true way to the permanent stability of the state. The hope of moulding the citizens to the community by legislation must always be futile."- Plato :Nettleship, lectures on the Republic of- **Plato** p-76.

पुनरावृत्ति-प्रश्नाः

1. भारते नागरिकतायाः शिक्षा किमर्थम् आवश्यकी वर्तते ?
2. शिक्षा-आयोगेन नागरिकताशिक्षायाः आवश्यकता कैः कारणैः ज्ञापिता ?
3. नागरिकतया भवता किम् अवगम्यते ?
4. उत्तमनागरिके के के गुणाः भवेयुः ?
5. नागरिकतायाः शिक्षायाः कानि-कानि अङ्गानि सन्ति ?
6. नागरिकतायाः विकासस्य कृते विद्यालयः स्वकार्यक्रमेषु केषां विषयाणां, कासां क्रियाणां च स्थानं प्रदद्यात् ?

लेखार्थः प्रश्नः

लोकतन्त्रे नागरिकतायाः महत्त्वं स्पष्टयन् कथयतु यत् छात्रक्रियाः नागरिकतायाः विकासे केन प्रकारेण सहयोगं दातुं शक्नुवन्ति ?

❑❑❑

30

जनसंख्या-शिक्षा

(Population Education)

"The purpose of population education is to develop awareness and understanding of the relations between population growth and national development both in short and long run and to develop an understanding of the consequences of individual decisions in the important area of reproductive behaviour."

-Viderman.

भारतस्य 1961 वर्षीयजनगणनानुसारं जनसंख्या 42.2 कोटिः आसीत्। सा जनसंख्या 1971 तमे वर्षे वर्धयित्वा 54.7 कोटिः, 1981 तमें वर्षे 63.38 कोटिः, 1991 तमे वर्षे 84 कोटितः अधिका, 1995 तमे वर्षे च 93 कोटितः अधिका अभवन्। अनया गत्या वर्धते चेत् 2000 वर्षे भारतस्य जनसंख्या 100 कोटितः अपि अधिका भविष्यति। इयं समस्या भरतखण्डस्यैव नास्ति अपि तु विश्वस्याऽपि वर्तते। अस्याः वृद्धेः अनुमानं डॉ. **विद्यावती – मलैया – महोदयस्य** अनेन शब्देन सहजतया कर्तुं शक्यते— ''20तम–शताब्देः प्रारम्भे विश्वस्य जनसंख्या प्रायः सार्द्धैकार्बुदमासीत् सम्प्रति प्रायः चतुरर्बुदजनाः सन्ति। अस्याः शताब्देः अन्तं यावत् इयं सम्भावना क्रियते यत्, विश्वस्य जनसंख्या सप्तार्बुदं सम्भविष्यति। विगतेषु वर्षेषु एव विश्वस्य जनसंख्या प्रायः एक–अर्बुदमवर्धत।'' जनसंख्यायाः इयमसाधारणवृद्धिः संसारस्य पुरतः गभीरसमस्यां प्रस्तौति, यतः इयं वैयक्तिक–राष्ट्रिय–अन्ताराष्ट्रियजीवनस्य च प्रत्येकस्मिन् पक्षे कलुषितं प्रभावं पातयति। अस्य प्रभावः व्यक्तेः सुखे स्वास्थ्ये सम्पत्तौ राष्ट्रस्य प्रगति–समृद्धि–अन्ताराष्ट्रियसुरक्षायाञ्च पतति। अस्याः समस्यायाः दुष्प्रभावं दृष्ट्वा धीमन्तः जनाः मतं प्रकटितवन्तः यत् जनसंख्याविस्फोटः अस्मान् जगतः विकटसमस्यायां निमज्जयति।

भारते जनसंख्यायाः विस्फोटः

भारते जनसंख्यायाः, विस्फोटः विक्षिप्तरूपं प्राप्नोत्। इदं रूपं किञ्चित् विकटमस्ति, अस्य अनुमानमधोल्लिखितप्रमाणैः सहजतया कर्तुं शक्यते—

1. भारते प्रति सार्द्धैकक्षणानन्तरं (सेकण्ड के बाद) एकस्य बालकस्य जन्म भवति।
2. भारते प्रतिवर्षं 31 कोटिः बालकाः उत्पन्नाः भवन्ति। तेषु 13 कोटिः बालाः स्थास्यन्ति। एवं जननमानस्य गतिः अधिका वर्तते।
3. भारतस्य जनसंख्यायाः प्रायः 42 प्रतिशतभागः 14 वर्षाणाम् आयोः अपेक्षया न्यूनाः एव।
4. भारतस्य जनसंख्यायाः वृद्धिः प्रतिवर्षं 2.4 प्रतिशतमस्ति। यत् विश्वे उच्चतमा वर्तते।
5. विश्वस्य षष्ठः पुरुषः भारतीयोऽस्ति।
6. जगतः 2.4 प्रतिशतं भूमिः, भारते वर्तते, परन्तु अस्यां भूमौ जगतः जनसंख्यासु प्रायः 16 प्रतिशततः अधिकाः जनाः निवसन्ति।
7. भारते 51.21 प्रतिशतं जनाः एव साक्षराः सन्ति, परन्तु स्त्री-साक्षरतागतिः अतीव न्यूना।
8. भारतस्य जनानाम् आचार-व्यवहारस्य च स्तरः अन्येषाम् अभिवृद्धराष्ट्राणाम् अपेक्षया अतीव न्यूना एव।

जनसंख्या-विस्फोटस्य नियन्त्रणार्थम् उपायाः

भारते जनसंख्या-विस्फोटं नियन्त्रयितुम् उपायद्वयस्य प्रयोगः क्रियते—

1. परिवारनियोजनम् (Family Planning)

2. जनसंख्या-शिक्षा च (Population Education)

पूर्वोक्त-उपाययोः सम्बन्धे 1976 वर्षे 'भारते' अधोलिखितानुभवः प्रकट्यते। ''भारतसर्वकारः एवमन्वभवत् यत् जनसंख्यायाः शीघ्रतया वृद्धिः जनेषु आचार-व्यवहारस्य च स्तरोत्थापनापेक्षया स्तरावरोधमेव जनयति। अस्य अनुभवस्याधारेण सर्वकारः 1953 वर्षे 'परिवार-नियोजनम्' इत्याख्यकार्यक्रमस्य क्रियान्वयनमकरोत्। अस्मिन् कार्यक्रमे चिकित्सासम्बन्धिसेवायाः प्राथमिकता आसीत्। 1961 तम-

वर्षस्य जनगणनायाः परिणामप्रकाशनात्परं सर्वकारेण अवगतं यत् जनसंख्यावृद्धेः वस्तुतः मानं सम्भावितमानापेक्षया अधिकम् आसीत्। अतः सर्वकारेण चिकित्सा–सम्बन्धिसेवाभिः सह प्रचारकार्याण्यपि प्रारब्धानि। अस्मिन् कार्यक्रमे साफल्यप्राप्त्यर्थं अनेकयोजनाः क्रियान्विताः बभूवुः, यथा चलचित्राणां प्रदर्शनेन, पुस्तकानां प्रकाशनेन, पञ्चायतप्रभृति–स्थानीयसंस्थानां माध्यमेन च परिवारनियोजनसम्बन्धिसूचनानां प्रसारश्च कृतः। परन्तु भारते परिवारनियोजनस्य कार्यं सम्पूर्णतया ऐच्छिकमस्ति। तदर्थं सर्वकारः पूर्वोक्त–उपायानन्तरमपि जनसंख्या–वृद्धेः गतिमवरोद्धुं सफलो नाऽभूत।''

भारतसर्वकारः कोलम्बिया–विश्वविद्यालयस्य **प्रोफेसर वेलैंड** (Wayland) महोदयस्य कार्यस्य प्रभावतः जनसंख्याशिक्षायाः योजनाम् अकरोत्। भारतसर्वकारस्य आदेशानुसारं परिवारनियोजनसंघः मार्चमासस्य सप्तम—अष्टमदिनाङ्कयोः 1969 तमे वर्षे मुम्बईनगरे एका विचारसङ्गोष्ठ्याः आयोजनं कृतम्। तत्र तस्यां संङ्गोष्ठ्यां जनसंख्याशिक्षायाः प्रसारस्य विषये प्रस्तुतिः कृता। अस्याः प्रस्तुतेः कृते शिक्षाविदुषां सर्वकारस्य च समर्थनं प्राप्तम्। ततः आरभ्य च जनसंख्याशिक्षायाः प्रसारस्य व्यावहारिकं रूपं प्रदातुं सर्वदा प्रयासः प्रचलन् अस्ति।

जनसंख्या–शिक्षायाः अर्थः

जनसंख्या–शिक्षायाः स्वरूपम् अद्यावधि विकसितावस्थायां नास्ति। किञ्चिद् वर्षात्पूर्वमस्याः स्वरूपं स्फुटतया अभिव्यञ्जयितुं 'यौन–शिक्षा', (Sex Education) पारिवारिकजीवनशिक्षा (Family Life Education) इति शब्दानां प्रयोगः क्रियते। परन्तु जनसंख्याशिक्षा तावत् यौनशिक्षा नास्ति। अनयोर्मध्ये भेदः वर्तते। यदा वयं यौनशिक्षायाः विषये चर्चयामः तदा वयं यौनसुखं, यौनसम्बन्धिरोगाणाम् अवरोधः परिवारनियोजनस्य विषये च आकृष्टो भवामः। परन्तु जनसंख्या–शिक्षायाः प्रमुखम् उद्देश्यन्तु परिवारनियोजनं जनसंख्यायाः नियन्त्रणं चेति विषये जनजागरणमेव। पुनश्च तस्य राष्ट्रस्य अभिवृद्ध्या सम्बन्धं स्थापयित्वा राष्ट्रस्य उन्तये महता प्रयत्नेन जनान् प्रचोदयेत्। जनसंख्याशिक्षा जनसंख्यापरिवार यौनानां सम्बन्धे अवबोधयेत्। पुनश्च तेन उपयुक्तदृष्टिकोणस्यापि विकासः अस्ति एव। प्रकारान्तरेण वयं वक्तुं शक्नुमः यत् जनसंख्याशिक्षा, यौनशिक्षा, पारिवारिकजीवनस्य शिक्षा एव न भूत्वा जनसंख्या–जागृतिः (Population Awareness) एवं वर्तते।

प्राय: विकासशीलदेशेषु सम्भवत: 40 त: 45 प्रतिशतपर्यन्तं जना: 15 वर्षत: न्यूनायुवर्गीया: सन्ति। अयम् आयुवर्ग: तरुणावस्थाया: प्रवेशकाल: एव। अस्य वर्गस्य जना: वयस्का: यदा भवन्ति, तत: वैवाहिक-जीवनं यापयन्ति, मातापितरौ स्याताम्। एतैरेव परिवारस्य आकृते: विषये निर्णय: क्रियते। जनसंख्याया: वृद्ध्या सह तेषां प्रत्यक्षसम्बन्धोऽस्ति। अत: अस्य वर्गस्य जनानां कृते वर्धिष्यमाण-जनसंख्याप्रभावस्य विषये अवबोध: अत्यावश्यकमस्ति। येन ते स्वभाविपरिवारस्य आकृते: सम्बन्धे समुचितं निर्णयं नेतुं समर्था: स्यु: तथा युवसंततौ लघुपरिवारस्य विचारे आसक्तिं जनयेयु:। येन ते प्रौढावस्थायां स्वपरिवारं सीमितं कर्तुं प्रभवन्ति। अत: जनसंख्या-शिक्षाया: कार्यक्रमेषु विद्यालये युवावस्थायां स्थितेभ्य: लघुपरिवारेण स्थातुं प्रेरणा दीयते, बालकानां कृते विश्वास: कार्यते यत् शिशव: केवलं संयोगमात्रेण उत्पन्ना न स्यु:, अपि तु तेषामुत्पत्तिरपि नियन्त्रयितुं शक्यते। एवं रीत्या जनसंख्याशिक्षायां केचन एतादृशा: विषया: प्रस्तूयन्ते, येन युवावस्थायां स्थिता: जना: जनसंख्याया: गते: किञ्च तस्य दिशाया: स्थिते: देशस्य सामाजिकार्थिकजीवने तस्य प्रभावस्य च ज्ञानं प्राप्तुं साहाय्यं मिलति।

जनसंख्याशिक्षाया: अर्थं सुस्पष्टयितुं काश्चन परिभाषा: प्रदत्ता: सन्ति—

''जनसंख्या-शिक्षा तावत् एक: शैक्षणिककार्यक्रम: अस्ति येन परिवारस्य, समाजस्य, राष्ट्रस्य, विश्वस्य च जनसंख्याया: स्थिते: अध्ययनं कर्तुं शक्यते। अस्या: अध्ययनस्य उद्देश्यम्-छात्रेषु अस्या: स्थिते: विवेकयुतस्य उत्तरदायित्वपूर्णदृष्टिकोणस्य किञ्च व्यवहारस्य विकसनम्।''[1]

जनसङ्ख्याशिक्षा जनसङ्ख्यां नियन्त्रणसमस्यात्वेन न, अपि तु सामाजिक-जीवशास्त्रीयतथ्यरूपेण विचारयति।''[2]

---

1. "Population education is an educational programme which provides for a study of the population situation of the family, community, nation and world, with the purpose of developing in the students national and responsible attitudes and behaviour toward that situation." **The Asian Regional Workshop on Population and Family Life Education.**
2. "Population education views population not as a problem to be controlled, but rather as a phenomenon- both social and biological - to be handled." –Pamphlet issued by the **Population Education Unit of Central Pedagogical Institute, Allahabad, Sept., 1973.**

चाल्समहोदयानुसारम्— "जनसंख्याशिक्षायां छात्राणां संस्कृतिः, तेषां समाजस्य जनसंख्यायाः स्थितिः, प्रचलितस्थितेः विषये तेषां स्वीयविचारः जनसंख्यायाः विषये तस्याः प्रभावस्य विषये च तेषां तर्कः, विवेकपूर्णः सङ्घटितो विचारश्च स्युः।"[1]

उपर्युक्तविवेचनेन अधोल्लिखिताः विषयाः सुस्पष्टाः स्युः—

1. जनसंख्याशिक्षा—शैक्षणिककार्यक्रमः वर्तते।
2. जनसंख्याशिक्षा—जनसंख्यावृद्धेः कारणभूतस्य जनस्य परिवारस्य समुदायस्य, राष्ट्रस्य, विश्वस्य च उपरि सम्भाव्यमानो प्रभावस्य अध्ययनं कर्तुमवसरं दापयति।
3. जनसंख्याशिक्षा—छात्रेषु जनसंख्यायाः जागृतिं तस्याः विषये समुचितं दृष्टिकोणञ्च वर्धयति।
4. जनसंख्याशिक्षा—व्यापकशब्दोऽस्ति यत्र यौनशिक्षा पारिवारिकजीवनस्य शिक्षा, परिवारनियोजनशिक्षा इत्यादयः सम्मिलिताः सन्ति।

जनसंख्याशिक्षायाः उद्देश्यानि

राष्ट्रिय-शैक्षिकानुसंधान-प्रशिक्षण-परिषदा (NCERT) 1970 तमे वर्षे जुलाई मासे देहलीनगरे जनसंख्याशिक्षायाः विषये एका कार्यशाला आयोजिता। तत्र अयं निर्णयः स्वीकृतः यत् जनसंख्याशिक्षा सामान्यशिक्षायाः अभिन्नाङ्गमिति स्यात्, अस्याः च निम्नलिखितानि उद्देश्यानि भवेयुः—

1. छात्रान् आधुनिकजगतः सर्वप्रमुखघटनात्वेन जनसङ्ख्यायाः वृद्धेः गतेः च हेतवः ये सन्ति तेषां विषये पाठयेत्।
2. छात्रान् व्यक्तेः, परिवारस्य, समुदायस्य, देशस्य, विश्वस्य च आर्थिक-सामाजिक-सांस्कृतिक-राजनैतिकजीवने जनसंख्यावृद्धितः सम्भाव्यमानदुष्प्रभावाणां विषये अवबोधयेत्।
3. कुटुम्बस्य आकृतिं, आहार-व्यवहारस्य च स्थितिं अल्प-आयेन स्थितस्य बृहद्परिवारस्य समस्यां संवर्ण्य तेषु लघुपरिवारस्य आवश्यकतायाः विचारं स्पष्टयेत्।

---

1. "Population education should comprehend the culture of students, the population situation of their society, the overviews about existing situation, their logical, reasoned an organized ideas on the situation of the population and its effects," **-Chauis Donald S.**

4. छात्रान् जनसंख्यायाः वृद्ध्या सम्भाव्यमानविभिन्नसमस्याः अवबोधयेत् येन तेषु जनसंख्यायाः नियन्त्रणस्य विषये जागृतिः समुत्पद्येत्।

ए.बी. वाडिया महोदयानुसारं जनसंख्याशिक्षायाः अधोलिखितानि उद्देश्यानि सन्ति—

1. युवकेषु इदं ज्ञानमुत्पादयेत् यत् आधुनिकजगतः प्रमुखसमस्याऽस्ति जनसङ्ख्यायां जायमाना तीव्रवृद्धिः। अस्याः कारणानां, प्रवृत्तीनां, प्रभावयतां कारकाणां चावबोधं प्राप्नुयुः छात्राः।
2. छात्रान् जनसङ्ख्यावृद्ध्या जीवनस्य विविधपक्षेषु जायमानैः प्रभावैः अवगमयेत्।
3. बालानाम् अनियोजितोत्पत्तेः नियन्त्रणं कार्यम्।
4. वैयक्तिपारिवारिकजीवने जनसंख्यावृद्धेः महत्त्वमधिगन्तव्यम्।
5. मातुः आरोग्यस्य कृते शिशूणां कल्याणार्थं आर्थिकस्थिरतायाः प्राप्तये च लघुकुटुम्बस्य महत्यावश्यकता अस्तीति छात्रान् सम्यक् बोधयेत्।

1969 तमे वर्षे जनसंख्याशिक्षाया उपरि काचित् राष्ट्रियसंगोष्ठी–आयोजिता मुम्बई–नगरे। अत्र जनसंख्याशिक्षायाः अधोलिखितानि उद्देश्यानि निर्धारितानि—

1. जनसंख्याशिक्षायाः उद्देश्यम्— छात्राः जानीयुः यत् परिवाराकारः नियन्त्रयितुं शक्यते। जनसंख्यायाः सीमानिर्धारणेन राष्ट्रे उच्चजीवनस्य सकलसौविध्यं निर्मातुं शक्यते। पुनश्च प्रत्येकं परिवारस्य लघ्वाकारः स्यात् तदैव परिवारसदस्यानां जीवनस्तरस्य उन्नतौ अतिसाहाय्यं भवति।
2. शिक्षायाः सर्वेषु स्तरेषु छात्रान् राष्ट्रियजनसंख्यायाः परिवाराकारस्य च विषये यथासम्भवम् अवबोधयेत्।

जनसंख्याशिक्षायाः विषयसामग्र्यः

(Contents of Population Education)

राष्ट्रिय–शैक्षिकानुसन्धान–प्रशिक्षण–परिषदा 1970 तमे वर्षे जनसंख्याशिक्षाम् आधारीकृत्य एका कार्यशाला दिल्लीनगरे आयोजिता। यत्र जनसंख्याशिक्षायाः पाठ्यक्रमस्य कृते अधोलिखितानां चतुर्णां क्षेत्राणां विषयसामग्र्यश्च निर्धारिताः

1. जनसंख्यावृद्धिः

2. आर्थिक-अभिवृद्धिः जनसंख्या च

3. सामाजिकविकासः जनसंख्या च

4. स्वास्थ्यं, पोषणं, जनसंख्या च

सी.टी. फैनिफ (C.T. Faneniff) महोदयः जनसंख्याशिक्षा-पाठ्यक्रमस्य कृते अधोलिखितानि तत्त्वानि सुनिश्चिनोति—

1. जन्मगतिः, मृत्युगतिः, जनसंख्या च।

2. स्वास्थ्यं, जनसंख्या च

3. आहारपदार्थानाम् उत्पादनं, जनसंख्या च,

4. परिवारस्य आकृतिः, जनसंख्या च

5. आचार-व्यवहारस्य स्तरः, जनसंख्या च

डी. गोपालराव (D. Gopal Rao) महोदयः जनसंख्याशिक्षायाः पाठ्यक्रमे निम्नलिखितप्रकरणानि प्रस्तौति—

1. जनसंख्यावृद्धेः इतिहासः— कारणानि प्रवृत्तिप्रभृतयः। अस्याध्ययनं विशेषतया भारतस्य सन्दर्भे कुर्यात्।

2. भारतस्य सन्दर्भे जनाङ्किक्या (Demography) अध्ययनम्।

3. जनसंख्यायाः शीघ्रतया वृद्धेः कारणेन राष्ट्राभिवृद्धौ आर्थिक-सामाजिक-सांस्कृतिक-राजनैतिकक्षेत्रे च प्रभावः।

4. व्यक्तेः पारिवारिकजीवने आचारव्यवहारे च जनसंख्यावृद्धेः प्रभावः।

5. भौतिकवातावरणे प्राकृतिकसाधनेषु भोजन-जीवनयोः तुलनात्मक-क्षेत्रे जनसंख्यावृद्धेः प्रभावः।

6. जगतः जनसंख्यानीतेः तत्कार्यक्रमस्य च सामान्यज्ञानम्।

7. जन्मसम्बन्धिसामान्यज्ञानम्।

अन्ते वयं वक्तुं शक्नुमः यत् जनसंख्याविस्फोटः अस्माकं देशस्य कृते शाप इव जातः, यतः गुणात्मकोन्नतेः सर्वाः योजनाः विफलाः सञ्जाताः। अतः वयं निःसन्देहेण वक्तुं शक्नुमः यत् जनसंख्याशिक्षां सामान्यशिक्षायाः अभिन्नाङ्गं विधाय छात्रान् एतानि तत्त्वानि बोधयेत्। सर्वकारः शिक्षाविदश्च अस्याः शिक्षायाः विषये कदाऽपि उपेक्षां न कुर्युः।

पुनरावृत्ति-प्रश्नाः

1. 'जनसंख्याविस्फोटः' इत्याख्यशब्देन भवता किम् अवगम्यते ? स्पष्टयत।
2. भारते जनसंख्याविस्फोटं नियन्त्रयितुं के उपायाः अनुष्ठाने आनीताः ?
3. जनसंख्याशिक्षया भवता किम् अवगम्यते ? सोदाहरणं स्पष्टयत।
4. जनसंख्याशिक्षायाः प्रमुखोद्देश्यानि कानि ?
5. जनसंख्याशिक्षायाः पाठ्यक्रमे केषां प्रकरणानां कृते स्थानानि प्रदेयानि किमर्थम् ?

लेखार्थः प्रश्नः

'जनसंख्याशिक्षा' इत्यस्य तात्पर्यं किम् ? भारते अस्याः आवश्यकता का अस्ति ? सोदाहरणं स्पष्टयत।

31

पर्यावरणशिक्षा

(Environmental Education)

"Environmental education is education through, about and for environment. Its scope is, therefore, very wide. It begins from using environment as a medium of learning and includes all that Kalidasa, Wordsworth and others have said in appreciation of nature and also all scientists and scholars have disclosed about our physical and social environment and finally includes all that we say and do for conserving our resources and for beautifying our surroundings including urban and country planning".

-R.C.Sharma, 'Environmental Education' p-VIII.

विषय प्रवेशः

भारतीयसंस्कृतौ प्राकृतिकसुषमां प्रति यावत् आदरः आकर्षणञ्चास्ति तत् केनाऽपि न तिरोभूतमस्ति। मानवः प्रकृतेः पुत्रः मन्यते। प्रकृतेः प्राङ्गणे सः वर्द्धते। पर्वतः, नदी, तडागः, शस्यश्यामलाभूमिः, सुवासितवायुश्च अस्माकं जीवनं निर्मलं सुखदं च निर्मान्ति। प्रकृतिः समयानुसारं परिस्थित्यनुसारञ्च मातुः ममतेव सुरक्षाप्रदानं करोति, परन्तु विपरीतपरिस्थितौ पितेव क्रोधमपि कुरुते। डॉ. विद्यानिवासमिश्र–महोदयस्य कथनमस्ति— ''प्रकृतेः संवेदनशीलता मानवं प्रभावयति किन्तु यत्र औद्योगिक–विकासेनान्धीभूतः मानवः प्रकृतिं समाह्वानममन्यत, तथा च तदुपरि विजयप्राप्तये इच्छुः अभवत्, अतः एव मानवस्य प्रकृतेश्च संघर्षः सञ्जातः, यस्य परिणामः प्रत्यक्षमनुभूयते।'' अतः प्रकृत्यां मानवहस्तक्षेपेण प्रकृतेः सन्तुलनं विनाशितम्।

यदि मानवः प्रकृतेः नियमान् ज्ञात्वा, प्रकृतिं गुरुं मत्वा तां सहकरोति विशेषतः सर्वावशेषान् प्रकृत्यै प्रत्यर्पयति तदा सृष्टिः मानवश्च स्वस्थं जीवेताम्। भारतीयसंस्कृतौ एतस्यैव अकम्प्यसत्यस्य स्थानं प्रादीयत। इयं हि संस्कृतिः प्राकृतिकसुषमायाः सर्वेष्वाधारेषु देवत्वमारोप्य तां श्रद्धादरयोः केन्द्रबिन्दुं व्यधात्। अस्य पुष्टिः ऋग्वेदस्य स्तुतिमाध्यमेन भवति, यत्र कथितं वर्तते ''अस्माकं दैवीनद्यः अस्माकं रक्षायै दयामय्यः भवेयुः। ताः अस्मभ्यं पातुं जलं प्रदद्युः। तथा च ताः अस्मत्सु आनन्दं हर्षं च वर्षेयुः। एताः अस्माकं बहुमूल्यविधीनां मानवानां चापि विधात्र्यः। हे नद्यः! वयं युष्माकमारोग्यकरस्य जलस्य आकाङ्क्षिणः स्मः'' इति।

सामान्यतः इदं मन्यते यत् गङ्गा पापनाशिनी वर्तते। तस्याः जलं पवित्रमस्ति तथा यावत् गङ्गायां जलं प्रवहति तावत् अस्माकं संस्कृतिः सभ्यता च पुष्पिता पल्लविता च स्थास्यति। परन्तु अद्य वयं तस्यां स्थितौ वर्तामहे यस्यां तु गङ्गायाः जलमपि दूषितं विद्यते। मानवजीवनस्य उपयोगयोग्यमपि नास्ति। अस्माकं सामाजिक-विकासस्य मानदण्डः इदानीम् औद्योगिकरणं भवति। औद्योगिकरणस्य द्वितीयं नाम विषवमनं भवति। दूषितपदार्थान् दूषितजलम् औद्योकिविषयुक्तवस्तूनि च प्रसार्य वयं समस्तं वातावरणं विषमयं कृत्वैव गच्छामः तथा अस्माकं पर्यावरणं जीवनरक्षकस्य स्थाने जीवनभक्षकरूपेण परिणतं भवेत्।

प्रकृतिः अस्मभ्यं प्राकृतिकसंसाधनानि पर्याप्तया उपलम्भयति यथा— वायुः, जलम्, भूमिः, खनिजपदार्थाश्च। परन्तु प्राकृतिकसंसाधनानाम् अत्यधिकशोषणं, जनसंख्यावृद्धिः, औद्योगिकीकरणं, विकासयोजनानां कार्यान्वयने पर्यावरणस्य उपेक्षा इत्यादि पर्यावरणसम्बन्धिन्यः समस्याः प्रतिदिनं वृद्धिमाप्नुवन्ति। आसां समस्यानां गम्भीरता पर्यावरणसंरक्षण-संशोधनस्याश्यकतां प्रति मानवान् जागरूकान् अवश्यं कुर्यात्। यतः तदैव आसां समस्यानां निराकरणार्थं पर्यावरणसंरक्षणयोजनासु चापेक्षितजनसहयोगः प्राप्तुं शक्यते। अतः पर्यावरणसंरक्षणे संशोधने च जनेषु जागृतिमुत्पादयितुमद्य पर्यावरणशिक्षायाः महत्त्वमनुभूयते। अस्याः शिक्षायाः आवश्यकतां पश्यन् रसायनविशेषज्ञेन **डॉ. सत्यप्रकाशमहोदयेन** उक्तम्—''प्रकृतिः अस्माकं देवी वर्तते। तस्याः प्रदूषणेन अस्माकं मानसिक-बौद्धिक-चिन्तनमपि प्रदूषितं भवति। अस्माभिः स्वहितरक्षणाय पर्यावरणस्य सुरक्षा करणीया।''

पर्यावरणशिक्षायाः अर्थः

(Meaning of Environmental Education)

पर्यावरणशिक्षा सा शिक्षा वर्तते, या पर्यावरणमाध्यमेन, पर्यावरणविषये, पर्यावरणाय भवति। पर्यावरणं जडेभ्यः चेतनेभ्यः च शिक्षादाऽ्कमस्ति। पर्यावरणेन सामञ्जस्यं कर्तुं न शक्यते इत्यनेन कारणेन तिर्यग्जन्तवः प्रायः नश्यन्ति। एवं पर्यावरणं व्यक्तेः तानि कार्याणि प्रोत्साहयति, यानि तेषामनुकूलानि भवन्ति। पर्यावरणमुत्तम-शिक्षकोऽपि अस्ति। शिक्षायाः कार्यं वर्तते यत्— छात्रं तस्य वातावरणानुकूलं निर्माति, येन सः जीवितुं समर्थः भवेत् अपि च स्वकीयाः मूलप्रवृत्तीः सरलतया निष्पादयितुम् अतिशयेन समर्थोऽपि भवेत्। शिक्षा व्यक्तिं पर्यावरणेन सह अनुकूलनमेव न शिक्षयति, अपि तु तां पर्यावरणं स्वानुकूलतया परिवर्तयितुमपि प्रशिक्षयति। सा व्यक्त्यै पर्यावरणनियन्त्रणस्य सामर्थ्यमपि प्रददाति।

पर्यावरणशिक्षा, पर्यावरणमाध्यमेन शिक्षा वर्तते

(Environmental Education as an Education through Environment)

मानवस्य पर्यावरणं, प्राकृतिकं, मानवनिर्मितं च सुन्दरं शिक्षाप्रदमस्ति। यदा बालकः खगान् पतङ्गान् वा दृष्ट्वा तान् प्रति आकृष्टः भवति, तदा तेषां विषयेऽवबोधनम् वातावरणमाध्यमेनैव करणीयम्। इयं शिक्षा कक्षायां प्रदत्तशिक्षातः अधिकतया महत्त्वपूर्णाऽस्ति। अतः पर्यावरणमाध्यमेन व्यक्तयै शिक्षणाधिगमौ पर्याप्तमात्रायां प्रदीयेते।

पर्यावरणशिक्षा पर्यावरणविषयिणी शिक्षा वर्तते

(Environmental Education as an Education about Environment)

मानवः स्वकीयास्तित्वाय समृद्धये च प्रतिदिनं पर्यावरणस्य सम्पर्के कार्यं करोति। सः कस्याः अपि परिस्थितौ अनेन विना जीवितुं न शक्नोति। सः परिवारे उत्पन्ऽो भवति, तस्मिन्नेव तस्य पालनं पोषणञ्च भवति। परिवारः तस्य कृते प्राथमिकसमूहः वर्तते। यदा सः शैशवावस्थामतिक्रम्य बालावस्थां प्रविशति तदा सः प्रतिवेशिसमूहस्य सम्पर्के आयाति। सः तेषां क्रियाकलापेषु भागं गृह्णाति। इत्थं सः वातावरणविषये शिक्षामधिगच्छति। **जॉनड्यूवीमहोदस्य** कथनमस्ति— ''सम्पूर्णशिक्षा व्यक्ति-द्वाराप्रजात्याः सामाजिकचेतनायां भागग्रहणेन प्रारब्धा भवति। व्यक्तिः समुदाये

सामाजिकसंस्थायाः (विद्यालयः, बैंक, नगरपालिका, ग्राम–पञ्चायत चेति) विषये जानाति। अस्य ज्ञानाभावे सः स्वजीवनं सफलतापूर्वकं यापयितुं न शक्नोति। सः स्वप्राकृतिकपर्यावरणेन इदं ज्ञानं प्राप्नोति यत् मानवः खाद्यसामग्रीं कुतः, केन प्रकारेण च प्राप्नोति? इयं सामग्री कीदृशभूमौ उत्पन्ना भवति? प्राकृतिकपर्यावरणं तस्य स्वास्थ्यस्य कृते आवश्यकम्। साकमेव इदं तस्य मनोरञ्जनमपि प्रददाति। पर्यावरणविषयकज्ञानं पर्यावरणशिक्षा वर्तते।

पर्यावरणशिक्षा पर्यावरणस्य कृते शिक्षा वर्तते

(Environmental Education as an Education for Environment)

सम्प्रति पर्यावरणे क्रान्तिः उत्पन्ना। जनसंख्यायाः विस्फोटः पर्यावरणे क्रान्तिमानयत्। जनसंख्याविस्फोटेन प्रौद्योगिक्याः विकासे बलं दत्तं, येन वर्धिष्यमाणजनसंख्यायाः आवश्यकतानां पूर्तिः कर्तुं शक्यते। जनसंख्यावृद्धिः, औद्योगिकीकरणं चेति कारणेन वायुप्रदूषणं, जलप्रदूषणं, परिवहनप्रदूषणं, सामाजिक-प्रदूषणं ध्वनिप्रदूषणञ्चेत्यादयः समस्याः उत्पन्नाः। एताः समस्याः मानवजीवनं दुर्भरमकुर्वन्। अतः एताः समस्याः अन्विष्य तासां निवारणाय कार्यं क्रियेत। येन पर्यावरणस्य संरक्षणं भवितुं शक्यते। तादृशपर्यावरणस्य संशोधनेन संरक्षणेन च सम्बन्धितज्ञानं पर्यावरणशिक्षा अस्ति।

पर्यावरणशिक्षायां शिक्षायाः विषयवस्तु शैली चेति द्वौ भागौ स्तः। शैलीरूपेण इदं पर्यावरणं शिक्षणाधिगमसामग्रीरूपेण प्रयुज्यते। विषयवस्तुरूपेण अस्य पर्यावरणस्य निर्माणतत्त्वानां विषये शिक्षणमस्ति। पर्यावरणाय दीयमाना पर्यावरणशिक्षा पर्यावरणनियन्त्रणेन, पारिस्थितिकसन्तुलनेन, पर्यावरणप्रदूषणनियन्त्रणेन च सम्बद्धा भवति।

पर्यावरणशिक्षायाः अर्थं स्पष्टीकर्तुं काश्चन परिभाषाः अधः प्रस्तूयन्ते—

1. संयुक्तराज्य-अमेरिकायाः पर्यावरणशिक्षाऽधिनियमः, 1970, सूचयति-''पर्यावरणशिक्षा नाम मानवस्य प्राकृतिक-मानवोत्पादितपरिधिभिः तदीयसम्बन्धम् अधीयाना शैक्षिकप्रक्रिया भवति, यत्र जनसंख्याप्रदूषणं, संसाधनानां विनियोगनिश्शेषणे, संरक्षणं, प्रस्थापनं, प्रविधिः, ग्राम—नगरनियोजनम् इत्यादयोऽन्तर्भवन्ति।''

("Environmental education means the educational process dealing with man's relationship with his natural and man-made surroundings, and includes the relation of population pollution,

resource allocation and depletion, conservation, transportation, technology, and urban and rural planning to the total human environment."**-United States Environmental Education Act,1970[see 3(2)]**

2. फिनिश-नेशनल-कमीशन् निर्दिशति— ''पर्यावरणीयशिक्षा पर्यावरणीयसंरक्षणस्य उद्देश्यानां क्रियान्वयनस्य एका पद्धतिः वर्तते। इयं विज्ञानस्य अन्यतमा शाखा पृथक्-अध्ययनविषयः वा नास्ति। एषा जीवनपर्यन्तम् एकीकृतशिक्षासिद्धान्तस्य रूपेण क्रियान्विता भवेत्।''

["Environmental education is a way of implementing the goals of environmental protection. Environmental education is not a separate branch of science or subject of study, it should be carried out according to the principle of lifelong integrated education." **-Finnish National Commission.**]

3. अनुसन्धानस्य विश्वविज्ञानकोशः (एनसाइक्लोपीडिया ऑफ रिसर्च)— ''पर्यावरणशिक्षायाः परिभाषणं सरलं कार्यं नास्ति यतः पर्यावरणशिक्षायाः क्षेत्रम् अधिगम-क्षेत्रमेव अद्यावधि सुनिश्चितं नास्ति, परन्तु इयं सर्वसम्मतिः अवश्यं वर्तते यत् पर्यावरणशिक्षायाः विषयवस्तु अन्तर्विषयकप्रकृतिकम् (Interdiciplinary) अस्ति। अस्यां जीवविज्ञानस्य, राजनीतिविज्ञानस्य, अर्थशास्त्रस्य समाजशास्त्रस्य च अन्यकल्याणकारिविषयाणां विषयसामग्री सम्मिलिताऽस्ति। अनेन विचारेण अपि सर्वेषां सम्मतिः अस्ति यत् पर्यावरणशिक्षायाः सम्प्रत्ययात्मकविधिः सर्वश्रेष्ठः वर्तते।''

4. चैपमेन टेलरः— ''पर्यावरणशिक्षायाः अभिप्रायः सन्नागरिकतां विकासयितुं सम्पूर्णपाठ्यक्रमस्य पर्यावरणीयमूल्येषु समस्यासु च केन्द्रीकरणमेव अधिगन्ता पर्यावरणविषये अभिज्ञः, प्रेरितः, उत्तरदायी च भवेत्।''

पर्यावरणशिक्षायाः लक्ष्याणि प्राप्योद्देश्यानि च

(Goals and Objectives of Environmental Education)

अक्टूबर 1975 तमे वर्षे बेलग्रेड नगरे पर्यावरणशिक्षाविषये अन्ताराष्ट्रिय-कार्यशालायाः आयोजनम् अभवत्। अस्याः कार्यशालायाः बेलग्रेड-घोषणापत्रे पर्यावरणशिक्षायाः लक्ष्याणां प्राप्योद्देश्यानाञ्च निर्धारणमभवत्। तानि संक्षेपेण अधः दीयन्ते—

(अ) लक्ष्यम्— पर्यावरणशिक्षायाः प्रमुखलक्ष्यमस्ति विश्वजनसंख्यायाः, पर्यावरणविषये तत्सम्बन्धिसमस्यानां च विषये जागृतिः।

(ब) प्राप्योद्देश्यम्—पर्यावरणशिक्षया निम्नलिखितानि प्राप्योद्देश्यानि निर्धारितानि—

(1) जागृतिः (Awareness)—व्यक्तिषु सामाजिकसमूहेषु च सम्पूर्णवातावरण-तत्सम्बन्धिसमस्यानां विषये संवेदनशीलतां जागरूकतां च विकासयितुं सहायता।

(2) ज्ञानम् (Knowledge)—व्यक्तिषु सामाजिकसमूहेषु च सम्पूर्णवातावरणस्य तत्सम्बन्धिसमस्यानां च विषये अवबोधाय सहायता-प्रदानम्।

(3) अभिवृत्तिः (Attitude)—व्यक्तिषु सामाजिकसमूहेषु च सामाजिकमूल्यानि, वातावरणं प्रति अगाधप्रेमभावना, तस्य संरक्षणार्थं संशोधनार्थं च प्रेरणाविकासे सहायताप्रदानम्।

(4) कौशलानि (Skills)—पर्यावरणसमस्यानां समाधानाय व्यक्तिषु सामाजिकसमूहेषु च कौशलानां विकासनम्।

(5) मूल्याङ्कन-योग्यता (Evaluation Ability)—व्यक्तिषु सामाजिकसमूहेषु च पर्यावरणीयतत्त्वानां शैक्षिककार्यक्रमाणां च पारिस्थितिकीय (Ecological)—राजनैतिक-आर्थिक-सामाजिक-सौन्दर्यात्मक-शैक्षिककारकाणां सन्दर्भे मूल्याङ्कनस्य योग्यतायाः विकासे साहाय्यप्रदानम्।

(6) सहभागिता (Participation)—व्यक्तिषु सामाजिकसमूहेषु च पर्यावरणसमस्यानां युक्तसमाधानसम्बन्धिन्याः उत्तरदायित्वभावनायाः विकासः, तद्योग्यप्रयासानां च संवर्धनम्।

पर्यावरणशिक्षायाः प्राप्योद्देश्यानि त्रिषु क्षेत्रेषु-संज्ञानात्मकम् (Cognitive), भावनात्मकम् (Affective), क्रियात्मकम् (Psychomotor) चेति विभक्तुं शक्यन्ते। संज्ञानात्मकक्षेत्रे तानि प्राप्योद्देश्यानि, यानि ज्ञानस्य प्रत्यभिज्ञया (Recognition) सम्बद्धानि भवन्ति। अस्मिन् बौद्धिककौशलानि योग्यताः अपि आयान्ति। संज्ञानात्मकक्षेत्रे स्मरणकरणं समस्यासमाधानं, अवधारणानिर्माणं, सीमितक्षेत्रे सर्जनात्मकचिन्तनात्मक-व्यवहारश्च निहिताः वर्तन्ते।

भावात्मकक्षेत्रे तानि प्राप्योद्देश्यानि आयान्ति यानि रुचीनाम्, अभिवृत्तीनां,

मूल्यपरिवर्तनानाञ्च वर्णनं कुर्वन्ति। क्रियात्मकं मनः प्रेरितं वा क्रियात्मकपक्षे शारीरकाभ्यासः, लेखनम्, योगः, नृत्यादिव्यवहाराः आयान्ति। इदं क्रियात्मकं कौशलैः सम्बद्धं वर्तते। पर्यावरणशिक्षायाः संज्ञानात्मकक्षेत्रेण सम्बद्ध-प्राप्योद्देश्यानि एतादृशप्रकारेण सन्ति—

1. तत्कालिकपर्यावरणस्य ज्ञानप्राप्तये साहाय्यप्रदानम्।
2. दूरस्थपर्यावरणस्य ज्ञानप्राप्तये साहाय्यप्रदानम्।
3. जैविकाजैविकपर्यावरणयोः अवबोधने साहाय्यप्रदानम्।
4. पोषणविषयकः (Trophic) विभिन्नस्तरेषु जीवनस्य अन्योन्याश्रिततायाः बोधने सहायताप्रदानम्।
5. भाविविश्वे अनियन्त्रितजनसंख्यावृद्धेः संसाधनानामनियन्त्रित-विदोहनस्य वा प्रभावानां बोधने सहायताप्रदानम्।
6. जनसंख्यावृद्धिप्रवृत्तीनां परीक्षणं तथा देशस्य सामाजिकार्थिकविकासार्थं तेषां व्याख्यानम्।
7. भौतिकानां मानवीयसंसाधनानाञ्च विदोहनस्य मूल्याङ्कनं तथा उपचारात्मकोपायानां प्रबोधनम्।
8. सामाजिक-चित्तोद्वेगानां कारणान्वेषणे सहायताप्रदानम् तथा तान् अपाकर्तुमुचितोपायानां कथनम्।

भावात्मकपक्षसम्बन्धितपर्यावरणशिक्षायाः प्राप्योद्देश्यानि एतादृशप्रकारेण सन्ति—

1. समीपस्थस्य दूरस्थस्य च पर्यावरणस्य वानस्पत्यप्रजातिषु (स्पीशीज) जीवजन्तुषु अभिरुचिमुत्पादने सहायताप्रदानम्।
2. समुदायस्य समाजस्य जनानां च समस्यासु अभिरुचिनिर्माणे सहायताप्रदानम्।
3. अनेक-जातिप्रजाति-धर्म-संस्कृतीनां विषये समानतया सहिष्णुता-प्रदर्शनम्।
4. प्रकृतेः उपदेयतायाः प्रशंसा।
5. समानता-स्वतन्त्रता-भ्रातृता-सत्यता-न्यायादीनां मूल्यानां महत्त्वप्रदानम्।

6. सर्वेषां राष्ट्राणां राष्ट्रियसीमानां सम्मानम्।
7. स्वपर्यावरणस्य स्वच्छतायां शुद्धतायां च महत्त्वप्रदानम्।

पर्यावरणशिक्षायाः क्रियात्मकपक्षसम्बन्धिप्राप्योद्देश्यानि एतादृशप्रकारेण सन्ति—

1. तेषु कार्यक्रमेषु सक्रियं भागं गृह्णीयात् येषु वायु–जल–ध्वनिप्रदूषणानि न्यूनयितुं कर्तुं शक्यन्ते।
2. समीपस्थपरिसरस्य स्वच्छतायाः कार्यक्रमे भागं वोढुं शक्यते।
3. नगरीय–ग्रामीणनियोजने भागं गृहीतुं प्रोत्साहनम्।
4. आहारपदार्थानां मिश्रणदूरीकरणकार्यक्रमेषु भागग्रहणम्।

पर्यावरणशिक्षायाः पाठ्यक्रमः

(Curriculam of Environmental Education)

वूरजेलबेचर् (Wurzelbancher) 1976 तमे वर्षे पर्यावरणशिक्षायाः एकं पाठ्यक्रमं निर्मितवान् यस्मिन् निम्नलिखितनिर्माणकतत्त्वानां सीानं प्रादात्—

1. मानवः पर्यावरणञ्च (Man and Environment)
2. जनसंख्या नगरीकरणञ्च (Population and Urabanization)
3. पारिस्थितिकी (Ecology)
4. अर्थशास्त्रं पर्यावरणञ्च (Economics and Environment)
5. नगरीयं क्षेत्रीयं च नियोजनम् (Uraban and Regional Planning)
6. सामाजिकसंसाधनानि (Social Resoures)
7. सर्वकारस्य नीतिः नागरिकश्च (Government Policy and Citizen)
8. वृक्षं जलसंसाधनानि च (Tree and Water Resources)
9. वनजीवनसंसाधनानि (Wild Life Resources)
10. वायुप्रदूषणम् (Air Pollution)
11. बाह्यमनोरञ्जनं नागरिकाणां भूमिका च (Outdoor Recreation and Role of Citizens)

आधुनिकाध्ययनानि अन्वेषणानि च पर्यावरणीयशिक्षां अन्तर्विषयकक्षेत्रस्य (Interdiciplinary) स्वरूपेण प्राकटयन्। साकमेव इदं समग्रस्वरूपेण (Piolistic) व्यक्तीकृतम्, यस्मिन् पारिस्थितिक-सामाजिक-सांस्कृतिक-अन्यक्षेत्राणां विशेषसमस्यानां स्थानं प्रदत्तम्। अयं वास्तविकजीवनस्य व्यावहारिकसमस्याभिः सम्बद्धः वर्तते। येन अयं नागरिकाणां मूल्यानां निर्माणार्थं तत्परो भवेत्।

पर्यावरणशिक्षायाः शिक्षणविधयः साधनानि च

(Methodologies and Means of Environment Education)

पर्यावरणशिक्षायां प्रयुज्यमानाः शिक्षणविधयः साधनानि च तस्य विषयस्य व्यापकतायाः कारणेन विभिन्नाः सन्ति। सामान्यतया पर्यावरणशिक्षायां निम्नलिखितशिक्षणविधीनां प्रयोगः क्रियते।

1. कक्षाविचारः (Class Discussion)
2. लघुवर्गप्रायोजनाः (Small Group Projects)
3. क्षेत्रीयपर्यटनम् (Field Trip)
4. बाह्य-अध्ययनम् (Out-door Study)
5. प्रदर्शनीनां प्रयोगः (Use of Exhibits)
6. अनुकरणं क्रीडा च (Simulation and Games)

1. कक्षाविचारः— अस्मिन् विधौ कस्यापि प्रकरणे समस्यायां वा कक्षायां विचारविमर्शः क्रियते। अनेन विचारविमर्शेन तस्य विभिन्नपक्षाः स्पष्टं क्रियन्ते।

2. लघुवर्गप्रायोजनाः— इयं व्यापकाध्ययनार्थं अधिकं उपयुक्ता वर्तते। अस्याञ्च कक्षा लघुसमूहेषु विभज्यते, तथा प्रत्येकं समूहस्य कृते प्रायोजना निर्धार्यते। एकैकः समूहः तत्प्रायोजनां करोति। उदाहरणार्थम्—एकस्य समूहस्य कृते स्थानीयसरोवरस्य प्रायोजना निर्धारिता। सः समूहः एतत्सम्बद्धविषयान् अधीते—

(अ) सरोवरम् आश्रिताः जनाः कति सन्ति?

(ब) समुदायस्य सामाजिकजीवने सरोवरस्य कः प्रभावः पतितः?

(स) सरोवरस्य क्षेत्रं कियत् वर्तते?

(द) सरोवरे तस्य पार्श्वे च के के जीवजन्तवः निवासं कुर्वन्ति?

(य) सरोवरे तस्य पार्श्वे च के के पादपाः सन्ति?

(र) सरोवरस्य जले काः काः अशुद्धताः वर्तन्ते?

(ल) सरोवरस्य स्थितिः कथं समीकर्तुं शक्यते?

3. क्षेत्रीयपर्यटनम्— अयं एकः प्रभावी शिक्षणविधिः वर्तते। कस्यापि स्थानविशेषस्य पर्यावरणाध्ययनार्थं क्षेत्रीयपर्यटनस्य आयोजनं कर्तुं शक्यते। अस्य माध्यमेन छात्राः प्रत्यक्षानुभवप्राप्तये समर्थाः भवन्ति। अस्यायोजनं सामुदायिकसाधनानि, यन्त्रागारः, पत्रालयः, वित्तकोशः (बैंक), स्थानीयः आपणः इत्यादीनाम् अध्ययनस्य कृते कर्तुं शक्यते।

4. बाह्याध्ययनम्— एतदर्थं नियोजनस्य समन्वयस्य च आवश्यकता भवति। बाह्याध्ययनस्य कृते तेषामुद्देश्यानां निर्धारणं, कार्यक्रमस्य निर्धारणं, सन्नाहः, क्षेत्रीयकार्यम् इत्यादयः पूर्वमेव निश्चीयन्ते। अस्मिन् वयं छात्रान् नद्याः गुहायाः, पर्वतीयक्षेत्रस्य च पर्यावरणस्याध्ययनार्थं बहिः नेतुं शक्नुमः।

5. प्रदर्शनीप्रयोगः— पर्यावरणशिक्षायां प्रदर्शिनीनां प्रयोगः महत्त्वपूर्णं माध्यमं वर्तते, येन तस्य विभिन्नप्रकरणानामध्ययनं रोचकतया सरलरीत्या च कर्तुं शक्यते। केनापि प्रकरणेन सम्बद्धप्रदर्शिन्याः आयोजनं कर्तुं शक्यते। आयोजने छात्राणां सक्रियसहयोगः अपेक्षितः। उदाहरणार्थं—वनजीवनसम्बन्धिप्रदर्शिन्याः आयोजनम्।

6. अनुकरणं क्रीडा च— पर्यावरणशिक्षायामनुकरणस्य क्रीडायाश्च प्रयोगः स्वतन्त्रनिर्णयने अभिवृत्तीनां निर्माणे च महत्त्वूपर्णभूमिकां निर्वहति।

साधनानि— पर्यावरणशिक्षायां निम्नलिखितसाधनानां प्रयोगः क्रियते—

1. स्थानीयसाधनानि— छात्राणां निवासस्थानानां पर्यावरणम्, जलप्रदूषणस्य स्रोतांसि, वायुप्रदूषणस्य स्रोतांसि इत्यादि।

2. राष्ट्रियसङ्घटनम्— दूरभाषः, पर्यावरणशिक्षायाः संक्षिप्तसमाचारः (Bulletin), युस्माकं पर्यावरणम् (Your Environment) इति नामकपत्रिका, नामधामसूचकं पुस्तकं (डायरेक्टरी) इत्यादि।

3. विद्यालयस्य क्रीडायाः क्षेत्रम्, विद्यालयस्य उद्यानमित्यादि।

4. मुद्रितसामग्री— सर्वकारस्य प्रकाशनम्, वार्षिक-प्रतिवेदनम्, नियतकालिक-पुस्तकानि (पीरियोडिकल्स), पुस्तकानि, बृहद्विज्ञापनपत्रम् (Poster), दृढकर्गज-पत्रम् (Charts) सर्वकारस्य नीतयः इत्यादि।

5. श्रव्यदृश्यसाधनानि— चलचित्रम्, चलचित्रखण्डः, व्यक्तिगत-स्लाइडस्, व्यावसायिकदूरदर्शनम् (कॉमर्शियल टी.वी.), ओडियो टेप्स, कॉमर्शियल-स्लाइड्स, आकाशवाणी इत्यादि।

उपसंहारः— अन्ते वयं वक्तुं शक्नुमः यत् मानवस्य अस्तित्वं भौतिक-सामाजिक-मानसिकरूपेण महत्तरं विधातुं येषां तत्त्वानामावश्यकता भवति तानि तत्त्वानि प्रकृतौ परिपूर्णानि सन्ति, परन्तु प्रकृतेः तत्त्वानि सन्तुलितरूपेणैव मानवं विकासयितुं शक्नुवन्ति। प्रकृत्यां एकं सन्तुलनं तु स्वयमेव व्याप्तं भवति। द्वितीयं सन्तुलनं मानवः स्वमेधाशक्त्या स्थापितवान्। पर्वतं समतलं सन्तुलितं विधाय कृषिकरणं, सागरमन्तरा आवासनिर्माणं, जलस्थल-मूलात् खनिजानयनं, विज्ञान-विद्यदाधुनिक-प्रौद्योगिकविधिभिः कृष्युद्योगपशुपालनेषु उन्नतिः प्रौद्योगिकीप्रभावेण मानवश्रमस्य न्यूनीकरणं, सारामसुखमयमानवजीवननिर्माणम् इति सर्वं मानवस्य स्वीयपरिश्रमस्य फलं भवति ; येन सः प्रकृतिं जीवनोपयोगिनीं विधातुं प्रयासमकरोत्।

परन्तु स्वप्रयासे मानवः कियान् सफलः सञ्जातः, भविष्यत्काले सः कियान् सफलो भविष्यति, इति चिन्तयन्नेव मानवः दुश्चिन्तान्तरे निमग्नः। सेयं दुश्चिन्ताऽस्ति प्रकृतेः सन्तुलनविघटनरूपा। उन्नत्या विकासेन च सह अस्माकम् उपलब्धिरेव तादृशदुष्परिणामान् अजनयत् येन प्रकृतेः साहजिक-सन्तुलनस्य विघटनरूपोऽपायः समजनि। यदा हि प्रकृतेरेव सन्तुलनं विघटितमस्ति, कथङ्कारं च मानवः सुरक्षितः स्यात्? अतः यदप्याचरितम् अस्माभिः प्रकृतेः विषये तदुपरि करणीयः एव पुनर्विचारः। **डॉ. विद्यानिवासमिश्रमहोदयस्य** शब्देषु ''प्रकृतेः संरक्षणं समेषाम् अस्माकं पावनकर्तव्यं भवति। अस्माभिः प्रकृतेः तावत् विदोहनं करणीयं यावत् तस्य सन्तुलनं न नश्यति। यदि मानवः अधुनापि नैव जागर्ति तर्हि अस्माकं विनाशः निश्चितः वर्तते।''

पुनरावृत्ति-प्रश्नाः

1. पर्यावरणशिक्षया भवता किमवगम्यते? अस्य प्राप्योद्देश्यानि क्षेत्रं च वर्णयत।
2. पर्यावरणशिक्षायाः शिक्षणाय केषां-केषां शिक्षणविधीनां साधनानां च प्रयोगः क्रियते?

❑❑❑